CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 746

Title Śāṅkhāyanagṛhyasūtra with Gṛhyapradīpa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 746 Subject: Vedic Lit.

Title: Śāṅkhāyanagṛhyasūtra with Gṛhyapra-dīpa

Author: Nārāyaṇa Scribe: Dvivedī Krisṇadeva

Date of the work: — Date of the Ms.: १.५.१९०६

Place of the work: — Place of the Ms.: Kāśī

Size: 9.1" by 3.8" Extent: 308 foll.

Language: Sanskrit Script: Devanagari

Remarks: —

शांखायन गृह्य

पु० २०५

[illegible]

श्रीमल्लक्ष्मीनृसिंहायनमः॥संसारभोगीरसनाविदष्टत्रिलोकसंरक्षणकर्मदक्षं॥योना
गेन्द्रभोगासनसंनिविष्टंवंदेनृसिंहंभुवनैकनाथं॥१॥उद्यद्भास्करको[illegible]
त्यंचाननास्यंमहाविद्युज्जिह्वमुदग्रदंष्ट्रंरुचिरंरक्षोनिलं।जानुस्था।[illegible]पक
जमुरुकेशास्तटोद्भूषितंवंदेहंनृहरेःस्वरूपममलंगीर्वाणवंद्यंसदा॥२॥[illegible]पत्यगुरु
मूर्द्ध्नाश्रीपतिंविष्णुतेजसं।करोम्यहंविशदार्थंगृह्यसूत्रप्रदीपकं॥३॥अज्ञानतिमिर[illegible]
नोविप्राणांमार्गदर्शनात्।इत्याख्यांनजतेसाधुगृह्यसूत्रप्रदीपकं॥४॥अथातः[illegible]
ख्यास्यामः॥तत्रतावद्ग्रंथादौग्रंथमध्येग्रंथांतेशिष्टपरंपराप्राप्तंमंगलं।[illegible]
तद्वज्ञारिप्सितस्यग्रंथस्यनिर्विघ्नपरिसमाप्त्यर्थंकृतंमंगलाचरणंशिष्यशिक्षार्थं[illegible]

ग्र०प्रो ३

निवर्तत्यथशब्द इति।अथशब्दोमंगलार्थइतिनि[illegible]कोशः।ॐकारश्चाथशब्दश्चद्वावेतौब्र
ह्मणःपुरा।कंठंभित्त्वाविनिर्यातौतस्मान्मांगलिकावुभावितिपद्मपुराणे।तत्रधर्मार्थकाममो
क्षमध्येधर्मःप्रधानभूतस्तन्मूलावर्थकामौ।भारतेव्यासः।कामार्थौलिप्समानस्तुधर्मम
दितश्चरेदिति।धर्मात्संजायतेह्यर्थोधर्मात्कामोभिजायते।धर्मोदेवपरंब्रह्मतस्मात्तं[illegible]
श्रयेत्।स्मृतिदर्शनात्।मोक्षोपितन्मूलकः।तपोदानहवनादिनिर्वृत्त[illegible]पम
प्रे ३ इतिब्रह्मवेदे।अहिंसेंद्रियासंगैर्वैदिकैश्चैवकर्मभिः।तपसश्चरणैश्चोग्रैः[illegible]
त्पद[illegible]मनुः।सचधर्मःकर्मसाध्यः।तच्चकर्मद्विविधंश्रौतंस्मार्तंच।[illegible]गोत्रा
ण्यायजेतेत्यादिश्रौतं।ऊर्ध्वमाग्रहायण्याअस्तिस्तोष्टकाअपरपक्षे[illegible]दिस्मार्तंश्र

४ नास्तिवक्ष्यमाणत्वात्कल्पैकत्वादिति।तस्माच्छ्रुतिस्मृत्युक्तंकर्मविधेयं ४

तिस्मृत्युदितंधर्ममनुतिष्ठन्हिमानवः॥इहकीर्त्तिमवाप्नोतिप्रेत्यचानुत्तमंसुखं।वेदोऽखि
लोधर्ममूलंस्मृतिर्मूलंचतद्विदां।आचारश्चैवसाधूनामात्मनस्तुष्टिरेवच।इतिमनुः।वेद
श्चाङ्गैःसांगोवेदः।शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमितिषडंगानि।कल्पश
ब्दयोर्निर्दिष्टंश्रौतंकर्मचस्मार्त्ताधानं।यतःस्मार्त्तमाधानमासाद्यश्रौतमाधानंक्रियते।स्मृतौ
कर्माणिकृत्वैवश्रौतकर्माण्यधीयतइतिस्मृतिः।आवसथ्यमनाहृत्यवैतानेयःप्रवर्त्तते
सोनाहिताग्निर्भवतिपरिवेत्तातथोच्यतेइतिवृद्धयाज्ञवल्क्यः।ततःस्वर्गसाधनत्वंफलंनव
ति।ज्योतिष्टोमेनस्वर्गकामोयजेतेतिश्रौतोश्रूयते।सकृदप्यष्टकादीनिकुर्यात्कर्माणि...
द्विजः।सततस्यापदःसर्वाब्रह्मलोकेमहीयतइतिकाठकश्रुतेः।तेनस्मार्त्तकर्मणोपिस्व...

फलंदृश्यतेतेनाथशब्दोग्रंथादौपठितःस्वर्गसाधनत्वं१

धनकंमंगलमंतेकरोति।अथवाआनंतर्यख्यापनार्थः।यस्मात्पूर्वंदर्शपौर्णमासा...
महाव्रतांताःश्रौतायज्ञाउक्ताः।अतःपाकयज्ञानभिधास्यंतइत्यानंतर्यख्यापनं।अ...
धिकारार्थः।वक्ष्यमाणपाकयज्ञज्ञापनार्थः।अतःशब्दोहेत्वर्थः।यस्मादग्न्याधानादिसंस्का...
र्विनाब्राह्मणक्षत्रियविशांअसंयुज्यविधीयमानत्वात्आवसथ्यादिकर्मस्वनधिकार...
स्तस्मात्स्मार्त्तान्यज्ञान्व्याख्यास्यामइतिहेत्वर्थः।निषेकाद्यावसथ्यांतैःस्मार्त्तैर्यःसंस्कृ
तोद्विजः।उत्तरेष्वधिकारीसइतिकारिका।पाकयज्ञानिति।पचतिप्रत्यहमोदनादिकंयत्र
इतिपाकोऽग्निरावसथ्याख्यः।तत्रयज्ञाःपाकयज्ञाः।ताश्चात्रैवत्रिविधाःपाकयज्ञाः।हुतोऽहु
तःप्रहुतःप्राशितइत्यग्रेवक्ष्यमाणत्वात्।तेअल्पयज्ञावाप्रशस्तयज्ञावा।पाकशब्दस्यान्यत्र

त्रापि दृष्टः। तेनाज्यहोमादावपि अल्पयज्ञत्वेन शाखापश्वादौ प्रशस्तयज्ञत्वेन च पाकयज्ञश
धानत्वाय दि पाकशब्दः पक्व एव वर्त्तेत तदाज्यहोमादौ तेन त्ता नस्यात्त त्र इष्यते तत्
स्मात्तन्नास्ति। तस्माद्यथा श्रोत्रियब्राह्मणे ब्राह्मणत्वगुणविशिष्टो धर्मः ... स्मिन्
त्रिय ब्राह्मणे नास्ति। अपि तु वर्त्तत एव। तथा पाकयज्ञशब्दः प्रशस्तयज्ञेऽल्पयज्ञे द।
घस्याभिमतफलदायिनो यज्ञाः। यज्ञा ... पि द्रव्यदेवतात्यागात्मानस्तथाप्यत्र सोम
वक्षितास्तेनात्रेदं प्रधानमिमान्यंगानीयं कर्त्तव्यतेति व्याजिहीर्षन् प्रधानादि
हिता... ज्ञाङ्क्रीतून्व्याख्यास्यामः कथयिष्याम इत्याचार्यणां प्रतिज्ञा। पाकयज्ञा नित्य ने
षय प्रयोजनाधिकारिणो निरूपिता भवंति। अत्र प्रतिपाद्याः पाकयज्ञा इति विष

पा२

ज्ञानं प्रयोजनं। तान्जिज्ञासुरधिकारी। तत्र शालाग्निसाध्यानि स्मार्त्तकर्माणि तत्परिग्रह
कालपक्षानाह। तत्र अधिकारे सत्यकृताधानस्य प्रायश्चित्तं स्मर्यते। यावंत्यब्दान्यतीता
नि निरग्नेर्विप्रजन्मनः। तावंति कृच्छ्राणि चरेद्धोम्यं दत्वा द्विजातय इति कात्यायनः। वेदाव
दिश्च विच्छिन्नौ वुनौ यस्य त्रिपूरुषं दुर्ब्राह्मणः स विज्ञेयः पुनर्भूतनयोपि वेति। दोष प्रवण
ध ५ त्वा। अथ योयमनग्निकः स कुंभलोष्ठस्तथा कुंभलोष्ठः प्रक्षिप्तो नैव शोवाथीयन ल्पते नै
वअस्यं निवर्त्तयत्येवमेवायं ब्राह्मणो नग्निकस्तस्माद्ब्राह्मणस्यानग्निकस्य ...
र्थं न वा स्य स्वाध्यायाशिषो न यज्ञाशिषः स्वर्गंगमा भवंतीत्याथर्वणे। ... होमी
स्यात्त ... द्रव्यमन्त्रोपतः। तद्दानं चैव विज्ञेयो यथा होमस्तथैव ... तत्रा

प्रे१

धानाधिकारिनिरूपणं।सोदरेज्येष्ठेभ्रातर्यकृताधानेआधानंनकुर्वीत।परिवेत्तृदो
षश्रवणात्।दाराग्निगमनाधानेयःकुर्यादग्रजेस्थिते।परिवेत्तासविज्ञेयःपरिवित्तिस्तु
पूर्वजः।परिवित्तिपरिवेत्तारौनरकंगच्छतोध्रुवमितिकर्मप्रदीपे।एतेऽनधिकारिणएव।
जडपंग्वंधबधिराःसहोदरकुब्जवामनधनासक्तपतिताऽन्यार्यसन्यस्तछिन्नांगाश्रद्दी
नक्लीबवेश्यासक्तैकवृषणाज्ञानिनोवेदरहिताश्चानधिकारिणएव।तथाचकर्मप्र
दीपे।देशांतरस्थक्लीबैकवृषणान्सहोदरान्।वेश्यातिसक्तपतितशूद्रतुल्यातिरोगि ४
णः।।जडमूकांधबधिरकुब्जवामनकंटकान्।अतिवृद्धानभार्यांश्चकृषिसक्तान्नृपस्यच।
धनवृद्धिप्रसक्तांश्चकामतोकारिणस्तथा।कुलटोन्मत्तचौरांश्चपरिविंदन्नदुष्यति।धनव

दूषिकंराजसेवकंकमेकंतथा।प्रोषितंचप्रतीक्षेतवर्षत्रयमपित्वरन्निति।पंग्वंधमूकब
धिरपतितोन्मादद्दूषणे।सन्यस्तछिन्नहस्तादौयद्वाखंढादिदूषणे।जनके[illegible]
कुर्याद्देवेतरःक्रियांतयोस्त्वनधिकारित्वान्नैतस्याधिक्रियाक्षतिः।दर्शेष्टिःपौर[illegible]
सोमेज्यामासंसंग्रहः।अग्निहोत्रंविवाहंचप्रयोगेप्रथमेस्थितं।नकुर्यात[illegible]धर्मे
दरेवाप्यकुर्वति।क्षेत्रजाद्यावनीजानेविद्यमानेपिसोदरे।नाधिकारविघा[illegible]
दर्येपिचौरसे।ज्येष्ठेश्रद्धाविहीनेसत्याधानंतदनुज्ञया।पितुःसत्यप्यनुज्ञा[illegible]
कदाचन।पितर्यनाहिताग्नावप्यादधीताथवासुतः।अग्निहोत्रंचजुहुया[illegible]
कारिका।पितायस्याग्निजोऽत्राताननकुर्याद्वापितामहः।तपोग्निहोत्रंदर्शंवाकुर्यात्कं[illegible]।रा

सवा१

यात्।योगशास्त्राभियुक्तेवाकुब्जेवावामनेजडेगद्गदेवाग्रजेदुष्येत्परिविं[illegible]दानुनः॥
देशांतरस्थोनज्येष्ठोज्ञायेताहितवानिति।कनीयाननधिकारीचेदादधीत।विवाहःरयनप्रो
षितस्तुयदाज्येष्ठोज्ञायतेनाहिताग्निलःषड्वत्सरान्प्रतीक्षेतत्तआदधीतानुजस्तदेत्याग्रस्तं
चकारिका॥तथाचदीपिका।मूकादिदोषरहितेसोदर्येयोधिकारिणि।दाराग्निहोत्र
संयोगंपरिवेत्ताकरोतियः।अनुज्ञयानदोषःस्याद्दावसथ्यंतथा।विधमिति।गार्ग्योपि।
सोदर्येतिष्ठतिज्येष्ठेनकुर्याद्दारसंग्रहं।आवसथ्यंतथाधानंपतितस्त्वन्यथाभवेदिति॥ ५
इत्यधिकारिनिरूपणं॥अथाधानकालानाह।अग्निसमावर्त्स्यमानोयंत्रांत्यांसमिध[illegible]
न्यादध्यात्तमग्निमिंधीत॥अग्निसमावर्त्स्यमानःगुरुकुलादधीतवेदस्यचतुर्णांत्रयाणां

वाद्वयोर्वैकस्यवापारंगतस्यकृतधर्मजिज्ञासस्यस्वसद्मन्यभिमुखोऽग्निसमावर्त्स्यमा
नःअनीत्वाभिमुख्यमितियास्कः।यत्रयस्मिन्नग्नौ।अंतेनवाअंत्या।तांसमिधमादध्या
दित्यनेनांतिमसमिकार्यंलक्ष्यते।तमग्निमिंधीततधारयेदित्यर्थः।एतद्यद्दिपित्र[illegible]
नवाकन्यायावाद्वानेकृतंनवतितदैवैतदाधानं।अन्यथाब्रह्मचा[illegible]आधानंन[illegible]
ति।तथाचकारिका।पित्रादत्ताथवाभ्रात्रावाभ्यावान्येनयस्यतु।कन्यानवेत्सम[illegible]र्त्स्य[illegible]
दधीतसनेतरइति।कर्मप्रदीपेप्युक्तं।यस्यदत्तानवेत्कन्यावावासत्येनकेनचित्[illegible]त्यां
समिधमाधास्यन्नादधीतेवनान्यथेति।तत्रयदद्दृष्टुर्वेनुज्ञानवतितस्मिन्[illegible]नेपानमोट
यजनत्पूर्वकमाधानस्नानयोरर्थेऽकमेवाभ्युदयिकंकुर्यात्।तत्रब्रह्म[illegible]गः।पितास्वपि

यात्।योगशास्त्रानियुक्तेवाकुब्जेवावामनेजडे।गद्गदेवाग्रजेदुष्येत्परिवि[illegible]नः।
देशांतरस्थोनज्येष्ठोज्ञायेताहितवानिति।कनीयाननधिकारीचेदादधीत।विद्यारण्य।प्रो
षितस्तुयदाज्येष्ठोज्ञायतेनाहिताग्निः।षड्वर्षान्प्रतीक्षेतआदधीतानुजस्तदेत्यग्रस्त
बकारिका।।तथाचदीपिका।मूकादिदोषरहितेसोदर्येयोधिकारिणि।दाराग्निहोत्र
संयोगंपरिवेत्ताकरोतियः।अनुज्ञयाननदोषःस्यादावसथ्यंतथा।विधमिति।गार्ग्योपि
सोदर्येतिष्ठतिज्येष्ठेनकुर्याद्दारसंग्रहं।आवसथ्यंतथाधानंपतितस्त्वन्यथानदेदिति।।
इत्यधिकारिनिरूपणं।।अथाधानकालानाह।अग्निसमावर्त्स्यमानोयंत्रोंतांसमिध[illegible] ५
न्यादध्यात्तमग्निमिंधीत।।अग्निसमावर्त्स्यमानःगुरुकुलादधीतवेदस्यचतुर्णांत्रयाणां

वाद्वयोर्वैकस्यवापारंगतस्यकृतधर्मजिज्ञासस्यस्वसदनन्याभिमुखोऽग्निसमावर्त्स्यमा
नः।अग्नीत्याभिमुख्यमितियास्कः।यत्रयस्मिन्नग्नौ।अंतेनवात्र्यंत्या।तांसमिधमादध्या
दित्यनेनांतिमसमिन्निकार्यंलक्ष्यते।तमग्निमिंधीतधारयेदित्यर्थः।एतद्यदिपित्रा[illegible]
नवाकन्यायावाद्यानंकृतंभवतितदैवैतदाधानं।अन्यथाब्रह्मचारिणा।आधानं[illegible]
ति।तथाचकारिका।पित्रादत्ताथवाभ्रात्रावाचावान्येनयस्यतु।कन्यान्वेवसम[illegible]
दधीतसनेतरइति।कर्मप्रदीपेप्युक्तं।यस्यदत्ताभवेत्कन्यावाचावासत्येनकेनचित्[illegible]त्याग्नि
समिधमाधास्यन्नादधीतवनान्यथेति।तत्रयदद्गुर्वनुज्ञाभवतितस्मिन्[illegible]नेमानमोढ
यजनत्पूर्वकमाधानस्नानयोरर्थश्चकमेवाभ्युदयिकंकुर्यात्।तत्रब्रह्म[illegible]:पितास्वपि

तृभ्यः पिंडान्ददाति।ब्रह्मचारीवास्वपितृभ्योददाति।ब्रह्मचारीसमावर्त्स्यन्यदहर्गुर्वेऽस्त्रा
या।तदहःप्रातरेवाथमातृश्राद्धंप्रकल्पयेत्।आधानस्नानयोस्तत्रस्वपितृभ्यश्चलिः।
स्नातस्योद्वहनायापिस्वपितृभ्यःसुतोथवेतिकारिका।स्वपितृभ्यःपितादद्यात्सुतसंस्कारक
र्मसु।पिंडानोद्वहनात्तेषांतस्याभावेतुतत्क्रमादितिकात्यायनः।तत्राभ्युदयिकेऽप्योदरण
मन्त्रोनभवति।अग्नेरसिद्धत्वात्।ततोग्निमानीयचतुरस्रेकुंडेभूसंस्कारेकृतेऽग्निंस्थापयेत्।तु
रूपश्चितिसूत्रेणवक्ष्यमाणोनियमःससमावर्त्तनेविवाहेचनभवति।समावर्त्तनकाले
चविवाहेचयदाकृतिः।नतत्रयोनिर्नियतःकेचिन्निर्मथ्यवर्जिते।अर्थप्राप्तेयतोवह्नौसं ६
मिल्लाजादिहोमकौ।संस्कारकोभवेतांतोनयोनिस्तत्रकारणमितिकारिका।ततोऽन्नयेस

मिधमित्याद्याश्चतस्रःसमिधोहुत्वापर्युक्ष्याग्निश्रद्धामित्युपस्थाययशातब्राह्मणभोजनसं
कल्पंविधायाध्यापकगुरोर्दक्षिणादानपूर्वकंगुरोरनुज्ञयास्नायात्।ब्राह्मणान्भोजये
दित्यग्रेप्रवक्ष्यमाणत्वात्।तंत्रांतरपरिप्राप्तानामर्थस्यसमृद्धये।धारणेर्थेःस्नातंविप्रा न २
न्सर्वकल्पेषुभोजयेदिति।तत्समावर्त्तनकर्मलौकिकाग्नावेवभवति।गुरवेदक्षिणांदत्वास्ना
यात्तत्कर्मलौकिकइतिकारिका।आधानदिनमारभ्यमातृश्राद्धपूर्वकंस्त्रीपरिग्रहात्प्राग
स्वयं६ पिसायंप्रातर्होमंद्वादशरात्रंकुर्यात्॥अन्यथावाशिष्यादिभिःकार्यः।सत्यवदनेऽस्मिनिषि
धृतमंद्वादशरात्रं।द्वादशरात्रंस्वयंहोमःस्यादितिस्मृतिं।चकाराद्ब्रह्मचारिणेऽप्यदुरं
नावयंवाहविष्यान्नंचकुर्यात्।तत्राभ्युदयिकेऽग्नौकरणंशालाग्नावेवनभवत्यग्नेःसिद्धत्वात्।

आरभ्याधानदिवसान्नित्यहोमं प्रवर्त्तयेत्। सायमादिकृतः श्राद्धः प्रागपि स्त्रीपरिग्रहादिति
कारिका। ततः विवाहोत्तरमधिकारी चेद्विवेवशालाग्नौ वैश्वदेवमारंभेत मासश्राद्धपूर्वकं।
तत्र श्राद्धेऽग्नौकरणं भवत्यग्नेः सिद्धत्वात्। नार्यया सहितस्य गृहस्थस्य वैश्वदेवेऽधिकारः।
नार्यया रहितस्य पुरुषस्य होमार्थमेवाग्निधारणं। तस्य दृष्टादिविविधानेन शाकलैर्मं
त्रैर्होमो वा ब्राह्मणे होम्यद्रव्यार्पणमिति वैश्वदेवानुकल्पाः। ते च शाकलहोममंत्राः पंच प
चशाकलानादधत इत्यस्मिन्खंडे पश्चात्कल्पे उक्ताः। पाणिग्रहणकर्मेति प्रारंभेत तत्रो
दिवा। वैश्वदेवं कृतश्राद्धस्तस्मिन्नौपासनेऽनले। वैश्वदेवाधिकारी स्याद्गृहस्थः सभा १
र्यया। नार्याभावेऽनुकल्पेन होमाय त्वग्निधारणं। वैश्वदेवानुकल्पश्च दृष्टादिविधान

तः। होमो वा शाकलैर्मंत्रैर्विप्रे होम्यस्य चार्पणमिति कारिका। अस्मिन्नपक्वे शालाग्नौ शां
ते श्रोत्रियगृहाद्वह्निमानीय भूसंस्कारपूर्वकं संस्थाप्य सर्वप्रायश्चित्ताहुती जुहुयात्।
भूर्भुवः स्वः स्वाहा। अयाश्चाग्न इति सर्वप्रायश्चित्ताहुती भवतः। विध्यपराधे इति खंडे पठि
स्मृतितं। शांतेऽग्नौ श्रोत्रियगृहाद्वा हृत्वाथ हविर्भुजं। लक्षणे स्थापयेत्सर्वप्रायश्चित्ताहुती
ततइति कारिका। अत्राग्निसिद्धौ सत्यामपि आमावास्यं व्रत्याशनपिंडयज्ञादिकर्मणा। वि
नार्यस्य न भवति। सपत्नीकस्य तत्राधिकारात्। आमावास्यमनारंभाद्भार्यां विनार्यस्येष्य
ते। पिंडयज्ञादिकर्माग्निनेवाऽनग्नेरसंभवादिति कारिका। यदि पुनराधाननिमित्तमा
पतेत्तदा समिद्धोमाद्युपस्थानांतमाधानवत्पुनराधानं कुर्यात्। अग्निनाशे समिद्धोमः

पुनःसंस्कारको भवेत्। अग्निकार्योद्वृतासर्वमुपस्थानांतमिष्यत इति कारिका। अथ सा
कन्या यद्यविवाहितैव म्रियेत तत्र दातमग्निं नैव परित्यजेत्। अन्यो कन्यामविलंबेन उद्वहेत्
कन्यायाअलाभे इहि मे प्राणानित्यनेन मंत्रेणात्मन्यग्निं समारोप्य उत्तराश्रमी स्यात्। दा
गदत्ता यद्यनूढैव कन्या पंचत्वमापतेत्। न त्यजेदग्निकार्याग्निं क्षिप्रमन्यां समुद्वहेत्। यद्य
सौ न लभेत्कन्यामन्यां स्यादुत्तराश्रमी। एहि मे प्राणानारोहेत्यात्मन्यग्निं निवेशयेत् इति
कारिका। अनूढैव तु सा कन्या पंचत्वं यदि गच्छति। न तथा व्रतलोपोस्य तेनैवान्यां समुद्वहे
त्। अथ चेन्न लभेतान्यां याचमानोपि कन्यकां। तमग्निमात्मसात्कृत्वा क्षिप्रं स्यादुत्तराश्रमी ८
इति कर्मप्रदीपे। एतावता ब्रह्मचर्यानंतरमेकमपि दिनमनाश्रमेण न स्थेयं दोषश्रवणात्।

तत्र द० १ अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः। आश्रमेण विना तिष्ठन्प्रायश्चित्तीयते हि सः इति।
।८। अथ द्वितीयः कालः वैवाह्यं वा। विवाहे भवो वैवाह्यः। यदा पूर्वकालेनाहितोग्निस्तदैतत
दाधानं। तत्र मातृयजनपूर्वकं विवाहाधानयोरर्थे एकमेवाभ्युदयिकं विधाय यस्मिन्नग्नौ आन
यिते वोढ्रा हुते वा लाजाहोमो जातस्तमेवाग्निमादधीत। लाजाहोमानंतरमाधानांगभूतं चात
ब्राह्मणतर्पणं। तत्र गृहप्रवेशनीयाख्यमानडुहं कर्म सायंप्रातस्त्रिरात्रहोमश्च विवा
हाग्नावेव भवति। विवाहांगभूतत्वात्। अन्यत्सर्वं प्रतिकृतादि चतुर्थीकर्मांतं लौकिका
ग्नावेव भवति। वैवाह्यमग्निमिंधीत मथितं तमथाहृतं। गणेशादिव्यमातृणामर्चनं
श्राद्धमेव च। विवाहादौ कृतं यत्तदाधानेप्युपकारकं। पाणिग्रहणिको होमो विवाह

ग्नेस्तु संस्कृतिः॥ गृहप्रवेशनीयो पितदंगं लिंगतो भवेत्। विवाहे गामुपक्रम्य क्रमेणोत्का
थकर्मणि। तोतं परिचरेयात्तां वैवाह्यमिति सूत्रकृत्। अनंगत्वोद्विवाहाग्नेश्चतुर्थीकर्म
लौकिके। प्रतिश्रुतादिहोमेपि विवाहाग्निर्न संमत इति कारिका। आधानानंतरमाभ्युदयि
कपूर्वकं सायमादिहोमं विवाहाग्नावेव कुर्वीत। अग्नेः सिद्धत्वात्। पाणिग्रहणे देहे
निवृत्ते सायमादित॥ नित्यहोमो विवाहाग्नौ भवेद्देवाग्निसिद्धत इति। ततो गृहप्रवेशहोमो ५१
नंतरं वैश्वदेवाधिकारी आभ्युदयिकपूर्वकं दिवा वैश्वदेवारंभं करोति। तदंगभूते आभ्युद
यिकेऽग्नौकरणमग्नौ कुर्वीत अग्नेः सिद्धत्वात्। ततः त्रिरात्रं ब्रह्मचर्याद्यग्निपरिचर्यांते सकल
नियमजातं तस्मिन्नेवाग्नौ कुर्वीत। गृहप्रवेशीयहोमांते प्रारभेत ततो दिवा। वैश्वदेवं विवाहा

ग्नौ होमश्चास्यात्र्यहं तत इति। यदि त्रिरात्रमध्ये उभयोर्होमकालयोरहुत इष्टवाग्निः
शाम्यते तदा पत्नी उपवासं कुर्यादिति केचित्। अयाश्चाग्न इत्येकामाहुतिं जुहुयादिति
तैत्तिरीयकाः॥ प्रायश्चित्ताहुती सर्वेषु दोषेष्विति कल्पे उक्तत्वात् सर्वप्रायश्चित्ताहुतीरेव
भवतः कारिकामते च। यस्मिन्न सायं हुतोग्निरुभयोर्होमकालयोः उपशाम्येत तस्मिं
स्तु पत्न्येवोपवसेदिति। केचित्तंत्रांतरात्प्राहुः अयाश्चाग्नेऽथवाहुतिं। शौनककल्पाद्दर्शे स
र्वप्रायश्चित्ताहुती इतीति। निर्मथ्येके विवाह इति सूत्रान्निर्मथनपक्षे आभ्युदयिकपू
र्वकमरणिप्रदानमारभ्य संस्कृते भूप्रदेशे वह्निं मथित्वा संस्थाप्य देवतादेः कर्णौ
नदुहं च कर्म त्रिरात्रहोमश्च तस्मिन्नेवाग्नौ कुर्यात्। अस्मिन्नपि पक्षे नित्यहोमवैश्वदे

वादिपूर्वं विज्ञेयं । शांते त्वग्नौ मंथनं कुर्वीत । एवं चोक्तयोः पक्षयोः पुनराधाननिमित्ते पतिते
श्रोत्रियगृहादानमथनाद्वा । यथाप्राप्तं वह्निमानीय समानतंत्रके विवाहकर्मानुष्ठकर्मणि
नवेतां । तत्र मूर्द्धहोमादिष्टिमिज्यादिकर्म न कुर्यात् । नैमित्तिके न मथिते मंथनादेव सि
द्धितः । तेनैव पुनराधेयं मंथयेदेवं च श्रुतेः । समानतंत्रके स्यातां कर्मणी पुनराहिते । मूर्द्ध
होमादि नैवेष्टं इष्टिमिज्यादिकर्म चेति । ततो मथित्वाहृत्य वाग्निं चतुरस्रे स्थाप्य प्रतिश्रुता
विधानेनाज्यभागांते कर्मणि कृते पत्न्यान्वारब्धो महाव्याहृतिभिस्तिस्रभिर्जुहुयात् । त
त्र तत्रैस सह स्थिता पत्न्यंजलिना लाजाञ्जुहोति । ततः पत्न्यन्वारब्धो गृहप्रवेशीयैराज्याहु १० प्र
तिभिर्जुहोति । तत आज्यादेव स्विष्टकृतं हुत्वा होमांते च गां दत्वा ब्राह्मणभोजनपूर्वकं क

र्म समापयेत् । मंथनस्थापने कुर्यादाहृत्य स्थापयेत वा । प्रतिश्रुता वृता तंत्र आज्यभागां
तश्रागते । अन्वारब्धो व्याहृतिभिस्तिस्रभिर्जुहुयात्पतिः । लाजानंजलिना पत्नी स्थिता नत्री
व पेद्धृताक्ताः । गृहप्रवेशनीयेश्च तत्रान्वारब्ध एतया । आज्यात्स्विष्टकृतं हुत्वा होमांते गोश्च
दक्षिणेति । ततः सायंप्रातर्होमैश्च स्वयं द्वादशरात्रं कुर्यात् । अन्ये नियमाश्च । जायायां वा
पाणिं जिघृक्षन्निति तिष्ठंदोगगृह्ये । अथ तृतीयः कालः दायाद्यकाल एकः । एतदुक्तकालयो
धानेऽकृते दायाद्ये पैतृकं धनं तस्य विभागकालो दायाद्यकालं तत्र विभागांते ऽग्न्यसमिधा
मेव न लाजाहोमात्मकसंस्कारनिरपेक्षं गृहस्थ इष्टिं विधायाभ्युदयिकपूर्वकं पंचभूसंस्कृतायां
भूमौ चतुरस्रे विनियुक्तं ब्राह्मणक्षत्रियवैश्येभ्यः श्रोत्रियागाराद्वा प्राग्न्मदानसाधीयज्ञुक्ता

क्ष

दक्षसत्रप्रवृत्तो देभ्योऽन्यतमस्मादग्निमादधाति। योयज्ञूकः कं डुककारः ॅनसमुच्चितं स
र्वैन्यः जोगारूक इत्यत रु कृ इत्यनुवर्त्तमाने यजजपदशां य उ इत्यनेन यायजूकः। तत्राग्नौक
रणमग्नौ न भवति अग्नेरसिद्धत्वात्। दायाद्याद्येषु कालेषु संस्कारानुपदेशात्। संस्कारा
रपेक्षोग्निरुक्तयो नित्य आहृतः। आहृतं स्थापयित्वाग्निमिति। तत्राधानात्प्राक् देहस्य
विधाय अधिकारादिना दारस्थ्यावंति संवत्सराणि गतानि तावंति कृच्छ्राणि कृत्वा तैः
स्वाकं होमद्रव्यं ब्राह्मणे दत्त्वा आधानं। कार्त्स्न्ये जिनिः। यावंत्यब्दान्यतीतानि निरग्नेर्दि
ग्मनः। तावंति कृच्छ्राणि चरेद्धोम्यं दद्याद् द्विजातये। अधिकारेनेतरततः श्रां ब्राह्मण
नपूर्वकं कर्मसमापनं। ततो मातृयागपूर्वकमाभ्युदयिकं विधाय सआर्यस्याग्निसिद्धोस

नर

त्वामपि अधिकारस्य संजातत्वेनाधिकारी होमात्यागपि दिवा वैश्वदेवमारभेत। वैश्वदेव
प्रवृत्तिस्तु होमादर्वागपीष्यते। सआर्यस्यानेले सिद्धेतत्र प्रामाधिकारत इति। तथाभ्युद
कपूर्वकं सायमादि होममारभेत। पूर्ववत्। अत्र कारिकामते देवताकालकर्मैक्यत्वादा
धान वैश्वदेव सायमादि होमार्थ एकमेवाभ्युदयिकं। तथाह्रयाह्रादिसंभवे अग्नौकरण
मग्नौ न भवति अग्नेः सिद्धत्वात्। अत्राप्यग्निनाशे सर्वप्रायश्चित्ताहुती भवतः। पुनराधान
निमित्ते पतिते आधानवदेव सर्वं विधेयं। प्रेते वा गृहपतौ स्वयं ज्यायान् आवसथ्याधानं दा
रकाले दायाद्यकाल एकेषामिति यजुर्गृह्ये। अथ चतुर्थः कालः। प्रेते वा गृहपतौ स्व ...
यात्। पूर्वोक्तकाले यद्यग्निर्नाहितस्तदा गृहपतौ गृहाणां पतिः स्वामी तस्मिन् ... रिभ्र

ताधानेपिज्येष्ठेभ्रातरिवाप्रेतेमृतेसतिसपिंडयित्वाऽनुजैरविभक्तोपिज्यायान् [illegible]
स्वयंत्वलिङ्गिरपेक्षोऽग्निमादधीत।वाशब्दःपक्षांतरैःसहविकल्पार्थः।अत्रस्वयंग्रहणा
वेपाकयज्ञाःस्वयंकर्तव्याःप्रथमप्रयोगेत्वलिङ्गिरपेक्षएव।यद्वाप्रेतेवागृहपतौ।[illegible]
यानितिसूत्रद्वयं।ब्राह्मणक्षत्रियविशांज्यायान्ज्येष्ठःब्राह्मणःस्वयंपाकयज्ञान्करो [illegible]
तरयोर्वर्णयोःपुरोहितद्वारापाकयज्ञाःकर्तव्याइत्येतावदर्थमिदंस्वयंग्रहणं।ज्या [illegible]
त्रि ३ प्रःस्वयंकुर्यात्क्षुद्रादेःपुरोहितकारिकात्रात्र्युदयिकपूर्वकमुक्तयोनितोऽग्निमानीय
तुरस्रेसंस्थाप्यज्ञातब्राह्मणभोजनपूर्वककर्मसमापयेत्।वैश्वदेवस्तायमादिहोमश्च १२
पूर्ववज्ज्ञेयं।शांताग्नौपुनराधाननिमित्तेचपूर्ववज्ज्ञेयवदिति।प्रेतेवागृहपतौपरमेष्ठिकरणमि

इति ३

१६१ तिकंदोगगृह्ये।वैशाख्याममावास्यायामन्यस्यांवा।वैशाखांतायाअमावास्यातस्यामन्यस्यां
वाऽमावास्यायामनिमित्तेप्याधानकालेधिकारीअग्निमादधीतपूर्वोक्तांदेहशुद्धिंविधाययथा
वंत्यज्ञानीत्यादिकृत्वा।पूर्वोक्तकालेऽकृतेएतदपिअग्न्याधानेकालांतरंवेदितव्यं।यासौवैशा
खस्यामावास्यातस्यामादधीतसारोहिण्यासंपद्यतइतिशतपथश्रुतत्वात्।अन्यस्त्वं
पूर्ववत्।कामतोनक्षत्रएके।स्नानादिकामनायांनक्षत्रेहस्तादावाधानमेकेआचार्याइ
च्छंति।कल्पेप्युक्तं।वसंतेब्राह्मणस्याग्न्याधेयंग्रीष्मेक्षत्रियस्यवर्षासुवैश्यस्यशरदिवा
शिशिरःसर्ववर्णानांयाथाकाम्यमन्नंसोमेनयक्ष्यमाणस्यामावास्यायांपौर्णमास्यांवा
दधीतशुक्लपक्षेवापुण्येनक्षत्रेकृत्तिकाप्रभृतीनित्रीणिफल्गुनीप्रभृतीनित्रीणि।अमावा

स्यायामग्न्याधेयं कृत्तिकारोहिण्यौ मृगशिरः फल्गुनी पूर्वहस्तौ लाभकामस्य चित्रा च क्षत्रिय
स्य वसंतो ब्राह्मणस्य ब्रह्मवर्चसकामस्य ग्रीष्मः क्षत्रियः श्रीकामयोर्वर्षाः प्रजापशुकामस्य वैश्य
रथकृतामिति । यजुः कल्पे । तिथिनक्षत्रपर्वसमवाय इति छंदोगगृह्ये । एतावताद्दर्शविषयोर्श
मासे वा नक्षत्रयोगतो वाऽधिकारी आधानं पूर्वोक्तं कृत्वा कुर्यात् । तथा च श्रौतपर्यग्निकृतिः ।
श्र नः स्वयमुपासीत को हि मनुष्यस्याग्नीन्वेदेति । उक्ता आधानकालाः । तेषु कृतो ऽग्निराहरण
इत्यंतमाह । पुरुरूपस्तु विट्कुलां बरीषबद्ध्याजिनामन्यतमस्मादग्निमिंधीत । पुरवः वहवः
पशवो यस्य यो स्तौ ब्राह्मणक्षत्रियौ । तथा विट्कुलमपि । केचित्तु पुरुरूपस्य विट्कुलमित्येकं ५३
विशेषणं वदंति तद्युक्तं न भासते । तंत्रांतरे पि श्रूयते ब्राह्मणक्षत्रियवैश्येभ्यो धनवद्भ्य
रू

श्चाग्निराहरणीय इति । तथा च छंदोगगृह्ये । अपि वा बद्ध्याजिन एवागाराद्ब्राह्मणस्य वा रा
जन्यस्य वा वैश्यस्य वेति । तस्माद्भिन्नाधिकरणमेव युक्तं । कारिकामते तु भिन्नमेव । ब्रह्म
क्षत्रियवैश्येभ्यो वित्तवद्भ्योऽग्निमाहरेदिति । पुरुशब्दो बहुवाचकः । उरु रूपं वि । पुरु । इति नि
घंटौ बहूनामसु पठितत्वात् । अंबरीषो भ्राष्ट्रः । बद्ध्यजंतीति बद्ध्याजिनो यागकर्तारः । एतेषा
मन्यतमस्मात्कस्य विट्कुलादग्निमाहृत्येंधीत । त्रि इंधी वृद्धौ । अग्नेर्वर्द्धनं धारणं कुर्वीतेत्य
र्थः । वैश्यकुलाद्वा अंबरीषाद्वा अग्निमाहृत्याभ्यादध्यादिति छंदोगगृह्ये । अस्याग्नेः संस्कारापेक्षा
नास्ति । अंगीकृतस्य योनेराहरणमिति नियमः । स्वयोनेराहरेद्धांतं नेष्यते योनिसंकरत्
ति । सर्वेभ्यः समद्धितो नाहरणीयः । ब्रह्मक्षत्रियवैश्येभ्यो वित्तवद्भ्योऽग्निमाहरेत् । तथा च छं

त्रियागारादिति तंत्रांतरं यतः। अंबरीषो न वेद्भ्राष्ट्रस्तद्रूपाकं कुंडकादपि। महानसादपि न वे
दुद्धदुग्रो यत्र पच्यते। बद्धयज्ञकृतो विप्रान्तृत्रियादिकुलादपि। अत्र सत्र प्रवृत्तानाद्याश्रुतद्वेद्धा
दृपीष्यते। उक्तिरन्योन्यतमस्मात्स्यान्नसर्वेभ्यः समुच्चितमिति। पूर्वैवानुगते श्रौ योनिः पुनरा
१७ धेय इति शाखांतरे। सायंप्रातरेके। एके आचार्याः सायंतने होमकाले प्रातस्तने च होमका
ले स्वयोनितोग्नेराहरणमिच्छंति। यद्वैव पुनः पुनर्निर्मंथितः इति श्रुतेः। तत्र माध्यायागपूर्वकमा
धाननिमित्तमाभ्युदयिकं विधाय स्वयोनितोग्निमानीय चतुरस्रे स्थाप्य तंडुलादीनां वैश्वदे १४
वार्थे पाकं विधाय वैश्वदेवहोमयोरर्थे एकमेवाभ्युदयिकं विधाय वैश्वदेवं निर्वर्त्याग्निमु
त्सृजेत्। एवं सायं स्वयोनित आनीय स्थंडिले स्थाप्य सायंतनं होमं हुत्वा वैश्वदेवं च कृत्वा

ग्नेरुत्सर्जनं कार्यं। एवं प्रातरपि। एवं नित्यधारित्वपक्षो न। एवं दर्शपौर्णमासे देवानां यजनं। ब्रह्म
त्रानं पिंडपितृयज्ञोप्येवमेव। सायंप्रातस्तु तंत्रेण केचिन्नेच्छंति धारणं। संस्कारनिरपेक्षेग्नौ नि
त्यं ह्याहरणं मतं। यतो यमेव संस्कारो यत्स्वयोनित आहुतिः। पुनः पुनर्मंथते यत्र दाधानमिति
श्रुतेः। प्रातः हुत्वा माध्यायागमग्न्याहुतिनिमित्तकं। निर्वर्त्याभ्युदयश्राद्धमग्निं योनित आह
त्य स्थापयित्वाथ पक्वान्नं वैश्वदेवस्य होमयोः। आद्यं कुर्वन्तत्तंत्रेण निमित्तं न हि नेदकः। स्व
योनेः सायमाहृत्य स्थापयित्वाग्न्यगारके। हुत्वा पक्वा वैश्वदेवं कृत्वाग्निमतउत्सृजेत्। प्रातर
२२ प्येवं हि सेवस्यात्कर्म प्राक्सायमाहुतेरिति कारिका। स्वयोनित एवाहरणमग्नेः। अग्निनाशेपि द
र्वाक्प्रायश्चित्तं विधेयं। अत्रापि देहशुद्ध्यादि पूर्वोक्ता व्यवस्था। सायमाहुतिसंस्कारो ध्वर्युद्र

त्ययस्त्वाचार्यो॥ किंचनाचार्याः आहुतस्याग्नेः सायंकाले आहुतिभिः संस्कारः अध्वर्युप्रत्ययः अ
ध्वर्युतः प्रत्ययः प्रतीतिर्नव्य इति वदंति। इदमाधानं ब्रह्मसाध्यं। अन्यदाधानं सद्यस्करं। स च संस्का
रप्रकारविधिः अध्वर्युकल्पतो विशदः क्रियते। पूर्वमध्वर्युवरणागारकरणहोमधारणं। पु
रुषस्यादियोनितोऽग्नेराहरणं। तस्मिन्नहन्यशनमुपास्त जपोन न भवति। स्यादुपास्त जपो नति
तिकारिका। यथाद्वारमगारं पत्नीयजमानौ प्रविशेतां। अग्नेः पश्चाद्यजमानो दक्षिणतः पत्नी
च उपविशति। अरणिप्रदानं न कर्तव्यं। आहुतस्याग्नेरेव संस्कारः। अत्रारणिप्रदानं यदध्व
र्युः कुरुते क्वचित्। मतं तन्न सुयज्ञस्य मथितं सोऽत्र नेच्छति। आहुतस्यैव संस्कारं सायमध्वर्युरा १५
खिकं। समिदाहुतिभिर्मने प्रातः पूर्णाहुतिं च स इति कारिका। अजवंधनमपि न कर्तव्यं। अ

स्तमित आदित्ये अग्नेः पश्चिमत आनडुहं चर्मास्तीर्य तदुपरि पात्रचतुष्टयं संस्थाप्य तेषु प्र
स्त्रतित्रयपरिमितांस्तंडुलान्मुक्त्वा पात्रस्थांस्तंडुलांश्च चर्मणि मुक्त्वा स्थाल्यः करोति। ए
वं द्वितीयतृतीयचतुर्थपात्रस्थानपि। द्विः प्रक्षाल्य तस्मिन्नग्नावेव चरुं पचेत्। शृतं चरुमुद्धास्य
मध्ये विलं कृत्वा घृतं क्षिपेत्। तस्मिन्बिले आश्वत्थीस्तिस्रः समिधोऽन्यज्य समिधाग्निमित्य
नयर्चा एकां तिष्ठन्नग्नावादध्यात्। उपविश्य सुसमिद्धायेत्येतां जपेत्। तं त्वा समिद्भिरित्य
नयर्चा द्वितीयां तिष्ठन्नग्नावादध्यात्। उपत्वाग्ने हविष्मतीरित्यनया तृतीयां तिष्ठन्नग्नावा
दध्यात्। उपविश्य तं त्वा समिद्भिरिति जपेत्। ततोऽध्वर्युप्रमुखान्वेदविदश्चतुरो ब्राह्मणां
श्चातुः प्राश्य प्राशनार्थमुपवेशयेत्। तत आसनादि प्राशनांतं कारयित्वाऽध्वर्युराहस्त

उपविश्य सुसमिद्धायेत्येतां जपेत। २

ब्रह्मौदन इति प्रैषमाह। ततो यजमानो वरं दक्षिणां ददाति। रात्रावग्निधारणं जागर
णं वा। इति रात्रिविभागकृत्यं। अथ प्रातःकृत्यं। प्रातः पूर्णाहुतिं जुहुयाद्विस्रव्यचान्ति १८
ष्णीं वा। प्रातरुदित आदित्येऽध्वर्युर्वाचंयच्छ पूर्णाहुतेरिति प्रैषमाह। ततः पत्नीय
जमानौ मौनं कुरुतः। संभारकरणस्य विकल्पितत्वादग्निस्थलांतरेकृतानस्मोद्धाप्य
तत्स्थलं गोमयेनोपलिप्याग्नेस्तुर्द्वशांगुलं वृत्तं संपाद्योपलेपनादिस्वशाखिकानध्वर्युः
संस्कारान्संपाद्याग्नेस्तस्मिन्वृत्तरूपे आयतने संभारार्थं पुनर्लिखेच्च। यजमानेनान्वा
रब्धोध्वर्युरुत्तस्य तत्र हिरण्यं निधायाखूत्कीर्णानुखान्निधाय मृदं च निधाय पंचदारुश
र्कराः संस्थाप्य तस्मिन्नग्निमादध्यात्। तत्राज्यसंस्कारं विधाय चतुर्गृहीतधर्मेणोपायेन

व स्रुवं परिपूर्याध्वर्युर्यजमानेनान्वारब्धः प्राथम्यादिदं विष्णुरित्यनया पूर्णाहुतिं जुहो
ति। तूष्णीं वा प्रजापतिं मनसा ध्यात्वा स्वाहाशब्दं चोच्चार्य जुहुयात्। संभारकरणे अयं के
मः। संभाराकरणे तस्मिन्नेवाग्नौ पूर्णाहुतिर्होतव्या। उपग्रहस्यांजनादि न भवति मं
त्रेण ग्रहणत्वात्। अमंत्रकं पर्युक्षणं। उपग्रहब्रह्मणोर्विसर्जनं। वरं ददामि। इत्युक्त्वा
वा विसर्जनं। वरोऽध्वर्यवे देयः। भूयसी दक्षिणा ब्राह्मणेभ्यः। त्रां न इंद्राग्नी इत्यादिकं ज
प्त्वा क्षौमाणि अध्वर्यवे देयानि। एवमध्वर्युप्रत्ययत आधानं भवतीति सायमाहुतिसू
त्रेंऽतर्गर्भितोर्थः। अत्राध्वर्युवरणसंभारक्षौमधारणराद्धप्रैषवाग्यमसंप्रैषोत्त
मवरदाना निचनेच्छंति। अत्राधाने तंत्रांतरपरिप्राप्तान्कृतं विप्राननुभोजयेत्। अत्रा

पिपुनराधाननिमित्तेपतितेऽङ्गीकृतस्यपुरुषस्यादियोनितोऽग्निमाहृत्यस्थापयित्वा
वातुःप्रात्रयपचनादिसमिधोहुत्वाचतुरोद्विजान्भोजयित्वावरंदत्वापूर्णाहुतिंचहुत्वावरं
वाध्वर्यवेदत्वाकर्मशेषंसमापयेत्।एतेषामन्यतमेकालेऽधिकारेसत्याधानंविधेयं।
तथाचकात्यायनः।आधानकालायेप्रोक्तास्तथाऽयंचाग्नियोनयः।तदाश्रयोऽग्निमाद
।४०। ध्यादग्निमानग्रजोयदीति।तस्यप्रादुष्करणहवनकालावग्निहोत्रेणव्याख्यातौ।।तस्योप
सनस्याग्नेःप्रादुष्करणकालःप्रकाशनकालःहवनकालःहोमकालश्चतौअग्निहोत्रेण
अग्निहोत्रहोमप्रकरणेकल्पेनव्याख्यातौउक्तौ।एतावताऽनेनसूत्रेणाचार्योगृह्यकल्पयो १७
रैक्यंदर्शयति।अंधकारसंसर्गात्प्राक्सायंप्रकाशनकालः।ध्वस्तेऽंधकारेउदयात्प्राक्प्रा

तरुद्धरणकालः।अत्रप्रादुष्करणंनामाग्नेःप्रकाशनंकृत्वाऽथकुस्थापनं।कारिका।प्रादु
ष्कृतेऽस्तमितिदेशाद्गृह्यागारात्स्थण्डिलेस्थितिरिति।पुरस्ताच्छायानांसंसर्गाद्गार्हपत्याद्दाहवनीय
मुद्धरतिप्रत्यांत्यांरात्र्यामितिसूत्रेसूत्रितं।सायमस्तमितेपुरातमसस्तस्मिन्कालेजु
हुयादितिश्रुतिः।प्रातःपुरोदयादपहतेतमसितस्मिन्कालेजुहुयादितिश्रुतिः।पुरा
स्तमयादग्निंप्रादुःकृत्यास्तमितेसायमाहुतिंजुहुयात्पुरोदयात्प्रातःप्रादुःकृत्योदितेनु
दितेवाप्रातराहुतिंजुहुयादिति छंदोगगृह्ये।प्रथमास्तमितेपर्युदयंचस्वर्गकामस्य
तमोन्वयेसायंजुहुयाद्व्युष्यतिप्रातरायुष्कामस्यांतःपशोःपशुकामस्यसायंप्रातःश्र
यानेश्रीकामस्यप्रातरितिकात्यायनः।सयःपुरादित्यस्यास्तमयादाहवनीयमुद्धरतीति।

१४। तथास्यस्सायमस्तमिते जुहोतीति शतपथे श्रुतत्वात्। यज्ञोपवीतीत्यादि च संभवत्सर्वं
कल्पैकत्वात्। यज्ञोपवीती त्वारभ्य यथोक्तं पर्युक्षणं द्वितीयमित्येतावत्पर्यन्तं परिसंख्यात
इति। तस्य प्रादुष्करणं हवनकाला देव कल्पतो ग्राह्याविति न चापि च यज्ञोपवीती देवक
कर्माणि करोति प्राचीनापवीती पित्र्याणीत्यादि च संभवत्सर्वमसंयुज्य विधीयमाना
दिश्च विरुद्धं कल्पैकत्वादिहापि ग्राह्यं। कुतः धर्माणां कल्पनात्कल्पस्तस्मात्। गृह्यसूत्र
योर्भेदो नास्ति। यज्ञत्वाद्युसाम्यात्कल्पस्य श्रौतधर्मानुविधायिनः गृह्यस्य स्मार्त्तधर्मानुविधा
यिनः कल्पत्वसाम्यात्। प्रत्यक्षवेदविहितं वर्जयित्वा यद्यदन्यकल्पेषूक्तं तदपि द्रष्टव्यं। १८
यथाऽरण्योर्लक्षणं श्रितानि घारादिपात्रादिमानमथः चायनमोपवसथादौ तदपि द्रष्ट

व्यं। तथा च यन्नाम्नातं स्वशाखायां परोक्तमविरोधि यत्। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रा
दिकर्मवदिति कात्यायनः। परोक्तमविरुद्धं तदपि शिष्टैरनुष्ठितं। श्रौतस्मार्त्तोऽस्य संस्था
स्ता यज्ञत्वाच्चायतो मता। अतो यज्ञत्वसाम्येन कल्पैक्योक्तावनुष्ठितिरिति कारिका। ए
तावता स्वशाखायामनुक्तमविरुद्धधर्मं परशाखोक्तं ज्ञेयमित्यर्थः। तथा च। स्वशाखा
यमुत्सृज्य परशाखाश्रयं च यः। कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितमिति कात्याय
नः। अतो यद्यसंभवति आसीनन्यायं वाह्वृच्यमित्याद्यत्रानुष्ठेयं तदप्याह। तदपि श्रौ
स्य कल्पयोरैक्यं यज्ञसाम्येवान्येप्याचार्या वदंति। कथं पाकसंस्था हविःसंस्थाः सो
मसंस्थास्तथापराः। एकविंशतिरित्येता यज्ञसंस्थाः प्रकीर्त्तिताः। अनेन सौकेन यु

स कल्पयोर्यदैक्यमुक्तं तद्दर्शयति। अष्टकाः पार्वणश्चरुः श्राद्धं मास्यश्वयुजी चैत्री श्रावण्या
ग्रहायणीति सप्तैके पाकसंस्थाः। तथा च कारिका। पाकसंस्थान्वक्ष्ये तानष्टकाः पार्वण
श्चरुः। श्राद्धं मास्यश्वयुजी चैत्री श्रावणी चाग्रहायणीति। एते सप्तात्मसंस्काराः स्मार्त्तीये च दृ
तादय इति। अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यान्याग्रयणं पशुः सौत्रामणी
तिर्हविःसंस्थाः सप्त। अग्न्याधेयं चाग्निहोत्रं पक्षान्तौ यौ पशुश्चयः। चातुर्मास्यान्याग्र
सौत्रामण्या हविर्मखा इति कारिका। अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोलशी वाजपेयो
तिरात्रश्चाप्तोर्याम इति सोमसंस्थाः सप्त। अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यश्चापि च षोलशी॥ १९
वाजपेयोऽतिरात्रोऽपि चाप्तोर्यामस्तथैव च। श्रौता एते तु संस्कारा आत्मनश्च चतुर्दशेति का

रिका। एता एकविंशतिः एकविंशतिसंख्याका यज्ञसंस्था इति अमुना प्रकारेण प्रकीर्त्तिता
उक्ताः इतीति किं। पाकसंस्थाः सप्त। हविःसंस्थाः सप्त। सोमसंस्थाः सप्त। एवं त्रिगुणिताः सप्त
संख्या एकविंशतिः संपद्यते। एवं गृह्यकल्पयोरैक्यं प्रदर्शितं॥ इति गृह्यप्रदीपिके प्रथमे
६७ प्रथमः खण्डः॥ ॥ कर्मापवर्गे ब्राह्मणभोजनं। कर्मणः अपवर्गः समाप्तिस्तत्र ब्राह्मणानां भो
जनं कर्त्तव्यमिति शेषः। तस्मात्सुस्थिते यज्ञे ब्राह्मणांस्तर्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पय
तीति शतपथे। भोजनीयब्राह्मणलक्षणमाह। वाग्रूपवयःश्रुतशीलवृत्तानि गुणाः। ६७
एते वाचो गुणाः। अकाठिन्यममर्मस्पृक्सत्यवादितात्वेत्येवमादिवाग्गुणाः। एते रूपगुणाः
अपंगुता अक्लीबता अकाणता चेत्यादिरूपगुणाः। वयोगुणा अवृद्धता अबालता चेति वयोगु

णाः॥ ऋतगुणावस्थमाणाज्ञेयाः॥ शीलगुणाश्चास्तेयताऽपरपाकरुचिताश्रुचिताचेतिशील
गुणाः॥ वृत्तगुणाः स्वविहितकर्मानुष्ठानादयः॥ एवंमादिगुणशीलोब्राह्मणः कर्मापवर्गेनि
जनीयः॥ सत्यंदमस्तपोदानमहिंसेंद्रियनिग्रहः॥ दृश्यंते यत्रराजेंद्रसब्राह्मणइतिस्मृत इति
वह्निपुराणे। अहिंसानिरतोनित्यंजुह्वानोजातवेदसं। स्वदारनिरतोदातासवैब्राह्मणउच्य
तइतियमस्मृतिः॥ ऋतंतुसर्वानत्येति। वाग्रूपादिगुणेष्वऽसत्स्वपिऋतवानेवयाज्यः॥ तु यतः
ऋतंसर्वान्गुणानतीत्यअतिक्रम्यैतिगच्छतितस्मादृतंनातीयात्॥ नऋतमतीयात्॥ एकं
ऋतगुणाएवनवंति। एकत्रवाग्रूपादिगुणाःनवंतितत्रसर्वान्गुणानत्यरित्यज्यऋतवानेवा
दरणीयः॥ यतः ऋतंसर्वमतीत्यवर्त्तते। ऋतवंतंनापक्रामेदित्यापस्तंबः॥ पूर्वंयदृतमुक्तंत

स्यलक्षणमाह॥ अधिदैवमथाध्यात्ममधियज्ञमितित्रयं। मंत्रेषुब्राह्मणेचैवऋतमित्यभि
धीयते॥ दिवतायाः स्तुत्यस्तावकादिसंबंधेनयज्ज्ञानंतदधिदैवंयथाइंद्रादिदेवानांस्तुतिप्र
तिपादकैर्मंत्रैः इंद्रस्यनुवीर्याणिप्रवोचमित्यादिषुमंत्रेषुइंद्रादिदेवतानांज्ञानंतदधिदै
वं। अथाध्यात्ममिति। अथशब्दःपादपूरणार्थः॥ श्रोतव्योमंतव्योनिदिध्यासितव्यइत्या दि
भिरात्मवर्णनमात्मसंस्कारस्तेनब्रह्मज्ञानंमध्यात्मं। अधियज्ञमिति। यज्ञसाधनसाध्यसं
बंधिमंत्रब्राह्मणगतंअग्नआयाहिवीतयेअग्निंदूतंवृणीमहइत्यादिमंत्राणांमंत्रेषुब्राह्म। णे
वकारात्कल्पेचविनियोगज्ञानंअधियज्ञं। इतित्रयंअधिदैवज्ञानमध्यात्मज्ञानमधियज्ञज्ञा
नंचऋतं। तदृतंनातीयादित्यर्थः॥ क्रियावंतमधीयानंऋतंदृढंतपस्विनं। नोजयेत्तंसरु

घस्य न तं भूयः क्षुद् दहति। तं यजमानं भूयः कदाचिदपि क्षुत्तृष्णा बाधा नाश्नुते न व्याप्नो
ति। तं कं यः सकृदपि एकवारमपि तं उक्तलक्षणं ब्राह्मणं भोजयेत् तर्पयेत्। कीदृशं तं क्रियाः स्ना
नसंध्यावैश्वदेवादिकास्ता नियुक्तं। अधीयानं। ब्रह्मयज्ञाद्यध्ययनशीलं। श्रुतवृद्धं। श्रुत
लक्षणेन वृद्धं। पारोवर्यवित्सु तु खलु वेदविद्वत्सु भूयो विद्यः प्रशस्यो भवतीति यास्केनोक्तं ततो
प्यधिकमित्यर्थः॥ तपस्विनां स्वधर्मानुष्ठानेन मुनितुल्यं। एवंविधं यः भोजयेत्स कदाचिदपि
।७। क्षुधयापीडितो न भवतीत्यर्थः॥ यांतितर्पयिषेत्कांचिद्देवतां सर्वकर्मसु। तस्यै उद्दिश्य मन
सा दद्यादेवं विधाय वै। सर्वकर्मसु स्मार्तेषु लौकिकेषु यां कांचिद्देवतां तर्पयितुमिच्छेत्तस्या २१
एव देवतायै मनसा उद्दिश्य उद्देशं कृत्वा एवं विधाय पूर्वोक्तलक्षणाय ब्राह्मणाय दद्यात्।

।७। भोजनादिकमिति शेषः॥ नैवंविधे हविर्न्यस्तं न गच्छेद्देवतां क्वचित्। निधिरेष मनुष्याणां देवा
नां पात्रमुच्यते। एवंविधे पूर्वोक्तलक्षणे ब्राह्मणे न्यस्तं स्थापितं हविः चर्वादिकं देवतांग्न्या
दिकं न गच्छेत् न प्राप्नुयादिति न। अन्नं च प्राप्नुयादेव। क्वचिदिति प्रश्ने। अग्नौ हुतं द्रव्यं क
विस्कंदनादिदोषैर्न प्राप्नुयादपि। तत्र मनुः॥ न स्कंदते न व्यथते न विनश्यति कर्हिचित्।
रिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतमिति। एषः द्विजं मनुष्याणां मरणधर्माणां निधिः॥ ने
धिस्थानीयः। यथा गुप्तप्रदेशे रक्षितो निधिः कालांतरे कार्यसाधको भवति तथा द्विजे हुतं ह
विर्जन्मांतरे लभ्यते। तथा एष एव द्विजः देवानां विश्वादीनां विद्यातपोवृत्तयुक्तं पात्रमुच्यते।
अत्र मनुः॥ यस्यास्येन सदाश्नंति हव्यानि त्रिदिवौकसः। कव्यानि चैव पितरः किं भूतमधिकं

ततइति।तथाचयाज्ञवल्क्यः।तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये।तृप्त्यर्थं पितृदेवानां
धर्मसंरक्षणाय चेति।तैत्तिरीयाश्रुतिश्च।यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसं
तीति।श्रुतीनामाकरा ह्येते रत्नानामिव सागराः॥विप्रा विप्राधिप मुखे पूजनीयाः प्रयत्नतः।
यत्र वेदविदो विप्रा न प्राश्नंत्युत्तमं हविः।न तत्र देवा देवेशि हविरश्नंति कर्हिचित् इति स्कंद
पुराणे।देवाश्चानेन पात्रेणादत्तं हविरुपभुंजत इति भावः॥ ॥इति द्वितीयः खंडः॥ ॥अथ द
र्शपौर्णमासाउपोष्य॥अथेत्यानंतर्यार्थः।आधानानंतरं दर्शपौर्णमासैउपोष्य उपोष
णं कृत्वा ततो वक्ष्यमाणकं कुर्यात्।उपपूर्वो वसतिरत्र व्रतचरणार्थः।व्रताचरणं तु याग २२
द्रव्यातिरिक्तेन हविषावर्तनं।एतद्व्रताचरणं दर्शपौर्णमास्योश्च पत्नीयजमानयोर्भवति।

पत्नीयजमानौ व्रत्यमश्नीयातां प्राग्वत्सापाकरणाद्यदन्यन्मांसलवणमिथुनमाषेभ्यो ये
न वा द्रव्येण यक्ष्यमाणः स्यादिति सूत्रे सूत्रितं।न ह वा अव्रतस्य देवा हविरश्नंतीति श्रुतेः।पू
र्वां पौर्णमासीमुत्तरां वोपवसेदिति कात्यायनः।पक्षांता उपवस्तव्याः पक्षादयो यष्टव्या इति
व्रताचरणाभावे प्रायश्चित्तं सूत्रोक्तं विधेयं अग्नये व्रतपतये व्रत्यवेला प्रोष्याऽव्रत्यं वाचर
त्विति।व्रतोपेतोऽव्रत्यं चरन्व्रातपतीं कुर्यादिति काठके।यश्चाहिताग्निः सन्नव्रत्यमिव वा चरे
वसेद्वाव्रत्येहनि मांसं वाश्नाति स्त्रियं वोपैतीति आपस्तंबः।अतो विहिताऽनाचरणेऽप्ययमेव
रूर्भवति।शाकं मांसं मसूरं च चणकं कोरदूषकान्।माषं मधु परान्नानि वर्जयेदोपवस्तके॥
लमुद्गाढतैत्रौब्यं सस्यगोधूमकोद्रवौ।चीणकं देवधान्यं च सर्वत्राकं तथैक्षवं।सज्जीदारय

वक्षारंटंकणंक्षारमेवच।व्रतस्थोवर्जयेन्नित्यंसामुद्रंलवणंतथा।क्रोधाहंकारस्नयविषादका
र्पण्यलोभादीन्यक्षमाणोवर्जयेत्।अमासुतुशिलापिष्टपरान्नानिचसंत्यजेत्।अहनिमांस
मैथुनंवर्जयेदितिकात्यायनः।एतदयथाकरणेप्रायश्चित्तंवक्ष्यमाणंचकुर्यात्।अत्रपाक्षिकंवप
नं।केशश्मश्रुवपनेवाशिखमितिकात्यायनोक्तत्वात्।केचित्सशिखंविशिखंवेतिविकल्पंइच्छं
तितदसत्।सदोपवीतिनाभाव्यंसदाबद्धशिखेनच।विशिखोव्युपवीतश्चयत्करोतिनतत्कृत
मितिकात्यायनः।तथाश्रुतिश्चविवोएषयन्मुंडस्तस्यैतदपिधानंयच्छिखेति।तस्माच्छिखावर्जमेवव
पनं।अमायांतुविशेषः।अपराह्णेपिंडपितृयज्ञःकार्यः।पिंडपितृयज्ञोपराह्णेमावास्यायामि २३
तिसूत्रितत्वात्।अपराह्णेपिंडपितृयज्ञश्चंद्रादर्शनेमावास्यायामितिकात्यायनः।पितृकर्मवा

दपराह्णेविधेयः।पूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणामपराह्णःपितॄणामितिशातपथी
श्रुतिः।सचपिंडपितृयज्ञःदर्शपौर्णमासारंभात्प्रागपिआरब्धव्यः।दर्शपौर्णमासानंगत्वात्।
अपराह्णेमावास्यायामित्युक्तत्वात्।अतोदर्शपौर्णमासारंभात्प्रागपिपिंडपितृयज्ञःकार्यः।त्र
तद्दिनेसत्यवादित्वंसत्यवाद्यतइतिकात्यायनसूत्रोक्तत्वात्।अन्नतातिथ्यपनोदितिउक्तत्वा
त्तत्रैव।अमायांपौर्णमास्यांचस्वयंहोमोविधेयः।स्वयंहोमश्चपर्वणीतिसूत्रितत्वात्।एहृद
त्येकत्वाच्च।दर्शपौर्णमासावित्यत्रअल्पाच्तरमित्यनेनदर्शशब्दस्यपूर्वनिपातः।अनुष्ठानका
लेनुपौर्णमासादितएवआरंभः।यद्यपरपक्षेनंगंनीयान्नास्ययज्ञविकर्षःस्यादितिज्ञापका
त्।मासारंभस्तुपौर्णमासीतरवायत्वादेवप्रपिबंतीत्यत्रउक्तः।तस्मात्प्रथमारंभःपौर्णमास्यां। र्ण

न दर्शोऽत्र कारमतात् कारिकामतात्तु दर्शोऽप्यारंभः। दर्शपूर्णमासावुपोष्येत्यत्र दर्शशब्द
स्य प्राथम्यश्रवणात्। कारिका। पूर्वं तु पौर्णमासः स्याद्दर्शोऽप्यारंभ एव च। अन्वारंभणीयागो न्दा
त्रनारंभे सर्वकर्मणां। अपि दर्शादिरारंभ इष्यते दर्शशब्दतः। य आयाति स होतव्यः सखा
दिरिति श्रुतेः। अतो दर्शपौर्णमासाभ्यामिष्ट्वा नेन यागो विधेयः। न पूर्वं प्रकृतित्वात्। व्याख्या
तौ दर्शपौर्णमासौ प्रकृतिरिष्टिपशुबंधानामिति सूत्रोक्तेः। दर्शपौर्णमासाविति कर्मणो ना
मधेयं। दर्शपौर्णमासयोः स्वरूपं मासि मासि पितृभ्यो दद्यादित्यत्र वक्ष्यते। प्रातर्यत्रैतन्महाव ·७·
क्षाग्राणि सूर्य आतपति स होमकालः स्वस्त्ययनतमः सर्वासामावृतामन्यत्र निर्देशात्। प्रा २४
तः शब्दोऽत्र अर्वाची। यत्र प्रातःकाले सूर्यः सर्वस्य प्रकाशनकर्त्ता महावृक्षाग्राणि महतो वृ

तो वृक्षाग्राणि आतपति घर्मयुक्तानि करोति स होमकालः स्वस्त्ययनतमो ज्ञेयः सर्वासां आ प
वृतां सर्वेषां कर्मणां महाशांतिप्रभृतीनां। स्वस्त्ययनं कल्याणायतनं अतिशयेन स्वस्त्ययनकरो
भवति। स्वस्तीत्यविनाशनामेति यास्कः। अतिशायने तमबिष्ठनाविति तमप्। निर्देशा
त् वचनादन्यत्र। यथा जातकर्मादौ। सर्वाण्यपि कर्माणि दिवसे विधेयानि दैवपित्र्यका
णि। अतोऽत्र प्रातः शब्दोऽर्वाचीति व्याख्यायुक्ता। रात्रौ कर्म न कुर्वीत राक्षसी कीर्तिता हि
सा इति मनुः। अपराह्णे पितृभ्यो दद्यादित्यनेन दैवकर्मापराह्णे न भवति। न सायमस्ति
दैवयाज्ञं दृष्टमिति दर्शनात् सायमपि न। पूर्वाह्णे दैवकर्म। पूर्वाह्णो वै देवानां मध्यंदिनो म
नुष्याणामपराह्णः पितॄणामिति शातपथी श्रुतिः। पूर्वाह्णे दैवकर्म प्रशस्तं भवति। तमप्

प्रयोगादहः सर्वोपि स्वस्त्ययनरूपः ततोपि पूर्वाह्णः स्वस्त्ययनतरः ततोपि सूर्योदयकाला
दनंतरकालः षड्घटिकात्मकः स्वस्त्ययनतमो ज्ञेयः पंचधा विभागपक्षे दिवसस्य प्रातः
संगवमध्याह्नापराह्णसायंकालरूपेषु प्रातः समये दैवकर्मकृतं सत् अतिकल्याणप्र
दं भवतीत्याचार्यस्य हार्दं। अत एवाश्विनशास्त्रे एतस्मिन्नेवाप्येषकालेऽपहतपाप्मा वि
विरूपाप्मा भवतीति श्रुतावुक्तं। वचनाद्रात्रौ होमः यथा वास्तोष्पतीये कर्मणि सो।
कृतीदर्शामीस्थालीपाकस्य रात्रौ। एवं वचनादन्यदपि भवति। यत्र वचनातिदेशो न भवति
।१८। तत्र प्रातरेव होमः॥ होमविधिः कथमित्यत आह। सुमनाः शुचिः शुचौ वरूथ्ये देशे पूर्णविध
नं चरुं श्रपयित्वा दर्शपौर्णमासदेवताभ्यो यथा विभागं स्थालीपाकस्य जुहोति। सुमनाः सु

अन्तकर्मादौ तु सामर्थ्यातिर

ष्टुमनाः अन्वासक्तचित्तरहितः शुचिः सुस्नातो न्यायार्जितधनो वा शुचिर्न्यायार्जितधनः
सुघुवाद्यपि सृज्यन्तैरिति श्रुतेः॥ अपगतपापो वा बाह्याभ्यंतरमलरहितो यजमानो र
हितो यजमानः शिष्टो वा शुचौ मार्जनदाहगोक्रमणखननादिभिः शोधिते वा दि
दृष्टिरहिते च वरूथ्ये देशे वरूथ्यो रमणीयप्रदेशस्तत्र पौर्णमास्यां सूर्योदयात्पूर्वं अमा
वास्यायामुदयात्प्राक् आपस्तंबश्रुतिः॥ उदितआदित्ये पौर्णमास्यास्तत्र पक्रमयति प्रा
गुदयादमावास्याया इति॥ एतस्मिन्काले पूर्णविधानं पूर्णेन परिपूर्णेन विधानं विशदं प्र
सिद्धं चरुं अनवस्रावितमूष्मपक्वं उदनं श्रपयित्वा पत्न्या स्थालीपाकस्य चरोः यथा वि
भागं भागमनतिक्रम्य इति यथा विभागं दर्शपौर्णमासदेवताभ्यः कल्प्योक्ताभ्यः अ

वरानथर्मेणजुहोतिहोमंकुर्यात्॥ सर्वमान्त्यकर्दयिकंकत्वाद्दर्शयागः॥ दर्शाग्निनेप्रातरेवपृथक
श्राद्धंतुनांदिकंमितिकारिका॥ उदनेचरुशब्दःस्यादितिकारिका॥ त्वक्छिमार्जिनाद्दाहात्क
लाजोक्रमणादपि॥ सेकोदुग्धेरवनात्क्षेपाद्धहंमार्जनलेपनादितियाज्ञवल्क्यः॥ अग्निसो
मइत्याज्यन्नागौसर्वत्र॥ अग्नयेस्वाहेतिएका॥ अग्नीषोमाभ्यां॥ उपांशु॥ स्वाहा॥ इत्यक्षैः देवताना
मधेयंचोपांशुनिगमस्थानेषुइतिसूत्रितं॥ अग्नीषोमाभ्यांस्वाहा॥ उच्चैर्न्ययिस्वर्गेदिइतिसूत्रावं
अग्नयेस्विष्टकृतेस्वाहेतिपौर्णमास्यां॥ दर्शेविशेषः॥ अग्नयेसोमाययेतिएवंचत्र॥ अग्नयेस्वाहेतिद् २६
वा॥ विष्णवेउपांशु॥ स्वाहेत्यक्षैः॥ इंद्राग्निभ्यांस्वाहा॥ अग्नयेस्विष्टकृतेइतिदर्शे॥ उन्नयत्वाग्नेयः
पुरोडाशोग्नीषोमीयउपांशुयाजोवैष्णवोवाग्नीषोमीयश्चपुरोडाशः पौर्णमासेइविशेषैद्राग्नोस
न्नयतोद्वितीयोमावास्यायामैंद्रंसान्नाय्यंसन्नयतोमाहेंद्रंवावैष्णवंत्वसन्न॥

यत्नुपांशुयाजंइतिसूत्रेसूत्रितं॥ दर्शपौर्णमासदेवताभ्यइत्युक्तत्वाददीक्षितस्यअसान्ना
य्ययाज्ञिनःदर्शपौर्णमासयोरेतादेवताः॥ दीक्षितस्यविशेषोदर्शे॥ अग्नये॥ सोमाय॥ अग्नये॥
अग्नीषोमाभ्यांस्वाहा॥ इंद्रायस्वाहा॥ महेंद्रायवा॥ अग्नयेस्विष्टकृतेइतिसोमयागकर्तुर्विशे
षः॥ असोमयाज्ञिनःसान्नाय्ययागोनिषिद्धःशतपथे॥ तदाहुर्नासोमयाजीसन्नयेत्रद्
समेवनयेदिति॥ तथाचकात्यायनः॥ सोमयाजीसन्नयेत्कामादितरइति॥ यथाविभागंस्था
लीपाकस्येत्यनेनानेकस्थालीपाकनिवृत्तिरभिधीयते॥ स्थालीपाकेकेकेपदार्थाभवंतीत्य
तआह॥ स्थालीपाकेष्वाज्यग्रहणासादनप्रोक्षणानिमंत्रंदेवताभ्यः॥ स्थालीपाकेषुसर्वे
षुमंत्रदेवताभ्यःमंत्रेषुयासांदेवतानामुपलब्धिस्ताभ्योदेवताभ्यःग्रहणंआसादनंप्रोद

ग्रहणंद्विविधस्त्वर्थादिष्टंमुष्टिचतुष्टयमितिकारिका४

णंचरुतानिनिर्वपंति।मंत्रदेवताभ्यइत्युक्तत्वाच्चतुर्थ्यंतेनग्रहणासादनप्रोक्षणानिनिर्वपंति।
चतुर्मुष्टिपरिमितंग्रहणंतंडुलादीनां।मंत्रपृथक्त्वात्कर्मपृथक्त्वमितिन्यायान्मंत्रावृत्तिर्द्वि
वारं।चतुर्थंतूष्णीं।वचनादाज्येमुष्टौनोनमइतिकात्यायनः।।तूष्णींकामेनचतुर्थमितिवि
द्यमानत्वात्।दैवस्यत्वेतिगृह्णात्याग्नेयंचतुरोमुष्टीनितिकात्यायनः।।अग्नयेजुष्टंगृह्णा
मिइतिग्रहणे।अग्नयेजुष्टमासादयामिइत्यासादने।अग्नयेत्वाजुष्टंप्रोक्षामिइतिप्रोक्षणे।
एवंसर्वत्रचतुर्थ्यंतेनग्रहणादिकंविधेयं।अग्नयेजुष्टंगृह्णाम्यग्नीषोमाभ्यांत्वाजुष्टंप्रोक्षा
मिइतियजुर्विदर्शनाच्च।वचोद्यात्वाकमात्रेपियथापूपादिसक्तुष्वितिकारिका।चकारात्स २१
क्त्वादीनांग्रहणं।अमंत्रकासुदेवतासुमंत्रेषुविद्यमानेषुचग्रहणादिप्रकारोनवमेखंडे

स्रु.च्छु ११।२।२

वक्ष्यते।केनप्रकारेणहोमःसंपादनीयइत्यतआह।।अवदानधर्माश्च।स्थालीपाकेषुस ।छ
र्वेषुचकारात्सक्त्वादिषुचअवदानधर्माअपिग्राह्याः।।अवदानप्रकारस्त्वेवं।एकःस्रुवः अ॰पं॰
मध्यात्पूर्वार्द्धात्अवदानद्वयं।उपरिएकःस्रुवः।एवंचतुरवत्तता।पंचावत्तिनांतुएकःस्रु
वःअवदानत्रयंमध्यात्पूर्वार्द्धात्पश्चार्द्धाच्चउपरिएकःस्रुवः।एवंपंचावत्तता।।स्विष्टकृतिएकः
स्रुवःअवदानमेकंउपरिद्वौस्रुवौ।तस्यद्विरवद्यतीतित्रिर्जमदग्नीनांपश्चात्तृतीयंसर्वेषां
वोनयमविधानान्मध्यात्पूर्वार्द्धाच्चसंभिंदन्नंगुष्ठपर्वमात्रमवदानंमात्रावद्दधिपयसो
राद्यंतयोराज्यमेकंप्रत्यवायः।स्विष्टकृतोद्विश्चाभिघारणमवदायप्रत्यभिघारणंप्राक्
स्विष्टकृतइतिकात्यायनोक्तत्वात्।।एवमेवपित्र्याष्टकयोः।।एकःस्रुवःअवदानमेकं।उ

परिद्वौ स्कन्वौ।कारिका।पित्र्याष्टकायांसर्वाणिचावदायसकृत्स्कृवि।अनिघारोद्विरेवस्यात्सर्व
त्रश्रुतिदर्शनादिति।तस्तस्मादवदध्यात्पथोपरिष्टाद्द्विराज्यस्याभिघारयतीतिशातपथे।तथा।
तदेनांस्तदवयतेयद्यजतेथयदग्नौजुहोतितदेनांस्तदवयतेतस्माद्यत्किंचिदग्नौजुह्वतितद
वदानंनामेतिशातपथे।तद्द्वैचतुरवत्तंभवतीत्यारभ्यउतोपंचावत्तमेवभवतीतितत्रैवोक्तं।ए
१७। वंचअवदानधर्मोज्ञाख्याः॥पूर्वंतुदर्शपौर्णमासाभ्यामन्वारंभणीयदेवताभ्योजुहुयात्।श
वृष्वार्थे।दर्शपौर्णमासाभ्यांपूर्वमेवअन्वारंभणीयदेवताभ्यःतिसृभ्यःपंचभ्योवाजुहुयात्।
स्थालीपाकधर्मेण।अग्नाविष्णूसरस्वतीसरस्वान्एताश्चपंचदेवताः।पंचपक्षेपूर्वोक्तोश्चयाअग्न २८
येभगिनेअग्नयेव्रतपतयेचउद्दिश्यजुहुयादवदानधर्मेण।संप्रदानत्वाच्चतुर्थ्येतेनस्वाहांतेन

स्तिस्रो२ स्तिस्रः२

तथाप्युदपिश्रं श्राद्धविधेयमु

वहोमः।स्वाहाकारांतेहोममंत्राणांसमिदाधानमंत्राणांचेतिसूत्रितत्वात्।पूर्वादर्शपौर्णमा
साभ्यामन्वारंभणीयेष्टिराग्नावैष्णवःसरस्वत्यैसरस्वतेचेत्यारभ्यपंचहविषमेकेऽग्नयेभगिने
अगिनेव्रतपतयेचेतिसत्रेसूत्रितं।अन्वारंभणीयाग्नावैष्णवएकादशकपालःसरस्वत्यैचरुः
सरस्वतेद्वादशकपालोदर्शपूर्णमासारंभेइतिकात्यायनः॥अत्रधेनुर्दक्षिणा।धेनुश्चदक्षिणा
इतिसूत्रितं।पृष्ठौहीदक्षिणामिथुनौवाइतिकात्यायनः॥पूर्वंतुदर्शपौर्णमासंदैवसाभ्यामि
त्युक्तत्वाद्दर्शपौर्णमासयोःप्रथमप्रयोगेऽन्वारंभणीयाभवति।औपौर्णमासाद्दर्शस्या १७।
कालातर नंतरंतःआदर्शात्पौर्णमासस्यप्रातराहुतिर्वैकेसायमाहुतिकालेत्यन्येमन्यते।कदाचिदा
पत्तिवशाद्दर्शपौर्णमासयोःकालातिक्रमेजातेविधानमाह।दर्शस्यअमायाःअतीतोपिका

चतुर्वर्गगो: ४

२ निमहोमविषयमिदमितिल मु.कं।
आत्ययादित्ययस्यमुख्यकालादित्येवमर्थः

लः अनतीत एव ज्ञात्वा आ पौर्णमासात् दर्शकर्म पक्षादिरूपं प्रायश्चित्तं विधाय कर्त्तव्यं। एवं पौ
र्णमासस्य अतीतोपि कालः अनतीत एव ज्ञात्वा प्रायश्चित्तं विधाय कर्म विधेयं। तथा एके आचा
र्याः सायं आहुतिकाले सायंतनाहुतिकाले अत्ययात् यजमानस्य मरणशंकातः प्रातराहुतिं
मन्यंते इच्छंति। एक इत्यभिधानादाचार्याणां मतं न। अत एव मंडनः। मुख्यकाले यदा कर्म कर्तुं वस्यं४
न शक्यते। गौणकालेपि कर्त्तव्यं गौणोप्यत्र हि शोभनो भवेत्। आ सायमाहुतेः। पौर्णमासस्य कालो
स्ति पुरा दर्शस्य कालतः। पौर्णमासस्य कालात् प्राक् दर्शकालोपि विद्यते। श्यामाके व्रीहि निश्चै
व यवै रन्योन्यकालतः। प्राग्यष्टुं दृश्यते वश्यं नत्वत्राग्रयणात्ययः। एवमाग्रामियागीय मुख्य २८
कालादधस्तनः। स्वकालादुत्तरो गौणः कालस्यात्पूर्वकर्मणः। गौणेष्वेतेषु कालेषु कर्मचोदित

माहुतेः आ आत्कालोस्ति प्रातराहुतेः। प्राक्प्रातराहुतेः आ आत्कालं
स्यात्...

मान्चरेत्। प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्। तथा। मुख्यकाले यदा पौर्णमासीयं कर्म न
जातं तदा दर्शात् प्राक् कृत्रविद्दिने विध्यपराधोक्तं प्रायश्चित्तं पंचमाध्यायोक्तं चरुं कृत्वा कार्यं। यदि
२३ पार्वणस्त्व कृतोन्यत्र स्ततस्थ चरुरिति। दर्शात् प्राक्केन जातस्तदा दर्शयागात् प्राक् प्रायश्चित्तं चरुं च
विधाय एव दर्शयागः कार्यः। यदि दर्शोपि गतस्तदा अग्नये वैश्वानराय आग्नेये तं तु मते चरुः पंचमेव
हुमानत्वात् पथिकृच्चरुर्वा भवति। एवं पौर्णमासात् प्राक् दारुणीयं कर्म न जातं तदा कृत्रवि
द्दिवसे विध्यपराधोक्तं प्रायश्चित्तं चरुं च कृत्वा पिंडपितृयज्ञं लुप्त्वा दार्शीयं कर्म विधेयं। पौर्णमा
सात् प्राक्केन जातस्तदा निन्ने दर्शपौर्णमासकर्मणी विदध्यात्। एवं पौर्णमासीययागोपि गत
स्तदा पूर्वोक्तश्चरुः पथिकृच्चरुर्वा भवति। एवं सायंतनो होमो मुख्यकाले न जातस्तदा बौक्तं प्रा

३

पंचमाध्या १

यश्चित्तं विधाय प्रातराहुतेः प्राक् होमो विधेयः॥ प्रातर्होमात्प्राक् चेन्न ज्ञातस्तदा प्रातर्होमेन सह
प्रायश्चित्तं विधाय कर्तव्यः॥ एवमुभयोरपि सायंतनप्रातस्तनहोमयोर्नाशे द्वा पथिकृत्पूर्वोक्तं प्रा
यश्चित्तं पुनराधानं वा भवति॥ वैश्वदेवातिक्रमे एकरात्रोपवासः॥ तथा च मंडनः॥ मुख्यकाले यदा
न स्यात्पौर्णमासः कथंचन॥ कृत्वानादिष्टमादर्शात्कर्तव्यो यत्र कुत्रचित्॥ न चेत्प्राग्दर्शतः स्याद्द
र्शेन सह तत्क्रिया॥ यदि दर्शोप्यतिक्रांतस्तदा पथिकृती भवेत्॥ एवं दर्शोतिपन्नः प्राक्पौर्णमासा
न्न चेत्कृतः॥ पिंडयज्ञं विना सोपि कर्तव्यो यत्र कुत्रचित्॥ पिंडयज्ञः स्वकाले स्यादन्वावाह्नोण कालतः॥
न चेत्संपद्यते तत्र प्रायश्चित्तं भवेन्न सः॥ न पौर्णमासतंत्रे स्याद्दर्शो भिन्नप्रयोगतः॥ पौर्णमासे व्यति ३०
क्रांतेऽतिपत्तिः पथिकृत्तदा॥ स्वकाले सायमाहुतेरप्राशे होतृहव्ययोः॥ प्राक्प्रातराहुतेः कालः प्राय

श्चित्ते कृते सति॥ प्राक्सायमाहुतेः प्रातर्होमकालानतिक्रमः॥ प्रायश्चित्तमथो कृत्वा पुनः संत
नुयाद्धुतं॥ होमद्वयात्यये दर्शपौर्णमासात्यये तथा॥ पुनरेवाग्निमादध्यादिति भार्गवशासनं॥
वैश्वदेवेत्वतिक्रांते अहोरात्रमभोजनं॥ होमकालातिक्रमप्रायश्चित्तं पंचमेध्याये वक्ष्यते॥ नि १८
यतस्त्वेव कालोऽग्निहोत्रे प्रायश्चित्तदर्शनाद्भिन्नकालस्य॥ तुशब्दः पूर्वोक्तानुकर्षणार्थः॥ नुत्र
नापदि नियतकालो एव वेदितव्यः॥ सायमस्तमिति पुरा तमसस्तस्मिन्काले जुहुयात् प्रातः पु
रोदयादपहते तमसि तस्मिन्काले जुहुयात्॥ प्रातर्यत्रैतन्महावृक्षाग्राणि सूर्य आतपति स हो
१० मकालः॥ स्वस्त्ययनतम इति स एव नियतो वेदितव्यः॥ कुतः भिन्न -- कालस्य भिन्नकाले कृते
सति अग्निहोत्रे अग्निहोत्रहोमप्रकरणे प्रायश्चित्तदर्शनात्॥ तस्यापराधे प्रायश्चित्तमिति सूत्रे

।छ। सूत्रितं॥नित्याहुत्योर्व्रीहियवतंडुलानामन्यतमद्धविःकुर्वीत॥नित्याहुत्योःसायंप्रातराहुत्योः
२ त्रया ला व्रीहियवतंडुलानांत्रिंशणांमध्येअन्यतमत्एकंहविःकुर्वीतअंगीकुर्यात्॥व्रीहीन्यवान्वाह
विषीतिकात्यायनः॥तंडुलैर्बलकामोदध्नेंद्रियकामोघृतेनतेजस्कामइतिकात्यायनः॥अ ।छ।
नावेन्यदप्रतिषिद्धं॥अनावेव्रीहियवतंडुलानामनावेअसद्भावेअन्यत्एतदन्यतरंअप्र त ४
५ स्मामाप्रादिर्षु तिषिद्धंअनिषिद्धंग्राह्यं॥अयज्ञियावैमाषावरटीकोद्र[illegible]वाश्चेतिकात्यके॥अनावेव्री
हियवयोर्दध्नावापयसावापि॥तदनावेयवाग्वावाजुहुयादुदकेनवेतिकर्मप्रदीपे॥मुख्यत्वेन
त्रयंत्वन्यत्प्रतिषिद्धमयज्ञियं॥तिलमुद्गमसूरांस्तुमुक्त्वाशैब्यंनयज्ञियं॥सस्यंप्रियंगुश्या ३१
।छ। माकागोधूमाएवशोवकइतिकारिका॥तंडुलांश्चेत्प्रक्षाल्यैकोयदितंडुलाअंगीकृतास्तदा

एकेआचार्यास्तांस्तंडुलान्प्रक्षाल्यसायंप्रातर्होमोविधेयः॥तत्रप्रक्षालनंदेवकर्मत्वात्त्रिः
प्रक्षालयेत्॥त्रिःक्षालितंहविर्दैवमितिकारिका॥इतिवदंति॥इतरेषामसंस्कारः॥इतरे ।छ।
षांव्रीह्यादीनांप्रक्षालनादिसंस्कारोनविधेयः॥अयंचनियमोयेनद्रव्येणसायंहुतंते
नद्रव्येणप्रातर्होमः॥सायंप्रातर्होमयोरेकहोमत्वात्॥सायमादिप्रातरंतमेकंकर्मप्रचक्ष
ते॥दर्शांतंपौर्णमासाद्यं कर्मैवमनीषिणइतिकर्मप्रदीपे॥सायमग्नयेप्रातःसूर्याय॥ ।छ।
सायंअग्नयेस्वाहा॥प्रातःसूर्यायस्वाहाइत्याहुतिर्यथाक्रमेणजानीयात्॥स्वाहाकारांते
होममंत्राणामित्युक्तत्वात्स्वाहाकारः॥पात्रांतरानुक्तत्वाद्धस्तेनहोमः॥यत्रोपदिश्यतेक
तु१ र्मकर्तुरंगंनतूच्यते॥दक्षिणस्तत्रविज्ञेयःकर्मणांपारगःकरइतिकर्मप्रदीपे॥विशेषविधाना
तथाचकर्मप्रदीपः॥पाणिरेवेतरस्मिंस्तिति॥सचदक्षिणएव॥२

भावादयं होम उपविश्यैव कर्तव्यः। आसीनं न्यायं बाहुल्यमिति सूत्रितत्वात्। व्रीह्यादिहवि
र्द्रव्यं पूर्णपात्रे स्थितं अग्नेः पश्चादुदग्वा स्थाप्यापः समिद्दर्भांश्च प्रणीताय म्याचम्य प्रयोगं
वीक्ष्यार्यं होमं कुर्यात्। कारिका। व्रीह्यादि वारणे पात्रे पश्चादग्नेर्निधाय च। अपश्च समिधं दर्भा
।छ। नुपविश्याय मे दस्तु। संकल्प्यैवं च मम्यक् कर्मांगमुदगुत्सृज्य चानलादिति। प्रजापतये चानूत च ४
नं योस्तूष्णीं। अन्वेतरार्थः। उभयोः अग्नये सूर्याय इत्यनयोः अनु अनंतरं प्रजापतये इति तूष्णीं
ध्यात्वा स्वाहेत्युच्चैरुक्त्वा जुहुयात्। देवतानामधेयं चोपांश्विति सुकृतत्वात्। प्रणवो ये यजामहे व
षट्कारः संप्रैषाः प्रैषाश्चोच्चैरुपांशु हविःषु इति स्वाहेत्युच्चैः॥ सर्वत्र यजमानेन त्यागाः कार्याः। प ३२
२ त्नी वानुमन्यते। अथवा नाव पित्यागौ कुरुतः॥ हविर्न दुह्व जुहुयात्पत्नी त्यागादि कुरुतें तिके। उप
मनो वै प्रजापतिरिति श्रुतेः ३ स्तूत्रात्र वषट्कारस्यानापन्नः २ घ ३

विष्टाद्दक्षिणतः पश्चादनलतः स्थितिः॥ संनिधौ तु स्वयं त्यागान्पत्नीतानगु मन्यते। तौ वा पृथक्पृ
थक्त्यागान्दंपती कुरुतः स्वयमिति कारिका। ब्रह्मपुराणे। पलाशफल्गुन्यग्रोधप्लक्षाश्वत्थ विकंक
ताः। उदुंबरस्तथा बिल्वश्चंदनं यज्ञियाश्च ये। सरलो देवदारुश्च शालश्च खदिरस्तथा। समिद
।छ। र्थे प्रशस्ताः स्युरेते वृक्षा विशेषत इति उक्तं॥ प्राक्कु प्रागाहुतेः समिधमेके॥ प्रागाहुतेः प्राक्कर
के आचार्याः प्रादेशमात्रां समिधं समिद्धोमं इच्छंति। आहुतिस्तु समिधि वसतीत्युक्तत्वात्॥
समिद्धोमोऽव्यवहितानामेवाहुतीनां भेदो भवति। प्रागाहुतेः पूर्वाहुतेः प्राक् पूर्वं समिद्धोमः॥
४ इंधनार्थं समिद्भवेदिति कात्यायनोक्तत्वात्। उत्तरा नैव समित्। प्राप्ते पि समिदाधाने सूत्रेणा
।छ। न्वोत्तरा समिदिति कारिका। यथोक्तं पर्युक्षणं। सर्वत्र होमादौ होमांते च पर्युक्षणं यथा उक्तं
क्रा द्विधा। प्रागाहुतेः समिदिति विकल्पार्थं उत्तरा गां समप्रा पाहुतेः प्राक्कल्पात्प्राक्प्रादेशः प समिद् २

कल्प्येत्तथाइहापिज्ञेयंइतिआचार्याणांप्रतिज्ञा।परिसमूहनमग्रेवक्ष्यते।परितःउदकणांसे
चनंपर्युक्षणं।तत्पर्युक्षणंहोमद्रव्येणसह।कारिका।प्रादुष्कृतंसमुक्षत्रिर्होमायालंहविर्भुजं॥
मंत्रावृत्त्याथपर्युक्ष्यत्रिरग्निंहविषासह।सव्येनादायचकुशानाधायसमिधंततः।द्व्यंगुलंसमिध
स्थूलकातन्नहोमःसमंत्रकइतिपरिसमुक्ष्यहोष्यन्नृतंत्वासत्येनपरिषिंचामीतित्रिस्त्रिरेके
कंपर्युक्ष्यकृत्वाचसत्यंत्वर्तेनपरिषिंचामीतिप्रातरितिसूत्रितं।तथाइहापिद्रष्टव्यो।कल्प्य
कत्वात्।आधानोत्तरंद्वादशरात्रंस्वयंहोमःपर्वणिचाद्वादशरात्रंनस्वयंहोमीस्यात्।स्वयं
होमश्चपर्वणीतिसूत्रणात्।अन्यदाशिष्यादिभिः।पुत्रोभ्रातेतिवक्ष्यमाणत्वात्॥ ॥इति ३३
।७। तृतीयःखंडः॥ ॥उत्थायप्रातराचम्याहरहःस्वाध्यायमधीयीत॥प्रातःशब्दोत्रब्राह्ममुहूर्त्तपरः

प्रातःब्राह्मेमुहूर्त्तेउत्थायशौचाचारादिक्रियांनिर्वर्त्यविधिपूर्वकंआचम्यअहरहःप्रतिदि
नंस्वाध्यायमधीयीतपठेत्।ब्राह्मेमुहूर्त्तेचोत्थायचिंतयेदात्मनोहितमितियाज्ञवल्क्यः।रात्रेः
पश्चिमयामार्द्धोब्राह्ममुहूर्त्तः।असंयुक्तविधीयमानत्वात्ब्राह्मणक्षत्रियविशांइदंअध्य
।८। यनं।किमध्ययनंइत्यतआह।ॐअघानोदेवसवितरितिद्वेअपेहिमनसस्पतइतिसूक्तं।ऋतं
चसत्यंचेतिसूक्तमादित्याअवहिरण्यतेतिसूक्तंशेषइंद्रश्रेष्ठानीत्येका।हंसःशुचिषदित्येका
नमोमहद्भ्यइत्येका।यतइंद्रभयामहइत्येका।ध्रुवंस्वस्यइत्येका।योमेराजन्नित्येका।ममाग्नेवर्च
इतिसूक्तं।स्वस्तिनोमिमीतामितिचपंच।अयंजपऋष्यादिदेवतछंदोज्ञानपूर्वकः।अविदि
त्वाऋषिंछंदोदैवतंयोगमेवच।योध्यापयेज्जपेद्वापिपापीयाञ्जायतेतुसइतिवचनात्।तद्येत

ज्ञानमृतेश्रोतेत्यारभ्यपापीयान्भवतीतिविज्ञायतइतिशौनकोक्तत्वात्स्वप्नऋषिर्दैवतछंदांसि
सर्वत्रोच्यंतइति।अद्यानोदेवसवितरित्यनयोः श्यावाश्वः सविता गायत्री।अपेहीतिपंचर्च
स्यसूक्तस्यप्रचेतादुःस्वप्नघ्नोनुष्टुप्तृतीयात्रिष्टुप्पंचमीपंक्तिः।आदित्याअवहिस्वतेतिअष्ट
र्चस्यसूक्तशेषस्यत्रितआदित्याअंत्यानांमुषाअपिवा।महापंक्तिः।इंद्रश्रेष्ठानीत्यस्यागृत्समद पंचा
इंद्रस्त्रिष्टुप्।हंसःशुचिषदित्यस्यावामदेवः सूर्योजगती।नमोमहद्भ्यइत्यस्याःशुनःशेपो
विश्वेदेवास्त्रिष्टुप्।यतइंद्रभयामहइत्यस्यागर्गइंद्रोबृहती।अद्यःस्वप्नस्येत्यस्याःकक्षीवा
न्दुःस्वप्ननाशनोगायत्री।योमेराजन्नित्यस्यागृत्समदोवरुणस्त्रिष्टुप्।ममाग्नेवर्चइतिनव ३४
र्चस्यसूक्तस्यविश्वेदेवास्त्रिष्टुबंत्याजगती।स्वस्तिनोमिमीतामितिपंचर्चस्यसूक्तस्यशेषस्यस्व

वर्ग ३

वि इ खो १

विश्वेदेवा

स्त्यात्रेयः [illegible] आद्यास्तिस्रोजगत्यस्त्रिष्टुभोवांत्येअनुष्टुभौ।वाशंमहीतिचजप्त्वाप्राप्नोत्यारो
ग्यमेवच।दुःस्वप्नघ्नीःपराजप्त्वाप्रातःपापैःप्रमुच्यते।इत्यादित्याअवहिस्वतेत्यस्याःफलं।
हंसःशुचिषदित्यृचाशुचिरीक्षेद्दिवाकरं।अंतकालेजपन्नेतिब्रह्मणःसद्मशाश्वतं।
फ ७४ हंसइत्यस्याः।यतोभयंविजानीयात्तस्यांदिशियतव्रतः।शुचौदेशेग्निमाधायजुहुयादिंद्रसर्पि
षा।यतइत्याज्यमुत्सृत्यषड्भिर्गंधान्निवेद्यच।पायसंदधिमंथंवापूपान्वाप्युपहारयेत्।अहोत्रमु रा ५
पोष्यैकंतिलान्वाघृतमेववा।यतइत्यस्याः।अद्यस्वप्नस्येतिजपेत्प्रातःप्रातर्दिनेदिने।दुःस्व
प्नंनुदतेक्षिप्रंनवास्याह्नोजनाद्भयं।अद्यस्वप्नस्येत्यस्याः।योमेराजन्नितीमांतुदुःस्वप्नशमनी
मृचां।जप्त्वानाशयतिक्षिप्रंदुःस्वप्नंब्राह्मणःशुचिः।योमइत्यस्याः।ममाग्नेवर्चइत्येतत्सर्वका

प्रातराहुतेः पश्चात्तर्पणादर्वाग्वैश्वदेवांते वा कुर्यात्। स्वचार्याक्तर्पणात्कार्यः पश्चाद्वा ५

मेजपेद्द्विजः। जुहुदाज्यमनेनैव सर्वान्कामानवाप्नुयात्। ममाग्न इत्यस्य। स्वस्त्यात्रेयं जपे
त्रिसंप्रातः प्रातर्द्विजः शुचिः। एतत्स्वस्त्ययनं पुण्यं सर्वकल्मषनाशनं। सुहृदं शौनकं चैव गच्छं ३२
तमनुमंत्रयेत्। स्वस्ति पंथामिति प्रोच्य स्वस्तिमान्व्रजते ध्वनि। इति स्वस्ति न इत्यासां। पाठक्र
मेण स्वविधानोक्तं फलं। चकारादायुःकराणि आ नो भद्रा इत्यादि जप्यानि। अथवा चशब्दो ब्र
ह्मयज्ञानुकर्षणार्थः। स च ब्रह्मयज्ञः प्रातराहुतेः। वैश्वदेवावसाने वा नान्यदंते निमित्तकाल ति ५
इति बृहस्पतिः। ब्रह्मयज्ञशब्देन नित्यं अध्यायं वानुवाकं वा सूक्तं वा मंत्रं वा वर्द्धमानं एवं
तं अनुवाकोथ सूक्तं वा ऋग्ध्यादिज्ञानपूर्वकमिति कारिका ब्राह्मणोपनिषदां सह। मंत्रब्रा ३५
ह्मणयोर्वेद इत्युक्तत्वात्। अथवा ॐकारं व्याहृतीस्तिस्रः सावित्रीं च तदित्यृचं शं नो मित्रः

शं नो मित्रः स्वस्ति न इंद्रः सुता सोम हृचं जपे शं नो मित्रः स्वस्ति न इंद्रः सुता सोम हृचं [illegible]
प्रणवः। व्याहृतयस्तिस्रः। गायत्री १ [illegible]

प्रणवः व्याहृतयस्तिस्रः गायत्री १

४ इति चतुर्थः खंडः ४

ऋं वरुणः स्वस्ति न इंद्रो वृद्धश्रवाः सुता सोम मधुमत्तमा इत्येतान्वो जपेत्। अग्निमीलइ
ति सूक्तं च। वेदादिं समुपक्रमेदिति स्वविधाने। अंतेप्येतान् जपेत्। मंत्रं जपित्वा यज्जपेद्ध्या
यं तु पुनः क्रमादिति कारिका। इति ब्रह्मयज्ञस्थाने। आदावारभ्य वेदं तु स्वात्वोपर्युपरि क्र
मात्। यदधीतेन्वहं शक्त्या स स्वाध्याय उदाहृत इति योगीश्वरः। चत्वारः पाकयज्ञा हुतोहुतः १०
प्रहुतः प्राशित इति। पच्यते भूत्यहं यस्मिन् असौ पाकः। तत्र यज्ञाः पाकयज्ञास्ते चत्वारः। अ
प्रकारा भवंति। ते के इत्यपेक्षायां हुतः अहुतः प्रहुतः प्राशित एतन्नामकाः। हुतादीनां च
तुर्णां लक्षणं छत्रामिरखे डेवहृपते हुतोग्निहोत्रेणेत्यादिना। एते चत्वारो हुतादयो वैश्वदेव
कर्मणा साग्निकस्य प्रत्यहं अनुष्ठिता भवंति। ब्रह्मयज्ञश्च पंचमः। एवं पंचमहायज्ञनि

ष्यंतिः साग्निकस्य। बलिकर्म स्वधाहोमः स्वाध्यायातिथिसत्क्रियेति याज्ञवल्क्यः। अथातः
पंचमहायज्ञाः स्तुपक्रमन्ता नेतान् हरहः कुर्वीतेति निगमः। महायज्ञेष्वयज्ञेश्च श्राद्धीयं
क्रियते तन्नुशिति मनुस्मरणात्। पंचसूनागृहस्थस्य वर्त्तंते हरहः सदा। कंडनी पेषणी चु
ल्ली जलकुंभ उपस्करः। एतानि वाहयन् विप्रो बध्यते वै मुहुर्मुहुः। एतासां पावनार्थाय पंच
यज्ञाः प्रकीर्तिताः। सूना हिंसास्थानं। उपस्करः शूर्पादिः शेषं सुगमं। अध्यापनं ब्रह्मयज्ञः
पितृयज्ञस्तु तर्पणं। होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनं इति मनुः। आकाशात्तु कृत्या
दपीति वक्ष्यमाणत्वात् यथाकथंचिद् गृहस्थैः पंचमहायज्ञा नित्यं निर्विधेयाः। पंचसु बहिः शा ३६
लायां विवाहे चूडाकरणे उपनयने केशांते सीमंतोन्नयन इति। पंचसु कर्मसु बहिः बाह्यः

न २

ग्निर्मंडपेऽपोदि व्यतरति। विवाहइत्यक्त्वादिवाहो गार्ग्नतेग्रहवैश्यपकर्मणि नित्यधारणापहे विवाहाग्निरेव रूवति। गृहप्रवेश
तो निहृत्तिसूचनार्थः। पंचकर्मव्यतिरिक्तेकर्मणि आवसथ्याग्निरिति नियमः। प्रतिश्रुतादान्यनं गत्वा ह्यौक्रियानतावेच

लौकिकाग्निर्ग्राह्यः। पंचव्यतिरिक्तेषु कर्मसु शालाग्निर्विधेयः। तानि कानीत्यत आह। विवाहे
परिणयने। चूडाकरणे क्षौरकर्मणि। उपनयने मेखलाबंधने। केशांते गोदानकर्मणि। सी
मंतोन्नयने गर्भसंस्कारे। तानि च विवाहादीनि पंच कर्माणि शालायां मंडपे एव कार्याणि न
बहिः। कारिका। विवाहादिषु बाह्योग्निं प्रणीय। पूर्वेषु चैव रूप्यदेशःस्तु कं ततः उपलिप्ते
गोमयादकाभ्यां उद्धृते स्फोनस्त्रुवेण वा अवोक्षिते उदकेन उत्सिक्ते एवंविधे भूप्रदेशे अग्निं
१०। प्रणीय लौकिकमग्निं प्रणीय वक्ष्यमाणं कं कुर्यात्॥ निर्मथ्यो केविवाहे। एके आचार्याः विवा
हे कर्मणि अग्निं निर्मथ्य वक्ष्यमाणं कं कुर्यात्। निर्मंथनपक्षे अरणिर्विधेया। अरणिलक्ष
णं दृष्टं प्रदीपे। अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः। तस्य या प्राङ्मुखी शाखा वोर्दी

एतत्विवाहाग्निपरि
ग्रहप्रकरणस्य वृत्तिः

शीघ्रादिवतदं गां जिंगानौ जवैहिदिविका दिक्काः। इतिकर
प्रति नादि दोसंपि विवाहाग्निर्नैसं स समस्तिका
विकार्या उपवितिस उद्वृत्ताधोरिति ८

स्वधि उपि नार्धिव।

वीवाङ्गापिवा। अरणिस्तन्मयी प्रोक्ता तन्मध्ये वोत्तरारणिः। सारवद्दारवं चात्रमोवेलीव
प्रशस्यते। संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते। अलाभे त्वशमीगर्भाद्धरेदेवाविलं। बे
तः। चतुर्विंशतिरंगुष्ठा दैर्घ्यं चापि षडंगुलं। चत्वार उच्छ्रयो मानमरण्योः परिकीर्तितं। अ
ष्टांगुलः प्रमंथः स्याच्चात्रं स्याद्द्वादशांगुलं। ओविली द्वादशैव स्यादेतन्मंथनयंत्रकमिति।
अश्वत्थशमीगर्भोरणीप्रयच्छत्यनादेऽगर्भस्येति कात्यायनः। तथाप्यर्वणपरिशिष्टे यज्ञमा ४५
नोरणिरिति वदंत्येके विपश्चितः। तत्प्रधानाः क्रियाः सर्वा यत्तस्मात्पितथैवहि। प्रथमे मूलपङ्क्ता ३९
गपादौ जंघेति कीर्तितं। द्वितीये जानुनी चोरू तृतीये श्रोणिरुच्यते। चतुर्थे जठरं सांगं ग्रीवा चै
व तु पंचमे। षष्ठे शिरः समाख्यातं अंगान्येतानि निर्दिशेत्। मथिते पादजंघे च पिशाचः संप्रजा

यते। जानुनोश्च तथा चोर्वोरात्कः सर्वं प्रयाति हि। श्रोण्यां च सर्वकामाः स्युर्जठरे तु तथा स्मृ
ता। उरस्यमित्रा ग्रीवायां मृत्युः शिरसि वेदना। श्रोण्यामेवातश्छंति निर्दोषा कीर्तितायतः।
तथा विज्ञपश्चात्पुत्रान्स्वर्गमायुः प्रियं सुखं। प्रथमं मंथनं श्रोण्यामाधाने च विशेषतः। इतराणि
यथेष्टं हि ग्रीवां सर्वत्र वर्जयेत्। त्रीण्यंगुलानि त्यक्त्वादौ तथाच्चत्वारिश्चांततः। मध्ये देवाः स्थिता
स्तस्माद्दक्षिणतश्चैव मंथयेत्। अनुलोमा नवे योनिः पार्श्वभेदो न विद्यते। आनुलोम्येन मथितः
सर्वान्कामान्प्रयच्छति। मूलादंगुलमुत्सृज्य त्रीणि त्रीणि च पार्श्वयोः। देवयोनिस्तु विज्ञेया तत्र
मथ्यो हुताशनः। मूलात्पस्कांगुलान्यष्टावग्रात्तु द्वादशैव हि। अंतरं देवयोनिः स्यात्तत्र मथ्यो हु
ताशनश्च इति। एवं निर्मथ्य वक्ष्यमाणं कुर्यादिति केषांचिन्मतं न तु आचार्याणां। अत्रारणिप्र

उदगयनादनां विसमासकरणं विस्पष्टार्थं ।
तथा चन्द्रांतरं सार्वकालिकं कर्मत्वविवाहमिच्छंति । २

दानं यदध्वर्युः कुरुते क्वचित् । मतं तत्र तु यज्ञस्य मथितं सोत्र नेच्छति इति कारिका । भार्यापरि
।६७। ग्रहे कालनियमाद्यर्थमाह । उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्यै पाणिं गृह्णीयात् ॥
उदगयने उत्तरायणे आपूर्यते चंद्रस्य कला अस्मिन् पक्षे असौ आपूर्यमाणपक्षः शुक्लपक्षः
तत्र पुण्याहे पुण्यदिवसे विष्टिव्यतीपातादिरहिते एवंविधे अहनि कुमार्यै पाणिं हस्तं गृह्णी
यात् । कुमार्यै इत्यत्र षष्ठ्यर्थे चतुर्थी । व्यत्ययो बहुलमिति सूत्रात् । कुमार्याः पाणिं गृह्णीया
दिति । तथा च रत्नमालायां । नाषाढप्रभृति चतुष्टये विवाहो नो पौषे न च मधुसंज्ञिते विधेयः ।
नैवास्तंगतवति भार्गवे न जीवे वृद्धत्वेन खलु तयोर्न बालभावे । आद्यगर्भदुहितुः सुतस्य वाज्ये ३८
ष्ठमासि न हि पीडनं मतमिति । तथा नक्षत्राणि । मूलमैत्रमृगरोहिणीकरैः पौष्णमारुतमघो

त्तराश्वितैः । निर्विधातिरुडुभिर्मृगीदृशां पाणिपीडनविधिर्विधीयते । अष्टवर्षा भवेद्गौरी
नवमे नग्निका भवेत् । दशमे कन्यका प्रोक्ता अत ऊर्ध्वं रजस्वला । तथा । सप्तवर्षा भवेद्गौरी नव
वर्षा तु रोहिणी । दशवर्षा भवेत्कन्या कुमारी साभिधीयते इति । एवंविधायाः कुमार्याः पा
णिग्रहो विधेयः । इदं च वैवाहिकं कर्म सूतकेपि भवति प्रतिरक्षतारहितं । कारिका । पाणिं
कुमार्या गृह्णीयात् सूतकेपि च शास्त्रतः । अपि प्राप्तिश्रुतमृते शेषमंते न वेदतः । तथा च वि
ष्णुः । अनारब्धविशुद्ध्यर्थं कूष्मांडैर्जुहुयाद्घृतं । गां दद्यात्पंचगव्याशी ततः शुध्यति सूत
की । पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते इत्यनेन सवर्णायाः पाणिग्रहणं विधेयं । न
त्वन्यवर्णायाः । एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः । यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्

न प्रिय इति याज्ञवल्क्यस्मरणात्। तर्हि सवर्णा पाणिग्रहण एवाधिकारात् शूद्रैव नार्या
शूद्रस्य सा च स्वा च विशः स्मृतौ ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मन इत्यस्य का गतिरि
त्यत्राह। शूद्रावेदी पतत्यत्रेरुचथ्यतनयस्य च। शौनकस्तु सुतोत्पत्त्या तदपत्यतया भृगोरि
त्यनेन वचनेन शूद्रायाः परिणेता पततीत्यत्रेर्दीर्घतमसो गौतमस्य च मतं। शौनकस्तु तस्या
मपत्यमुत्पाद्य पतति तो न वतीत्याह। भृगुस्तु तस्यामपत्यं तस्याप्यपत्यमुत्पाद्य पतति तो न वती
ति। भृगुशौनकयोर्मते शूद्रा स्मृतौ नोपगच्छेदिति मतं। अत एव हीनजातिं स्त्रियं मोहादुद्वहंतो
द्विजातयः। कुलान्यकुलतां यांति ससंतानानि हीनतामिति हीनकुलत्वापत्तेः सवर्णाया एव ३९
।छ। विवाहः। या लक्षणसंपन्ना स्यात्तां या कन्यालक्षणैरक्रूरनाथित्वादिभिः संपन्ना युक्ता स्या

त्तनवति तामुद्वहेत्। अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्। अनन्यपूर्विकां कांतामसपिंडां
यवीयसीं। अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजामिति याज्ञवल्क्यः। यस्या अन्यात्ममंगा ।छ।
नि स्युः। यस्याः कन्यायाः अन्यात्मं आत्मानं हृदयमनिलक्षीकृत्य इति अभ्यात्मं अंगानि पादादी
नि उन्नतानि स्युस्तामुद्वहेत्। आत्मशब्देन हृदयं यतस्तत्रानुभूयते। हृदयाभिमुखानीवयस्
अंगानि मुग्नितः। कंधरा नो त्रिरंगुष्ठाबुन्नरोष्टश्च नासिकेति कारिका। समाः केशांताः तथा यस्याः ।छ।
केशांताः केशानामंताः अग्राणि समाश्च कुटिला यस्याः तामुद्वहेत्। आवर्त्तोव पियस्येस्यातां ।छ।
प्रदक्षिणो ग्रीवायां। यस्या इति षष्ठ्यर्थे चतुर्थी। यस्याः कन्यायाः ग्रीवायां आवर्त्तो भ्रमरो प्रदक्षि
।छ। णो प्रादक्षिण्येन न वेत्तां तामुद्वहेत्। षड्वीराञ्जनयिष्यतीति विद्यात्। या कुमारी एनिर्लक्षणैरु

न्यैश्च सामुद्रिकोक्तैर्युक्तान्नवति सार्ष्टवीरान् षट्संख्याकान्वीरान्पुत्रान्जनयिष्यतीति विद्या
तज्जानीयात्। सामुद्रिके च। हस्तौ पादौ परीक्षेत अंगुलीयमुखानि च। पाणिरेखा च जंघे च क्रूरूयु
ग्मौ तथैव च। जंघे चोदरपृष्ठे च स्तनौ कर्णौ द्विजौ तथा। वक्त्रं समस्कं ललाटं च शिरः केशास्तथैव च।
रोमराजी स्वरो वर्णः प्रकृतिश्चलनं तथा। एतत्सर्वं परीक्षेत सा कन्या गृहमंडनं। पादौ समांसलौ
स्निग्धौ भूम्यां वै च प्रतिष्ठितौ। सुकोमलौ चरणौ चैव षट्पुत्रान्सुषुवे तु सा। इति कन्यालक्षणं
विज्ञाय विवाहं कुर्यात्॥५॥ ॥इति पंचमः खंडः॥ भार्यामुपग्रहीष्यमाणो नृक्षरा इति वरका ४०
न्या इत्यनुमंत्रयते॥ जायां स्त्रियं उपग्रहीष्यमाणः उपगृहीतुमिच्छुः पुरुषो वरः अनृक्षरा इत्यने
न मंत्रेण वरकान् पित्रादीन् अनुमंत्रयते। कीदृशान् कन्यावरणार्थमभिगच्छतो गमनं कर्तुं प्रव

तान्। अनुमंत्रणं नाम आलोकनं। क्वचिदालोकयन्नपीति कात्यायनोक्तेः॥ तान्गच्छ[illegible]नान्दृ
ष्ट्वा अनृक्षरा इत्यनुमंत्रं वरो जपेत्। अनृक्षरा इत्यस्याः सूर्या देवा त्रिष्टुप्। अनृक्षरा [illegible]
(७) सन्तु पंथाः॥७॥ अभिगमने पुष्पफलयवानादायोदकुंभं च॥ कन्यावरणार्थमभिगमने व
मनविषये पुष्पाणि मल्लिकादीनां स्रजः फलानि नालिकेरप्रभृतीनि। सुखभक्षिका वा य
वान् उदकुंभं उदकपूर्णकलशं आदाय गृहीत्वा चकारात् कन्यापरिधानयोग्यं वस्त्रं आभर
णानि च गृहीत्वा कन्यावरणार्थं वरपित्रादयो गच्छेयुरिति वाक्यशेषः। अयमहं भो३ इति त्रिः ४१
प्रोच्य। ततो वरपित्रादयः साचार्याः कन्यादातृगृहं गत्वा मंडपे स्थित्वा इति त्रिः कथयंति वर
पिता। अयं अमुकशर्मा अहं भो३ इति त्रिः आत्मानं कथयति। अर्हणा वः। कन्यादातुर्गृहे

पं१

कौतुकदर्शनार्थमन्येपिजनाआयांतितद्विवेकार्थमात्मनामकथनं।यस्मैनवताकन्यादान
मुद्दिष्टंसममपुत्रोममभ्रातावाइत्येवंविवेकार्थकथनं।अयंनोयमहंनोस्तित्रिरित्यादुःख
नामतत्प्रतिकारिका।उश्चैर्न्यायश्वश्वेदइत्युक्तत्वादुच्चैःकथनं।दूरादाह्वानेटे:प्लुतउदात्तइत्यु
।८। क्तत्वात्।उदितेप्राङ्मुखाःगृह्याःप्रत्यङ्मुखाआवहमानागोत्रनामान्यनुकीर्तयंत:कन्यांव
रयंति।उत्तरांदैवेप्राचीमेवैकइतिवक्ष्यमाणस्यनिषेधमाह।ततःकन्यापक्षीयैरस्मत्कन्या
नवहरायदेयाइतिउदितेउक्तेसतिगृह्याःगृहेनवागसाः।कन्यापक्षीयाःसर्वेपिबालस्त्रीवृ
द्धसहिताःप्राङ्मुखाउपविशंति।आवहमानाःकन्याह्वानमिच्छंति।वरपक्षीयाःसर्वेपिप्रत्य ५१
ङ्मुखाःपश्चिमाभिमुखाउपविशंति।एवंउभावपिपक्षौउपविशतः।आसीनन्यायंबाहुल्य

मितिसूत्रितत्वात्।सर्वैरप्येस्वस्तिकवद्भवनेप्राङ्मुखास्तदाभवंतिकन्यादातारःप्रदेशेसप
५२ रिग्रहाःप्रत्यङ्मुखाश्चवरकाःसाचार्याभवंतिति।तेसर्वेउपविष्टाःस्युरितिकारिका।एवंउप
विष्टपगोत्रनामानिवरकाःअनुकीर्तयंतःकन्यांकमनीयांवरयंति।एवंगोत्रनामानुकीर्त
नं।अमुकगोत्रःअमुकामुकशर्मावरःअमुकगोत्राःवरस्यपितृपितामहप्रपितामहाःअमु
कामुकशर्माणःअमुकगोत्राःवरस्यमातामहप्रमातामहवृद्धप्रमातामहाःअमुकामु
कशर्माणःइत्युक्त्वाईदृग्विख्याततविशुद्धोन्वयकुलायास्मदेरायकन्यांदत्तइत्युक्तेकन्याप
क्षीयैःअस्माभिरुपस्थितेलग्नेविकलेंद्रियायापापायवरायकन्यांदास्यतइत्युक्तेवरपक्षीयाः
सर्वेपिब्रूयुः।नवक्ष्दिीयमानाइयंकन्याअस्मत्कुलवृद्धयेनवतुसाचकन्याआदेयः।अन्

तनोतु।नवत्वेवमियंकन्यायास्माकंकुलवृद्धये।नवद्भिर्दीयमानासातनोतुस्तुनमानयोरि
तिकारिका।एवंकन्यांवरयंति।अत्रगोत्रानुकीर्त्तनंसगोत्रनिवृत्त्यर्थं।नामकीर्त्तनंसप्तपुरुष
ख्यापनार्थं।पितृतःसप्तपुरुषादूर्द्ध्वं।मातृतःपंचमादूर्द्ध्वं।पंचमात्सप्तमादूर्द्ध्वंमातृतःपितृतस्तथे
७ तियाज्ञवल्क्यस्मरणात्॥७॥ततःयातोरुचितेपूर्णपात्रीमभिमृशंतिपुष्पाक्षतफलयवहिरण्य
मिश्रामनाधृष्टमस्यनाधृष्यंदेवानामोजोनभिशस्त्यभिशस्तिपाः।अनभिशस्तेन्यमंजसा स
त्यमुपगेषंसुवितेमाधाइति।ततःवरपक्षतःकन्यापक्षतःरुचितेअभिमतेकन्यादात्रा
तववराय।विकलेंद्रियायापापायकन्यांदास्यामिइत्युक्तेअभिमतेसतिवरपक्षीयाःकन्यापक्षी ४२
यास्वपूर्णपात्रींउदकुंभस्थांपरस्परमैकमत्यार्थंअद्रोहायचअभिमृशंतिस्पृशंतिअनाधृ

पक्षौसुवर्णादिधातुनिर्मितांवंशपात्रींवाभिमृशंतः।कीदृशींपात्रीं।पुष्पाणिश्वेतानिमाल
त्यादीनि।अक्षताफलानिअक्षतानिफलानिअन्यानिफलानिनालिकेरादीनि।यवाःप्रसिद्धाः।
हिरण्यंसुवर्णंतन्मयानि।आभरणानिकंठाभरणादीनितैर्मिश्रांयुक्तां।एवंविधांपूर्णपात्रीं
अनाधृष्टमित्यारभ्यमाधाइत्यंतेनमंत्रेणअभिमर्शनंकुर्वंति।आसीनंन्यायंबाह्वभ्यामितिव
चनात्सर्वेउपविष्टाएवोत्तरेन्यायस्थर्वेदद्युकुलादुत्तरतःपार्श्वेकुर्वतोभिमर्शनंकुर्युः।इतिकर
७ णस्वमंत्रांतइतिवचनादितिकरणं॥८॥आनःप्रजामितिकन्यायाआचार्यउत्थायमूर्द्धनिकरो
तिप्रजांत्वयिदधामिपशूंस्त्वयिदधामितेजोब्रह्मवर्चसंत्वयिदधामीति॥आचार्यःप्रत्यङ्मुखः
आगारायणंग्राहयिताउत्थाय।वचनात्स्थानमितिसूत्रितत्वात्।तिष्ठन्नकन्यायाःप्राङ्मुख्याःमू

र्द्धनि उत्तमांगे पूर्वोक्तां तां पूर्णपात्रीं आ नः प्रजामिति मंत्रेण करोति। स्थापयति तथा प्रजां। [illegible] स्तेन
इत्यादिभिस्त्रिभिर्यजुर्भिरसंधितैस्तथैव मूर्द्धनि कन्यायां आचार्यः करोति। एको मंत्रस्तु नैनेतां स्थि
तः प्रत्यङ्मुखो गुरुः न्यसेन्मूर्द्धनि कन्यायाः प्राङ्मुख्याः पूर्णपात्रिकां। एकेनैवेति शब्देन मंत्रांत
ज्ञापनं भवेत्॥ इति द्वित्वान्न संदध्याद्दृष्टं चेद्यजुषा सहेति कारिका। आचार्य आचारं ग्राहयत्या चि
नोत्यर्थानाचिनोति बुद्धिमिति वेति यास्कः। उपनीय ददद्वेदमाचार्यः स उदाहृत इति याज्ञवल्क्य
स्मरणात्॥ सूर्या विवाहस्तुतिर्जगती॥ आ नः प्रजां जनयतु प्रजापतिरित्यनियताक्षरं यजुः॥ ॥
इति षष्ठः खंडः॥६॥ प्रतिश्रुते जुहोति। जायामुपगृहीष्यमाण इत्यनुवर्तते। प्रतिश्रवणं प्रति
श्रुतं तस्मिन्सति कन्यादात्रा वरपक्षाय [illegible] प्रतिश्रुणोति प्रत्याचष्टे वेति कल्पसूत्रात्। जुहोति ४२

प्रतिश्रुते प्रं गीसते प्रतिवरो जुहोति नीत दक्षिणाना मन्यत म इति [illegible] १

ति १ तुक्ते सर्पिः प्रतीयेते न्यायात्। न स्थालीपाकं तत्कथं जुहुयादित्यत आह॥८॥ चतुरस्रं गोमये
न स्थंडिलमुपलिप्य। चतुरः अस्रयः कोणा यस्मिन् ईदृशं स्थंडिलं हस्तोन्मितं रत्निमात्रं वरं तस्या
दाश्वलायनगृह्यत इति कारिकोक्तेः। ततः गोमयेन गोः पुरीषेणोपलिप्य उपलेपनं कृत्वा ततः सु
मनाः शुचिः शुद्धोऽ इति पूर्वोक्तं कृत्वा ततो गोमयेनोपलेपनं विधाय ततः दक्षिणान्यायानि पित्र्या
णीत्यस्यापवादः॥९॥ पूर्वयोर्विदिशोर्दक्षिणां प्राचीं पित्र्ये पूर्वं दक्षिणां च पूर्वां तु राच। पूर्वे
दिशौ तयोः आग्नेयी ऐशानी च तयोर्या दक्षिणा पूर्वा आग्नेयी तां पित्र्ये कर्मणि। मासि मासि पितृ
भ्यो दद्यादित्यादौ प्राचीं पूर्वां कल्पयेत्। आग्नेय्यां पितृकर्माणि विधेयानीत्यर्थः। आग्नेय [illegible] दि
पितृलोकस्य द्वारमिति श्रुतेः। प्राङ्न्यायानि दैवकर्माणीत्यस्यापवादमाह॥१०॥ [illegible] देवे।

पूर्वयोर्विदिशोरित्यनुवर्त्तते। पूर्वयोर्विदिशोर्या उत्तरा ऐशानी तां दैवे कर्मणि होमादे[illegible]ल्य
येत्। शौ[illegible]याणि दैवकर्माणीत्यस्यापवादः। ऐशान्यां दिशि दैवान्यीशानीति कठाः। [illegible] दैवे
दैवे इत्यनुवर्त्तते। एके आचार्याः दैवे कर्मणि प्राचीमेव प्राचीमिच्छंति। एवकारकरणादाचार्यस्य
यमेवेष्टतरं पक्ष इत्यध्यवसीयते प्राङ्मुखायानि दैवकर्माणीति सूत्रितत्वात्। प्राग्यज्ञस्ता[illegible]
च उपवास्मिन्नासीनाजुह्वतीति श्रुतेः॥ ७॥ उदक्संस्थां मध्ये लेखां लिखित्वा। पंचभूसंस्कारान्त[illegible]
ज्ञे३ तिसंमार्जनमुपलेपनं चोक्त्वा उल्लेखनविधिमाह दैवे इत्यनुवर्त्तते। मध्ये गोमयोपलिप्तस्थंडिल
मध्ये उदक्संस्थानं स्थितिर्यस्याः सा तां लेखां लिखित्वा प्रादेशमितां खड्गेन सा[illegible] ४५
नौस्रुवेण ततः स्फ्येनोल्लिखतीति श्रुतेः॥ कारिका। उदीच्या उपरिष्टात्तु सर्वाः प्रादेशसंमिताः सप्त

न लेखास्तु तत्र स्युर्लेखासु स्फ्यस्य दर्शनादिति॥ ८॥ तस्यै दक्षिणत उपरिष्टादूर्ध्वमेकां मध्य
एकामुत्तरत एकां। लिखितेत्यनुवर्त्तनीयं। तस्या इति षष्ठ्यर्थे च तुर्थी। तस्याः लेखायाः उपरिष्टा
त् उपरिभागे दक्षिणतः दक्षिणत आरभ्य ऊर्ध्वं पश्चादारभ्य प्राक्संस्थां रेखां कुर्यात्। ततस्तस्यै
व मध्ये एकां तथैवोत्तरत एकां लेखां लिखित्वा एवमुक्तप्रकारेण उत्तरायामेकां लेखां कृत्वा त
दुपरि प्रागग्रं प्रादेशमितं लेखात्रयं कुर्यात्। ततस्ताभ्यो लेखाभ्य एकैकशः पांसून् प्रांशं समुद्
ईर्म्प्रति. रेत्। पांसून् प्रांशं समुद्धृत्य ताभ्य एकैकशः क्रमात् इति कारिका। ततः॥ ९॥ ता अभ्युक्ष्य ताः स्फ्या
दिना कृतास्ताः [illegible] लेखास्तंत्रेण उदकेनाभ्युक्षयन्त्र्यभ्युक्षणं कृत्वा। तंत्रेणाभ्युक्षणं कृ[illegible] का
रिका। ततः॥ अग्निं प्रणयामि मनसा शिवेनायमस्तु संगमनो वसूनां। मा नो हिंसी[illegible]मा
७२
तस्रो २

वामदेवोत्रिरिशुषु १२

कुमारं शान्नोभवद्विपदेशंचतुष्पदइत्यग्निंप्रणीयाएवंपंचभूसंस्कृते प्रदेशे यत्रयत्र [illegible] रा
वसथ्याख्यो लौकिकोवातंतमग्निंअनेनाग्निंप्रणयामीत्यादिनाचतुष्पदेइसंतेनआग्नि [illegible] गीर
स्थाप्य। ततः॥७॥तूष्णींवा॥ वाशब्दो विकल्पार्थः अथवातूष्णीमेवामंत्रकमेवअग्निस्थापनंविधेयं॥
प्रदक्षिणमग्नेःसमंतात्पाणिनासोदकेनत्रिःप्रमार्ष्टितिसमूहनमित्याचक्षते। दैवेकर्मणिप्रद
क्षिणं प्रादक्षिण्येनाग्नेःसमंतात्सर्वतःसोदकेनउदकयुक्तेनपाणिनादक्षिणहस्तेनत्रिःवारत्रयं
मार्ष्टिमार्जयतितत्समूहनंइतिआचक्षते। वदंतियाज्ञिकाइत्यर्थः तस्मात्परिसमूहनमित्ययमं
त्रोनभवति। अपितुत्रिःशोधनप्रापकःकलापः यत्रहोमस्तत्रत्रिःशोधनंभवति। परिसमुह्य ५
होष्यन्निति कल्पेवक्ष्यति। ईशानकोणादारभ्यप्रादक्षिण्येनेशानकोणपर्यंतंसमूहनंविधेयं।

पारिसमूहनादिकं ४

इति
अग्नेःसमंतात्रिर्मार्ष्टिदृष्टार्थंगर्हिःप्रदक्षिणमितिकारिका। ईशानाद्यप्रदक्षिणंपिंडपितृयज्ञप्रक
ति रणेकारिका। विपर्यस्यपित्र्येषुतुसकृद्दक्षिणाचेतिकात्यायनसूत्रोक्तेः॥८॥सकृदपसव्यंपित्र्ये।
एतदुक्तंपित्र्येकर्मणिसर्वपदार्थजातंसकृत्एकवारंभवतिअपसव्यधर्मेण। पितृकर्मणिएत
देवखाकरणादिकमप्रादक्षिण्येनभवति। एतदेवेशानकोणादारभ्यअप्रादक्षिण्येनेशानको
णपर्यंतंविधेयं [illegible] दक्षिणान्यायानिपित्र्याणीतिधर्मात्। एतदेवसकृत्पित्र्येस्यात्कर्मण्यप्रद
क्षिणंइतिकारिका॥ ॥सप्तमःखंडः॥ ॥अथपरिस्तरणं अग्नेस्थापनानंतर्यार्थः अग्नेःसंस्कारकथ
नानंतरंप्रधानाहुतिसंस्कारनिमित्तमग्नेःस्तरणंभवति। नब्राह्मणःननूक्तेस्तरणेदक्षिण
तोब्रह्मणःप्रतिष्ठाप्येत्यग्नेसूत्रंवर्ततेतत्कथं। सत्यं। सव्येनकुशानादायेतिस्तरणंशोधप ति

दक्षिणाभिमुखः ४

देशात्ब्रह्मणिस्थापितेस्तरणंभवतीतिविज्ञायते।तस्मादग्नेःसमंततएकैकयाकुश्यापिंजू
ल्यास्तरणंवतस्पष्टुदिक्षुब्रह्मादीनामासनदानेचेतितदेवंपरिस्तरणं॥८॥प्रागग्रैःकुशैःप
रिस्तृणातित्रिवृत्त्वंचवृद्धा।प्राक्प्रांविस्त्रग्राणियेषांतेतथोक्तैःकुशैर्बर्हिर्भिःत्रिवृत्त्रेधावि
भज्यपूर्ववद्वापंचधावाविभज्यपरिस्तृणाति।परिस्तरणंवक्ष्यमाणक्रमेणकुर्यात्।वेदिं
स्तृणातिपूर्णमृदसमितित्रिवृद्दितिकात्यायनंकौशंबर्हिरितिकात्यायनोक्तत्वात्कुशैरित्युक्तं
॥८॥पुरस्तात्प्रथममथपश्चाद्दथपश्चात्प्रकरणवशात्अग्नेःपुरस्तात्पुरोभागेत्रेधावि
भक्तस्यकुशस्यप्रथमंभागंपरिस्तृणाति।अथेत्यानंतर्यार्थःपुरस्तात्स्तरणा[illegible]नंतरंद्वितीयेनभा ४६
गेनाग्नेःपश्चात्भागेस्तृणाति।अथेत्यनंतरंतृतीयंभागंपश्चादेवस्तृणाति।तृतीयस्यभागस्य

कथंस्तरणंइत्यपेक्षायामाह॥८॥मूलान्यग्नैःप्रच्छादयति।द्वितीयभागस्यमूलानिकुशमूलानि
अग्नेःतृतीयभागस्याग्नेःप्रच्छादयति।आच्छादनंस्तरणंकरोति।अथरमूलंपश्चादपवर्गमितिदक्षिणतो
यस्तुत्रे।मूलान्यधस्तात्करोतिपश्चात्समाप्तिरित्यर्थः॥८॥सर्वाश्चावृतोदक्षिणतःप्रवृत्तयउदक्सं
स्थाभवंति।आवृच्छब्देनक्रियाउच्यंते।सर्वाअपिक्रियाःदक्षिणतःप्रवृत्तिर्यासांतास्तथाउदक्सं
स्थाःउदक्संस्थानंस्थितिर्यासांताःएवंक्रियाःकार्याःदक्षिणतआरभ्योत्तरतःसमापयितव्याःस
र्वाअपीतिलौकिकाअपिउपलेपनादयोऽपिदक्षिणतउत्तरेसमापयितव्याः॥८॥दक्षिणतोब्रह्मा
णंप्रतिष्ठाप्यभूर्भुवःस्वरिति।अग्नेर्दक्षिणतःब्रह्माणंपंचाशत्कुशनिर्मितंभूर्भुवःस्वरितिमं
त्रेणप्रतिष्ठाप्य।कुशैःकुशाश्चपंचाशद्ग्रंथिस्यात्तेषुतंत्रतःअग्नेःपुरस्तादानीय[illegible]ये

६१ स्तृणीतेति कारिका। दक्षिणतोन्वार्यं ब्रह्मकर्मेति कल्पसूत्रं। दक्षिणतो ब्रह्मयजमानयोरासनमर्हतीति का
तीयसूत्रात्॥ ॐ॥ सुमनोभिरलंकृत्य। तं स्थापितं ब्रह्माणं सुमनोभिः पुष्पैरलंकृत्य पश्चात्स्थित्वा। ततः॥ ॐ॥
उत्तरतः प्रणीताः प्रणीय को वः प्रणयतीति प्रणीतापात्रं उदकपूर्णं कृत्वाग्रे उत्तरतः स्था
प्य को वः प्रणयति इति मंत्रेण प्रणीताः प्रणीतापात्रे प्रापिता आपः प्रणीय प्रकर्षेण लब्ध
पुष्पैरलंकृते पश्चास्तीर्णे तोयेन पूरितं। निधायालभ्य च मसंसंस्तीर्णं प्रणायेदुदगिति कारि
का। एवं प्रणीतायाः प्रणयनं कृत्वा उक्तं स्तरणं वक्ष्यमाणधर्मेण स्तृणुयात्। तो उत्तरेण
हवनीयं प्रणयतीति ज्ञातपथे उक्तत्वात्॥ ॐ॥ सव्येन कुशानादाय दक्षिणेनापनोति। प्रथम ४७
तः स्त्रेधा यं च धा सप्तधा वा बर्हिषो विभागाः कल्पनीयाः त्रिवृत्त्वं च वृद्धेत्युक्तत्वात्। प्रथम सदि

दक्षिणेन च त्रपमद्वितीमक्रमेण

तीयो भागो दक्षिणेन हस्तेन ग्राह्यो। ततस्तो सव्येन वामेन हस्तेनादाय गृहीत्वा दक्षिणे
न हस्तेन अपनीय स्तृणुयात्। एवं द्वितीयादिकं भागं स्तृणुयात्। तत्र विशेषविधानमाह
॥ ॐ॥ दक्षिणं जान्वाच्य। तत्परिस्तरणं कुर्वन् दक्षिणं जानुन्यक्कुर्वन् स्तरणं कुर्यात्। दैवे कर्म
णि सर्वत्र विधानमेतत् ज्ञेयं। दक्षिणं पातयेज्जानु देवान्परिचरन्सदेति कात्यायनः। पित्र्ये वि
शेषमाह॥ ॐ॥ सव्यं पित्र्ये। पित्र्ये कर्मणि सर्वत्र सव्यं जानुन्यक्कुर्वन् स्तृणुयात्। पातयेदितर
ज्जानु पितॄन्परिचरन्नपीति कात्यायनः॥ ॐ॥ नाज्याहुतिषु नित्यं परिस्तरणं। यत्परिस्तरण
मुक्तं तत्र यत्र केवला आज्याहुतयः तत्र नित्यं न अपि तु वैकल्पिकमित्यर्थः॥ ॐ॥ नित्याहु
षु चेति मांडूकेयः। मांडूकेय आचार्यमते नित्याहुतिष्वपि सायंप्रातर्वैश्वदेवाद्याहुतिषु परि

रणंनित्यंनभवतिवैकल्पिकमेव।पवित्रयोर्लक्षणमाह॥ ॥कुशातरुणेअविषमेअविछि
न्नाग्रेअनंतर्गर्भेप्रादेशेनमापयित्वाकुशेनछिनत्तिपवित्रेस्थइति।दर्भपिंजूलेअनिनवेप्रा
देशेनमापयित्वाप्रादेशसंमितेकृत्वाकुशेनदर्भेणछिनत्तिछेदनंकरोतिपवित्रेस्थःइतिमंत्रे
अवच्छि णा।किंभूतेतेपवित्रे।अविषमेनविषमेसमेइत्यर्थः।पुनःकिंभूते।अविछिन्नाग्रेनविछिन्नेअग्रेय
योस्ते।अप्रशीर्णाग्रेइत्यर्थः।पुनःकिंभूते।अनंतर्गर्भेननिविद्यतेअंतःमध्येगर्भोययोस्तेशल्यर
हिते।अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच।प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित्इतिका
त्यायनः॥ ॥द्वेत्रीणिवाभवंति।तेपवित्रेपूर्वोक्तेद्वेवात्रीणिवाभवंतिकार्याणि।मंत्रस्तुपूर्वोक्त ४८
एव।मंत्रेद्विवचननिर्देशात्तद्वेएवभवतः।नांतर्गर्भेकुशौःछिन्नेकौशेप्रादेशसंमितेइतियोगीश्वरः

पवित्रेकरोतीत्यारभ्यतेवैद्वेभवतइत्यध्याहार्य।अथोअपित्रीणिस्युर्व्रोनोद्दिष्टतायोद्वेवैभवत
इतिशातातपः॥ ॥प्रागग्रेधारयन्वैष्णव्यावित्यनुसृतेएवपवित्रेप्रागग्रेप्राचीनाग्रेसव्यहस्तेनधार
यन्सन्वैष्णव्यौइतिमंत्रेणदक्षिणेनहस्तेनअनुद्धृत्यअनुद्धरणंकृत्वावक्ष्यमाणंकुर्यात्।इतिकर
णस्यमंत्रान्तेइतिकल्पेउक्तं।प्रागग्रेधारयन्नित्यत्रमंत्रसाकांक्षत्वेपिपूर्वमंत्रस्यनिराकांक्षत्वात्कुतः
शेषभूतान्यपूर्वाणीतिन्यायात्।शेषशब्दएकदेशवाची।भूतशब्दउपमायां।शेषतुल्यानिसाकां
क्षस्यमंत्रस्यनिराकांक्षीकरणनिअपूर्वाणिपूर्वमंत्रेअपठितानियथासमाम्नातानिभवंति।यत्र
न २ नसमाम्नातानितत्रभवंति।अतःअत्रनपूर्वमंत्रस्याकांक्षा॥ ॥कुशातरुणाभ्यांप्रदक्षिणं[illegible]त्रिः
पर्युक्षणंकुशातरुणाभ्यांपवित्राभ्यांप्रदक्षिणंप्रादक्षिण्येनाग्नेःत्रिःपर्युक्षणंअमंत्रकंकृत्वा।[illegible]मा

णं कुर्यात्। पर्युक्षणमसंत्रकमिति कारिकोक्तेः तांभ्यामित्युक्ते निकटस्थयोर्मंत्रयोः संदेहः स्यात्तन्मा भू
त्तस्मात्कुत्रातरूणाभ्यामित्युक्तं ॥ मिहीनां पयोसीत्याज्यस्थालीमादाय महीनां पयोसि इत्यनेन मंत्रेण
घृतयुक्तामाज्यस्थालीं सघृतामादाय गृहीत्वा वक्ष्यमाणं कुर्यात् ॥ ८ ॥ इषे त्वेत्यधिश्रित्य इषे त्वा इत्यने
न मंत्रेण तां आज्यस्थालीमग्नौ अधिश्रित्य स्रुवादीनां प्रतपनसंमार्जनादि विधेयं। कारिका। आद
वाज्यमधिश्रित्य प्रतितप्य स्रुवादिकं स्थालीपाकेषु पात्राणि स्रुवः स्रुक् कूर्मेक्षणं निवा। अर्थलक्षण
सूत्रे व कथितानि नवं त्वतः उद्वास्याज्यं स्रुवे चाथः कृत्वाज्योत्पवनं तयोः वासुदेवोक्तं। स्रुवमधो बिलं
प्रतप्य संमार्गकुशैः संमृज्याभ्युक्ष्य पुनः प्रतप्य निदधाति। माध्यंदिनगृह्ये। स्रुवं प्रतप्य संमृज्याभ्यु
क्ष्य पुनः प्रतप्य निदध्यात्। स्रुवं प्रतप्य पूर्ववद्दंडाग्रैरंतरतः प्राक्तो मार्ष्टि निशितः इति विपर्यस्य बाहि

मूले: प्राङ्मुखमभ्यप्रतप्य प्रतप्य प्रयच्छत्यनिशितेति स्रुच इति कात्यायनः। तथा चाश्वलायनः। प्रोक्षप्र
ताप्य चासाद्य बर्हिःषु त्तरतो भृतान् तान् कुशान्स्कृत संमार्गान् प्रोक्ष्याग्नौ प्रहरेदथ ॥ ९ ॥ ऊर्जे त्वे त्युदगु
द्वास्य ऊर्जे त्वा इत्यनेन मंत्रेण अधिश्रितां तामाज्यस्थालीमुदक्प्रागे वायव्यकोणे प्रणीतायाः पश्चिम
त उद्वासयेत्। प्रणीताभ्यां परेणात्तामिति कारिकोक्तेः उदगग्रे पवित्रे धारयन्नंगुष्ठाभ्यां चोपकनि
ष्ठिकाभ्यां चोन्नयतः प्रतिगृह्योदगग्रे प्रच्छेदं कृत्वाज्ये प्रत्यस्यति सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण
पवित्रेण वसोः सूर्यस्य रश्मिभिः। पवित्रे उदगग्रे उत्तराग्रे धारयन् ॥ अनाभ्यां मंगुष्ठाभ्यां चोनाभ्यामु
पकनिष्ठिकाभ्यां च उन्नयतः मूलाग्रयोः प्रतिगृह्य अंगुष्ठानामिकाभ्यां मूलं प्रतिगृह्य अंगुष्ठानामि
काभ्यां चाग्रं प्रगृह्य ऊर्ध्वायेपवित्रे कृत्वा प्रच्छेदनमाभूते विधाय आज्ये आज्यमध्ये प्रत्यस्यति प्रक्षेपणं

द्विरुक्त
मिता ख्यः

करोतिसवितुष्प्रसवइत्यनेनमंत्रेण।अयंउत्पवनमंत्रोलिंगात्।इत्याज्यसंस्कारःसर्वत्र।इतिपूर्वोक्तप्रका
रार्थः।यत्रयत्रआज्यहोमस्तत्रसर्वत्रअयंआज्यसंस्कारःप्रत्येतव्यः।उक्तंकारिका।आज्याद्यानाधिश्र
यणोद्वासनोत्पवनात्मकं।प्रायश्चित्तादिहोमेष्वपियत्रस्यादाज्यसंस्कृतिः।अतएवतुचत्वारस्तत्रस्युर्जु
हुयादथेति।।८।।नासंस्कृतेनजुहुयात्।असंस्कृतेनसंस्काररहितेननजुहुयात्होमोनभवतित
स्मात्पूर्वोक्तःसंस्कारोज्ञेयःसर्वत्र।।८।।स्रुवेचापःसवितुर्वइति।चकारःपूर्वोक्तानुकर्षणार्थः।आज्यो
त्पवनानंतरंस्रुवेऽपिउदकानिस्थापनीयानि।तत्रोदकेपूर्वोक्तेनप्रकारेणउदगग्रेपवित्रेइत्यादि
नास्रुवस्थितानामपांसवितुर्वइत्यनेनमंत्रेणउत्पवनंकरोति।सवितुष्प्रसवइत्यत्रसवितुर्वइत्यू ५०
हो विधेयः।अन्यत्समानं।इदंकेवलाज्यहोमेनभवति।नापःप्रत्यानयत्याज्यइत्युक्तत्वात्।तथाकारि

शिव

कायांमंत्रेणोह्यास्यवोस्रुवनापोनोत्पवनंनवेदिति।।८।।ताःप्रणीताःप्रोक्षणीस्यात्तद्धीयद्व
मंपदंतेयाःपूर्वंस्रुवेऽपिप्रणीताःस्ताःप्रोक्षणीःप्रोक्षणीसंज्ञकाज्ञेयाःयदिप्रमादात्एकस्यापिपात्र
स्यप्रोक्षणविस्मरणेप्रणीतास्थोदकेनप्रोक्षणंविधेयं।एतदर्थंप्रोक्षणीःसंज्ञोक्ता।चकारोऽनुक्ता
नुकर्षणार्थः।अपउत्पवनानंतरंयत्रचरुर्भवतितत्रचतुर्थ्यंतेनउक्तदेवतासहितेनचरुस्थाल्यां
पवित्रेणांतर्हितायांतंदुलादीनांग्रहणंविधेयं।ततोहविरासादनं।ततस्त्वाशब्दसहितेनमं
त्रेणस्रुवस्थितानिरद्भिर्हवींषिप्रोक्षणंसकृत्।अद्भिश्चप्रोक्षयेत्सकृत्।हविःप्रोक्ष्याथसमिधोब
र्हिर्यद्वस्रुगादिकमिष्टिमितिकारिका।समित्स्रुक्स्रुवादीनामुपयुक्तपात्राणांप्रोक्षणं।ततःशेषमु
ता[illegible]पःप्रणीतासुस्थाप्याः।ततश्चरोरधिश्रयणं।। ।।अष्टमःखंडः।।८।।स्रुवःपात्रं।अनादेशे...

पात्रंज्ञेयं।जुहूरूपपात्रमित्यस्यापवादः।अर्थलक्षणग्रहणं।स्रुवादीनांयानिलक्षणानिविहितानिप
रिमाणादीनितथायस्यपदार्थस्यार्थःप्रयोजनंतस्यग्रहणंअर्थाद्वेदितव्यं।यत्रयस्ययादृशोऽर्थः
तत्रतस्यतादृशंपरिमाणादिविधेयं।यथास्थूलगवादिषुपित्र्याष्टकासुचपशोरवदानादिमांनिता
दृशीस्रुक्विधेया।एवंचूडाकरणादिकेकर्मणिलोहक्षुरस्यादर्शादिस्थापनंविधेयं।अर्थात्परि
माणमितिकात्यायनः।अत्रगृह्यकृतापात्राणांपरिमाणानिनोक्तानि।तथाप्यत्रप्रकरणवशा
ल्लिख्यंते।खादिरःस्रुवःस्फ्यश्चेति।अरत्निमात्रःस्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करःस्फ्योऽस्याकृतिरितिका
त्यायनः।स्फ्यःखड्गं।स्रुवःखड्गावरत्निमात्रौ।कृतमुष्टिकप्रकोष्ठोऽङ्गुष्ठीरत्निर्निरष्टिस्तांशाकरंसा ५२
रत्निस्त्वकनिष्ठेरतिरामवाजपेयीकारा।बाहुमात्रीस्रुक्।हस्तमात्रीवा।खादिरोवाथपालाशीवादि

क१

वितस्तिःस्रुवःस्मृतः।स्रुग्बाहुमात्राविज्ञेयावृत्तस्तुप्रग्रहस्तयोः।स्रुवाग्रेघ्राणवत्खातंद्व्यङ्गुष्ठंप
रिमंडलं।सर्वखातंसनिर्वाहंस्रुचश्चार्धषडङ्गुलमितिकात्यायनः।मेक्षणंद्वादशाङ्गुलं।द्वादशाङ्गु
लाप्रणीताचेत्येवमादिद्रष्टव्यं।इध्मजातीयमिध्मार्धप्रमाणंमेक्षणंनवेदितिकर्मप्रदीपे।इमानि
पात्राणिन्युब्जानिस्थापयेत्।पात्राण्यासादयेत्त्वांधिन्यंचितंत्रांतरादुर्दोगितिकारिका॥छ॥सव्येन
कुशानादायदक्षिणेनमूलेस्रुवंविलोहस्तोसीति।ततःश्वरोःपाकेआज्येएकस्रुवेणाह्वता।निधा
रणं।चरोरुद्वासनमुत्तरतः।पार्श्वप्रक्षालनं।प्रत्यग्निधारणं।दर्शपौर्णमासयोःपंचदशसमिधःसमि
द्धोमे।प्रतिस्कृतादिविकृतौसप्तदश।प्रादेशमात्रीःपालाशीःसमिधःसप्तदशाकृत्वापश्चात्स्रुवग्रहणं
दर्शपौर्णमासयोःपंचदशामध्यावर्षेष्टकेतिस्त्रो।वाजवंतीतिपरिशिष्टाध्यायेवक्ष्यमाणत्वा।त्पंचदे

श्रासुसम्मदश्रास्तुवातिस्रः समिधोरक्षणीयाः तिस्रः समिधोभ्याधायेति वक्ष्यमाणत्वात् एवं समि
द्धोमं विधाय तानिः समिद्भिरग्नौ चतुरस्रतो संपाद्य सव्येन वामेन करेण पंचविंशति संख्याकैर्दर्भ
पिंजूलैर्निर्मितं उपयम्हस्रूपं उपयम्हकुशानां च संख्या स्यात् पंचविंशतिरिति कारिका। तं कुशोत्रा
दायगृहीत्वा दक्षिणेन हस्तेन स्रुवं मूले बुध्ने विष्णोर्हस्तोसीत्यनेन मंत्रेण वामेनोपयम्हं दक्षि
णेन स्रुवं युगपद्गृह्णीयान्मंत्रस्तंत्रे एव। समिद्भिश्चतुरस्रं तदग्नेः स्थाने प्रकल्पयेदिति कारि
का॥छ॥ स्रुवेणाज्याहुतीर्जुहोति। वक्ष्यमाणआज्याहुतयः स्रुवेण जुहोति यत्र यत्राज्यहोमस्त
त्र तत्र स्रुवेणैव कार्यः स्रुवः पात्रमिति ग्रहणात्॥छ॥ उत्तरपश्चार्द्धादग्नेरारभ्याविच्छिन्नं दक्षिण ५
तो जुहोति त्वमग्ने प्रमतिरिति॥छ॥ अग्नेः स्थापितस्य उत्तराच्च पश्चिमाच्च तयोः अर्द्धाद्वायव्यकोण।

होतव्याः ३

दारभ्य अविच्छिन्नं विच्छेदरहितं यथा स्यात्तथा एकधारया दक्षिणतः आग्नेयकोणपर्यंतं त्वमग्ने
प्रमतिरिति मंत्रेण जुहोति। अविदित्वा ऋषिं छंदो दैवतं योगमेव च। योध्यापयेज्जपेद्वापि पापी
यान्जायते तु सः इति स्मृतिवचनाद् ऋषिदैवतछंदसां ज्ञानमपेक्षितं। न ह्येतज्ज्ञानमृते श्रौतस्मा
र्त्तकर्मप्रसिद्धिरिति शौनकोक्तत्वाच्च। त्वमग्ने हिरण्यस्तूपो ऋषिर्जगती। त्वमग्ने प्रमतिस्त्वं पिता सि
नः स्वरमदाभ्य स्वाहा। स्वाहाकारांते होममंत्राणां इति कल्पे उक्तत्वात्॥छ॥ दक्षिणपश्चार्द्धादग्ने
रारभ्याविच्छिन्नमुत्तरतो जुहोति यस्येमे हिमवंत इति। अग्नेः स्थापितस्य दक्षिणाच्च पश्चिमा
च्च तयोरर्द्धं तस्मान्नैर्ऋतिकोणादारभ्य अविच्छिन्नं यथा स्यात्तथा संततधारया उत्तरतः ऐ
शानी मर्यादीकृत्य यस्येम इत्यनेन मंत्रेण जुहोति। यस्येमि हिरण्यगर्भः कस्त्रिष्टुप्॥ यस्येमे

अंते स्वाहाकारः ४

हिमवंतो महित्वा० विधेम स्वाहा। एतौ आघारसंज्ञौ भवतः। स्रु आघारावाज्यभागौ तौ इति कारिका॥
।८॥ आग्नेयमुत्तरमाज्यभागं सौम्यं दक्षिणं। आघारानंतरं प्रयाजानां निषिद्धत्वादाज्यभागावादितए
ते प्रयाजा इति वक्ष्यमाणत्वात्। आग्नेयं अग्निदेवताकं आज्यभागमुत्तरं उत्तरार्द्धे ज्ञेयं। सौम्यं सो
मदेवताकं आज्यभागं दक्षिणं दक्षिणार्द्धे ज्ञेयं। कारिका। अग्नये वाथ सोमाय जुहुयादाहु
तिद्वयं। उत्तरार्द्धे दक्षिणार्द्धे समिद्धे बहुले तथेति। एवमाज्यभागौ जुहुयात्। चक्षुषी हवा एते य
ज्ञस्य यदाज्यभागौ तस्मात्पुरस्ताज्जुहोति पुरस्ताद्धीमे चक्षुषी तत्पुरस्तादेवैतच्चक्षुषी दधाति
तस्मादिमे पुरस्ताच्चक्षुषी। उत्तरार्द्धपूर्वार्द्धे हैके आग्नेयमाज्यभागं जुह्वति दक्षिणार्द्धपूर्वार्द्धे सौ ५३
म्यमाज्यभागमेतत्पुरस्ताच्चक्षुषी दधां इति शतपथे। तस्मादाग्नेयमुत्तरपूर्वार्द्धे दक्षिणपूर्वार्द्धे

सौम्यमित्यर्थः॥८॥ मध्येन्याहुतयः। अन्याश्च ताः आहुतयः अन्याहुतयः प्रधानभूता मध्ये होतव्याः।
न च अग्निर्जनितेत्यादि मंत्रत्रयमुक्त्वा मध्ये इति वक्तव्यं। मध्येन्याहुतय इति गुरुणा सूत्रेण किंप्र
योजनं। मैवं आचार्यः अनेन सूत्रेण कल्पैकत्वं दर्शयति। अंतरेणाज्यभागौ स्विष्टकृतं च यद्दि
ज्यते तमावापइत्याचक्षते तत्प्रधानं तदंगानीतराणि इति कल्पे। तस्मादाज्यभागानंतरं प्रध
नभूता अश्ववाघा आहुतयः स्विष्टकृतः प्राग्घोतव्या इत्येतदर्थमिदं सूत्रं। तस्मात्प्रधानाहुतीनाम
वाप इति संज्ञा कल्पोक्ता इहापि प्रत्येतव्या। अत्र प्रतिश्रुताकर्मसु आज्याहुतय एव प्रधान
भूतास्तस्मादाज्याहुत्यनंतरं स्विष्टकृद्भवति। आज्यं हव्यमनादेशे इत्युक्तत्वात्। आज्याहु
तिमंत्राः। अग्निर्जनिता स मेऽमूं जायां ददातु स्वाहा। सोमो जनिमान्स माऽमुया जनिमं करे।

तुस्वाहा।पूषाज्ञातिमान्स्समामुष्येपित्रामात्राभ्रातृनिर्ज्ञातिर्भर्तंकरोतुस्वाहेति।अमूमित्यस्य
स्थानेकन्यायाद्वितीयांतेननामग्रहणं।समेअमुकीदांजायामिति विशेषः।अमुयेत्यस्यस्था
नेकन्यायास्तृतीयांतेननामग्रहणं।समाअमुकीदयाजायया।इति विशेषः।अमुष्यैइत्यत्रकन्या
याश्चतुर्थ्यंतेननामग्रहणं।समाअमुकीदायैजायायैइति विशेषः।अग्निर्जनितेत्यादित्रयोपि
मंत्रायथाक्रमेणआग्नेयसौम्यपौष्णलिंगाः।प्रधानांतरंस्विष्टकृद्भवति।तत्संबंधेनाह।।ठ।। न्ा५
नाज्याहुतिषुनित्यासुआज्यभागौस्विष्टकृच्चयत्रकेवलाआज्याहुतयःप्रधानास्तत्राज्यभागौ ५४
न१ नित्यौभवतः।अपितुवैकल्पिकौ।स्विष्टकृच्चापिआज्याहुतिषुवैकल्पिकः।तस्मात्प्रतिकृताक
र्मसुआज्यभागौस्विष्टकृच्चविकल्पेनभवति।।ठ।।नित्याहुतिषुचेतिमांडूकेयःमांडूकेयइतिब्रवीति।

इतीति किं।नित्याहुतिषुवैश्वदेवहोमादिषुतिलहोमादिषुवा।आज्यभागोत्रग्नीषोमात्मको
स्विष्टकृच्चविकल्पेनभवति।अत्रमांडूकेयग्रहणादयंविकल्पोमांडूकेयशाखिनामेव।ना
न्येषां।कुतः।आचार्यस्येष्टःपक्षःस्यात्तदानित्याहुतिषुचेत्येतावदेवावक्ष्यत्।अपिच।अयमेव
क्ष्यमाणवैश्वदेवप्रकरणेआज्यभागस्विष्टकृतांविकल्पःकुर्यात्तत्रचविकल्पोनोक्तस्तस्मा
दाचार्यस्येष्टतमःपक्षोन।।ठ।।महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यांतरमेतदावापस्थानं।।
महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यांतरंभवति।महाव्याहृतयश्चसर्वप्रायश्चित्तंचप्राजा
पत्येचतेभ्यःअंतरंबहिर्वाह्यमित्यर्थः।तेनएतदुक्तंभवति।आज्यभागौ।ततःप्रधानाहुतयःत
तःस्विष्टकृत्।अग्नयेस्विष्टकृतेस्वाहेति।ततोमहाव्याहृतयःस्वतस्त्रभूःस्वाहाभुवःस्वाहा।स्वः
एतदुक्तमावापस्थानं३

स्वाहा।भूर्भुवःस्वःस्वाहेतिततःसर्वप्रायश्चित्ताहुती।भूर्भुवःस्वस्वाहा।अयाश्चाग्नेस्यन
भिशस्तिश्चसत्यमित्वमयाअसि।अयासामनसाहितोयासंहव्यमूहिषे।अयानःकृणुहि
भेषजंस्वाहेतिसर्वप्रायश्चित्ताहुती।ततःप्राजापत्या।प्रजापतयेस्वाहेतिप्राजापत्या।एतानव
आहुतिभ्यःप्रधानाहुतयोबाह्याइत्यर्थः।एताःसप्ताहुतयःचरुहोमांते।आज्यहोमांतेचह
वंति।ननुमहाव्याहृत्यादीनांकेनसूत्रेणविधानं।अनेनैवेतिब्रूमः।नन्वनेनसूत्रेणप्र
नाहुतिभ्योमहाव्याहृत्यादयोबाह्याइत्येतदेवोक्तं।तर्हिकेनविधानंक्रियते।सत्यं।अ
वसूत्रेणविधानंक्रमस्तुप्रतिपाद्यते।यथाब्राह्मणाःभोज्यतांमाठरकौंडिन्यौपरिवेविष्टा ५५
मितिमाठरकौंडिन्ययोर्ब्राह्मणत्वेनभोजनंप्राप्तं विशेषविधानात्परिवेषणंचप्राप्तं।तत्रय

था।विधानक्रमोप्रतिपाद्यतेतथाइहापि।अंतरंबहिर्योगोपसंव्यानयोरित्यंतरशब्दोबहिर्यो
गार्थः।अंतरशब्दस्यअविधेयपुल्लिंगवचनान्नपुंसकेनावापस्थानशब्देनसामानाधिकरण्या
न्नपुंसकलिंगता।ततःस्वस्तिवाचनपूर्वकंदक्षिणासंकल्पः।एषदक्षिणाकालःसर्वासा।मिष्टी
नामितिकल्पेउक्तत्वात्।नत्वेवादक्षिणंकर्मकिंचिदस्तीतिशौनकइतितत्त्वविधानं।इदानींपू
र्वीवामकरधृतानामुपयमनरूपाणांकुशानांप्रतिपत्तिरुच्यते।।७।।आज्येहविषिसव्येपाणौधृ
कुशास्तान्दक्षिणेनाग्रेसंगृह्यमूलेसव्येनतेषामग्रंस्रुवेसमनक्तिमध्यमाज्यस्थाल्यांमूलंच।।
आज्येप्रधानेहविषिएवंविधेकर्मणिसव्येवामेपाणौहस्तेयेकुशाःपूर्वमुपयमनरूपाधृतास्ता
न्दक्षिणेनकरेणपग्रहमग्रेसंगृह्यग्रहणंकृत्वासव्येनकरेणपग्रहंमूलेस्रुवमध्येगृहीत्वातेषांक

पि१

ग्नानामग्रंअग्रनागंस्रुवेसमनक्ति मध्यमाज्यस्थाल्यांमूलंचतेषांमूलमेवसमनक्ति।एतदाज्य
प्रधानेकर्मणि।इदानींस्थालीपाकेषुविशेषउच्यते॥७॥अथवैस्थालीपाकेषुस्रुच्यग्रंमध्यंस्रु
वेमूलमाज्यस्थाल्यां।अथशब्दःसंभावनायां।वैतच्छब्दोयद्यर्थो।यदिस्थालीपाकंस्वरतएव
प्रधानास्तेषुपूर्वोक्तप्रकारेणोपग्रहंधृत्वास्रुवितेषामग्रंसमनक्तिस्रुवेमध्यंसमनक्ति।आ
ज्यस्थाल्यांमूलंसमनक्ति।स्थालीपाकेष्वितिबहुवचनंअहूतसंस्कारादिष्वपितद्धर्मप्रापणार्थं॥
॥७॥ताननुप्रहृत्याग्नयेवोसोसीति।तानन्यक्तानुपग्रहरूपान्कुशाननुअग्नयेवोसोसीत्यनेनमं न
त्रेणअग्नौहस्तेनअनुप्रहृत्यअप्रहरणेहत्वाततः॥८॥तिस्रःसमिधोन्याधाययथोक्तंपर्यु ५६
क्षणं।पूर्वैर्यास्तिस्रःसमिधोरक्षितास्ताअग्नौअन्याधायप्रास्ययथोक्तंयथापूर्वमुक्तंकुर्यात्त

णान्यांप्रदक्षिणमग्निंत्रिःपर्युक्षेदितितथापर्युक्षणंमंत्ररहितंकुर्यात्इतिवाक्यशेषः।ततःप
वित्रयोःप्रतिपत्तिःसाचमार्जनपूर्विकाभवति।इदमापइतिचवेनपवित्रवतिमार्जयन्तेइतिक
ल्पे।स्तृतानांबर्हिषांचहोमःतत्रप्रणीताविमोकःतस्मात्प्रणीतादक्षिणतःपरीत्यनिनयती।नि
ऋतपथे।ततोब्रह्मणेपूर्णपात्रं।ब्रह्मणेदक्षिणादेयायत्रयापरिकीर्तिता।कर्मान्तेनूच्यमा
नापिपूर्णपात्रादिकानवेत्।यावताबहुभोक्तुस्तुतृप्तिःपूर्णंनविद्यते।नावरार्ध्यमतःकुर्यात्पू
र्णपात्रमितिस्थितिरितिकात्यायनः।ततोब्रह्मासंमार्जनंकृत्वोदकेनिक्षिपेत्।ततोब्राह्मणभोज
नं।कर्मापवर्गेब्राह्मणभोजनमित्युक्तत्वात्।ततःशान्तिजपः।शान्त्यःपंचेनाशान्तिः।शंनइन्द्राग्नी
भवतामवोभिः।सदानःशंचवयश्चअन्नइन्द्राग्नीइतिचसूक्तंजपेत्सर्वेष्वेवकर्मसुउपतिष्ठताादि

त्यग्रेपरिशेषाध्याये वक्ष्यमाणत्वात्। तत्राशीः त्रयो वै यज्ञे कामा॰ नाप्नोति। तयाप्रजायति वै
यज्ञ॰ नाप्नोति इति एवं कर्मसमाप्तिर्ज्ञेया सर्वत्र। यत्र प्रधानदेवता उक्ता। मंत्राश्च नोक्तास्तत्राय त्र
र्मंत्रा उक्ता देवताश्च नोक्ता भवंति तत्र कथमित्याकांक्षायामाह॥ ७॥ अनाम्नातमंत्रास्वादिष्ट
देवतास्वमुष्यै स्वाहाऽमुष्यै स्वाहेति जुहुयात् स्वाहाकारेण शुद्धेन। अनाम्नातमंत्रासु अनाम्ना
ता उक्ता मंत्रा यासां ताः तासु विकृतिषु आदिष्टदेवतासु आदिष्टा उक्ता देवता यासां ताः तासु
अमुष्यै देवतायै इति चतुर्थ्यंतं देवतानामोद्दिश्य शुद्धेन स्वाहाकारेण जुहुयात्। तत्रादिष्टदे
वतासु अनाम्नातमंत्रासु उदाहरणं। यथा अग्नये सोमायेत्यादि जन्मतिथिं हुत्वा त्रीणि च ५८
जानि सदेवतानि तन्मंत्रैर्जुहुयादिति। आदिष्टमंत्रासु अनाम्नात मंत्रासु उदाहरणं। तासां

देवतासु ।

प्रथमायां अष्टके जुहोतीत्यत्र देवता नोद्दिष्टा मंत्रश्चोद्दिष्टः इयमेव सा यएति। अनाम्नातमंत्रास्वि
त्यनेन सूत्रेण विकृतिभूतानां शाकाष्टकादीनां प्रधानचिंता कृता। अथ तासामेव विकृतीना
मंगचिंतोच्यते। व्याख्यातः प्रतिश्रुते होमकल्पः॥ ८॥ नवमः खंडः॥ ॥प्रकृतिर्भूतिकर्मणां॥
प्रतिश्रुते कर्मणि यो होमकल्पो व्याख्यात उक्तः स भूतिकर्मणां वैकृतानां प्रकृतिः। यथा ओतद्
र्शपौर्णमासो इष्टिपशुबंधादीनां प्रकृतिः। तथा जातकर्मादीनां स्मार्तानां विकृतानां प्रतिश्रुतक
ल्पः प्रकृतिः। प्रतिश्रुते जुहोतीत्यारभ्य यथोक्तं पर्युक्षणमित्येतावत्पर्यंतं यदुक्तं स प्रतिश्रुतक
ल्पः॥ ९॥ सर्वासां चाज्याहुतीनां॥ सर्वासामारण्यकत्वा विधानपरिशेषाध्यायोक्तादीनां आ
ज्याहुतीनामयं प्रतिश्रुतकल्पः प्रकृतिः। चकारात् अनूतिकर्मणामपि प्रकृतिः॥ १०॥ आरव

शूनां। आचार्या याज्ञयज्ञ त्विजे बार्हित्य इत्येवमादिकानां इयमेव प्रकृतिः॥छ॥ चरुपाकयज्ञानां
त्वा। वरुणं पाकयज्ञानां चेयमेव प्रकृतिः। श्रौता अपि ये चरवः अपि वा स्थालीपाकमेव गार्हप
त्य अपि त्वेत्यादयः पाकयज्ञा दर्विहोमादयः तेषामपि इयमेव प्रकृतिः॥छ॥ ते एते पाकयज्ञाः
[illegible]ति ते एते ऽप्रयाजा अननुयाजा अनिला अनिगदा असामिधेनीकाः सर्वे पा
कयज्ञा भवंति। ते एते पाकयज्ञाः सर्वे एवं विधा भवंति। किं विशिष्टाः अप्रयाजाः प्रयाजरहि
ताः श्रौते पंच प्रयाजान्यजतीति प्रसिद्धं। पुनः कीदृशाः अननुयाजाः न विद्यंते अनुयाजा येषां
ते तथा। श्रौते अथ यत्रीननुयाजान्यजतीत्युक्तं। पुनः कीदृशाः अनिलाः न विद्यते इला येषां ते त ५८
था। इलामुपह्वास्यमानस्येति श्रौते उक्तं। पुनः कीदृशाः अनिगदाः न विद्यंते निगदा येषां ते तथा।

दिनार

श्रौते उपहूतमित्यादि निगदाः पुनः कीदृशाः असामिधेनीकाः न विद्यंते सामिधेन्यो येषां ते तथा।
श्रौते प्रवो वाजा इत्याद्याः चकारात् सूक्तवाकादिरहिताः एवं विधाः पाकयज्ञाः न एत इत्या सूत्रेण प्र [illegible]
याजादिराहित्येन गृह्यकल्पयोरैक्यमाचार्यैर्दर्शितं॥छ॥ तदपि श्लोकांतदपि तद्धर्मविशेषं दर्श
यंतः श्लोका अपि भवंति॥छ॥ हुतोग्निहोत्रहोमेनाहुतो बलिकर्मणा प्रहुतः पितृकर्मणा प्राशि
तो ब्राह्मणे हुतः अग्नौ हूयते तत् अग्निहोत्रं। तत्र होमस्तेन अग्निहोत्रहोमेन बलिसाहचर्याद्वैश्व
देवहोम उच्यते। एवं च वैश्वदेवहोमेन हुतयज्ञः संपन्नो भवति। अग्रयेनम इत्येवमादिनिर्वास्तु
मध्ये बलिकरणात् अहुतनामको यज्ञः संपद्यते। प्राचीनावीती दक्षिणात इत्यनेन श्राद्धलक्ष
णेन प्रहुतनामको यज्ञः संपद्यते। ब्राह्मणे श्रोत्रिये हुतः कृतो होमस्तेन प्राशितनामको यज्ञः

संपद्यते।श्रोत्रियंभोजयेदित्यत्रैवह्यसमाप्तत्वात्।एवंवैश्वदेवेचत्वारोयज्ञानिःपन्नाभवंति।पंचमे
ब्रह्मयज्ञश्च।एवंश्रद्धानांयजमानानांपंचमहायज्ञाभवंति॥छ॥ अनूर्द्ध्वज्ञुर्व्यूढजानुर्जुहुयात्सर्वदा
हविःनहिबाह्यहुतंदेवाःप्रतिगृह्णंतिकर्हिचित्।अनूर्द्ध्वज्ञुःनऊर्द्ध्वेजानुनीयस्यसअनूर्द्ध्वज्ञुःव्यूढ
जानुः।व्यूढेविस्तीर्णेजानुनीयस्यसतथादक्षिणंबाहुंजान्वोरंतरेकृत्वेत्यर्थः।सर्वदासर्वस्मिन्नपिक
र्मणिहविर्होमद्रव्यंजुहुयात्होतव्यं।कुतः।यस्माद्देवाअग्न्यादयःबाह्यहुतंहोमद्रव्यंकर्हिचित्क
दाचिदपिनप्रतिगृह्णंति।द्विराचामोनिश्चयार्थे।दक्षिणंपातयेज्जानुदेवान्परिचरन्सदा।पातयेदित ५९
रज्जानुपितृन्परिचरन्पातिकात्यायनः।तस्माद्धोतस्मात्तत्कर्मानुष्ठानेप्रयत्नततयाभवितव्यं॥छ॥
रौद्रंतुराक्षसंपित्र्यमासुरंचाभिचारकं।उक्त्वामंत्रंस्पृशेदपआलभ्यात्मानमेवच।रौद्रादिकंमंत्रमु

क्त्वाअपउदकंस्पृशेत्।उदकस्पर्शोविधेयः।रौद्रंरुद्रोदेवतायस्यसतंरुद्रास्त्वंद्राजानइत्यादिकः।
राक्षसंरक्षोदेवतायस्यसतं।आसुरंअसुरोदेवतायस्यसतं।अपहताअसुरारक्षांसिवेदिषदइ
त्येवमादिकंपित्र्यं।पितरोदेवतायस्यसतं।येतातृप्णुरित्यादिकः।आभिचारिकं।अभिचारेविनियो
क्तस्सतं।उदगादयमित्येवमादिकः।चशब्दश्चशब्दैःपादपूरणार्थः।द्वितीयश्चशब्दःपुनरर्थेचपु
नःआत्मानंआलभ्यआत्मालंभनंकृत्वाउदकस्पर्शोविधेयः।रौद्रराक्षसमासुरमाभिचार
णिकंमंत्रमुक्त्वापित्र्यमात्मानंचालभ्यापउपस्पृशेदपउपस्पृशेदपइतिकात्यायनवचनात्॥ ॥
दशमःखंडः॥ ॥अथैतांरात्रींस्वस्तृतीयांवाकन्यांवक्ष्यतीति।अथशब्दोविवाहाधिकारार्थः।एतां
श्वोरात्रींविवाहस्यश्वोभाविनींतृतीयांवाविवाहस्यपरभाविनींवाकन्यांवक्ष्यंतिपरिणेष्यतिः।इ

तीति वक्ष्यमाणप्रकारेण। वह्निप्रापणे। अथेन्द्राणीकर्मोच्यते विवाहांगं तस्यां रात्र्यामतीते निशाका
ले सर्वौषधिफलोत्तमैः सुरभिमिश्रैः सशिरस्कां कन्यामाप्लाव्य। तस्यामिति पूर्वोक्तायां रात्र्यामिति।
विवाहात्पूर्वदिने तस्मादपि पूर्वदिने वा रात्र्यां निशाकाले। निशामध्यस्थे प्रहरद्वयं तस्मिन्काले अ
तीते अतिक्रांते सर्वौषधिफलोत्तमैः सर्वौषधी प्रसिद्धा। फलोत्तमानि फलेषु उत्तमानि उक्तेशानिश्रा
दीनि तैः। शंखपुष्पी वकुष्टं च वालकं नागकेसरं। सर्वौषधय एतास्तु मांगल्येषु च कर्मणीति हेमाद्रौ। धे ६
कारिका च। पूगखर्जूरजंब्वाम्रबदरोदुंबरामलं। उत्तमानि फलान्याहुरिति। सुरभिमिश्रैः सुरभिद्र
व्याणि चंदनकस्तूरिकादीनि तैर्मिश्रितैः सशिरस्कां कन्यां कमनीयामाप्लाव्य मंगल्यैः कलशैः स्ना ६०
पयित्वा ततः अविधवानां शिरःस्नानस्य निषिद्धत्वात् सशिरस्कामित्युक्तं॥ ८॥ रक्तमहतं वा वासः परि

धाय। कौसुंभादिभिर्मंजिष्ठादिभिर्वा रंजितं रक्तं जीर्णमहतं वा अहतं नूतनं श्वेतं वा कन्यां वासः
परिधाय। अहतं यंत्रनिर्मुक्तमिति स्मृत्युक्तत्वात्। ततः पश्चादग्नेः कन्यामुपवेश्याचार्यः स्वा... महा
व्याहृतिभिर्हुत्वाज्याहुतीर्जुहोत्यग्नये सोमाय प्रजापतये मित्राय वरुणाय इंद्राय इंद्राण्यै गंधर्वा
य भगाय पूष्णे त्वष्ट्रे बृहस्पतये राज्ञे प्रत्यानीकायेति। स्त्रीणां मंत्रे अनधिकारादाचार्यः करोति। अ
च मनादि अग्न्याधारांतं कृत्वा। वैकल्पिकावाज्यभागौ च कृत्वा। नाज्याहुतिषु नित्यावाज्यभागौ स्वि
ष्टकृच्चेत्युक्तत्वात्। अग्नेः पश्चादात्मनो दक्षिणभागे प्राङ्मुखीं कन्यामुपवेश्य तस्या मन्वारब्धाया
मन्वारंभणयुक्तायां सप्तदशाज्याहुतीर्जुहोति। महाव्याहृतिभिश्च ततः स्विष्टकृन्निर्दृ स्वाहेत्यादिभिर्द
त्वा अग्नये स्वाहेत्यादिकास्त्रयोदशाज्याहुतीः कुर्यात्। विहृतिलाः सप्तदश समिधः जुहोतीत्युक्ते सर्पिः प्रत

येत्तितिन्यायात्स्थालीपाकेन।स्वाहाकारांते होममंत्राणामित्युक्तत्वात्स्वाहाकारेण होमः।राज्ञे
प्रत्यानीकायेत्येतदेकमेव पदं न पदद्वयं।प्रत्यानीकगुणविशिष्टाय राज्ञे इत्यर्थः॥चितस्त्रोष्टेवा
विधवाः शाकपिंडीभिः सुरयान्नेन च तर्पयित्वा चतुरानर्त्तनं कुर्युः।चतस्रः श्रेष्ठैवेति विकल्पः॥
अविधवाः सनर्तिकाः सुराशब्दसंयोगाच्छूद्रस्त्रियः।शाकपिंडानिः शाकैर्मोदकैः पिष्टपिंडैर्स्नानि
सुरयापेष्ट्या।दिकयान्नेनेन पायसादिना मादकेन तास्तर्पयित्वा भोजनं कारयित्वा चतुः[illegible]र्धं
आनर्त्तनं नृत्यं कुर्युर्नृत्यगीतवादनादिभिः चतुर्विधं तु नेपथ्यं पुस्तोलंकार एव च।तथांगरचनं
चावहिल्यासंचारिणस्तथा।एते वर्णास्तु विज्ञेयाश्चत्वारो गीतयोजकाः।ततश्चैवावनद्धं च घनं सु ६९
षिरमेव च।चतुर्विधं तु विज्ञेयं मातोद्यं लक्षणान्वितमिति कारिका॥४॥एता एव देवताः पुंसः पुरुष

उक्त १

स्यवरस्य एताः स्वदेवता महाव्याहृत्यादयः सप्तदश चतुर्थीसंयुक्ताः स्त्वाज्याहुतयो होतव्या॥व
रस्यापि तस्यामेव रात्र्यां मध्यरात्रादुत्तरकाले पूर्वोक्तप्रकारेण स्नपनं कारयित्वा देवतानां यजनं
कुर्यात्॥४॥वैश्रवणमीशानं च।एता उक्तदेवता एव न वंतिशतिना।अपि च वैश्रवणं ईशानं
चतुर्थ्यंतं जुहुयात्।एतावता कन्यागृहे महाव्याहृत्यादिका राज्ञे प्रत्यानीकायेत्यंताः सप्तदशै
व देवताः।वरगृहे महाव्याहृत्यादिका ईशानपर्यंता एकोनविंशतिर्देवताः।अन्यत्तेनादिकं समा ना १
नं॥४॥अतो ब्राह्मणभोजनं।अतो नर्त्तना।देवानंतरं कन्यागृहे वरगृहे प्रातर्ब्राह्मणभोजनसंक
ल्पः।कर्मापवर्गे ब्राह्मणभोजनमित्युक्तत्वात् एकैकमेव।ततः शान्त इंद्राणी इति कर्मसमापनं॥इ
ति इंद्राणीकर्मणा॥ ॥ततो वृद्धिश्राद्धं ततः स्यादाभ्युदयिकमिति कारिकोक्तेः॥ ॥एकादशः खंडः॥११॥

स्नाः तंकृतमंगलंवरमविधवाःसुभगायुवत्यःकुमार्यैवेश्मप्रपादयंति॥स्नातंनिर्गतंकृ...लकि
कृतमंगलंकुंकुमचंदनदधिवंदनस्रगादिभिरलंकृतंद्विजैःकृतस्वस्त्ययनंएवंविधंवरंअवि
२३ धवाःसपत्नीकाःसुभगाःकुंकुमसुकुटादिसौभाग्यचिह्नैर्युक्तायुवत्यस्तरुण्यःस्त्रियःकुमार्यैक
न्यायैदर्शनायतदीयंवेश्मगृहंकौतुकागारंप्रपादयंतिप्रवेशयंतिमांगल्येषुस्त्रीणांप्राधान्या
पद्धतु त्अविधवाबहुवचनं।अविधवाइत्युपलक्षणमेतत्।शिष्टाद्विजाःब्रह्मघोषपूर्वकंकन्यागृहंवधू
रमानयंति॥तासामप्रतिकूलंस्यादन्यत्रब्रह्मपातकेभ्यः।तासांस्त्रीणांअप्रतिकूलंअनुकूलं
वरंस्यात्।तायत्कारयंतिकुलाचारंअर्थाविरुद्धंतत्तत्कुर्यात्।सर्वमेवोक्तंकुर्यात्...
ब्रह्मपातकेभ्यःअन्यत्र।ब्रह्मवधलक्षणंयेनचपातकंभवतितन्नकुर्यात्।कास्वनद्विजाःअभि

न्नवसरेकार्मणादिकंकुर्वंतितद्व्यतिरिक्तंयद्यत्कारयंतितत्तद्विधेयं॥८॥ताभिरनुज्ञातोयास्ये
वासःप्रयच्छतिरैभ्यासीदिति।अथानंतरंताभिःस्त्रीभिःअनुज्ञातःअनुज्ञःवरःअस्यैकुमार्यैवासः
परिधानीयंवस्त्रंरैभ्यासीदित्यनेनमंत्रेणप्रयच्छतिददाति।सावित्र्यनुष्टुब्विवाहस्तुतिःरैभ्यासीदत्तु
देयीत्तचकन्याचतद्वस्त्रंपरिधत्तेअमंत्रकंमंत्राधिकाराभावात्॥९॥चित्तिराउपबर्हणमित्यांजन
कोशमादत्ते।वरःअंजनकोशस्यदंष्ट्रांजनंकोशंअंजनपात्रंकज्जलपात्रंभांडमयंचित्तिराइ
त्यनेनमंत्रेणकन्यायैआदत्तेगृह्णाति।सावित्र्यनुष्टुब्विवाहस्तुतिः।चित्तिराउपबर्हणं॥१०॥समं
जंतुविश्वेदेवाइतिसमंजनीया।वरोऽनेनमंत्रेणकन्यायाअक्षिणीअंजयतिसमंज्यतेअनयासा
समंजनीयातत्रऋषिःसावित्रीविश्वेदेवाअनुष्टुप्।समंजंतुविश्वेदेवाः॥११॥कन्यावरस्यनेत्रेअंजयतिअमंत्रंच

कं॥शिष्टाचारात्॥ढ॥यथेयं शचीं वावातां सुपुत्रां च यथादितिं॥अविधवां च पा[illegible]मेवं त्वामिह रक्ष
तादिममिति दक्षिणपाणौ शाललीं त्रिवृतं ददाति॥वरो यथेयं शचीमित्यनेन मंत्रेण कन्या[illegible]दक्षि
णहस्ते त्रिवृतां त्रिःश्वेतां शाललीं सेधाशलाकां ददाति प्रयच्छति॥सीमंतार्थं॥सीमंतार्थं ददातीति ता
ति कारिका॥ढ॥रूपेरूपमित्यादर्शं सव्ये॥वरो रूपेरूपमित्यनेन मंत्रेण कन्यायाः सव्ये हस्ते आद
र्शं मुकुरं ददाति॥गर्ग इंद्रस्त्रिष्टुप्॥रूपंरूपं प्रतिरूपो बभूव॥रक्तसूत्रमाविकं क्षौमं वा त्रि[illegible]
प्रतिसरं ज्ञातयो स्या बध्नंति नीललोहितमिति॥अस्याः कन्यायाः ज्ञातयः बंध्वादयः प्रतिस[illegible]
सूत्रं हारं एकदेशे रक्तमेकदेशे कृष्णं आविकमूर्णामयं क्षौमं वा कौशेयं पट्टसूत्रनिर्मितं वा त्रि ६२
मणिं त्रयो मणयो यस्मिन् एतादृशं नीललोहितमित्यनेन बध्नंति॥अथ माचारो [illegible]कुलानां॥सा[illegible]

त्री विवाहस्तु तिरनुष्टुप् नीललोहितं नवतिज्ञश्च वरो मंत्रं पठति॥ढ॥मधुमतीरोषधीरिति मधूका
नि बध्नाति॥वरो मधूकानि मधुकहारं मधुमतीरित्यनेन बध्नाति वाद्धाधुर्यार्थं॥वाद्धाधुर्या[illegible]म
धिति कारिकोक्तेः॥वामदेवः क्षेत्रपतिस्त्रिष्टुप्॥मधुमतीरोषधीर्द्याव आपः॥ढ॥विवाहे ग[illegible]
यित्वा गृहे प्रागंते माधुपर्किक्यो॥वरस्य कौतुकागारगमनादूर्ध्वं कन्यादाता मधुपर्कं करोति[illegible]
कर्तृहानिः स्त[illegible] स्य जामातुः श्वशुरेण घः कर्तव्यो स्मिन्क्रमे सूत्रारंभात्स विधिः षलघ्यो भवे
तीत्यस्मिन् खंडे कल्पे उक्तः विवाहे गामर्हयित्वा पूजयित्वा मा वा रुद्राणामित्यृचं जपित्वा गृहे
तस्य षु परिणीयागतिर्न मधुपर्कसंबंधिनी गां अर्हयति पूजयति॥तत्र आचार्यो मधुपर्के[illegible]दं[illegible]स्य
वरस्य करोति॥तेन वो माधुपर्किक्यो॥मधुपर्कसंबंधिन्यो नवतः॥ढ॥पश्चादग्नेः क[illegible]वेश्मा

सीमंतोन्नयने विवाहतिरिक्तकर्मण्यपीति न्याय्यकारस्य तस्योपाशयः। सर्वं च होमानां
वाक्यद्वयविधानात् समस्तानि चतुर्थीं प्रतीयात् महाव्याहृतिभिर्जुहोतीति चोदनायां चेति

न्वारब्धायां महाव्याहृतिभिस्तिस्रो जुहोति। तत्राचार्यः स्थापितस्याग्नेः पश्चात् कन्यां उपवेश्य व
रस्य दक्षिणतः अन्वारब्धायां अन्वारंभयुक्तायां महाव्याहृतिभिस्तिस्रो जुहोति। भूः स्वाहा भुवः
स्वाहा स्वः स्वाहेति॥ ॥ समस्तानि च चतुर्थीं प्रतीयेतेतस्यां चोदनायां॥ समस्तानि महाव्याहृति
भिस्तिसृभिरेकीकृतानि चतुर्थीमाहुतिं प्रतीयेत जानीयात् तथा एतस्यां महाव्याहृतिचोदना
यां यत्र यत्र महाव्याहृतिभिर्होम उच्यते तत्र तत्रैवं प्रतीयात्॥ ॥ एवमेनादेशे सर्वेषु स्मृति
कर्मसु पुरस्ताच्चोपरिष्टाच्चैताभिरेव जुहुयात्। एवं च तस्मिन् महाव्याहृतिभिर्यत्र आदेशो उ ६४
क्तो न भवति तत्र सर्वेषु स्मृतिकर्मसु उपनयनादिषु संस्कारेषु पुरस्तात् प्रथमत उपरिष्टाद
न्ते च एताभिरेव महाव्याहृतिभिरेव जुहुयात्। यत्र महाव्याहृतिहोमस्तत्रतास्य प्रधानान्न्या

६० न्यंगानि ज्ञेयानि॥ ॥द्वादशखंडः॥ ॥१२॥ सम्राज्ञी श्वशुरे भवेति पिता भ्राता वास्याग्रेण मूर्द्धनि जुहो
ति स्रुवेण वा तिष्ठन्नासीनायाः प्राङ्मुख्याः प्रत्यङ्मुखः। प्राङ्मुख्याः आसीनायाः उपविष्टायाः कन्यायाः
पिता जनको भ्राता वा तिष्ठन् प्रत्यङ्मुखः कन्याया मूर्द्धनि सीमंते अस्याग्रेण असिं खड्गः स्रुवस्याग्रेण स्रुवे
ण वा घृतं जुहोति। जुहोती स्रुवे सर्पिः प्रतीयेतेति न्यायात्। स्वाहाकारांते होममंत्राणामिति सूत्रात्
अंते स्वाहाकारः। सा विशी सा विशत्रुष्टुप्। सम्राज्ञी श्वशुरे भव स्वाहा। ॥ मिति सोनगत्वाय
मिति दक्षिणेन पाणिना दक्षिणं पाणिं गृह्णातीति सांगुष्ठमुत्तानेनोत्तानं तिष्ठन्नासीनायाः प्राङ्मुख्याः
७२ प्रत्यङ्मुखः। तिष्ठन् प्रत्यङ्मुखो वरो गृभ्णामि इत्यनेन मंत्रेण प्राङ्मुख्या आसीनायाः कन्यायाः द
क्षिणं हस्तं वामीग्रनीश्च कुलक्रमसहितमाचारात् सांगुष्ठं उत्तानं उत्तानेन दक्षिणेन हस्तेन गृह्णाति॥

अत्र तिष्ठन्नित्यनेन आसीनं न्यायं बाह्यमिति निषिध्यते। प्रत्यङ्मुख इत्यनेन प्राङ्मुखत्वं नि-
षिध्यते। सावित्री सावित्री त्रिष्टुप् अर्यम्णामिति सौ नगत्वा यद्दस्तं तिष्ठन्नासीनाया इत्याद्युक्तत्रैव
पुनस्तिष्ठन्नासीनाया इति किमर्थं॥ पूर्वं यत्तिष्ठन्नासीनायोरित्युक्तं तत्पित्रादेरविशेषितस्योक्तं।
अत्र यदुच्यते तदाग्नीयोगाद्वरस्य तस्मात्पुनर्ग्रहणं। तथा च शाख्यांतरं। पुत्रकामोंगुष्ठमेव गृह्णी-
यात्स्त्रीकामोंगुलीरेव हस्तं सांगुष्ठमुभयकाम इति कारिका। कन्याहस्ते शमीगर्भादश्वत्थादा-
हृतं लवं। आचाराद्दंपती पिष्टाममर्पयंतिकरग्रह इति॥छ॥ पंच चोत्तरा जपित्वा। अर्यम्णामित इत्य-
स्या एव उत्तराः पंच ऋचस्तां पूषन्नित्याद्या जपित्वा। ततः सावित्री सावित्री त्रिष्टुप् इति सोनुष्टुभस्तो ३५
।१८। पूषन्शिवतमामेरयस्व स्वपा। अमोहमस्मि सा त्वं सा त्वमस्यमोहं। द्योरहं पृथिवी त्वमृक्त्वमसि सा

४२

माहं सामाहं सा मामनुव्रता भव। तावेह विवहावहै प्रजां प्रजनयावहै। पुत्रान्विंदावहै बहूंस्ते
संतु जरदष्टय इति॥ अमोहमित्यारभ्य जरदष्टय इत्येवमंतो मंत्रः पंच ऋचोनंतरं जप्तव्यः। इति करण-
स्य मंत्रांत इत्युक्तत्वात्। अस्मिन्नवसरे चत्वारो द्विजाः सूर्यकन्यायै श्रावयेयुः शिष्टाचारात्॥
तथा च ग्रंथविधाने। सूर्यायै नाव ऋत्वं तु श्रावयेत्कन्यकां पिता। अनुरूपं तु सद्दर्शं नक्षत्रं तेन दिद-
ति। इमामिति जपेत्कन्या नानि मालभ्य नित्यशः॥ एवमेव जपेद्भर्ता दीर्घायुः सुमनेव ततः आदा-
य दक्षिरूपेत्तु भ्राता कन्यां पिता पिवा। इत्यापुत्रवती भवेन्न च भर्त्रा वियुज्यत इत्यारभ्य। सूक्ता-
दुपोद्धरेदेनं नक्षत्राशतिरुद्धचं। उपदिष्टोयमेकेषां पुंसः कर्माणि पौरुष इति॥छ॥ उदकुंभेन
वं भूर्भुवः स्वरिति पूरयित्वा। नवं ब्रतनमुदकुंभं स्थंडिलादीशानकोणे भूर्भुवः स्वरित्यनेन

स३ पूरयित्वाप्रागुदीच्यांदिशितास्थेयाइतिवक्ष्यमाणत्वात्॥ततः॥छ॥पुन्नाम्नोवृक्षस्यसक्षीरा
न्सपलाशान्सकुशानोप्य।तस्मिन्नुदकुंभेसआचार्यःपुंनाम्नआम्रकादेर्वृक्षस्यसक्षीरान्सदुम्बा
न्सपलाशान्नवपल्लवान्सकुशानुदकेनोप्यप्रक्षिप्यततः॥छ॥हिरण्यमितिचैके।तस्मिन्नुदकुं
भेहिरण्यंसुवर्णंप्रक्षिपेदित्येके।एकइतिवचनाद्विकल्पः॥छ॥तंब्रह्मचारिणेवाग्यतायप्रद
यात्तमुदकुंभंवाग्यतायवाग्यमयुक्तायब्रह्मचारिणेप्रदायदत्वाततः।प्रागुदीच्यांदिशितास्थे
याःप्रदक्षिणमवर्तंति।प्रागुदीच्यांदिशिऐशान्यांताःकुंभस्थाःस्थेयाआपःयथावधावरस्य
क्रमणेक्रियमाणेप्रदक्षि देशाःप्रादक्षिण्येनभवंतितथास्थापनीयाःतासांघटस्थानाम ६६
पांस्थेयाइतिसंज्ञा॥छ॥अश्मानंचोत्तरतउपस्थाप्य।वध्वाइआनंतर्यार्थःअनंतरंअग्नेरुत्तर

तःपेषणीपेषणीपुत्रकलक्षणं।अश्मानंउपस्थाप्यततःउदकुंभमभित्यारन्यत्रअश्मनःस्था
पनांतंआचार्यकर्तृकं।इतउत्तरमाचार्यःकारयतीतिवक्ष्यमाणं॥छ॥एहिसूनरीतुदक्षाद्दक्षि वरर
णहस्तेनवरःआचार्येणोक्तःएहिसूनरिइतिमंत्रेणतांवधूमुत्थापयति।ततः॥छ॥एह्यश्मा
नमातिष्ठाश्मेवत्वंस्थिरानव।अभितिष्ठपृतन्यतःसहस्वपृतनायतइतिदक्षिणेनप्रपदे
नाश्मानमाक्रमय्य।वरःएह्यश्मानमितिमंत्रेणगृहीतहस्तांवधूंदक्षिणेनप्रपदेनपादाग्रे
णअश्मानमाक्रमयतिततःअश्मनःक्रमणादर्वाक्कन्याउपुरतःस्थिता।अतऊर्द्ध्वउपष्ट
स्यामंगलानिकर्मेत्वसा॥छ॥प्रदक्षिणमग्निंपर्याणीय।वरःस्वयंपुरतोभूत्वापश्चात्कन्या
कृत्वाअग्निंप्रदक्षिणंपर्याणीयततः॥छ॥तेनैवमंत्रेणद्वितीयंवसनंप्रदाय।तेनैववस्त्रेण [illegible] नव

जानामात्यंसंस्कृतंकुर्वन्तिज्ञानसमानमेवच।एतांश्चबाह्यतःकृत्वाशेषस्यैवप्रदक्षिणमितिगंगाधरः।

रोरेभ्यासीदित्यनेन मंत्रेण कन्यायै द्वितीयं वसनं दद्यात् ततः ॥ छ ॥ लाजांछमीपलाशमिश्रान् नि
ताभ्राता वास्याद्अंजलावावपति । कन्यायाः पिता भ्राता वास्यात् शूर्पात् कन्याया अंजलौ लाजा
न् त्राष्ट्रं त्रष्टान् व्रीहीन् शमीपलाशमिश्रान् शमीपल्लवमिश्रितान् हस्तेन दर्व्या वा आवपति ।
स्पंशूर्पस्पत्तेरिति यास्कः । हस्तेन वार्पयेत्ताश्च यज्ञदारुमयेन वेति कारिका ॥ छ ॥ उपस्तरणाभि
घारणप्रत्यभिघारणं चाज्येन । ततः आचार्यः कन्याया अंजलौ स्रुवेण घृतं उपस्तरणसंज्ञकं
मुंचति । ततः कन्यादाता कन्याया अंजलौ लाजावदाने द्वे त्रीणि वा शूर्पात् दर्व्या मुंचति । ततः उप
रि अभिघारणं । शूर्पस्थस्य शेषस्य हविषः आज्येनाभिघारणं च । उपस्तरणाभिघारणप्रत्य ६१
भिघारणानि आचार्यः कुर्यात् । इयं परिभाषा सर्वत्रावदानधर्मे याद्याताञ्जुहोति ॥ २ ॥ ॥

इयं पतिर्यदित्मंत्रं स्थिता पत्नी जुहोति तान् अंगुष्ठेन प्राङ्मुखी चैव देवतं स्यात् प्रजापतिरिति कारिका

॥ ॥ अयो दक्षः षंडः ॥ इयन्नार्युपब्रूते लाजानावपंतिका । शिवा न्यातिज्योम्भूयासं चिरंजीवतु मे प
तिः स्वाहेति तिष्ठंती जुहोति पतिर्मंत्रं जपति । ताल्लाजानावपंतिका इयं नारीति मंत्रेण तिष्ठंती कन्या जुहो
ति पतिर्वरो मंत्रं जपति । अश्मक्रमणं घेवं द्वितीयं । अश्मक्रमणादि एष्य समानं तत इति पूर्व
वत् अश्मानं आक्रमय्य स्वयमग्नेर्भूत्वा वह्निं प्रादक्षिण्येन पर्याणीय लाजा चतुर्थं हीत
पत्नी जुहोति वरो मंत्रं जपति । एवं द्वितीयं होमं कुर्यात् । द्वितीयं होममित्यनेन वस्त्रदानप्रतिदेवा
दृश्यते । एवं तृतीयं अश्मक्रमणाघारम्य एवं तृतीयं होमं कुर्यात् । तूष्णीं कामेन चतुर्थं । अश्म
क्रमणादि अमंत्रकं होमं च कुर्यात् । कामेन कामनया सह या कामना भवति तां मनसा ध्यायन् जु
हुयात् ॥ छ ॥ प्रागुदीच्यां दिशि सप्तपदान्यभिप्रक्रमयति । प्रागुदीच्यां दिशि ऐशान्यां दिशि

प्रजापतिं ध्यायन्निसाम्धलायन इति

इषत्त्वमपे२

वाक्यस्य साकांक्षत्वान् यादेश्ययोग्यत्वा संनिहितत्वाच्च य ...
प्राणाय त्वापानाय त्वा व्यानाय त्वा त्रिस्वाभिरुक्तिस्वाभिरि ... सर्वत्र सन ...

सप्तभिर्मंत्रैर्वरः सप्तपदानि दक्षिणं दिप्रक्रमयति अभ्युत्क्रामयति॥छ॥ इष एकपद्यूर्जे द्विपदी राय
स्पोषाय त्रिपदी मायोभवाय चतुष्पदी पशुभ्यः पंचपदी ऋतुभ्यः षट्पदी सखा सप्तपदी भवेति। अत्र
त्वं से भव राष्ट्रं इष्टः सप्तसु पदेषु योजनीयः तेन इष एकपदी भवेत्यादि मंत्राः सप्त॥छ॥ तान्यद्भिः शाम
यति। तानि पदानि अद्भिरुदकैः परिषिंचति सेचनं करोति। पदाक्रमणं चाचार्यः कारयति॥छ॥
आपोहिष्ठीयाभिस्तिसृभिः स्थियाभिरद्भिर्मार्जयित्वा आपो हिष्ठामयोभुव इत्येताभिस्तिसृभिर्ऋ
ग्भिः कुंभस्थिताभिः स्त्रियस्तज्ज्ञकाभिरद्भिरुदकैः कन्यावरयोर्मार्जनमाचार्यः कृत्वा ततः॥छ॥ मूर्द्ध
न्यभिषिच्य। कन्याया वरस्य च मूर्द्धनि मस्तके आचार्योभिषेचनं करोति। ततः मूर्द्धनीत्येकदेशोस ६८
प्तमी। अर्द्धतीं प्राग्नुरवा वाल्ला सप्तमादुत्तरपदे। पादानित्ता निवाल्याभिरद्भिः प्रोक्ष्यात्र हावकः।

धीवर

७२ तिष्ठन्तु दक्षुरवो विलक्षणस्वर्णां दक्षिणस्तयोः। ऋचेनापोऽभिषिंचेत्तौ पल्लवैः सकुशोदकैः। अत्यिका
मूर्द्धनि तनयोः कुंभेनैवाथ सिंचति। बध्वा हृद्बंधं ततः सम्यक् करं मुंचत्यतो करः। गां ददानीत्याह। वर आचा
र्य भवते गां ददातीत्याह॥छ॥ ब्राह्मणेभ्यः किं विदध्यात् सर्वत्र स्थालीपाकादिषु कर्मसु ब्राह्मणे
द्विजेभ्यः सर्वत्र सर्वेषु स्थालीपाकादिषु पार्वणप्रभृतिषु कर्मसु किं विदध्यात् अष्टमुष्टीन् भवेत् किं
चिदिति स्मृतिः। पूर्णपात्रो दक्षिणा वरो वेति कात्यायनः। सूर्याविदुषे वाधूयाँ। सूर्यां यो वेत्ति तस्मै
विदुषे पंडिताय वाधूयं वध्वाः शिरोवच्छादनं वस्त्रं जालिकां वा त्र्यहे इतिक्रांते दद्यात्। सत्येन वेति स
क्तं यो ब्राह्मणः पठतोऽर्थतः वाधूयं च वरं धौतं तस्मै दद्यात् त्र्यहे स्थालीपाकमिति कारिका॥छ॥ गौर्ब्राह्मण
स्य वरः। ब्राह्मणस्य वरो दक्षिणा तु उक्ते गौर्ज्ञेया॥छ॥ ग्रामो राजन्यस्य। राजन्यस्य क्षत्रियस्य श्रि

सूर्य धा दृष्टे मंत्रा ...
त्रिभिः सा ...
रवेब ...

१ आमोन्नवति। छन्न अश्वो वैश्यस्य। वैश्यस्यप रो दक्षिणे तुले १

णे तुक्तैः अश्वो भवति। उक्ताद्दक्षिणा आचार्यस्य। अधिरथं शतं दुहितृमते। गौ रितानुवर्तते दुहि
तृमते अभ्रातृमती पित्रे अधिको रथो यस्मिन्तत् गवां शतं दद्यात्। अभ्रातृमती विवाहदोषनाशा
र्थं। नाभ्रातृीमुपयच्छेत ततो कंह्यस्य तद्भवतीति निरुक्ते निषेधात्॥८॥ याज्ञिकेभ्यो श्वं ददाति। याज्ञि
केभ्यो विवाहयज्ञप्रवणेभ्योश्वं दद्यात्॥ ॥चतुर्दशः खंडः॥१४॥ ॥ प्र त्वा मुंचामीति त्र्यृचं गृहात्प्रतिति
ष्ठमानायां। पितृगृहात्पतिगृहं प्रतितिष्ठमानायां गर्भस्थां कन्यायां प्रथमगमने हावकः। प्रत्वा मु
ंचामीति त्र्यृचं जपेत्। सावित्री वरुण सविता इंद्र पूषा त्रिष्टुबनुष्टुप् त्रिष्टुभः। प्रत्वा मुंचामि वरुणस्य
पाशात्। जीवं रुदंतीति प्ररुदंत्यां। प्रथमगमने कन्यायां बालस्वभावात् प्ररुदंत्यां प्रतिष्ठमा
नायां कन्यायां जीवं रुदंतीति त्र्यृचं हावको जपेत्। घोषाश्विनौ त्रिष्टुप्। जीवं रुदंति विमयंते अध्वरे॥१॥

नाम्निप्रविष्टकाछविशेष २

॥ अथ रथारूढस्योपांजनं पत्नी कुर्यात् अक्षन्नमीमदंतेत्येतया सर्पिषा। अथवा द्वीपयद्यर्थी यदि वेद्रथो न
वति तदा जनादिकं न वति रथारूढस्य रथचक्रस्य पत्नी विवाहिता कन्या अक्षन्नमीमदंतेत्यनया स
र्पिषाज्येन अंजनं कुरुते। गोतम इंद्रः पङ्क्तिः। अक्षन्नमीमदंत ह्यव प्रिया॥८॥ शुची ते चक्रे इति चक्रे रतिने
ताभ्यां चक्रयोः पूर्वया पूर्वमुत्तरयोत्तरं शुची ते चक्रे यात्याभ्यां चक्रयोः पूर्वया शुची त इत्यनया दक्षि
णं चक्रमभ्यंजति। उत्तरयाद्वेत इत्यनया उत्तरं चक्रमभ्यंजति। अनयोः सूर्या विवाहसूक्ति रनु
ष्टुप्। शुची ते चक्रे यात्या व्यानद्वेते चक्रे सूर्ये। नारु॥७॥ उक्षो च॥ वक्ष्यमाणमंत्रेण स्त्रो अनड्वाहो युंजति
चकारात्तयोरभ्यंजनं कुर्यात्॥८॥ खे रथस्येत्येतया फलवतो वृक्षस्य शम्यागर्तेषु केकां यांनि
खाय। खे रथस्येत्यनया फलवतः फलयुक्तस्य वृक्षस्य तरोः शम्यागर्तेषु शम्यार्थे

एकैकांएकांएकांवयांशाखांनिखायनिद्धिष्यात ततःअपालेंद्रोनुष्टुप्।खेरथस्यखेनसः॥ श
त्यावाग्निमंत्र्य॥वाशब्दोविकल्पार्थः नित्यायु गस्त्वाएवयापुरातनीशाम्यातांवापूर्वोक्तेनमंत्रे
णाग्निमंत्र्यअग्निमंत्रणंकृत्वाततः॥७॥अथोसोयुंजंतियुक्तस्तेअस्तुदक्षिणइतिद्वाभ्यां।पूर्वया
पूर्वमुत्तरयोत्तरमित्यनुवर्तते।अथानंतर्यार्थे अग्निमंत्रणानंतरंयुक्तस्तइतिद्वाभ्याम्सूर्यांउत्ते
अनड्वाहौपूर्वयायुक्तस्तइत्यनयापूर्वंदक्षिणपार्श्वे उत्तरयायुनज्मि तइत्यनयाउत्तरंवामपा
युंजंतिवरपार्श्वस्थं॥गोतमइंद्रःपङ्क्तिःयुक्तस्तेअस्तुदक्षिणःशर८॥युक्तावनड्वाहावित्येतेना
र्चेनयुक्तावग्निमंत्र्य।युक्तावित्यनेनार्द्धर्चेनलक्षणेनमंत्रेणयुक्तौयोजितावनड्वाहौअग्निमंत्र्यात १०
तःसूर्यानड्वाहावनुष्टुप्।युक्तावनड्वाहावास्तांअर्द्धर्चं॥१॥अथयदिरथांगंविशीर्येतच्छिद्येत।

वाहितामेर्गृहांकन्यांप्रपाद्य।अथयदिसंनावनायां।यदिचेन्मार्गेरथस्यईषादिकंरज्वादिकंवा
विशीर्येतविशीर्णंभवतिविच्छिद्येतविच्छिन्नंवाभवतितदाआहिताग्नेरग्निहोत्रिणोगृहान्कन्यांवि
वाहितांप्रपाद्यप्रवेश्यततः॥७॥अग्निव्ययस्वखदिरस्येत्यनयापरिदध्यात्।अग्निव्ययस्वेत्यनया
तद्रथांगंविच्छिन्नंपरिदध्यात्।पुनःसंतनुयात्।विश्वामित्रोरथांगस्तुतिस्त्रिष्टुप्।अग्निव्ययस्वख
स दिरस्यसारंकुरु।त्वंविदस्वमितिग्रंथिं।संविदित्यनयाच्छिन्नरज्वादेर्ग्रंथिंबध्नीयात्।अत्रिरग्नि
र्वानुष्टुप्।त्वंविदस्वंनवाज्जिनंत्वास्वस्तिनोमिमीतामितिपंचर्चंजपति।तद्रथांगसंस्कारानंतरं
स्वस्तिनइतिस्वस्त्ययनंमार्गेकल्याणायजपति।स्वस्त्यात्रेयोविश्वेदेवास्त्रिस्रोजगत्यस्त्रिष्टुनो १२
वानुष्टुभो।स्वस्तिनोमिमीतामश्विनानगःस्वपासिकिं स्थकमितिरथमारोहंत्यांउहानिमंत्रणा

नंतरं रथमारोहेत्यां रथारोहणं कुर्वीत्यांत स्यां वधां सुकिंशुकमित्येतां जपेत्। सूर्या विवाहस्तु त्रिष्टि
ष्टुप्। सुकिंशुकं शल्मलिं विश्वरूपं शशास्मा विदन्परिपंथिन इति चतुष्पथे। मार्गक्रमेण चतुष्पथे प्र
प्रमा विदन्नित्येतां जपेत्। मा विदन्परिपंथिन इन्द्रस्य सूर्या दंपती अनुष्टुप्॥ ॥ ये वध्व इति श्मशाने
मार्गे श्मशाने मनुष्यदाहस्थाने प्राप्ते ये वध्व इत्यृचं जपेत्। सूर्या यक्ष्मनाशनो नुष्टुप्। ये वध्वश्चंद्रं वहतुं
न्तः वनस्पते शतवल्शा इति वनस्पतावर्द्धर्चं जपति। मार्गवशाद्वनस्पतौ महावृक्षे प्राप्ते वनस्पते शतस
र्द्धर्चं जपेत्। विश्वामित्रो वनस्पतिस्त्रिष्टुप्। वनस्पते शतवल्शो विरोह अर्द्धर्चः॥ ॥ सुत्रामाणमिति
नावमारोहंत्यां। मार्गवशान्नद्यां नावं नौकामारोहंत्यां वध्वां सुत्रामाणमित्येतामृचं जपेत्। गयो दिवे ७१
देवा जगती सुत्रामाणं पृथिवीं द्यामनेहसं। अश्मन्वतीति नदीतरंत्यां। नदीतरंत्यां वध्वां अ

न्वतीत्येतामृचं जपेत्। स अग्नयुर्देवास्त्रिष्टुप्। अश्मन्वती रीयते संरभध्वं॥ ॥ अपि वायुक्तेनै
वा। स्वल्पोदकायां नद्यां युक्तेनैव रथेन गच्छंत्यामपि वा अश्मन्वतीति जपेत्॥ ॥ उद्वऊर्मिरि
त्यगाधे। अगाधे गंभीरे जले गच्छंत्यां वध्वां उद्वऊर्मिरित्येतामृचं जपेत्। विश्वामित्रो वि [illegible]
नद्यो वाच्यमनुष्टुप्। उद्वऊर्मिः शम्या हंतु अश्रा अप्रेक्षणं वध्वा अगाधस्य जलस्य वधा अप्रेक्षणं दर्श
नं न कार्यं॥ ॥ इह प्रियमिति समष्टहाम्नाम्नायाः कृताः परिहाप्य। इहा अति प्राम्नायावधा इह प्रि
यमिति समस्तवाचावायो जपेत्। परं तु कृतायाः पूर्वं विनियुक्तास्ताः परिहाप्य त्यक्ता। सूर्या वि
वाहस्तु तिरश्ची जगत्यनुष्टुभश्चतस्र उरो बृहत्यनुष्टुप्। ये वध्वो मा विदन्निति परिहरेत्। नी
प्रति १ ललोहितमिति सरखंधने विनियुक्तापि न त्याज्या। कन्यावंधुर्निर्विनियुक्तं वा कर्तनेदात्। इह

प्रियंप्रजयातेसमृध्यतांस्त्वं अत्रप्रत्वामुंचामीत्यादिमंत्राआचार्येणजप्तव्यावरेणवा।उभ
यथाशिष्टाचारदर्शनात्॥१४॥ ॥पंचदशःखंडः॥१५॥ आनडुहमित्युक्तं।अनडुहानुक्तातदीयंरोहि
तवर्णंकृत्वोक्तंचर्मोदग्ग्रीवंप्राग्ग्रीवंवाअग्नेःपश्चादुपस्थापयेत्।आनडुहंरोहितंचर्मोदग्ग्री
वंप्राग्ग्रीवंवोत्तरलोमंपश्चादग्नेरुपस्तीर्येतिसूत्रेसूत्रितं॥१॥ तस्मिन्नुपवेश्यान्वारब्धायांप
तिस्रुवतस्त्रोजुहोति।तस्मिंश्चर्मणितांकन्यामुपवेश्यान्वारब्धायांअन्वारंभंकुर्वत्यांतस्यांपति
र्वरोवक्ष्यमाणेनश्रुवतस्त्र आज्याहुतीर्जुहोतितांदृढपुरुषउन्मथ्यप्राग्वोदग्वासुगुप्तेअगारेआ
नडुहेरोहितेचर्मण्युपवेशयतीतिकात्यायनोक्तेःअग्निनादेवेनपृथिवीलोकेनलोकानामृग्वेदेन ७२
वेदानांतेनत्वाशमयाम्यसौस्वाहा।वायुनादेवेनान्तरिक्षलोकेनलोकानांयजुर्वेदेनवेदानांतेन

[illegible]त्वा॰स्वाहा।सूर्येणदेवेन द्यौर्लोकेनलोकानांसामवेदेनवेदानांतेनत्वा॰स्वाहा।चंद्रेणदेवे
नदिग्लोकेनलोकानांब्रह्मवेदेनवेदानांतेनत्वा॰स्वाहा।अग्निनेत्यादिभिश्चतुर्भिर्मंत्रैःसा
वित्र्यत्रवध्वाःसंबोधनंतंनामग्रहणंकृत्वाचतस्रआज्याहुतीर्जुहुयात्आचार्योवावरोवाचा
त्।भूर्यतिपतिघ्नलक्ष्मीदेवरघ्नींजारघ्नींतांकरोम्यसौस्वाहेतिवाप्रथमयामहाव्याहृत्याप्रथमो
पहिताद्वितीययाद्वितीयातृतीययातृतीयासमस्ताभिश्चतुर्थी।वात्राद्यःपूर्वोक्तचतुष्टयमंत्राणां
विकल्पार्थः।असावित्यत्रवध्वाआमंत्रितांतंनामग्रहणपूर्वकंप्रथमयामहाव्याहृत्याभूरित्यन
याप्रथमामहाव्याहृतिभिर्भूरितीयंउपहितामिश्रीकर्तव्या।तत्रएवंप्रयोगः।भूर्यातिस्वाहा।एवं
द्वितीययामहाव्याहृत्याभुवरित्यनयाद्वितीयाभुवरितीयंमिश्रीकर्तव्या।भुवोयाते॰हा।एवंतृतीयया

महाव्याहृत्या स्वरित्यनया तृतीया स्वरितीयं मिश्रीकर्त्तव्या। स्वर्यात्ते० हा। समस्ताभिर्महाव्याहृति
भिः भूर्भुवः स्वरितीयं मिश्रीकर्त्तव्या। भूर्भुवः स्वर्यात्ते० स्वाहा। एवं चतसृभिर्मंत्रैस्तत्स्त्राज्याहुती
र्जुहुयात्॥७॥ अघोरचक्षुरित्याज्यलेपेन चक्षुषी विमृजीत। ततः स्विष्टकृतः प्राक् अघोरचक्षुरि
त्यनया वधा चक्षुषी नेत्रे आज्यलेपेन विमृजीत नेत्रांजनं वर आचार्यो वा करोतीत्यर्थः। सूर्या विवा
हसूक्तिः रनुष्टुप्। अघोरचक्षुरपतिघ्न्येधि। ३। ८। कयानश्चित्र इति तिसृभिः केशांतान् निमृज्य। वधाः
केशांतान् अलकांतान् कयानश्चित्र इति तिसृभिर्त्तृचैरभिमृश्य वरः। ततः अभिमर्शनं करोतीत्य ७२
र्थः। वामदेव इंद्रो गायत्री। कयानश्चित्र आभुवत्। ३। ३। ७। उतत्यादेव्या भिषजेति च तस्यो हुत्याते स्वा
हाकारेण मूर्द्धनि संस्रावं। उतत्येति च ~~सृभिर्मिर्मंत्रैरस्याकारककरसंस्रवमा~~ अत्र तेपं अतु द्रवणं कृत्वा क

तुर्वोमंत्रान्   डु१

न्यायामूर्द्धनि मस्तके अंते स्वाहाकारेण संस्रवं संस्रवसंज्ञकं होमं स्रुवेण जुहुयात्। इरिंबिठि
रश्चिनाकुसिकः। उतत्यादेव्या भिषजा। ३। ६। अत्र सर्वत्र लिंगाद्वरस्यैव मंत्रजपो नाचार्यस्येति ज्ञाय
ते॥७॥ अत्र हैके कुमारमुत्संगमानयंत्युन्नयतः सुजातमाते योनिमित्येतया पिवास्त्री। अत्र क
र्मणि एके आचार्याः कन्याया उत्संगे उपस्थे कुमारं अनुपनीतं आतेयोनिमित्यनेन मंत्रेण आ
नयंति। कीदृशं। उन्नयतः उन्नयकुलतः मातृतः पितृतश्च सुजातं सुजन्मकं। उन्नय कुल विशुद्ध
मित्यर्थः। अपिवेति पक्षांतरे। तूष्णीममंत्रकमेव कुमारमुपवेशयेत्। शिष्टुरादंतजननात्कुमा
रः पंचमादिति। आतेयोनिं गर्भ एतु ३। ३। अये वक्ष्यमाणोयं मंत्रो ज्ञेयः॥८॥ तस्यांजलौ फलानि
दत्वा पुण्याहं वाचयंति। तस्य कुमारस्य अंजलौ प्रसृतौ फलानि आम्रश्रीफलादीनि दत्वा पुण्या

हं ब्राह्मणान्वाचयति। पुण्याहवाचनं करोतीत्यर्थः॥ छ॥ पुंसवतीह भवति। इति प्रसिद्धौ। एवम
मुना प्रकारेण सापत्नी पुंसवती वीरसूर्भवति तस्मादेतत्कुमारोत्संगादिकर्म विधेयं॥ छ॥ इहै
वस्तमिति सूक्तशेषेण गृहान्प्रपादयंति। इहैवेत्यतः सूक्तशेषेण वधूं नर्वरगृहान्प्रपादयंति प्रवे
शयंति। वरपक्षीयाः बहुवचनात्। वरं च मंत्रलिंगात्। सूर्याविवाहस्तुतिरनुष्टुप् द्वितीया जग
ती तृतीया त्रिष्टुप्॥ इहैव स्तं मा वियोष्टं इत्यृगिहाशास्त्रयोर्जायापत्योर्नियमानाह॥ १२॥ ॥ षोडशः
खंडः॥ दधिक्राव्णो अकारिषमिति दधि संपिबेयातां। समित्येकीभावे। दधिक्राव्ण इत्येतया दं
पती दधि संपिबेयातां। दधिपानं सहैव कुरुतः न सह भुंजीतेत्यस्य निषेधात्। अत्र तु वचनात्सह[illegible] ३५
नं। वाग्यतावासीयातामाध्रुवदर्शनात्। तौ दंपती ध्रुवदर्शनमर्यादीकृत्य वाग्यतौ वाग्यमयुक्तौ आ

सीयातां। आसीयातामित्यनेन व्यापारांतरनिवृत्तिः। अस्तमिते ध्रुवं दर्शयति ध्रुवैधि पोष्या
मयीति। अस्तमिते आदित्ये ध्रुवं ध्रुवाख्यं नक्षत्रं नार्यायै ध्रुवैधि इति मंत्रेण दर्शयति। वरः [illegible]
मित इत्यनेन सान्निध्याकाशे ध्रुवदर्शनाख्यं कर्म विधेयं। सूर्याविवाहस्तुतिरनुष्टुप् ध्रुवैधि
पोष्या मयि इत्यृचा॥ ध्रुवं पश्यामि प्रजां विंदेयेति ब्रूयात्। सापत्नीय यद्यत्र ध्रुवं न पश्येत्तथा
पि ध्रुवं पश्यामि प्रजां विंदेय इति ब्रूयात्॥ छ॥ त्रिरात्रं ब्रह्मचर्यं चरेयातां। तौ दंपती त्रिरात्रं ब्र
ह्मचर्यं मैथुननिवृत्तिं चरेयातां पाणिग्रहणादनंतरं एते नियमा दंपत्योः। तौ ॥छ॥ संवत्सरं [illegible]
[illegible]न समुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमंततः इति कात्यायनः। त्रिरात्रं द्वादशरात्रं संवत्स
रं नियतौ स्यातामित्याश्वलायनः॥ छ॥ अधःशायीयातां। त्रिरात्रमित्यनुवर्तते। तौ दंपती त्रिरात्रं

अधःशयीयातां। त्रिरात्रं खट्वादिशयनप्रतिषेधः। अक्षारालवणाशिनौ ब्रह्मचारिणौ
अलंकुर्वाणौ वधःशायिनौ स्यातामित्याश्वलायनः। अधःशाय्येति कात्यायनः॥८॥ दध्योदनं सं
भुंजीयातां। पिबतं च तृप्णुतं चेति ऋचेन। त्रिरात्रमिति वर्त्तते। पिबतं चेति ऋचेन दध्योदनं दध्ना
दं४ उपसिक्तओदनो दध्योदनस्तं संभुंजीयातां दंपती त्रिरात्रं शय्या वाश्वलायनावु परिशिष्टात् ज्योतिः पिब
तं च तृप्णुतं चास्य गच्छतं शश्व॥ सायंप्रातर्वैवाह्यमग्निं परिचरेयातामग्नये स्वाहाग्नये स्विष्टकृ
ते स्वाहेति। त्रिरात्रमिति वर्त्तते। सायंप्रातस्त्रिरात्रमाज्याहुतिधर्मेणाग्नये स्वाहाग्नये स्विष्टकृते
स्वाहेति हुत्वा वैवाहमग्निं विवाहस्यायं वैवाहस्तमग्निं परिचरेयातां दंपती। नाज्याहुतिषु स्वि ३५
वाज्यभागौ स्विष्टकृच्चेति प्राप्तस्य निषेधस्य नियमः क्रियते स्विष्टकृतः॥ पुमांसौ मित्रावरुणौ

पुमांसावश्विनावुभौ। पुमानिन्द्रश्चाग्निश्च पुमांसं वर्त्ततां मयि स्वाहेति पूर्वां गर्भकामा। गर्भका
मा गर्भकामयते सौ आग्नेय्याहुतिस्थाने पूर्वां प्रथमां पुमांसाविसनेनाहुतिं जुहुयात्। पूर्वा
मित्युक्तत्वात् स्विष्टकृन्नित्यः। दशरात्रमविप्रवासः। विवाहानंतरं जायापत्योः सहनिवासो दश
रात्रं दशादिनं यावत् एके च नैते पदार्थाः पाक्षिका इत्येवमाहुः॥११॥ ॥सप्तदशः खंडः॥ ॥अथ च
तुर्थीकर्म अथशब्द आनंतर्यार्थः यद्वा प्रकृतस्य विवाहार्थे निरासार्थः वक्ष्यमाणमिति कर्मणो ना ४१
मधेयं त्रिरात्रे निर्वृत्ते स्थालीपाकस्य जुहोति। त्रिरात्रे निर्वृत्ते अतीते लौकिकाग्निं स्थापयि
त्वा स्थालीपाकस्य चरो जुहोति। स्थाली पाकस्येत्युक्तत्वाद् ग्रहणासादनप्रोक्षणानि भवंति। च
तुर्थीकर्म लौकिके इति कारिकोक्तत्वात् स्मार्त्ताग्निर्निवृत्तिः। अग्न्यादेश। अग्नये वायवे सूर्यायार्यं

म्णेव वरुणाय प्रसूक्ते प्रजापतयेनुष्टुभं ह्वयामि। एवमासादनप्रोक्षणे नवतं॥ ठ॥ अग्ने प्रायश्चि
त्तिरसि त्वं देवानां प्रायश्चित्ति रसि या स्याः पतिघ्नी तनूस्तामस्या अपजहि अग्न यइत्यनेन मंत्रेण
स्वाहाकारांतेनावदानधर्मेणजुहुयात्॥ वायो प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि। या
स्या अपुत्रियातनूस्तामस्या अपजहि। एवं वायोऽइत्यनेन द्वितीयाहुतिः॥ सूर्यप्रायश्चित्तिरसि
त्वं देवानां प्रायश्चित्तिरसि। यास्या अपशव्या तनूस्तामस्या अपजहि। एवं सूर्येत्यनेन तृतीयाहु
तिः॥ अर्यमणं नु देवं कन्या अग्निमयक्षत स इमां देवो अर्यमा प्रेतो मुंचातु नामुतः॥ एवमर्यमणं
त्वित्यनेन चतुर्थ्याहुतिः॥ ठ॥ वरुणं नु देवं कन्या अग्निमयक्षत। स इमां देवो वरुणः प्रेतो मुंचातु ७६
नामुतः॥ एवं वरुणं त्वित्यनेन पंचम्याहुतिः॥ पूषणं नु देवं कन्या अग्निमयक्षत स इमां देवः पूषा

प्रेतो मुंचातु नामुतः॥ एवं पूषणं त्वित्यनेन षष्ठ्याहुतिं॥ प्रजापत इति सप्तमी॥ प्रजापतेत्यनेन सप्त
म्याहुतिः सप्तमीग्रहणं मंत्रसंदेहनिरासार्थं। हिरण्यगर्भः कस्त्रिष्टुप्। प्रजापतेनत्वदेतान्यन्यः॥
त्रा॥ सो विष्टकृत्यष्टमी॥ स्विष्टकृत इयं सौविष्टकृती। अष्टम्याहुतिः अष्टमीग्रहणं संदेहव्युदा
सार्थं॥ ॥ अष्टादशः खंडः॥ ॥ १८॥ ॥ अध्यांडामूलं पेषयित्वर्तुवेलायामुदीर्ष्वातः पतिवत
ह्यान्यामंत्रे स्वाहाकाराभ्यां नस्तो दक्षिणतो निषिंचेत्॥ अध्यांडापर्णफलिनी तस्यामूलं पे...
नासिकायां निषेकयोग्यं कृत्वा। धर्मपत्न्याः प्रथमर्तुवेलायां प्रथमरजोधर्मे दक्षिणतो नस...
णनासिकायाः दक्षिणरंध्रतः उदीर्ष्वातः इति द्वाभ्यामंत्रे स्वाहाकाराभ्यां निषिंचेत्॥
पृथक्त्वात्कर्म पृथक्त्वमिति न्यायात्॥ एतत्कर्म मंत्रैर्विकरोति। नान्यः प्र... संस्कारत्वा...

वं कर्मण्याज्यभागांतं हुत्वा। व्याहृतिवत्स्विष्टकृतं हुत्वा। पत्न्या दक्षिणनासायां दक्षिणे छिद्रे उदीर्ष्वा
तइति द्वाभ्यां दक्षिणे विंचेत्। एतदाभ्युदयिकपूर्वकं भवति। इष्टापूर्तैस्त्रियाज्ञातो द्वतिदेवलवचनात्।
तथा कारिकायां च। स्मार्त्ते मांगल्यसंस्कारा गर्भाधानादयस्त्रयइति। संस्कारकारणं सर्वेषां मार्
जे श्राद्धमिष्यतइति। ततो महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यादिकर्म समापनं एवमनादे
शे सर्वेष्वनुकृतिकर्मसु पुरस्ताच्चोपरिष्टाच्चैतान् निरेव जुहुयात् इत्युक्तत्वात्॥ ॥ गंधर्वस्य वि
श्वावसो मुखमसीत्युपस्थं प्रजननं विष्यमाणो निमृशेत्। प्रजननं विष्यमाणः प्रजननं रेतःसेकं
कर्त्तुमिच्छुर्नरापत्न्या उपस्थं प्रजननस्थानं गंधर्वस्येत्यनेन मंत्रेणाभिमृशेत् स्पृशेत्। एतदभिम ११
र्शनादिकं रात्रावेव भवति न दिवसे। दिवामैथुननिषेधात्॥ न दिवा स्त्रियमुपेयादित्यापस्तंबः

यदि दिवा मैथुनं व्रजेत्स्त्रीबाऽल्पवीर्याऽल्पायुषाश्च भवंतीति तस्मादेतद्वर्जयेदिति कात्याय
नः। ज्योतिःशास्त्रे। अल्पायुरल्पवीर्यो वा जातो वाप्यत्र जायते। एवं प्रदुष्यते पुत्रो दिवा मैथुनसं
भवः। एतद्गर्भधारणाख्यं कर्म रजोनिवृत्तौ चतुर्थेदिने कार्यं। हारीतः। चतुर्थेऽह्नि स्नातायां युग्मा
सु वा गर्भाधानं तत्र ब्रह्मगर्भं दधातीति। मनुः। रजस्युपरते साध्वी स्नानेन स्त्री रजस्वलेति साध्वी
गर्भाधानादिविहितं कर्म योज्येति कालनिर्णये। अथ मेहनि चांडाली द्वितीये ब्रह्मघातिनी। र
रजकी प्रोक्ता च चतुर्थेऽहनि शुध्यतीति स्मृतिं॥ ॥ समाप्ते अर्थं जपेत्। अर्थं रेतःसेके समाप्ते
त्यृमःणे मंत्रौ जपेत्। जपग्रहणामुच्चैर्न्यायस्यार्थेद इति निराकरणार्थं। प्राणेते रेतो दधाम्यसा
वित्यनुप्राण्यात्। प्राणेत इत्यनेन मंत्रेण असा विति ज्ञायाया आमंत्रितां तं नामगृहणं त्वा अ

नुप्राशयेत्तत्रानुप्राशनंकुर्यात् ।जायायामुखंमुखसंनिक्षिपेदित्यर्थः ।एवमनुप्राशनंअमुकगोत्रे
अमुकीदेविदेहत्युक्त्वातामवजिघ्रेत् ।प्राणेनेत्ययंमंत्रउत्तराभ्यांमंत्राभ्यांसहविकल्प्यते ॥
यथाभूमिरग्निगर्भायथाद्यौरिंद्रेणगर्भिणीवायुर्यथादिशांगर्भएवंगर्भंदधामितेसाविति
वा ।वाशब्दोविकल्पार्थः ।यथेत्यनेनमंत्रेणपूर्वोक्तंवजिघ्रेदा ॥ ६ ॥ आतेयोनिंगर्भएतुपुमान्बा
णइवेषुधिं ।आवीरोत्रजायतांपुत्रस्तेदशमास्यः ।पुमांसंपुत्रंजनयतंपुमाननुजायतां ॥ ते
षांमातान्नविष्यसिजातानांजनयांश्चयान् ।पुंसिवैपुरुषेरेतस्तत्स्त्रियामनुषिंचतु ।तथानदब्र
वीद्धातातत्प्रजापतिरब्रवीत् ।प्रजापतिर्व्यदधात्सविताव्यकल्पयत् ।स्त्रीषूयमन्यास्वादधत्सु ७८
मांसमादधादिह ।यानिभद्राणिबीजानिपुरुषाजनयंतिनः ।तेभिष्ट्वंपुत्रंजनयसुप्रसूर्धेनुका

भव ।अग्निक्रंद ।वीलयस्वगर्भमाधेहिसाधय ।वृषाणंवृषन्नाधेहिप्रजायैत्वाह्वामहेअय
स्ययोनिंपतिरेतोगृभाय ।पुमान्पुत्रोधीयतांगर्भेअंतः ।तंपिष्टहिदशमास्योंतरुदरेसजायतो
श्रेष्ठतमःस्वानामितिवा ।आतेयोनिमित्यारभ्यश्रेष्ठतमस्वानामित्यंतेनमंत्रेणसर्वोक्तं
जिघ्रेदा ।इतिकरणअस्यमंत्रांतद्योतकत्वात् ।श्रेष्ठतमःस्वानामित्येवमंतोमंत्रः ।अत्रमैथु
नंविधेयं ।अनंतोगमनेदोषः ।अनंतौउगर्भशंकित्वात्स्नानंमैथुनिनःस्मृतं ।अन्ततौनु
गच्छेच्चेत्वमूत्रपुरीषवदितिस्मृतिः ।अयमृतुकालःस्त्रीणांषोडशाहपर्यंतः ।याज्ञवल्क्यः ।षो
डशर्तुनिशाःस्त्रीणांतासुयुग्मासुसंविशेत् ।ब्रह्मचार्येवपर्वण्याद्याश्चतस्रस्तुवर्जयेत्तत्र
षोडशादिनेषुपुत्रकामोयुग्मासुरात्रिषुसंविशेदयुग्मासुपुत्रीकामः ।युग्मास्वपिउत्तरोत्त

रैव प्रशस्ता। तत्र चतुर्थ्यादि फलं व्यासः। रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः। पंचम्यां पु
त्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः॥ सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः पुमान्। नवम्यां सुभगा
नारी दशम्यां प्रवरः सुतः। एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तमः॥ त्रयोदश्यां सुता पापा व
र्णसंकरकारिणी। जायते सर्वदुष्टा स्त्री दुःखशोकभयप्रदा। धर्मध्वजः कृतज्ञश्च स्यादात्मवेदी
दृढव्रतः। प्रजायते चतुर्दश्यां गुणाढ्यो जगतः पतिः। राजपुत्री महाभागा सा राजवल्लभाथ
वा। जायते पंचदश्यां तु बहुपुत्रा पतिव्रता। विद्यालक्षणसंपूर्णः सत्यवादी जितेंद्रियः। आश्र १९
यः सर्वभूतानां षोडश्यां जायते पुमानिति। ऋतुयोगपद्ये तु गमने क्रममाह देवलः। योगप
द्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत्। रक्षणार्थमपुत्रां वा ग्रहणक्रमशोऽपि वेति। तीर्थमृतुः तद्यौ

गपद्ये वर्णक्रमेण विवाहक्रमेण वा गच्छेदपुत्रां वा पूर्वमित्यर्थः। ऋतौ गमनमावश्यकं। ऋतु
स्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ इति यमः॥
स्वस्थावस्थायामेतत्पापं स्मृत्यंतरे॥ यः स्वदारानृतुस्नातां स्वस्थः सन्नोपगच्छति। भ्रूणहत्या
मवाप्नोति प्रजां प्राप्तां विनश्यति। न तु काले गमनं यावद्गर्भो न संभवति तावत्। गर्भिणीलिंगानि
आयुर्वेदे श्रमो ग्लानिः पिपासा चानुबंधे रक्तशोणयोः। सद्योगृहीतगर्भाया योन्याः स्फुरणं न
६।३ वेदिति याज्ञवल्क्यः। एवं गच्छन् स्त्रियं क्षामां मघां पौष्णं च वर्जयेत्। सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जन
येत्पुमान्। तत्र निरुक्ते विशेषः। शुक्रशोणितसंयोगान्मातृपितृसंयोगाद्वेति। यदा शुक्रस्य वृ
द्धिर्भवति शोणितात्स्वल्पत्वे च तदा पुत्रः संभवति। शुक्रातिरेके पुमान्भवति इति निरुक्ते। एवं स्त्रियः

शोणितवृद्धिर्भवति पुरुषस्य शुक्राल्पत्वेन तदा पुत्री भवति। शोणितातिरेके स्त्री भवतीश्वतिनि
रुक्ते। यदा शुक्रशोणितौ समानौ भवतस्तदा षंढो भवति। द्वाभ्यां समेन नपुंसको भवति इति
नैरुक्ते। यदा युग्मासु शोणितवृद्धिः शुक्राल्पत्वं तदा स्त्री पुरुषाकारा भवति। यदा युग्मासु
शोणिताल्पत्वं शुक्रवृद्धिस्तदा पुरुषः स्त्र्याकारो भवति। इत्यृतौ नियमः। अनृतावपि स्त्रीच्छया
गमनेन दोषः। याज्ञवल्क्यः। यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। स्वदारनिरतश्चैव प[illegible]
क्ष्या यतः स्मृता इति।। श्री ।। एकोनविंशतितमः खंडः।। ।। तृतीये मासि पुंसवनं स्त्रिया गर्भे
धारणे कृते निश्चिते सति तृतीये मासि गर्भस्य पुंसवनाख्यं गर्भसंस्कारकं कर्म भवति। वृद्धिश्रा सं
द्धपूर्वकं गर्भसंस्कारकत्वात्। गर्भसंस्कारकर्मणीति गार्ग्यवचनात्। गर्भाधानमृतौ पुंसः सव ८०

क्षेत्रसंस्कारकर्मेति विज्ञानेश्वरः २
ति

एपा

ष्यो॥

नं स्पंदनात्पुरेति याज्ञवल्क्यः। पुष्येण श्रवणेन वा। पुष्येण नक्षत्रेण श्रवणेन वा नक्षत्रेण का
र्यं। पुंसवने पुंनक्षत्राण्येव वान्यानि ग्राह्याणि। उक्तयोरेतयोर्नक्षत्रयोरभावे। रत्नमालायां।। पि २
हस्तो मूलं श्रवणः पुनर्वसुमृगशिरस्तथा।। पुंसंज्ञितौ पुष्योऽन्येतानीति। सोमांशुं पेषयि
त्वा कुशकंटकं वा न्यग्रोधस्य वा स्कंधस्यात्यां शुंगां यूपस्य वाग्निदग्धं सोमांशुं सोमलतां
कदेशं पेषयित्वा स्त्रियो दक्षिणनासापुटे न्यसेदिति वक्ष्यमाणसूत्रेण सह संबंधः। कुशकं
टकं वा कुशो दर्भस्तस्य कंटकः सूचीं तां वा पेषयित्वा। न्यग्रोधस्य वटस्य स्कंधस्य मध्यशाखा
प्रत्यां शुंगां अग्रांकुरस्तस्य मूलं वा पेषयित्वा। लताग्रपल्लवो बुधैः शुंगेति परिकीर्तित इति का
त्यायनः। यूपस्य स्थापितस्य अग्निदग्धं अग्निराहवनीयस्तस्याभिमुखांत्वं वा पेषयित्वा। सोमांशु।

दीनां यथासंभवमन्यतमं प्रोषयित्वा नासापुटे निषिंचेदिति संबंधः सर्वत्र। अत्र सत्रे वा शब्दः
पूर्वोक्तद्रव्यैः सह विकल्पार्थः। सिंस्थिते वा यज्ञे जुह्वाः संस्रावं। संस्थिते समाप्ते यज्ञे इष्ट्यादौ जुह्वाः
जुह्वाख्यायाः स्रुचः संस्रावं नासापुटे निषिंचेत्। अत्रापि वा शब्दः पूर्वोक्तद्रव्यैः सह विकल्पार्थः
॥७॥ अग्निनारयिं तन्नस्तुरीपं समिद्धाग्निर्वनवत्पिशंगरूप इति चतसृभिर्ऋग्भिरंते स्वाहाकारे
न स्रोदक्षिणतो निषिंचेत्। अग्निनारयिमित्यादिभिश्चतसृभिर्ऋग्भिरंते स्वाहाकारेण स्वाहा
कारयुक्तेनैकैकमंत्रेण गर्भिण्या दक्षिणतः नस्तः नासिकाया दक्षिणरंध्रे सोमांश्वादीनां अ
न्यतमं निषिंचेत्प्रतिमंत्रं। मंत्रपृथक्त्वात्कर्मपृथक्त्वमिति न्यायात्। मधुच्छंदा अग्निर्गायत्री॥ अग्नि ८२
नारयिमश्नवत्। त्र्य १ विश्वामित्रस्त्वष्टा त्रिष्टुप्। तन्नस्तुरीपमधपोषयित्नु त्र्य २ वीरलिंगादिर्यं

ग्याद्याग्निरत्रिरिस्त्रिष्टुप्। समिद्धाग्निर्वनवत्स्तीर्णबर्हिः त्र्य ३ गृत्समदस्त्वष्टा जगती पिशंगरू
पः सुभरो वयोधाः त्र्य ४ एतत्कर्म भर्तृकर्तृकं। गर्भसंस्कारे कृत्वा तन्त्राज्यभागांतं कृत्वा। अनादे
शपरिभाषया महाव्याहृतिचतुष्टयं हुत्वा। सोमांश्वादीनां नासायां निषेकं कृत्वा उपरि
ष्टात्कं महाव्याहृतिचतुष्टयं हुत्वा वैकल्पिकं स्विष्टकृतं हुत्वा सर्वप्रायश्चित्तादि कर्म समा॰
विंशतितमः खंडः॥ ॥चतुर्थे मासि गर्भरक्षणं। गर्भस्य चतुर्थे मासि गर्भरक्षणं गर्भर
क्षाख्यं कर्म भवति। गर्भरक्षणमित्युक्तत्वात् गर्भरक्षार्थमेतत्कर्म न संस्कारकं कर्मेति। ...
क्षणाकर्मापि रक्षार्थं न तु संस्कृतिरिति कारिका। तेनैतत्प्रतिगर्भमपि भवति। अत्रापस्त
दर्यं भवति। ब्रह्मणाग्निः संविदान इति षड्भिः स्थालीपाकस्य हुत्वा। ब्रह्मणाग्निरिति षड्भिर्ऋग्भिः स्था

७॥ ६ पा

लीपाकस्य चरोः षलाहुतीर्हुत्वा ततः स्थालीपाकस्येत्युक्तत्वाद्बर्हिरासादनप्रोक्षणानि भ
वंति। यद्धरणोरक्षोहाग्नये जुष्टं गृह्णामीत्येवमासादनप्रोक्षणे न भवतः रक्षोहा लिंगोक्तदेवतानु
ष्टुप् ब्रह्मणाग्निः संविदानः इत्यस्त्रं कीन्यां तेमासि काम्यामिति प्रस्तरं च माज्यलेपेनांगान्यनु
विमृज्य। अकीन्यामिति षड्भिर्मंत्रैः प्रस्तरं च हुतशेषेणाज्यलेपेन यथालिंगं गात्राण्य
निवकुरादीनि अनुविमृज्य अनुविमृजीत। ततः विष्णुहाय ब्रह्म अनुष्टुप् अकीन्यां ते
काम्यो॥ स्वर्द॥ ॥एकविंशतितमः खंडः॥२१॥ ॥सप्तमे मासि प्रथमगर्भे सीमंतोन्नयनं॥
र्भस्य सप्तमे मासि प्रथमगर्भे आद्यगर्भे सीमंतोन्नयनाख्यं कर्म भवति। लौगाक्षिः तृतीये ८२
गर्भमासे सीमंतोन्नयनमिति बैजवापः॥ ॥अथ सीमंतोन्नयनं मासि चतुर्थे षष्ठे पंचमे वेति।

त्रो रवयाज्ञवल्क्यो॥ षष्ठेष्टमे वा सीमंत इति शौनकः चतुर्थे गर्भे सीमंतोन्नयनं षष्ठाष्टमयोर्वा
पूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यादिति। त्रीखः गर्भस्य दातृ सीमंतोन्नयनं या
वद्वान प्रसव इति। प्रथमगर्भे इत्युक्तत्वादाचार्यस्याभिमतः क्षेत्रसंस्कारो न गर्भसंस्कारः।
तत्र स्मृतिः सकृच्च संस्कृता नारी सर्वगर्भेषु वास्यत इति। हारीतः सकृत्संस्कृतसंस्का...
सीमंतेन द्विजस्त्रियः यं यं गर्भं प्रसूयंते स गर्भः संस्कृतो भवेत्। अत्र वृद्धिश्राद्धं...
सीमंतोन्नयने तथेति कार्ष्णाजिनिवचनात्॥ ॥ स्नातामहतवाससं पश्चादग्ने...
त्र्य। स्नातां मांगल्यादिद्रव्यैर्गर्भिणीं अहतवाससं नूतनवस्त्रकंचुकीपरिहितां पश्चा
दग्ने लौकिकस्य स्थापितस्य कृतसंस्कारस्य पश्चात् पश्चिमभागे तां उपवेशयत ततः अन्वा
...धारितं। अहतं तादृशी नीया सर्वकर्मसु पावनमिति ॥
[illegible]
[illegible]
[illegible]

रब्धायां महाव्याहृति निर्हुत्वा स्थालीपाकं। अन्वारब्धायामन्वारंभ नयुक्तायां तस्यां मन्त्रो स्थाली
पाकधर्मेण स्थालीपाकं श्रपयित्वा महाव्याहृतिभिश्चतस्रः निर्हुत्वा ततः। श्रपयित्वा मुद्गौ
दनमित्येके। एके आचार्या मुद्गौदनं श्रपयित्वा होमः कार्य इत्याहुः मुद्गतंडुलाभ्यां चरुः संपा
दनीयः संसृष्टस्यान्नस्य होमस्य निषेधादत्र केषांचिदाचार्याणां हृदयंगमत्वादलौकि
त्वश्रपयित्वेत्यारभ्य सूत्रं संवृतं। तिलतंडुलमिश्रं स्थालीपाकं श्रपयित्वेति कात्यायनः।।
दुपकरणानि सर्वनक्षत्रं वा। अत्र उपकरणानि स्नानादीय यथा घटोदियः गडुकोदय इत्या
तपुंल्लिंगानि वा अपरं नक्षत्रं पुष्यहस्तादिकं पुंवत्पुंल्लिंगं ज्ञेयं। रत्नकोशे। हस्तो मूलं श्रवणः ३
पुनर्वसुर्मृगशिरस्तथा पुष्यः पुंसि स्त्रिते षु कार्येषु ग्रानि सर्वानि धिष्ण्यानीति। धाता ददातु दा

शुषे प्राचीं जीवातुमक्षिति। वयं देवस्य धीमहि सुमतिं सत्यधर्मणः।। धाता प्रजाया उत राय ईशे
धातेदं विश्वं भुवनं जजान। धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवज्जुहोतिनेजमेष प
रापतेति तिसृः प्रजापतञ्इति षष्ठी। धातेति द्वे। नेजमेष परापतेति तिसृः प्रजापतञ्स्येका
३ त्वौतयो वदानधर्मेण होतव्या। त्वष्टा विष्णुरनुष्टुप्। नेजमेष परापतत्वउ हिरण्यगर्भ
पतिस्त्रिष्टुप्। प्रजापते न त्वदेतान्यन्यः स्त्रीति। त्रिःश्वेतया शलल्या दर्भस्तुच्या औदुंबरशलाटु
सहमध्याद्रूर्ध्वं सीमंतमुन्नयति। त्रिःश्वेता त्रिषु स्थानेषु श्वेता तया शलल्या सेधाशलाक
र्भस्तुच्या वा कुशकंटकेन वा उदुंबरशलाटुभिः अपक्वोदुंबरफलैः सह इसादर्शमध्यात् नासिका
देशात् ऊर्ध्वं सीमंतं केशांतं यावत् उन्नयति उन्नयनं करोति। अपक्वानि शलाटूनि युग्मानि

श॰ नकुनी॰ नमि सुरुर्न्य धर्मस्तत्व क उच्यत इति कौशिक सायनः।

क उच्यत इति विश्वकोशेः॥ ओं भूर्भुवः स्वरित्युत्संगे निधाय। भूर्भुवः स्वरित्यनेन तदुन्नयनकरणं
सीमंतिन्या उत्संगे अंके निधाय ततः॥ त्रिश्वेतिप्रतिमुच्य कंठे बध्नात्ययमूर्जावतो वृक्ष ऊर्जीव फ
लिनी भवेति। त्रिश्वेति त्रिभिस्तंतुभिर्वृते सूत्रे उदुंबरफलानि प्रतिमुच्य बध्वा सीमंतिन्याः कंठे ग
ले अयमूर्जावतो वृक्ष इति मंत्रेण बध्नाति॥ अथाह वीणागाथिनौ राजानं संगायतेति। अथ कंठे
उदुंबरफलहारबंधनानंतरं भर्ता वीणागाथिनः स्त्रीगायनानाह। राजानं संगायतेति। [illegible]
तादिनौ राजानं संस्तुतेत्यर्थः॥ यो वाप्यन्यो वीरतर इति। अन्यो वापि राज्ञोऽन्यः यो वीरतरः अति
शयेन वीर उक्त स्तं वा गायतेत्याह॥ उदपात्रे व्रीहीनवनिनीय विष्णुर्योनिं कल्पयत्विति राकामहमि ८४
ति षड्भिर्जेन पाययेत्। उदपात्रे उदकपात्रे व्रीहीन् यवानवनिनीय संस्थाप्य विष्णुरित्येतया राका

मह मिति षड्भिः र्ऋग्भिरेकैकया सर्वासमुदकं तां गर्भिणीं पाययेत्। त्वष्टालिंगोक्तदेवता अनुष्टुप्
विष्णुर्योनिं कल्पयत्वित्यस्य समदः। प्रथमयोरा[illegible]रयोः सिनीवाल्युत्तरस्या लिंगोक्तोत्तरस्या
रुद्रो जगत्यां वनुष्टुभस्तिस्रस्त्रिष्टुप्॥ राकामहं सुहवां सुष्टुती हुवे। उत्तरीत्रिथास्या उदरमभि
मृशेत्। अथोदपानानंतरं अस्याः सीमंतिन्या उदरं नाभिदेशादूर्ध्वं वक्ष्यमाणमंत्रेणाभिमृशे
त्। ओं॥ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुः छंदांस्यंगानि यजूंषि नाम साम ते
३७ इत्यनेन मंत्रेणाभिमृशेत्। सोमं मानी गापयेत्। सोमं मानी हर्षयुक्तां तां मांगलिकैर्गीतैर्गापयेत्।
महाहेमवतीं वा। महाहेमवतीं वरुणाय युक्तां वा गापयेत्॥ ऋषभो दक्षिणा तं स्विष्टकृतः प्राशन
वति। समयवशाद्धर्मो यथानादीनामकृतानां सीमंतोन्नयनेन समानतंत्रेण संस्काराः कर्तव्याः। पा

म३

२७। ऋषभो दक्षिणा। सीमंते आचार्याय दक्षिणा
ब्राह्मणभोजनं वदति

अनंतान्नमः। काकादनी। इंद्रवारुणी। मत्य... ...। ...। देवदाली। वृहती। शंखपुष्पी। कालकीतकी

इत्याश्वलायनमत...

कयज्ञोन्समासाद्येकाज्यानेकबर्हिषिः एकः स्विष्टकृतः कुर्यान्नानापि सति दैवते ऽग्नेकेद...
ज्ञासुरेकस्मिन्काल एव चेत्। समानतंत्रिताः कार्या न तंत्रावृत्तिरिष्यत इति आश्वलायनकारिका।
॥ ॥द्वाविंशतितमः खंडः॥२२॥ ॥काकादन्यामेषकताटिन्याः कोशातक्या बृहत्याः कालकीतन
तिमूलानि पेषयित्वोपलेपयेद्देशं यस्मिन्प्रजायेत रक्षसामपहत्यै। काकादन्यादीनामोष...
लानि पेषयित्वा पिष्ट्वा यस्मिन्देशे प्रदेशे पुत्रादिकं प्रजायेत उत्पत्तिर्भवति तं देशं प्रदेशं वा रक्ष...
कृसप्रच्छतीनां अपहत्यै अपहननार्थं उप...लेपयेत्। उपलेपनं कार्यं। काकादनी काकनंद...
सिद्धा। मेषकताटिनी पेपोटीति लोके प्रसिद्धा। कोशातकी घोषावती। बृहती प्रसिद्धा। कालकीत ८५
हीत कंकालिघेरलिनूकेति प्रसिद्धं रक्षसां नाशार्थमुपलेपनमेतत्तु गर्भस्य संस्कारः॥ ॥अथेअंथ

नि(ल)षगा३

तमः खंडः॥ ॥२३॥ ॥अथ जातकर्म। अथेति पुत्राद्युत्पत्तेरनंतरं जातस्य पुत्रादेर्नाभिछे...
तकर्माख्यं कर्म विधेयं। तज्जातकर्म पितुः स्नानानंतरं भवति। जाते पुत्रे पितुः स्नानं स... दि...
यत इति स्मृतिः। जातकर्म ततः कुर्यात्पुत्रे जाते यथोदितमिति विष्णुः। प्राङ्नाभिवर्द्धनात्पुंसो...
विधीयत इति मनुः। यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं
त इति जैमिनिः। एतत्स्नानं रात्रावपि भवति रात्रौ स्नानं कुर्वीत तदाने चैव विशेषतः नैमित्तिक
नं दानं च रात्रिरपि इति स्मृतिः। इदं कर्माशौचमध्येपि भवति। आशौचे तु समुत्पन्ने पुत्रजन
कर्तुस्तात्कालिकी शुद्धिरशुद्धिः पुनरेव सा इति प्रजापतिः। अछिन्ननाले कर्त्तव्यं श्राद्धं दैपुत्रजन... ना।
आशौचापरते कार्यमथवा नियतात्मभिरिति विष्णुधर्मोत्तरे। अत्र श्राद्धं हिरण्येन। अ...

५

श्वासमंतः प्रवेश्य ४

जाता वे प्रवासे पुत्रजन्मनि ॥ हेमश्राद्धं प्रकुर्वीत यस्य नार्यो रजस्वलेति षड्त्रिंशन्मतेः ॥ ८ ॥
स्थापनं तत्र पुरस्तात्संज्ञां कंडुत्वा ततः एतस्मिन्नेव सूतिकायामिति वत्समाणत्वात् सूतिकाग्नि
पनं तत्र होमः ॥ ८ ॥ जातं कुमारं त्रिरस्य वान्यात्प्राणप्या द्वा प्राणिहि यन्नुषा समनिदि
हीति जातमुत्पन्नं कुमारं बालकं त्रिः वारत्रयं अन्यवानांवघ्राय अनुप्राणयात् अनुप्राण
णन्वेत्यादिना त्रिः आघ्राणमंत्रकं सर्पिर्मधुनी दध्युदके च संनिनीय व्रीहियवोबासं
त्रिः प्राशयेज्जातरूपेण ॥ सर्पिर्घृतं । मधु माक्षिकं ते च एकीकृत्य दध्युदके चैकीकृत्य एवं चत्वा...
पि मधु दधि पानीयमेकीकृत्य जातरूपेण सुवर्णेन त्रिः प्राशयेत् बालकस्य मुखे त्रिप्रद्वितो ...
णेन मंत्रेण वा विकल्पार्थी सर्पिः प्रभृतीनां स्थाने व्रीहियवौ मिश्रौ संनिघृष्य प्राशयेद्... त्रिः

बालकमस्तकोपरि श्वासानिः क्षेप ५

...दिव दत्त इति २

७ ॥

प्राशनात्र ञौप्रतेयच्छामि मधुमन्नस्वादयवेदं प्रसूतं सवित्रा मघोनाऽआयुष्मान् गुप्तो देवताभिः ...
ते जीव शरदो लोके अस्मिन्नित्य सावितिना मास्य दधाति घोषवदाद्यंतरंतस्थं अघ्यक्षरं चतुरक्षरं दा
पि वा घ्वलक्षरं कृतं कुर्यान्न तद्धितं । प्रत इत्यादिरन्यत्र अस्मिन्नित्येतावता मंत्रेण प्राशनं कारयेत् ...
ति अस्य बालस्य आमंत्रितां तं पिता नामदधातिकरोति । किंभूतं । घोषवदादि । पंचवर्गाणां प्रथ...
यो वर्णौ अघोषसंज्ञौ । यथा कखचछटठतथपफेति । तथा शषसं अः ᳵक ᳶप इति अघोषाः ...
वर्णा घोषसंज्ञकाः तदन्यत्तमवत् घोषवत् ... ततः आद्यो यस्य तत् घोषवदादि । अंतःस्थाः सप्त ते ...
वर्गे वर्गे च प्रथमावघोषाविति पार्षदं । पुनः किंभूतं । अंतरंतस्थं । अंतः मध्ये अंतस्था नामन्यतमत् ...
तत् ... तस्थं । यरलवा अंतस्था इति पार्षदं । यरलवा ... इति पुनः किंभूतं । द्व्यक्षरं । द्वे अक्षरे यस्य तत् द्व्यक्षरं

रं। अक्षराः स्वराः ॥ उभये लक्षराणीति पार्षदं। वा यद्वा चतुरक्षरं। चत्वारि अक्षराणि स्वराद…
त। अपि वा षलक्षरं यद्वा षट् अक्षराणि यस्मिन्स्तत्। यक्षरं देवदत्तादिकं। चतुरक्षरे रामचंद्रद… ता र
दिकं। षलक्षरं भुवनपोषक इत्यादिकं। पुनः किंभूतं। कृतं कुर्यात् कृत प्रत्ययांतं कुर्यात्। न त…
द्धित प्रत्ययांतं न ॥ ७॥ तदस्य पिता माता च विद्यातां तत्पूर्वोक्तलक्षणोपेतं। अस्य बाल…
जनको माता जननी च विद्यातां जानीयातां। अन्यः कोपि न जानाति तथा कुर्यात्। दशम्यां…
रिकं ब्राह्मणजुष्टं। दशम्यां रात्र्यां व्यतीतायां यावहारिकं लोकव्यवहारप्रसिद्धं कुर्यात्। … ७९
ब्राह्मणजुष्टं ब्राह्मणो द्विजैर्यत् जुष्टं सेवितं नवतितं कुर्यात्। अत्र लोकप्रसिद्धेनाम्नि…
दानि विशेषणानि निरपेक्षाणि ॥ गोः कृष्णस्य शुक्लकृष्णानि लोहितानि च रोमाणि…

ये१ पिबेत्तस्मिन्नेव चतुष्टयं सन्निनीय चतुः प्राश्नीयादिति मांडूकेय। कृष्णस्य कृष्णवर्णस्य गोः कृष्णाः
शुक्लानि रोमाणि कृष्णानि रोमाणि लोहितान्यारक्तानि च रोमाणि मषं स्पृष्टानि काश्यपिला।
एतस्मिन्नेव चतुष्टये पूर्वोक्ते एव सर्पिर्मधु दध्युदकरूपे संनिनीय मिश्रीकृत्य पूर्वोक्तेनैन म
त्रेण कुमारनामग्रहणपूर्वकं चतुः चतुर्वारं बालकं प्राशयेत्। इति मांडूकेयाचार्यस्य…
नीन् ऋग्वेदं त्वयि दधाम्यसौ स्वाहा ॥ भुवो यजुर्वेदं त्वयि दधाम्यसौ स्वाहा ॥ स्वः सामवेदं त्वा…
म्यसौ स्वाहा भूर्भुवः स्वर्वाकोवाक्यमितिहासपुराणं ओं सर्वान्वेदांस्त्वयि दधाम्यसौ स्वा… त
वा। वेति विकल्पार्थो। भूर् ऋग्वेद मित्यादिभिश्चतुर्भिर्मंत्रैरसावित्यत्र पूर्ववत्कुमारनामग्रहण
पूर्वकं कुमारं प्राशयेत्। मांडूकेयमतमेतदप्यानंतयोत्॥ मेधाजननं दक्षिणे कर्णे ज…

वाग्देवीत्यारभ्य स्वयंभूरित्यंतेन मंत्रेणोत्स्पर्शः ४

त्रिः कुमारस्य दक्षिणे कर्णे वाक् इति त्रिवारं मेधाजननं कुर्यात्। एवं कृते सति मेधाया उत्पत्तिर्भ
वतीत्यर्थः॥ वाग्देवी मनसा संविदाना प्राणेन वत्सेन सहेंद्रप्रोक्ता जुषतां त्वा सौमनसाय देवीम
ही मंद्रा वाणी वाणी वी सलिला स्वयंभूरिति वाचमंत्रयेत वाग्देवीत्यनेन मंत्रेण कुमारस्य
मंत्रणं ४ नु प्राणनं कुर्यात्। चकारः पूर्वसमुच्चयार्थः॥ ६॥ शाणसूत्रेण विग्रथ्य जातरूपं। जातरूपं
येन पूर्वं प्राशनं कारितं तत्। शाणसूत्रेण शाणनिर्मितेन सूत्रेण विग्रथ्य ग्रंथयित्वा तत् जात
रूपमिति हिरण्यस्येति निघंटौ दक्षिणे पाणौ वपिनह्य उच्छानात्। तच्छणसूत्रग्रथितं जातरूपं बा
लस्य दक्षिणे हस्ते अपिनह्य बध्वा आ उच्छानात् यावत् सूतिकागेहान्निःसरति तावत् बध्नाति॥ ६॥
ऊर्ध्वं दशम्या ब्राह्मणेभ्यो दद्यात्। दशम्या रात्र्या ऊर्ध्वं एकादशेह्नि तज्जातरूपं ब्राह्मणेभ्यो दिन

ज्य दद्यात्। बहुवचनत्वात् द्विजाग्ः॥ अमा वा कुर्वीत। तज्जातरूपं अमा गृह एवा कुर्वीत। वा[illegible]र्था
र्थे अमादसे। इति गृहनाम सुपागत। ततो महाव्याहृति चतुष्टयं हुत्वा पात्रि कं स्विष्टकृतं हुत्वा स
स्नुकादिकर्म समापनं॥ २४॥ ॥ चतुर्विंशतितमः खंडः॥ ॥ दशरात्रे चोत्थानं। दशरात्रे व्यतीते
न सूतिकाया इति शेषः। च शब्दात् तत् क्षत्रियविशोरपि अयं कालः स्मर्तव्यः। आशौचे तु व्य[illegible]
नामकर्म विधीयत इति शंखः। अहन्येकादशे नामेति याज्ञवल्क्यः। नामधेयं दशम्यां तु दे
केति पार्थिवा दशम्यामपरे रात्र्या मासे पूर्णे तथा परे। अष्टादशेहनि तथा वदंत्यन्ये मह[illegible]
न विष्णुपुराणे। नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत्। पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा
गुणान्वित इति मनुः। जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वेति गृह्ये [illegible]॥ ६॥ मा[illegible]

अनीनाथां एकादश्यामित्यर्थः २ छांदोग्य

तरौ शिरस्नातावहतवाससौ॥ कुमारस्य मातापितरौ शिरस्नातौ मांगलिककुंकुमहरिद्रादूर्वा

युक्तेन सुगंधितैलेन स्नातौ अहतवाससौ नवीनवाससौ भवतः कुमारश्च बालकश्च तैलादिना स्ना

पनीयो हतवस्त्रालंकृतः कार्यः आभ्युदयिकं कृत्वा नामकर्म कार्यं नामकर्मणि बालानां लिखि

जिनोक्तेः॥ छ॥ एतस्मिन्नेव सूतिकाग्नौ स्थालीपाकं श्रपयित्वा। एतस्मिन्नेवेति ज्ञापकात् पूर्वे

गृहे अग्नी रक्षार्थं धारयितव्यस्तत्रैव जातकर्म विधेयं। एतस्मिन्नेव पूर्वे स्थापिते सूतिकाग्नौ

वह्नौ स्थालीपाकधर्मेण स्थालीपाकं च श्रपयित्वा ततः॥ छ॥ जन्मतिथिं हुत्वा त्रीणि

वतानि। जन्मतिथिर्यस्यां तिथौ बालको जातस्तां तिथिं प्रथमतश्चतुर्थ्यंतेन [illegible] नक्षत्रेण हु ८०

त्वा च अनंतरं त्रीणि भानि नक्षत्राणि सदैवतानि देवतासहितानि चतुर्थ्यंतानि जुहुयात्। दैव

तास्मरणं श्रुतिः प्रजापतिः सोम इत्यादि॥ छ॥ तन्मध्ये जुहुयात् यस्मिन् जातः स्यात् पूर्वं दैवतं सर्वत्र। ८१

यस्मिन्नक्षत्रे डिंभो जातः उत्पन्नः स्याद्भवति तन्नक्षत्रं मध्ये अंतः कृत्वा जुहुयात्। तत्रापि सदैवतं

देवतासंप्रदानरूपं आहुतिलक्षणं पूर्वं नक्षत्रात् प्रथमतो जुहुयात्। तस्मादेवं निष्पन्नं आ

गहोमानंतरं जन्मतिथिर्यथा द्वितीयां तां च चतुर्थ्यंतेन हुत्वा यस्मिन्नक्षत्रे बालको जातः यथा

कास्तु तान्यः पूर्वं यन्नक्षत्रं भरणी संज्ञकं तान्यः पूर्वं तद्दैवतं हुत्वा भरणीभ्यो हुत्वा ततो ज

क्षत्रे कृत्तिका संज्ञकं सदैवतं हुत्वा ततो जन्मभादुपरितनं रोहिणी संज्ञकं सदैवतं जुहुयात्।

यथा द्वितीयायै स्वाहा। यमाय स्वाहा। भरणीभ्यः स्वाहा। अग्नये स्वाहा। कृत्तिकाभ्यः स्वाहा। प्रजा

पतये स्वाहा। रोहिण्यै स्वाहा। इत्याद्यूह्यं सर्वत्र॥ छ॥ आयुष्टे अ गीर्भिरियमग्निर्वरेण्यः आयुर्नो द

ऋ१ हिन्नीवसे। आयुर्दाग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव
ऋ२ पुत्रमभिरक्षतादिममिति त्वं सोम महे भगमिंद्रद्वामी स्थालीपाकस्य स्थालीपाकस्य चरोः स्त्वं
सोमेति दद्याम्याहुतिः दद्यामीति ब्रुवन्नेतत् ज्ञापयति। एका जन्मतिथिः सदैवता नक्षत्राहु
न४ षट्। आयुष्ट इत्येका। आयुर्दा इत्येका। एवं वैत्वं सोमेति दद्यामी। गोतमः सोमो गायत्री। त्वं
५। महे भगं त्वरा। नामधेयं प्रकाशं कृत्वा। नगवल्ल्यादिपत्रे कुमारस्य गोत्रं व्यावहारिकं नाम
कुंकुमादिना लेख्यं कुमारस्य दक्षिणे कर्णे व्यावहारिकं नाम प्रकाशयेद्द्वैस्ततः। आस
स्तिवाच्य। ब्राह्मणहस्ते पुण्याहं दीर्घमित्यादिकं स्वस्तिवाचनधर्मे स्थितास्ते स्वस्तीति प्रत्युक्तेस्ति ९०
७॥ ष्टकादादिकर्मसमापनं एवमेव मासि मासि जन्मतिथिं कृत्वा। एवमेव पूर्वोक्तप्रकारेण मासि मा

सि प्रतिमासे सूतिकायै जन्मतिथिं कृत्वानंतरं जुहोती त्सुक्के सर्पिः प्रतीयेते तिन्याया दाज्यहोमो न
७॥ स्थालीपाकं। ऊर्ध्वं संवत्सराद्धोमो अनुहोति। मासि मासी त्यनुवर्त्तते। एवं संवत्सरपर्यंत सूतिका
श्रीरक्षणाय संवत्सराद्ध्वं गृह्येश्रौ स्थापितेऽग्नौ मासि मासि होमो विधेयो यावज्जीवं। गृहोगा
स्तु कृत्वा सूतिकाग्निर्निवृत्तिः॥ ॥पंचविंशतितमः खंडः॥२५॥ ॥अथ यइत्यादिकं होप
खंडं देवताज्ञानाय व्याख्यायते। अत्र खंडे देवतानक्षत्राणि च चतुर्थ्यंतानि होमकाले
दिष्टानि प्रत्येतव्यानि। अथ ये कृत्तिकाम्यः त्रीणिवचनानि सदैवतानि हस्तु कं तज्ज्ञानाय
कृत्तिकानामग्निर्देवता। अग्निः प्रजापतिरित्यारभ्य नक्षत्रदेवता होतारति ज्योतिष्ठु कं प्रजा
तये रोहिण्ये। रोहिण्याः प्रजापतिः सोमाय मृगशिरसे मृगशिरसः सोमः रुद्राया र्द्राभ्य आ

णं रुद्रः॥ अदितये पुनर्वसुभ्यां। पुनर्वस्वोरदितिः॥ बृहस्पतये पुष्यस्य बृहस्पतिः॥ सर्पेभ्योऽश्लेषाभ्यः
अश्लेषाणां सर्पाः॥ पितृभ्यो मघाभ्यः॥ मघानां पितरः॥ भगाय फल्गुनीभ्यां। पूर्वफल्गुन्योर्भगः॥ अर्य
म्णे फल्गुनीभ्यां। उत्तरफल्गुन्योरर्यमा॥ सवित्रे हस्ताय। हस्तस्य सविता। त्वष्ट्रे चित्रायै। चित्राया
स्त्वष्टा। वायवे स्वातये। स्वात्या वायुः॥ इन्द्राग्निभ्यां विशाखाभ्यां। विशाखयोरिन्द्राग्नी॥ मित्रायानुराधा
नूराधार्य मित्रः॥ इन्द्राय ज्येष्ठायै। ज्येष्ठाया इन्द्रः॥ निर्ऋतये मूलाय। मूलस्य निर्ऋतिः॥ अद्भ्योऽषाढा
षाढानामापः॥ विश्वेभ्यो देवेभ्यो षाढाभ्यः॥ उत्तराषाढानां विश्वेदेवाः॥ ब्रह्मणेऽभिजिते। अभि
ह्मा॥ विष्णवे श्रवणाय। श्रवणस्य विष्णुः। वसुभ्यो धनिष्ठाभ्यः॥ धनिष्ठानां वसवः॥ वरुणाय शततभिष
जे। शततभिषजो वरुणः॥ अजायैकपदे प्रोष्ठपदाभ्यः॥ पूर्वभद्रपदानामजएकपात्॥ अजायैकपदे

इत्यत्र एकपाद्ग्रहणं विशिष्टाय अजायेत्यर्थः॥ अहिर्बुध्न्याय प्रोष्ठपदाभ्यः॥ उत्तरभद्रपदानामहिर्
बुध्न्यः॥ पूष्णे रेवत्यै। रेवत्याः पूषा॥ अश्विभ्यामश्विनीभ्यां। अश्विन्योरश्विनौ॥ यमाय भरणीभ्यः॥ भ
रणीनां यमो देवता। होमादेस्य इतरार्थे चतुर्थ्यन्तानि सदैवतानि नक्षत्राण्युक्तानि॥ ॥ षष्ठि
तितमः खंडः॥ २६॥ ॥ षष्ठे मास्यन्नप्राशनं। जन्मप्रभृति षष्ठे मासि अन्नप्राशनाख्यं
मबालकस्य भवति। आभ्युदयिकपूर्वकं विष्णुपुराणे। जातस्य जातकर्मादिक्रियाकां
षतः। पुत्रस्य कुर्वीत पिता श्राद्धं चाभ्युदयात्मकमिति। तथा नामान्नप्राशने चैवेति॥ गर्भा
न्निर्गमप्रभृति षष्ठेऽन्नप्राशनं मासीति याज्ञवल्क्यः। षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मंगलं कुल इति
मनुः॥ षष्ठेऽन्नप्राशनं जातेषु दंतेषु चेति लौगाक्षिः॥ संवत्सरेऽन्नप्राशनमिति शंखः॥ आजमन्नाद्य

कामः। आजमस्येदमाजं मांसं अन्नाद्यकामः पित्रादिः कुमारं प्राशयेदिति विवस्पति। तैत्तिरं ब्रह्मवर्च
कामः। तित्तिरिरिदं मांसं ब्रह्मवर्चसकामः पित्रादिः कुमारं प्राशयेत्। मात्स्यं जवनकामः मत्स्याना
मिदं मात्स्यं मांसं। जवनो वेगस्तं कामयते। असौ तथा कुमारं प्राशयेत्। घृतोदनं तेजस्कामः।
३४ ओदनो घृतौदनस्तं तेजस्कामः कुमारं प्राशयेत्। दधिमधुघृतमिश्रमन्नं प्राशयेत्। कामनान्त
णादेतत् दध्यादिमिश्रितमन्नं प्राशयेत्। नित्यत्वेन पित्रादिः दध्योदनमिंद्रियकामः
कामो मध्योदनमायुष्कामः इति शाखान्तरे। अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः। प्र
तारिषऊर्जं नो धेहि द्विपदे चतुष्पदे। यस्विद्धिमहःस्वित्। स्मममन्त्रआयुषे वर्चसेति मम मो जो वरु ७२
ण सोमराजन्। माते वास्मा अदितिः शर्मयंसद्विश्वेदेवा जरदष्टिर्यथासदिति द्वे। अन्नपतइत्या

दिनिश्चनुस्टन्निर्मन्त्रैश्च तस्याज्याहुतयो होतव्याः। यस्विद्धिमहस्विदनयोर्वामदेवोग्निस्त्रिष्टुप्शाय
स्विद्धितेपुरुषत्राय विष्टुन्त्र महःस्विदयएनसोऽग्नीकेशवद्धुत्वेत्युक्तत्वात्स्थालीपाकेन।। यस्वि
द्धीतिद्वे एतावदेव वक्तव्यं महःस्विदिति किमर्थं। उच्यते। यदियस्विद्धीतिद्वे उच्यते तदायस्विद्धि
शायथेत्यनयोः प्रथमयोः प्राप्तिर्नवर्तिततन्निवारणार्थं महःस्विदित्युक्तं। अयनआयूंषीत्यग्नि
ग्रहस्तनेन मन्त्रेण बालकमभिमंत्र्य ततः शान्तवेश्वानसाग्निः पवमानो गायत्री। अग्निर्ऋ ২५
सोनः शर्मोदगग्रेषु कुशेषु स्योना पृथिवि निवेत्युपवेश्य। उदगग्राणि येषां तादृशेषु कु
शदर्भेषु स्योनेति मन्त्रेण प्राङ्मुखं बालकमुपवेशयेत्। ततः प्राशनीयानि द्वे कर्माणीत्युक्तत्वात्।
मेधातिथिः पृथिवी गायत्री। स्योना पृथिवि नवशर्महाव्याहृतिभिः प्राशनं। ततस्त्रिभिर्महाव्याहृ

तिग्निर्दध्यादिप्लुतमन्नं कुमारं प्राशयेत्। अजमांसादेरपि अयमेव कर्मकलापः॥ छ॥ शेषं माता प्रा
श्नीयात्। शेषं बालस्तु कं शेषं माता कुमारजननी प्राश्नीयात्॥ ॥सप्तविंशतितमः खंडः॥२७॥
संवत्सरे चूडाकर्म। जन्मप्रभृति संवत्सरे पूर्णे चूडाकरणाख्यं कर्म पित्रादिः कुर्यात्। तृतीये वा॰
वा शाखोक्तविकल्पार्थे तृतीये वर्षे वा चूडाकरणं कार्यं। सोमः। संवत्सरे चूडाकरणं। तृतीयस्य वा
स्य भूयिष्ठे गते चूडा कार्येति लौगाक्षिः॥ पारस्करः। संवत्सरे चूडाकरणं तृतीये वा प्रति॰
चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्॥ शंखः॥
र्षे चूडाकर्म पंचमे सप्तमे वा। आश्वलायनगृह्ये। तृतीये वर्षे चौलं यथाकुलधर्मो वोदगयन आपूर्य २३
माणपक्षे कल्याणनक्षत्रे। व्यासः। अश्विनी श्रवणस्वाति चित्रा पुष्यः पुनर्वसुः। धनिष्ठा रेवती ज्येष्ठा

मृगे हस्ते च कारयेत्॥ वारनक्षत्रयोगेषु शुभेषु करणेषु च। नक्षत्रे तु न कुर्वीत यस्मिन् जातो भवेन्नरः।
न प्रोष्ठपदयोः कार्यं नैवाग्नेये च भारत। दारुणेषु च सर्वेषु दुष्टतारां विवर्जयेत्। वारेशानैश्वरादि
त्यभौमा होरात्रमेव चेति। चूडा कार्या यथाकुलमिति याज्ञवल्क्यः सिद्धांतोप्ययमेव॥ छ॥ पंचमे क्ष
त्रियस्य क्षत्रियस्य जन्मप्रभृति पंचमे वर्षे कार्यं सप्तमे वैश्यस्य। वैश्यस्य जन्मप्रभृति सप्तमे वर्षे
कार्यं। अग्निमुपसमाधाय। शालातो बहिर्लौकिकाग्निं भूसंस्कृतप्रदेशे वृद्धिश्राद्धपूर्वकं संस्था
प्य। चूडायां च विवाहेष्वेति लिखितोक्तेः। तत॥ पंचसु बहिः शालाया इति सूत्रात्॥ छ॥ व्रीहिय
वानां तिलमाषाणामिति पात्राणि च पूरयित्वा। व्रीहियवतिलमाषैश्चत्वारि पात्राणि पृथग
मिश्रितानि पूरयित्वा। नापितायधान्यपात्राणीति वक्ष्यमाणात्॥ छ॥ आनडुहं च गोमयं कुश

भिन्नंचकेशप्रतिग्रहणाय।दर्भेणनवनीतंशललंलोहक्षुरंचोत्तरतउपस्थाप्य।अथैरुत्तरतए
तानिस्थापयेत्।आनडुहंरोहितंचर्मेतिपूर्वोक्तं।गोमयंचतस्यैवानडुहस्यकार्यं।तत्रनंतरं
कुशपिंजूलंसमूलंकुशंकेशप्रतिग्रहणाय।आदर्शंदर्पणं।नवनीतंविलीनंघृतं।लोहक्षुरं
श्चक्षुरूपयुक्तं।एतानिसंस्थाप्यततःसंहत्यध्मृत्तावरीरूपिणामधुमन्त्रमाः।इंवत्तीमधुना
योमंत्रोधनस्यसातयहतुब्लाप्तुंस्वेशीताआसिंचति।संहृत्यध्रुमित्यनेनमंत्रेणउष्णाः
पितथास्वष्णुशीताशीतलाआपःआसिंचतिआसेचनंकरोति।आपउंदंतुजीवसेदीर्घा
युवर्चसे।त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषंअगस्त्यस्यत्र्यायुषं।यद्देवानांत्र्यायुषंतन्नेक ।५४
रोमित्र्यायुषमित्यसावितिशीतोष्णानिरद्भिर्दक्षिणंकेशपक्षंनिरस्यनक्ति।चूडाकर्मणःप्र

५५ प्रथमरात्रेस्त्रियोबालकस्यजटाधिवासनंकुर्वंति।तत्रबालकस्यदक्षिणेभागेतिस्रोजटाबध्नंतिदे
वोत्तरतःएवंपंचबध्नंति।तत्रदक्षिणेभागेदक्षिणंकेशपक्षंजटांआपउंदंत्विितिमंत्रेण।ऽसावि
तिबालकस्यसंबोधनांतंनामगृहीत्वाशीतोष्णाभिर्मिश्रिताभिरद्भिरुदकैःक्लिन्नं...
त्रिंप्रक्षालयति।शलल्यैकेविजटाकृत्वा।शलल्यासेधाशलाकयाकेशान्विजटान्कृत्वा।तत
कइतिशलल्याविजटीकरणंविकल्पेननवनीतेनाभ्यज्य।तान्विजटीकृतान्केशान्नवनी
तेनाभ्यनक्ति।ततःओषधेत्रायस्वैनमितिकुशतरुणमंतर्दधाति।ओषधइतिमंत्रेणकुश
तरुणंकुशपिंजूलंअंतर्दधातिव्यवधानंकरोति।केशान्कुशतरुणंचादर्शेनसंस्पृश्य।केशानस्म
कान्कुशतरुणंकुशपिंजूलंचादर्शेनदर्पणेनसंस्पृश्यसंस्पर्शंकृत्वा।तेजोसिस्वधितिष्टेपितामे ।७०।

नं हिंसीरिति लोहक्षुरमादत्ते तेजोसीत्यनेन मंत्रेण लोहक्षुरमादत्ते ग्रहत्वान्ति ॥ येनावपत्सविता क्षुरम
क्षुरेण राज्ञो वरुणस्य विद्वान् येन धाता बृहस्पतिरिंद्रस्य चावपच्छिरः तेन ब्रह्माणो वपते
दमद्यायुष्मान्दीर्घायुरयमस्तु वीरो सावितिकेशाग्राणि छिनत्ति कुशान्तरूणं च केशाग्र
कुशान्तरूणं च येनावपदित्यनेन मंत्रेण सावितिप्रथमं तं बालस्य नामोच्चारणं कुर्वन् क्षुरेण
नत्ति लुनाति । दक्षिणभागस्थां स्रूर्णकुंतलां छित्वा गोमये निदधाति । अग्रे प्रयोजनं
एवं द्वितीयमेवं तृतीयं एवमुक्तप्रकारेण आपउंदुं क्षित्या तस्य बालस्य नामोच्चारणात् २८५
रेण दक्षिणभागस्थं द्वितीयं केशपक्षं छिनत्ति । एवं दक्षिणभागस्थं तृतीयं केशपक्षं छिनत्ति ।
एवं द्विरुत्तरतः एवमुक्तप्रकारेण उत्तरतः स्थितस्य केशपक्षद्वयस्य छेदनं मंत्राधत्वा का

भवंतइतिशेषः ।

५२ र्यं । ततो बालस्य शिरसो वपनं कार्यं । निकक्ष्योः षष्ठसप्तमे गोदानकर्मणि वक्ष्यमाणकालके गोदा
नकर्मणि निकक्ष्योः कक्षावेव निकक्षौ तयोः षष्ठसप्तमे छेदने वक्ष्यमाणं गोदानं कार्यं सप्तम
इति विकल्पार्थः । एतावता गोदानकर्मणि दक्षिणभागे पंच केशाः रक्षणीयाः । उत्तरतो द्वे एवं सप्त भ
वंति ॥ ॥ एतदेव गोदानकर्म यच्चूडाकर्म । यत्तच्चूडाकर्म उक्तं एतदेव गोदानकर्म ज्ञेयं । चूडाकर्म
णि ये पदार्था उक्ताः ते सर्वे ज्ञातव्याः चूडाकर्मणा गोदानं व्याख्यातमित्यर्थः ॥ षोडशे वर्षे द्वादशे
वा । एतद्गोदानकर्म षोडशे वर्षे द्वादशे वा वर्षे कार्यं । वाशब्दो विकल्पार्थः क्षत्रियस्य द्वाविंशे चतुर्विं
शे वैश्यस्य केशान्ते वत्तु षोडशे इति याज्ञवल्क्यः एतत् षोडशे द्वादशे वा गोदानं ब्राह्मणस्य अत्र
विशेषो मनुना विशेष उक्तः केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबंधोर्द्वाविंशे वैश्यस्य

होमस्तु समन्त्रकः। तथा च छन्दोगसूत्रं। न यैव बाधते
क्रियास्तूष्णीं मन्त्रेण तु होम इति।

द्यधिके तत॥ तृतीये तु प्रवपने गां दद्यात् अहतं च वासः। तृतीये प्रवपने छेदने गां अहतं नूतनं वासो ९६
वस्त्रं च ददाति। उदगाश्चात् चूडाकरणे गोदानकर्मणि च तूष्णीमावृतः कन्यानां कन्यानामपरिणीतानां
आवृतः क्रिया जातकर्मादिकास्तूष्णीं मन्त्ररहिताः कार्याः। तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु स
क इति याज्ञवल्क्यः। प्रागुदीच्यां दिशि बह्वोषधिके देशे पांसु समीपे केशान्निखनंति ये केशा
स्तानास्तान् प्रागुदीच्यां दिशि ऐशान्यां दिशि केशान्निखनंति। बह्वोषधिके बह्व्य ओषधयो यस्मि
न् देशे देशप्रदेशो वा केशान्निखेयाः अपां उदकसमीपे वा निखेयाः नापिताय धान्यपात्राणि नापिताय
धान्यपात्राणि नापिताय वपनकर्त्रे यानि पूर्वं व्रीह्यादीनि धान्यपात्राणि स्थापितानि तानि तस्मै
दद्यात्। द्विरभ्यासोऽध्यायसमाप्तिसूचनार्थो मंगलार्थो वा॥ ॥अष्टाविंशतितमः खंडः॥ २८॥ ॥इति

श्रीमत्सकलविद्वज्जनमंडलीमंडनद्विवेदिश्रीपतितत्सुतद्विवेदिश्रीकृष्णजीततनयनारा
यणविरचिते गृह्यप्रदीपके भाष्ये प्रथमोऽध्यायः॥ ॥१॥ श्रीगणेशाय नमः॥ मत्तेभगर्ज्जितमिनन्द्रा
रण्यं महाशरीरं विकटास्यमुग्रं। उत्संगनिक्षिप्तहिरण्यदेहं वंदे नृसिंहं भुवनैकनाथं॥ ॐ गर्भा
ष्टमेषु ब्राह्मणमुपनयेत। गर्भोऽष्टमो येषां तानि गर्भाष्टमानि वर्षाणि तेषु ब्राह्मणमुपनयेत। उप
नयनाख्येन संस्कारेण पित्रादिराचार्यो वा संस्कुर्यात्। अयमुपनयनसंस्कारस्त्रयाणां वर्णानां
भवति। अत्र ब्राह्मणशब्देन ब्राह्मणत्वजातिर्वाच्येत्यर्थः। कालविशेषस्थापनार्थं त्रयाणां मध्ये
ब्राह्मणस्योपादानं। गर्भाष्टमे ह्ये कुर्वीत ब्राह्मणस्योपनायनमिति मनुः। गर्भाष्टमे ब्राह्मणं गर्भैका
दशे राजन्यं गर्भद्वादशे वैश्यमित्यापस्तंबः। गर्भपंचमे ब्राह्मणमुपनयेद्गर्भाष्टमे वेति पैठीनसिः।

निर्णयसिंधौ ग्रंथांतरे। शुद्धिर्नैव गुरोर्यस्य वर्षे प्राप्तेष्टमे यदि। चैत्रे मीनगते भानौ तस्योपनयनं शुभं
त्रिविक्रमस्तु ... जन्मार्कैः ... चारोपगताः कुर्युः ... परिवर्जनीयाः। यथाक्रमस्याः
स्वगृहस्थिता वा न वर्जनीयाः ग्रहा ना ... इति॥१॥

ब्रह्मवर्चसकामस्य पंचमे षष्ठे ग्रजन्मनः॥ आयुष्कामस्य नवमे कार्यं मौंजीनिबंधनमित्युक्तं गिरा॥ तथा
मासा अपि। माघादिषु तु मासेषु मौंजी पंचसु शस्यते। वसंते ब्राह्मणमुपनयेदित्यापस्तंबः॥ यथा
मंगलं वा सर्वेषामुपनयनं। हस्तत्रये दैत्यरिपुत्रये च शाक्रेंदुपुष्याश्विनिरेवतीषु वारेषु सुक्रार्कि न४
बृहस्पतीनां हितानुबंधी द्विजन्मनां बंध इति ज्योतिःशास्त्रे। तथा। जन्मधिष्ण्ये न च जन्ममासि न जन्म
कालीयदिने विदध्यात्। न ज्येष्ठमासि प्रथमस्य सूनोस्तथा सुताया अपि मंगलानि॥ढ॥ ऐणेयेना
जिनेन। एण्या इदं ऐणेयं। तेनाजिनेन चर्मणा ब्राह्मणमावृतं कृत्वा उपनयेत्। ऐणेयी मृगी तदीयं
चर्म। एणः कृष्णमृगस्तथेति कात्यायनः॥ ऐणेयमेण्याश्चर्माद्यमित्यमरः॥ढ॥ गर्भदशमेषु वा॥ ग २०
र्भादशमो येषां तानि वर्षाणि तेषु वा ब्राह्मणमुपनयेत्। कार्यवशाज्जन्माष्टमेतिक्रांते गर्भदशमे वोपन

रुरुर्गौरमृगस्कृत इति कात्यायनः

येत्॥ढ॥ गर्भैकादशेषु वा क्षत्रियं रौरवेण। गर्भैकादशेषु जन्मतो दशमेषु रौरवेण चर्मणा छा
लेसार दितं क्षत्रियं उपनयेत्। रुरोरिदं रौरवं तेन। रुरुः स्याच्चित्रलोममृग इति कोशः॥ गर्भैकादशे राजन्य
मिति पैठीनसिः॥ एकादशे क्षत्रियस्येति मनुः॥ढ॥ गर्भद्वादशेषु वैश्यं गव्येन। गोरिदं गव्यं तेन च
र्मणा प्रावृतं जन्मत एकादशेषु वैश्यं उपनयेत्। अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमे वैकादशव
र्षं राजन्यं द्वादशवर्षं वैश्यं यथा मंगलं वा सर्वेषामिति कात्यायनः॥ गर्भद्वादशे वैश्यमिति पैठी
नसिः॥ कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिण इति मनुः॥ क्षत्रियवैश्ययोः काम्यः कालः॥ षष्ठे तथा
द्वादशे वा राज्ञो वृद्धिर्बलायुषोः॥ ईहायुषोस्तु वैश्यस्य अष्टमे द्वे चतुर्दश इत्युक्तं गिरा॥ ईहा कृष्यादिचेष्टा।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोष्टम इति मनुः॥ अथ काम्याः॥ सप्तमे ब्रह्मवर्चसकाममष्टमे आ

पुः कामं नवमे तेजस्कामं दशमे अन्नाद्यकाममेकादशे इंद्रियकामं द्वादशे पशुकाममित्यापस्तंबः॥
एतद्वर्णत्रयसाधारणं॥ ॥ आषोडशाद्वर्षाद्ब्राह्मणस्यानतीतः कालः। आङ्मर्यादार्थः। षोडशव
र्षमर्यादीकृत्य तस्मात्प्राक् ब्राह्मणस्योपनयने कालोऽतीतो न भवति गर्भाष्टमाद्यतिक्रांतेपि। आ
षोडशाद्ब्राह्मणस्य सावित्री नातिवर्तत इति मनुः॥ ॥ आद्वाविंशात्क्षत्रियस्य। अत्राप्याङ्मर्यादा
र्थः। तस्मात्क्षत्रस्योपनयने कालो नातीतो भवति॥ ॥ आचतुर्विंशाद्वैश्यस्य। अत्रापि तथैव। वैश्य
स्योपनयने कालो नापैति। याज्ञवल्क्यः। आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रवि २८
शां काल औपनायनिकः परः। शंखः। षोडशाब्दानि विप्रस्य राजन्यस्य चविंशतिः। विंशतिः सच
तुष्का च वैश्यस्य परिकीर्तिता॥ ॥ अत ऊर्ध्वं पतितसावित्रीका भवंति। षोडशाद्वाविंशचतुर्विंश

पर्यंतेषु वर्षेषु वेदनुपनीतास्तत ऊर्ध्वमनंतरं पतितसावित्रीका भवंति। पतितसावित्रीसंज्ञाप्रयोज
नं पतितसावित्रीक उद्दालकव्रतं चरेदित्यादि। अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः। सावित्रीप[ति] ति२
ता व्रात्या व्रात्यस्तोमादृते क्रतोरिति याज्ञवल्क्यः। व्रात्यस्तोमो व्रात्यस्तोमानामनवानां नाकसदां चेति सू
त्रे सूत्रितं॥ ॥ नैनानुपनयेयुः। अनुचीर्णप्रायश्चित्तान्नोपनयेयुर्नोपनयनं कार्यं॥ ॥ नाध्यापयेयुः। पु४
इति५ पतितसावित्रीकाननुवर्त्तते। यद्विनौं दज्ञानाद्वा उपनीतास्तदपि तेषामध्यापनादि न कार्यं प्रायश्चि
त्तमृते॥ ॥ नयाजयेयुः। मोहादध्यापितानपि तान्याजयेयुर्न याजनयाजनादि न कार्यं॥ ॥ नैभिर्व्य
वहरेयुः। यद्यज्ञानादिना एतदादि ज्ञातं तथापि प्रायश्चित्तं विना एभिः पतितसावित्रीकैः सह भोज
नदानादिको व्यवहारः कार्यो न। इति शिष्टस्मरणं दान्ता यैः शिष्यशिक्षार्थमुक्तं॥ ॥ अहतेन वास

र्वान्मेखलिनः॥ वा शब्दो ऽजिनेन सह विकल्पार्थः॥ सर्वोपि वर्णस्त्र्यान्मेखलिनो मेखलायुक्तानहतेनयं
त्रनिर्मुक्तेन वाससा संवृतान्कृत्वा उपनयेत्॥ अजिनोत्तरीयस्थाने वस्त्रोत्तरीयं धारयेदित्यर्थः॥ ॥ मौं
जी मेखला ब्राह्मणस्य॥ मुंजजाया इयं मौंजी मेखला ब्राह्मणस्य कार्या॥ मौंजी त्रिवृत्समा श्लक्ष्णा कार्या
विप्रस्य मेखलेति मनुः॥ मुंजकाशाताम्बुल्यो रज्वाना इति सामगृह्ये॥ ॥ धनुर्ज्या क्षत्रियस्य॥ क्षत्रियस्य
धनुषः कार्मुकस्य ज्या मौर्वी मेखला कार्या॥ क्षत्रियस्य तु मौर्वीज्येति मनुः॥ शणसूत्री वैश्यस्य॥ श
णसूत्रस्येयं शणसूत्री मेखला वैश्यस्य भवति॥ वैश्यस्य शणतान्तवी॥ मुख्याभावे प्रतिनिधिः॥ मुं
जाद्यभावे तु कर्तव्याः कुशाश्मंतकबल्वजैः॥ त्रिवृता ग्रथनैकेन त्रिभिः पंचभिरेव वेति मनुः॥ दंडमान
माह॥ ॥ पालाशो बैल्वो वा दंडो ब्राह्मणस्य॥ ॥ पालाशो ब्रह्मवृक्षस्तस्य दंडो ब्राह्मणस्य भवति॥

पालाशाभावे बैल्वो वा॥ वा शब्दाद्दंडविकल्पो न॥ किंतु दंडवृक्षस्यैव विकल्पः॥ ॥ नैयग्रोधः क्ष
५२ त्रियस्य॥ न्यग्रोधो वटस्तस्यायं नैयग्रोधो दंडः क्षत्रियस्य भवति॥ ॥ औदुंबरो वैश्यस्य॥ उदुंबरो हे
मदुग्धको वृक्षस्तस्यायमौदुंबरो दंडो वैश्यस्य भव ति॥ पालाशादिवृक्षसाहचर्यान्न ताम्रम
यः॥ ब्राह्मणे बैल्वपालाशौ क्षत्रिये वटखादिरौ॥ पैलवौदुंबरौ वैश्ये दंडानर्हंति धर्मत इति मनुः
दंडमानमाह ॥ ॥ प्राणसंमितो ब्राह्मणस्य॥ प्राणो वायुस्तस्य निर्गमनस्थानं नासिकाग्रं तत्संमितो ब्राह्मण
स्य दंडः कार्यः॥ नतु प्राणमात्र एव॥ संमातुमशक्यत्वात्॥ ॥ ललाटसंमितः क्षत्रियस्य॥ लला
– टं टं ललाटमतं दंडसंमितः क्षत्रियस्य दंडः कार्यः॥ नतु ललाटमात्र एवायोग्यत्वात्॥ ॥ केशसंमि
तो वैश्यस्य॥ एवं केशसंमितो दंडो वैश्यस्य कार्यः॥ सर्वेपि पालाशादिदंडाः पादतस्त्वारभ्य प्रा

केशपर्यंत इति यावत्॥ २

त केशाग्रसंमि

णललाटकेशांतायथाक्रमंदंडा विधेयाः।केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः।ललाट
संमितो राज्ञः स्यात्तु नासांतिको विशः।ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः।अनुद्वेगकरा नृ
णां सत्वचो नाग्निदूषिताः इति कात्यायनः॥७॥सर्वे वा सर्वेषां।सर्वेषां ब्राह्मणक्षत्रियविशां सर्वे पा
लाशादिदंडाः परस्परं विकल्पेन भवंत्यभावे॥८॥येनाबद्धेनोप नयेत्ताचार्याधीनं।तत्र।येनक
ण्ठादिभूषणेनाबद्धेनाचार्यो बटुमुपनयेत्तदाचार्याधीनं रक्षणं विसर्जनं वा।ब्रह्मचारिणो य
द्यपि पुरातनवस्त्रादियुक्तो वेष उचितस्तथाप्याचार्यो यथा उत्सवादिष्विति तथा विधेयं॥९॥
परिवाप्योपनेयः स्यात्।बटोः परिवापनं मुंडनं कारयित्वोपनेयं उपनयनयोग्यः स्याद्भवति।मुंड १००
नं सर्वतः कार्यं।जटिलत्वं शिखाजटिलत्वं न परिवाप्येत्युक्तत्वात्।परीति सर्वतो भावं इति यास्कः।मुंडो वा

६१

निमत्तो द्विज इति परिशिष्टे।आप्लुत्यालंकृत्याहरिद्राकुंकुमादियुक्तैर्मौराल्योदकैः स्नातं बटुमा
प्लुत्य आप्लाने आप्लवनं कारयित्वा कर्णभूषणांगुलीयादिभिरलंकृत्योपनयेत्॥१०॥कृत्वा
जघनेनाग्निं तिष्ठतः प्राङ्मुखश्चाचार्यः प्रत्यङ्मुख इतरः।एतदप्युपनयनं वृद्धिश्राद्धं विधाय कृ
र्तव्यं।पुत्रोत्पत्तिप्रतिष्ठासु तन्मौंजीत्यागबंधन इति गार्ग्यः।कृत्वाऽनादेशपरिभाषातः पुरस्तात्सं
ज्ञकं कृत्वा अग्निं स्यापिताग्निं जघनेन पश्चात् आचार्य उपनेता प्राङ्मुखः प्राच्यभिमुखः इतरो मा
ती णवकः प्रत्यङ्मुखः प्रत्यभिमुख एवमाचार्यः शिष्यो तिष्ठतः।नन्वेवमनादेश इत्यनेन पुरस्ताद्धो
मे प्राप्ते कृत्वेति किमर्थं।शृणु एवमनादेश इति यदुक्तं तद्भूतिकर्मसु न दृष्टकर्मसु।मेखलाबंध
नं तु दृष्टार्थं तस्मादेवमादिषु कर्मसु पूर्वं पुरस्ताद्धोममकृत्वैवेषां प्राप्तिर्भवति तस्मात्कृत्वेत्युक्तं॥

॥५॥ तिष्ठंस्तिष्ठंतमुपनयेत्। प्राङ्मुख आचार्यस्तिष्ठन् प्रत्यङ्मुखं बटुं तिष्ठंतमुपनयेत्॥६॥ ॥प्र
थमः खंडः॥ इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती न आगात्। प्राणापानाभ्यां बलमावि
शंती सखा देवी सुभगा मेखलेयमिति त्रिर्मेखलां प्रदक्षिणं त्रिः परिवेष्ट्य॥ कृतस्नानस्य कृत
तिलकस्य कृतरक्षाजिनोत्तरीयस्य माणवकस्याचार्य इयं दुरुक्तादित्यनेन मंत्रेण त्रिः प्रवृत्ते
न मेखलां मौंजीं श्रोणिदेशे त्रिः परिवेष्टयति। प्रादक्षिण्येन। एवं नवगुणा भवति॥७॥ ग्रंथिरे
कस्त्रयोपि वा पंच वा। आचार्यो माणवकस्य कटिप्रदेशे बद्धायां मेखलायां एको ग्रंथिस्त्रयो
वा पंच वा कुर्यात्। एकस्त्रयः पंच वेति विकल्पाः प्रवरानुस्मरणार्थाः। अपि द्वयपशाद्वात् द्विगोत्र ९२
स्य द्विगुणा यथास्मरणं। द्वयोर्गोत्रयोः षड्भ्रात्रीण्येव वेति यद्येतानि रूपाणीयां॥८॥ यज्ञोपवी

२ इदं छंदोगविजयमिति तित्रेणं नारायण

तं कृत्वा यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामीति। यज्ञोपवीतं यथोक्तं कृत्वा यज्ञोपवीत
मिति मंत्रेण आचार्यो माणवकस्य परिधापयति। यज्ञोपवीतलक्षणं छंदोगपरिशिष्टे। त्रिवृदूर्ध्ववृ
तं कार्यं तंतुत्रयमधोवृत्तं। त्रिवृत्तच्चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। पृष्ठवंशे च नाभ्यां च धृतं यद् ५३
विंदते कटिं। तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितमिति। मनुः। कार्पासमुपवीतं स्याद्विप्रस्योर्ध्व
वृतं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकमिति। करेण दक्षिणेनोर्ध्वगतेन त्रिगुणी
कृतं। वलितं मानवैः शास्त्रे त्रिवृदूर्ध्ववृतं स्मृतमिति संग्रहकारः। कार्पासक्षौमगोवालशणवल्क
तृणोद्भवं। सदा संभवतो धार्यमुपवीतं द्विजातिभिरिति देवलः। शुचौ देशे शुचिः सूत्रं संहतांगु
लिमूलके। आवृत्य षण्णवत्यां तु त्रिगुणीकृत्य यत्नतः। अब्लिंगैः त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं त्रि

हृत।स प्रदक्षिणमावृत्तसावित्र्या त्रिगुणीकृतं। ततं प्रदक्षिणावर्त्तं समं स्यान्नवसूत्रकं। त्रिरा
वेष्ट्य दृढं बध्वा ब्रह्मविष्णुशिवं स्मरन्मेत्॥ ईदृशमुपवीतं परिधापयेत्॥ अजिनं दद्यात्। मुष्टिस्या दृढाह
स्याच मेखला। षण्णवतिब्रह्मसूत्रं स्याद्ब्रह्मचारी गृहस्थयोः। अजिनमंत्रमाह माध्यंदिन गृह्ये।
मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरं समृद्धं। अनाहनस्यं वसनं जरिष्णु परीदं वाज्य
जिनं दधेहमिति। अनेन मंत्रेण माणवकस्य वामस्कंधे अजिनं मेखलोपवीतमूर्ध्वकं धारय। ते
॥छ॥ अंजलीपूरयित्वा थैनमाह को नामासीति। आचार्य आत्मनो माणवकस्य चांजली उदकेन
पूरयित्वाऽथानंतरं एनं बटुं को नामासि इति आह। अंजली इति द्विवचननिर्देशात्स्वस्य ब्रह्मचा १·२
रिणश्चांजलिकरणं॥छ॥ असावहंभो २ इतीतरः। इतरो माणवकं असाविति प्रथमांतस्वकीयंना

मांते नो वा ब्रूयुक्तं गोत्रशर्मयुक्तं प्रत्याह। अयमपि को नामासीत्याचार्येण पृष्ठ अमुकगोत्रो मुको
मुकशर्मा अहं भोऽस्मि नेन आचार्यो माणवकं वाचयति। सोपि तथैवाह। भोः शब्दस्वरूपभावार्थः॥
भोः शब्दं कीर्त्तयेदंते स्वस्य नाम्नो भिवादने। नाम्नां स्वरूपभावो हि भोः शब्द ऋषिभिः स्मृत इति मनुः।
समानार्षेय इत्याचार्यः। समानार्षेयो भवान्ब्रूहि इति आचार्यो वदति। अत्र भवान्ब्रूहीति ब्रह्मचा
री भवान्ब्रूहीत्यतः सिंहावलोकनन्यायेनात्रानुषज्यते॥छ॥ समानार्षेयोहं भो ३ इतीतरः। इतरो ब्रह्म
चारी समानार्षेयोहं भो २ इति भणति तथाचार्येण भणितव्यं॥छ॥ ब्रह्मचारी भवान्ब्रूहीति। आ
चार्य इति एवं वदति॥छ॥ ब्रह्मचार्यहं भो २ इतीतरः। इतरो माणवको ब्रह्मचार्यहं भो ३ इति वद
ति। तथाचार्येणाव कर्त्तव्यं॥छ॥ अपोऽनु वेः स्वरित्यस्यांजलावंजली स्त्री नासिच्य। आचार्येस्यमाणव

ब्रवीतु इस स्पर्धा। मयछ
ह्योगात् ३

कस्य अंजलौ भूर्भुवः स्वरिति मंत्रेण त्रीनूर्ध्वांजलीन् आसिंचति ततः॥ ॥ दक्षिणेनोत्तराभ्यां पाणिभ्यां
पाणी संगृह्य जपति। आचार्यो दक्षिणोत्तराभ्यां दक्षिणउत्तर उपरि ययोस्तौ दक्षिणोत्तरौ पाणी स्वी
यौ हस्तौ ताभ्यां हस्ताभ्यां माणवकस्य पाणी हस्तौ संगृह्य एवं संपुटीकृत्य वक्ष्यमाणं मंत्रं जपति॥ ॥
व्या देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामुपनयाम्यसाविति। असावित्यत्र माणवक
स्य संबोधनांतं नाम गृह्णीयादाचार्यः। अमुकगोत्रामुकामुकशर्मन्निति॥ ॥ गणानां त्वेति गणका
मान्। गणानामिति मंत्रेण गणमुख्यताकामानुपनयेत्। गृत्समदो बृहस्पतिर्जगती। गणानां त्वा
गणपतिं हवामहे। आगंता मा रिषण्यत इति योधान्। आगंतेत्यनेन मंत्रेण योधान्योद्धुकामानुप १३
नयेत्। सोभरिर्मरुतो बृहती। आगंता मा रिषण्यत त्स १॥ महाव्याहृतिभिर्व्याधितान्। समस्ताभिर्म

हाव्याहृतिभिर्व्याधितान् रुग्णानुपनयेत्। उपनयाम्यसाविति सर्वेष्वपि मंत्रांतेषु विशेषः॥ २॥ ॥ इ
ति द्वितीयः खंडः॥ ॥ न गस्ते हस्तमग्रभीत् सविता हस्तमग्रभीत् पूषा ते हस्तमग्रभीदर्यमा हस्तमग्रभी
न्मित्रस्त्वमसि धर्मणाग्निराचार्यस्तव। असावइंद्रो माणवक एतं ते ब्रह्मचारिणं परिददामीन्द्रैतं ते ब्रह्म
चारिणं परिददाम्यादित्यैतं ते ब्रह्मचारिणं परिददामि विश्वेदेवा एतं वो ब्रह्मचारिणं परिददामि
दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय रायस्पोषाय सर्वेषां वेदानामाधिपत्याय सुश्लोक्याय स्वस्तये।
न३ माणवकस्य गृहीसंपुट एवाचार्येन गस्त इमं मंत्रं जपन्नसावित्यत्र ब्रह्मचारिणो [illegible] नाम संबो
धनांतं कुर्वन्नहं वेत्यारभ्य स्वस्तय इत्येवं मंत्रं जपत्याचार्यो निवाचयति बटुं॥ ॥ ऐंद्रीमावृतमा
वर्त्ते आदित्यस्यावृतमन्वावर्त्ते इति दक्षिणं बाहुमन्वावृत्य। आचार्यो बटोर्दक्षिणं बाहुं हस्ते ऐंद्रीमा

वृ[illegible]तमिति मंत्रेणान्वावर्त्तयेत्॥ अयमर्थः॥ आचार्य इमं मंत्रं जप्त्वा तं बटुं वाचयित्वा प्रदक्षिणा
वर्त्तं कारयेत्॥ उदङ्मुखंत्रमलंकारयन्नाभ्यभिमुखं कुर्यात्॥छ॥ दक्षिणेन प्रादेशेन दक्षिणांसं सम
न्ववहृत्य शिष्यतस्ते हृदयस्य प्रियो भूयासमिति हृदयदेशमभिमृशति॥ आचार्यो बटोर्दक्षिणमं
समनु अधो वहृत्य कृत्वा शिष्यतदस्यनेन मंत्रेण स्वस्य दक्षिणेन प्रादेशेन तस्य हृदयदेशमुरःप्र
देशमभिमृशति स्पर्शनं करोति॥ अयमर्थः॥ आचार्यः स्वकीयं दक्षिणं बाहुं बटोर्दक्षिणकक्षांतरे
प्रवेशयित्वा दक्षिणेन प्रादेशेन तस्योरोभिमृशेद्वटोः शिष्यत इति मंत्रेण॥ आत्मन्यात्मानमेवं चेत्युक्त
त्वादुदकस्य शेषं विधेयः॥छ॥ तूष्णीं प्रसव्यं पर्यावृत्य तूष्णीमेवेमिति मंत्ररहितं प्रसव्यं पर्यावृत्य स २४
व्यं हस्तं पर्यावृत्य वामहस्तपर्यावर्त्तनं कारयित्वा अप्रदक्षिणमावर्त्तनं कारयित्वा आचार्यआलनी

भिमुखं करोति॥छ॥ अथास्योर्द्ध्वांगुलिं पाणिं हृदये निधाय जपति॥ अथानंतरमर्थो॥ एवं पर्यावर्त्तना
दिकं कृत्वाचार्यो ब्रह्मचारिणो हृदये ऊर्द्ध्वांगुलिं ऊर्द्ध्वा अंगुलयो यस्य एतादृशं पाणिं हस्तं निधाय
वक्ष्यमाणं मंत्रं जपति॥३॥ ॥तृतीयः खंडः॥ ॥मम व्रते हृदयं ते दधामि मम चित्तमनु चित्तं ते अस्तु।
मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति॥ ब्रह्मचारिहृदये आचार्यः स्वस्य दक्षि
णं हस्तं पूर्वोक्तप्रकारेण स्थाप्येमं मंत्रं जपति मम व्रत इत्यादिकं॥छ॥ कामस्य ब्रह्मचर्यस्यासाविति।
कामइका॥ सा गुरोः शिष्यस्य वा॥ आचार्याधीनं तदित्युक्तत्वादाचार्यस्यैव॥ संवत्सरं त्रिरात्रान्वादादी
नां वक्ष्यमाणकालानामन्यतमस्मिन्काले ब्रह्मचर्यस्य असाविति संबुध्यंतमाणवकनामग्रहणी
यान्मम व्रत इति मंत्रांते। ब्रह्मचर्यवान्दो विशिष्टाचारयमनियमादिसमूहवाचकोऽपि तदात्मकेषु

वि २

पंचसुव्रतेषुसावित्रस्युक्रियशाक्वरव्रातिकौपनिषदेषुद्रष्टव्यः।तेषुशाक्वरव्रातिकौपनिषदानि
त्रीणिव्रतानिवक्ष्यमाणकालानिसांवत्सरिकाणि।शाक्वरंतुसंवत्सरंव्रातिकमौपनिषदंचेतिवक्ष्य
माणत्वात्।शुक्रियमाचार्येच्छया।सावित्रं कल्पत्रययुक्तं।संवत्सरेसावित्रीमन्वाहत्रिरात्रेऽन्वक्ष
वेतिवक्ष्यमाणत्वात्।तदर्थमिदंकामस्यब्रह्मचर्यस्येत्युक्तं।अयमर्थः।नियुनक्तुमह्यंसांवत्सरिक
स्यत्रैरात्रिकस्यवाऽन्वह्निकस्यवासावित्रस्यब्रह्मचर्यस्यामुकामुकशर्मन्नितिवाक्यसंयोगोज्ञेयः
॥८॥तेनैवमंत्रेणतथैवपर्यावृत्य।तेनैवैंद्रीमावृतमितिमंत्रेणतथैवपूर्वोक्तप्रकारेणपर्यावृत्त्यप
र्यावर्तनंकारयित्वाततः॥९॥दक्षिणेनप्रादेशेनदक्षिणमंसमन्वारभ्यजपति।आचार्यःस्वकीये १५
नदक्षिणेनप्रादेशेनबटोर्दक्षिणमंसंस्कंधंअन्वारभ्यसंस्पृश्यवक्ष्यमाणंजपति॥१०॥ब्रह्मचार्यसीति

श्रा २

मिधमाधेह्यपोऽशानकर्मकुरुमादिवासुषुप्थावाचंयच्छसमिदाधानात्।इमंनिगदमाचार्योजिह्वा
बटुंशिष्यति।ब्रह्मचार्यसीत्याचार्यआह।असानीतिमाणवकप्रत्युक्तिः।एवमुत्तरत्रापि।समिध
माधेहीत्याचार्यः।आदधानीतिमाणवकः।अपोऽशानेत्याचार्यः।अश्नानीतिमाणवकः।मूत्रपुरीषा
दौकृतेस्मृत्युक्तमाचमनंकुर्वित्यर्थः।कर्मकुर्वित्याचार्यः।करवाणीतिमाणवकः।मादिवासुषु
प्थाइत्याचार्यः।नस्वपानीतिमाणवकः।वाचंयच्छसमिदाधानादित्याचार्यः।यच्छानीतिमाणव
कः॥११॥एषा।तेऽग्नेसमिदित्यग्न्यादधातिसमिधंतूष्णींवा।एषातइत्यनयामाणवकःसमिधंप्रादे
शांत्रेऽग्न्यादधातिअग्नौ।तूष्णींवाअमंत्रकंवासमिधंजुहोति।एषातइतीयंपूर्वकल्पेउक्ता।अग्रेवक्ष्य
तिवाचार्यः॥४॥ ॥चतुर्थःखंडः॥ ॥संवत्सरेसावित्रीमन्वाह।उपनयनानंतरंआचार्यःसंवत्सरेतीते

अपोऽशानकर्मकुर्वित्येकोप्याऽऽदेशः।सायंप्रातर्भोजनयोरपिपूर्वोत्तरत्वेनोपरिष्टाच्चपृथक्मंत्रान्त्या अपोऽशान् कर्मकुर्वित्यर्थः

सावित्रीं सवितृदेवताकामन्वंमाणवकायान्वाह उपदिशति। असंयुज्य विधानाद्दर्णात्रयस्यापि॥छ॥
त्रिरात्रे। त्रिरात्रेतीते सावित्रीमुपदिशेदाचार्यः। पक्षांतरमेतत्॥छ॥ अन्वक्षं वा। अन्वक्षं तत्क्षण एव
सावित्रीमुपदिशेदाचार्यः। वाशब्दः पक्षांतरविकल्पार्थः॥छ॥ गायत्रीं ब्राह्मणायानुब्रूयात्॥ ब्रा
ह्मणाय गायत्रीं गायत्रछंदस्कामृचं तत्सवितुरित्येतां अनुब्रूयात् कथयेदाचार्यः। अथास्मै सावित्रीं
मन्वाह तत्सवितुरिति वक्ष्यमाणत्वात्॥छ॥ त्रिष्टुभं क्षत्रियाय। क्षत्रियाय माणवकाय त्रिष्टुभं त्रिष्टुप्छं
दस्कामृचं आकृष्णेनेति प्राथम्यात् अनुब्रूयादाचार्यः॥छ॥ जगतीं वैश्याय। वैश्याय जगतीं जगतीछंद
स्कामृचं हिरण्यपाणिः सवितेत्येतां प्राथम्यात् अनुब्रूयात्॥छ॥ सावित्रीं त्वेव। उक्ताछंदोनियमार्थः १०६
गायत्रीं त्रिष्टुभं जगतीं वा सावित्रीमेव सवितृदेवत्यामेवोपदिशेन्नादित्यदेवताकां। आग्नेयो ब्राह्म

न्या१

इत्यादिश्रुतिविधानासंदेहो मा भूदिति सावित्रीं त्वेवेत्युक्तं॥छ॥ उत्तरेणाग्निमुपविशतः। अन्वह
दिकाले उच्यमानायां सावित्र्यां अग्नेः स्थापितादग्निमुत्तरेणाचार्यमाणवकौ उपविशतः॥छ॥ प्राङ्मु
ख आचार्यः प्रत्यङ्मुख इतरः। आचार्यमाणवकौ प्राङ्मुखप्रत्यङ्मुखावुपविशतः। अथ्यासीनो
दिशमेकां प्रशस्तां प्राचीमुदीचीमपराजितां वा। एकः श्रोता दक्षिणतो निषीदेदित्येतन्निषिध्यतेऽने
न सूत्रेण॥छ॥ अधीहि भो ३ इत्युक्त्वाचार्यः। आचार्यं अधीहि भो ३ इति माणवकमुक्त्वा वक्ष्यमाणं
कुर्यात्। आङ्कृतोऽध्ययने कुर्यादिति स्मृतेः॥छ॥ ॐकारं प्रयुज्याथेतरं वाचयति सावित्रीं भो ३ अनुब्रू
हीति। आचार्यस्त्रिमात्रमोंकारं प्रयुज्योक्त्वाथानंतरं इतरं माणवकं सावित्रीं भो ३ अनुब्रूहि इति वा
चयति। स्वयमुच्चार्य इतरो यथा वक्तुं शक्नोति तथा विधेयं॥छ॥ अथास्मै सावित्रीमन्वाह तत्सवितुर्व

अधीहीस स्वाध्यायेतिवार्थः। तथाच ते धाहि भो इत्यभिचोदये
नीति पार्श्वदंसग छते। तदायं भावः अधीहि भो ३ इति शिष्येणोक्ते
आचार्यो ॐमिति त्रिसी कृत्य अध्ययने विशेषं वाचयति सावित्रीमिति २

रेण्यमित्येतांपच्छोर्द्धर्चेशोनवानं।अथानंतर्यार्थः॥ॐकारोच्चारणानंतरंअस्मैमाणवकायावा
र्यस्तत्सवितुरित्येतांसावित्रींपच्छःपादंपादंइतिपादशः॥अर्द्धर्चेशः॥अर्द्धर्चमर्द्धर्चमित्यर्द्धर्चशः॥अ
नवानंअवसानरहितंयथास्यात्तथानुब्रूयात्।वर्णत्रयस्यानुब्रूयाद्गायत्रींत्रिपदामृचं।विश्वामि
त्रर्षिदृष्टांतुनित्यंब्रह्मविवर्द्धनीमितिपराशरः॥विश्वामित्रःसवितागायत्री।तत्सवितुर्वरेण्यं।त्तर
त्रिष्टुप्पङ्क्ते।हिरण्यस्तूपःसवितात्रिष्टुप्।आकृष्णेनरजसावर्त्तमानःइत्यजगतीपङ्क्ते।हिरण्यस्तूपःस
विताजगती॥हिरण्यपाणिःसवितादिवर्षणिः॥इवश्येदुक्रमपोशानेतितत्प्रकारमाह॥५॥पंच
मःखंडः॥ ॥आपोनामस्थशिवानामस्थोर्जोनामस्थाजरानामस्थाभयानामस्थामृतानामस्थता
सांवोशीयसुमतौमाधत्तेत्येवंत्रिरपआचमय्य।आपोनामस्थेत्यास्यधत्तेत्यंतेनमंत्रेणवायोंमं

प्राङ्मुखायेतिपद्धतिकाराः २

त्राहृत्यामाणवकमपश्चिराचमयति॥६॥स्वस्तिनोमिमीतामितिपंचर्चेनदंडंप्रयच्छति।दंडपालाशा
दिकंमाणवकायस्वस्तिनइतिपंचर्चेनाग्नेःपश्चात्प्राङ्मुखआचार्यस्तिष्ठन्प्रत्यङ्मुखायतिष्ठतेमाणव
कायप्रयच्छति।ऋषिछंदोदैवतानिप्रातर्जपेउक्तानि॥७॥वरोदक्षिणा।अस्मिन्नुपनयनकर्मणिव
रोदक्षिणात्वेनदेयः॥गौर्ब्राह्मणस्यवरइतिअत्रवर्णक्रमेणवरस्वरूपमुक्तं॥८॥प्रदक्षिणमग्निंप
र्याणीयभिक्षतेग्रामं।ग्रामशब्दोऽत्रजनपदवाची।प्रदक्षिणंप्रादक्षिण्येनअग्निंपर्याणीयबटुकं।
ग्रामंभिक्षते।ब्रह्मचारिणोभोजनप्रशस्तान्यन्नादीनिबटुकोभिक्षतेयाचते॥९॥मातरंत्वेवप्रथमां।
तुशब्दोनिश्चयार्थे।बटुकोमातरंजननीमेवप्रथमांभिक्षयति॥१०॥यावैनंनप्रत्याचक्षीत।याअन्या
वास्त्रीएनंबटुकंनप्रत्याचक्षीतप्रत्याख्यानंनिराकरणंनकरोतितांवाभिक्षांभिक्षते।तत्रभिक्षाप्रका

ए ३

हेमो भने रःस्मृतिषु। ब्राह्मणेन ब्रह्मचारिणा ओं भवति भिक्षां देहीति वक्तव्यं। तथा क्षत्रियेण। भिक्षां भवति देही
ति वक्तव्यं। तथा वैश्येन देहि भवति भिक्षामिति वक्तव्यं। याज्ञवल्क्यः। ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्म
वृत्तये। आदिमध्यावसानेषु भवच्छब्दोपलक्षिता। ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमं। मनुः। प्रतिगृह्ये निति
प्सितं दंडमुपस्थाय च भास्करं। प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि। भवत्पूर्वं चरेद्भैक्षमुपनीतो द्वि
जोत्तमः। भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरं। व्यासः। ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहं। सजा
तीयगृहेष्वेव सार्ववर्णिकमेव वा। सर्वेषां वाचरेद्ग्रामं पूर्वोक्तानामसंभवे। अत्यवर्जं महानाग इति भवि
ष्यत्पुराणे। हारीतेन पात्रनियम उक्तः। कांस्ये लोहे मृन्मये पात्रे न भुंजीत। शौनकः। भिक्षेत पात्रहस्तः स २.८
न्प्राप्य प्राप्येत दंतिकं। तच्च पात्रं स्वयं प्रक्षालयेत्। भुक्त्वा स्वयममत्रं प्रक्षालयेदित्यापस्तंबः। शौनकः॥

अग्रे भिक्षेत जननीमथ त्याख्यापिनी च या। पश्चात्तितरमन्यापिये वा सुबोधवास्ततां॥क॥ आचार्याय
भैक्षं निवेदयित्वानुज्ञातो गुरुणा भुंजीत। माणवको भैक्षं भिक्षासंबंधानं आचार्याय निवेदयित्वा स
मर्प्य गुरुणाचार्येणानुज्ञातः आज्ञप्तो भुंजीत भोजनं कुर्वीत। कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञ
रू ४ या। आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्। ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि। ब्राह्मणः
काममश्नीयाच्छ्राद्धे व्रतमपीडयन्॥ देवलः। भवतीति पदं चोक्त्वा भिक्षां देहीति वाचयेत्। याचयित्वा त स्त ३
तो भिक्षां गुरवे सम्यगर्पयेत्॥क॥ अहरहः समिदाधानं भिक्षाचरणमधःशय्या गुरुशुश्रूषेति ब्रह्मचा
रिणो नित्यानि। ब्रह्मचर्यो बध्येते नियमाः। आचार्येण इयं शिक्षा ब्रह्मचारिणे देया। भो माणवक अह
रहः समिदाधानं कार्यं। बाढमिति माणवकः। अहरहः प्रतिदिनं समिदाधानं अग्निकार्यं समिदाधान

अ ३.

मित्यनेनाग्निकार्यं लक्ष्यते ॥ भिक्षाचरणं कार्यमित्याचार्यः ॥ बाढमितीतरः ॥ अथ शय्याकार्येति आ
चार्यः ॥ बाढमितीतरः ॥ अधःशय्येत्यनेन मंचकनिवृत्तिः ॥ गुरुशुश्रूषा कार्येत्याचार्यः ॥ गुरोः पित्रादेः
शुश्रूषा ॥ बाढमितीतरः ॥ एते धर्मा ब्रह्मचारिणो नित्यं भवंति ॥ महाव्याहृतिचतुष्टयं वैकल्पिकस्वि
ष्टकृत्सन्नकादिकर्मसमापनं ॥ याज्ञवल्क्यः ॥ मधुमांसांजनोच्छिष्टशुक्लस्त्रीप्राणिहिंसनं ॥ भास्करा
लोकनाश्लीलपरिवादांश्च वर्जयेत् ॥ कात्यायनः ॥ अहरहः सन्नरण्यात् समिधमाहृत्य तस्मिन्नग्नौ पूर्व
वदाधाय वाचं विसृजते ॥ अधःशय्यी क्षारलवणाशी स्याद्दंडधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षा
चर्या मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानादि वर्जयेत् ॥ ततो गायत्र्यैव संध्याकरणं ॥
गायत्र्यैव प्राणायामत्रयं ॥ एकगायत्र्या आचमनं ॥ दशमार्जनानि गायत्र्यैव ॥ त्रिरघमर्षणं गायत्र्यैवांपंच

त्रिर

दशकृत्व उपस्थानं गायत्र्यैव ॥ जपोपि गायत्र्यैव ॥ एतत्प्रातर्मध्याह्नयोः कर्म ॥ उपस्थानवर्जं सायं ॥ अ
ग्निकार्यमपि गायत्र्यैव ॥ त्रिकालं एतत् शुक्रियव्रतात् प्राक् ॥ अथ गायत्र्यनुवाचनप्रसंगेन शुक्रियव्रता
नंतरं यदनुवाचनं तदुच्यते ॥ ६ ॥ ॥ षष्ठः खंडः ॥ ॥ अर्थानुवाचनस्य ॥ अथ शुक्रियव्रतोत्तरं अनुवा
चनस्य कर्मणो विधिं वक्ष्याम इति वाक्यशेषः ॥ अग्नेरुत्तरत उपविशतः ॥ स्थापितस्याग्नेरुत्तरत आचा
र्यमाणवकावुपविशतः ॥ ७ ॥ प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरः ॥ आचार्यमाणवकौ प्राङ्मुख
प्रत्यङ्मुखावुपविशतः ॥ ८ ॥ अभिवाद्य पादावाचार्यस्य पाणी प्रसंगृह्य ॥ वक्ष्यत्यहरहराचार्याभि
वादये तत्यारस्य असावहं भो इत्यात्मनो नाम ॥ दिशयव्यत्यस्य पाणी इति ॥ तथा वक्ष्यमाणप्रका
रेण माणवक आचार्यस्य पादौ चरणौ अभिवाद्य नमस्कृत्य ततो हस्तौ प्रक्षालयेत् ॥ ततः पाणी प्र

ह्वाल्येतिवचनादन्यत्राभिवादनानंतरंनहस्तयोःप्रक्षालनं।अत्रवाचनिकत्वात्प्रक्षालनं॥छ॥दक्षिणे
नजानुनाक्रम्यमूलेकुशातरुणान्।माणवकःदक्षिणेनजानुनाकुशातरुणान्कुशापिंजूलीन्मूले
आ॥क्रम्यआक्रमणंकृत्वावक्ष्यमाणंकुर्यात्॥छ॥दक्षिणोत्तराभ्यांपाणिभ्यांमध्येपरिगृह्य।दक्षिणः
उत्तरः।अग्रेययोस्ताभ्यांहस्ताभ्यांप्रकरणात्पूर्वंजानुनाक्रांतान्कुशान्मध्येमध्यदेशेमाणवकःपरि
गृह्णातितः॥छ॥तांसव्येनाचार्योग्रेसंगृह्यदक्षिणेनाद्भिःपरिषिंचन्नथेतरंवाचयति।अथकुशग्रह
णानंतरंआचार्यःसव्येनहस्तेनतान्माणवकगृहीतान्कुशानग्रेकुशाग्रेसंगृह्यगृहीत्वादक्षिणेन
हस्तेनआनडुहगोमयकुंडाद्गृहीताभिरद्भिस्तानेवकुशान्परिषिंचन्परिषेकंकुर्वन्नितरंमा ११
णवकंवाचयति।भाणयतिवक्ष्यमाणं।आनडुहेनमूलेकुंडंकृत्वेतिवक्ष्यमाणत्वात्अनडुद्गोमय

निर्मितंकुंडंप्रथमतएवविधेयं॥छ॥सावित्रींभोअनुब्रूहीतीतरः।आचार्येणवाचनमेवंविधेयं।आ
चार्यःप्रथमतःसावित्रींभोःअनुब्रूहिइतिस्वयमुक्त्वाततोमाणवकंसावित्रींभोःअनुब्रूहीइति
वाचयति।भाणयति।ततइतरोब्रह्मचारीतथैवाह।नस्वातंत्र्यतःकृतानुकरत्वात्।एवंवक्ष्यमाणेष्व
पिद्रष्टव्यं।ओंकारंव्याहृतीस्तिस्रःसावित्रींचतदित्यृचं।मनसैताअनुद्रुत्यवेदादिंसमुपक्रमेदितिश्रु
तिविधानेउक्तत्वात्सावित्रींप्रस्तावयति।तस्याऋषिदेवतछंदसपूर्वकंअनुसंधानंकर्तव्यं।तथासर्वेषां
मंत्राणांच।ततइतिक्रियं॥छ॥सावित्रींतेअनुब्रवीमीत्याचार्यः।सावित्रींतेअनुब्रवीमि।इत्याचार्यो
वदति।सावित्रींसवितृदेवताकांतेअनुब्रवीमीत्याचार्यः॥छ॥गायत्रींभोःअनुब्रूही।तितिरोगायत्री
तेअनुब्रवीमीत्याचार्यःपूर्ववदाचार्यमाणवकौकुरुतः।गायत्रींगायत्रछंदस्कांचतुर्विंशत्यक्षरात्मि

कांसावित्रीमित्यर्थः॥ वैश्वामित्रींनोऽअनुब्रूहीतीतरो वैश्वामित्रींतेअनुब्रवीमीत्याचार्यः॥ अत्रापितौपू
र्ववत्कुरुतः॥ वैश्वामित्रीं विश्वामित्रदृष्टांसावित्रींतत्सवितुरितिऋचमित्यर्थः॥ ब्राह्मणस्यएतत्सावित्रीप्र
शंसात्मकोनुवादः॥ क्षत्रियवैश्ययोस्तुऊहःकर्तव्यः॥ शाब्दविकाररूपः॥ शाब्दविकारमूहंअवतरति
लोके॥ त्रिष्टुभंनोऽअनुब्रूहीतीतरस्त्रिष्टुभंतेअनुब्रवीमीत्याचार्यः॥ त्रिष्टुभंत्रिष्टुप्छंदस्कांसावित्रीं
चतुश्चत्वारिंशदक्षरात्मिकामित्यर्थः॥ हैरण्यस्तूपींनोऽअनुब्रूहीतीतरो हैरण्यस्तूपींतेअनुब्रवीमी
त्याचार्यः॥ हैरण्यस्तूपीं हिरण्यस्तूपदृष्टांसावित्रीं आकृष्णेनेत्यृचं क्षत्रियस्यब्रूयात्॥ त्रिष्टुभं क्षत्रियाये
त्युक्तत्वान्नगायत्री॥ इतिक्षत्रियस्य॥ जगतींनोऽअनुब्रूहीतीतरो जगतींतेअनुब्रवीमीत्याचार्यः॥ जगतीं १११
जगतीछंदस्कांसावित्रीमष्टाचत्वारिंशदक्षरात्मिकामित्यर्थः॥ हैरण्यस्तूपींनोऽअनुब्रूहीतीतरो हैर

ण्यस्तूपींतेअनुब्रवीमीत्याचार्यः॥ हिरण्यस्तूपदृष्टांजगतीं हिरण्यपाणिःसवितेत्यृचंवैश्यस्यब्रूया
त्॥ जगतींवैश्यायेत्युक्तत्वान्नगायत्री॥ सावित्रींवैवेत्युक्तत्वात्सवितृदेवताकैवब्रूयात्॥ वामदेवींनोऽ
अनुब्रूहीतितरोवामदेवींतेअनुब्रवीमीत्याचार्यः॥ वामदेवींजगतीं हंसःशुचिषदित्यृचंवाब्रूयात्॥ इ
तिवैश्यस्य॥ ॥ ऋषींनोऽअनुब्रूहीतीतरऋषींस्तेअनुब्रवीमीत्याचार्यः॥ अत्रापितौपूर्ववत्कुरुतः॥
ऋषयोमंत्रद्रष्टारोमधुच्छंदःप्रभृतयः॥ देवतानोऽअनुब्रूहीतीतरोदेवतास्तेअनुब्रवीमीत्याचार्यः॥
देवतामंत्रगताअग्न्यादिकाः॥ ॥ छंदांसिनोऽअनुब्रूहीतीतरश्छंदांसितेअनुब्रवीमीत्याचार्यः॥ छंदां
सिमंत्रगतानिगायत्र्यादीनि॥ ॥ श्रुतिंनोऽअनुब्रूहीतीतरःश्रुतिंतेअनुब्रवीमीत्याचार्यः॥ श्रुतिः
संहितारूपाब्राह्मणरूपाच॥ ॥ स्मृतिंनोऽअनुब्रूहीतीतरःस्मृतिंतेअनुब्रवीमीत्याचार्यः॥ ऋग्वेद

स्मृतिर्द्धर्मस्मारिकामान्वादिः॥ श्रद्धामेधेयेनो स्मनुब्रूहीतीतरः। श्रद्धामेधेयेते अनुब्रवीमीत्याचार्यः। श्र
द्धावेदबोधितेषु धर्मेषु आस्तिक्यं। मेधा तेषां धर्माणां मनसि धारणशक्तिः॥ ८॥ एवमेव महर्षेर्यस्य यस्य
यो यो मंत्रो यद्दैवत्यो यच्छंदाश्च तथा तथा तं तं मंत्रमनुब्रूयात्। आचार्यो माणवकायोपदिशेत्। एवं पूर्वो
क्तेन प्रकारेण ऋषिदेवताछंदःपूर्वकं तं तं अग्निमीळे इत्यादिकं मंत्रं माणवकायाचार्योऽनुब्रूयात्। एवं
एवं कथं। यस्य यस्य मधुच्छंदादिकस्य ऋषेर्दृष्टो यो यो मंत्रः अग्निमीळ इत्यादिकस्तथा यद्दैवत्यः या या दे
वता अग्न्यादिका अस्य सः। तथा यच्छंदाश्च यच्छंदो गायत्र्यादि यस्य सः। तथा तथा तेन तेन प्रकारेण तं
तं मंत्रमनुब्रूयात्। अयमर्थः। पूर्वं मंत्रस्य ऋषिः ततस्तद्देवता ततस्तच्छंदः एवं मंत्रस्यार्षादियुक्तं मं ११२
त्रजातमाम्नायपाठक्रमेणानुब्रूयात्। इति प्रथमः कल्पः॥ ८॥ अपि वा विदन्नृषिदेवतछंदांसि तत्स

वितुर्वरेण्यमित्येतां पच्छोऽर्द्धर्चशोऽनवानं [illegible] मित्येषेति समाप्य आहाचार्यः। अपि वेति पक्षांतरे। आचा
र्यो मंत्रगतान्नृषिदैवतछंदांस्यविदन्नजानन्प्रतिदिनं समाप्तिपरिसमाप्त्यनुवचनेन यथाभिलषि
तं तत्सवितुरित्येतामृचं पच्छः पादं पादं इति पच्छः। अर्द्धर्चशः अर्द्धर्चमर्द्धर्चमित्यर्द्धर्चशः। अनवानं अव
सानरहितं यथा भवति तथा [illegible] हा। ततः एषेति गायत्र्येव स्वरूपेण निर्दिश्यति। एषैव गायत्री त्रिपात्। प
च्छः प्रयोगे त्रिपदा। तथा एषैव अर्द्धर्चशः प्रयोगे द्व्यवसाना प्रथममर्द्धर्चं ततो द्वितीयं तृतीयचरणांते। त
था एषैव अवसानरहिता चरणत्रयांते चतुर्विंशत्यक्षरांते अवसानं विधेयं। एवं सावित्रीं ते अनुब्रवी
मीति गायत्रीं ते अनुब्रवीमि वैश्वामित्रीं ते अनुब्रवीमि इति गायत्रीमात्रे प्रयुक्ते सर्वस्य वेदस्य पाराशोरेत
न्मयत्वात्सर्वज्ञानं भवतीत्यभिप्रायः। ततः एषा सावित्री गायत्री वैश्वामित्री चागिति॥ इति द्वितीयः॥

॥ एवमेकैकमृषिमनुवाकं वानुब्रूयात्। एवं पूर्वोक्तेन प्रकारेण ऋषिदेवताछंदःपूर्वकं एकैकं ऋषिं
कऋषिदृष्टमंत्रजातं अनुवाकं वा आचार्यो माणवकाय ब्रूयात्। अयमर्थः। एकैकमृषिमित्यनेन या
वत्पर्यंतं येन ऋषिणा दृष्टं तावन्मंत्रजातं प्रत्यहं ब्रूयात्। अनुवाकं वानुब्रूयात्। अनुवाकास्तु अग्नि
मीले त्रिसूक्तस्तु इत्येवमाद्याः। वाशब्दः संनवापेक्षौ विकल्पार्थः॥ ॥ क्षुद्रसूक्तेष्वनुवाकं। एकैक
मित्यनुवर्त्तते। एकऋषिदृष्टमंत्रजातोच्यमानपक्षे दशमे मंडलस्थितेषु क्षुद्रसूक्तेषु क्षुद्रसूक्ताम
केषु सूक्तेषु अनुवाकं एकं एकैकं ब्रूयात्। नैकैकमृषिमिति नियम्यते॥ ॥ यावद्वा गुरुर्मन्येत। वेति
पक्षांतरसूचनार्थः। गुरुराचार्यो यावत्संख्याकं मनसि मन्येत सूक्तं यं द्वयं वैकं वा तावदेव ब्रूयात्। २२
गुरोरिच्छयाध्यापनं। एवमुक्तेन प्रकारेण प्रत्यहं वेदाध्ययनेनांतं नयेत्। इति तृतीयः॥ ॥ आद्योत्त

स्त्रक्षे

मकामं वानुब्रूयादृषेः। एकैकमृषिमित्यनुवर्त्तते। वाशब्दः पक्षांतरे। आचार्यः कामं स्वेच्छया एकै
कस्य ऋषेः आद्योत्तमे सूक्ते माणवकायानुब्रूयात्। आद्यं च उत्तमं च ते ब्रूयात्। आद्यं प्रथमं उत्तमं
मंत्यं। इति चतुर्थः॥ ॥ अनुवाकस्य वा। आद्योत्तमे सूक्ते इत्यनुवर्त्तते। आचार्यः स्वेच्छया अनुवाक
स्य आद्यं सूक्तं अंतिमं च अनुब्रूयात्। वाशब्दः पंचमपक्षसूचनार्थः॥ ॥ एकैकां सूक्तादावित्ति। इ
ति शब्दः षष्ठपक्षसूचनार्थः॥ ॥ सूक्तादौ सूक्तस्य आदौ प्रथमतः आचार्यः स्वेच्छया एकैकामृचं अनु
ब्रूयात्। दाशतय्यां यावंति सूक्तानि तावतां प्रथमां प्रथमामृचं माणवकायानुब्रूयात्॥ ॥ एकेषां न २१
ति रिति कामं सूक्तादावाचार्य इति। एकैकामित्यनुवर्त्तते। द्वितीय इतिकारः सप्तमपक्षसूचनार्थः।
आचार्यः काममिच्छया सूक्तादावेकैकामृचं माणवकाय कथयति। इति अनेन प्रकारेण सूक्तस्या

दिष्टा एषानृकृतत्वम्रतिश्रद्दंसूक्तंरतत्प्रकारकमिदंसूक्तं॥६॥एतदृषिस्वाध्यायेव्याख्यातं।एतद्यु
दनुवाचनंव्याख्यातंतदृषिस्वाध्यायेमंत्रसंहितायोज्ञेयं॥७॥समाप्तेकुशांतरुणानादायानडुहेनमूले
कुंडंकृत्वायथासूक्तंकुशेष्वपोनिषिंचति।एवंपूर्वंमंत्रास्ततोब्राह्मणंविनियोगास्ततोमन्वादिस्मृतयो
माणवकायोक्ताः समाप्तेनुवाचनेयेकुशाःपूर्वंगृहीताअनुवाचनार्थंतान्शिष्यादादायगृहीत्वा
चार्यश्चानडुह्बलीवर्दस्तस्यदमानडुहंगोमयंतेनमूलेकुशांतरुणमूलेकुंडंकुंडाकारमुदकावस्थानं
कृत्वासंपाद्ययथासूक्तंआम्नायपाठक्रमेणकुशेषुकुशांतरुणेषुअपःगोमयकुंडस्थाएवापोनिषिं
चतिसेचनंकरोति।यथासूक्तमृषीनुद्दिश्येतिकेचित्॥८॥अहःशेषंस्थानमुपवासश्च।अनुवाचन ११४
समाप्तौब्रह्मचारिणोयंनियमः।शेषंकर्मकुर्वीतउर्वरितंअहःदिनंस्थानंउपवेशनंनकार्यं।अहः

शेषमुपवासश्च॥९॥सप्तमःखंडः॥ ॥अपराह्णेकृतधानानिष्क्रित्वाज्याहुतिधर्मेणाग्नौपाणिनानुहु
यात्सदसस्पतिमद्भुतमितिप्रत्यृचंसूक्तशेषेण।तस्मिन्नेवोपवासदिनेऽपराह्णेऽकृतधानाअखंडि
तधानाअखंडितत्वचस्ययवानिष्क्रित्वानिष्क्राधर्मेणनिष्क्रित्वाआज्याहुतिधर्मेणप्रतिश्रुतकल्पेनाज्यभा
गांतंकृत्वाअग्नौस्थापितेअग्नौसदसस्पतिमितिसूक्तशेषेणचतुर्ऋचात्मकेनप्रत्यृचंऋचंऋचंप्रतिऋचि
प्रत्यृचंपाणिनाहस्तेनजुहुयात्त्वचष्टयवान्।स्रुवःपात्रमितिप्राप्तत्वात्पाणिनेत्युक्तं।आज्याहुतिधर्मत्वा
दाज्यभागस्विष्टकृतोर्विकल्पः।नाज्याहुतिषुनित्यावाज्यभागौस्विष्टकृच्चेत्युक्तत्वात्।ॐभवतिनिष्क्रां
ति २ देहीब्राह्मणस्यनिष्क्रांभवतिदेहीतिक्षत्रियस्यादेहिभवतिनिष्क्रामितिवैश्यस्येतिनिष्क्राधर्मोयथा
स्वं।याज्ञवल्क्यः।ब्राह्मणेषुचरेद्भैक्षमनिंद्येष्वात्मवृत्तये।आदिमध्यावसानेषुभवच्छब्दोपलक्षिता।

ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमं इति। सदसस्पतिमिति च तस्य काण्वो मेधातिथिर्ऋषिः स
दसस्पतिर्देवता अश्वं त्वा नाराशंसी वा गायत्री छंदः। होमे विनियोगः। सदसस्पतिमद्भुतं ४ सोमान्
मिति पंच ब्राह्मणस्पत्याः अस्य तुरीयया मिंद्रस्य सोमस्य पंचम्या दक्षिणस्यान्याः सादसस्पत्या नाराशंसी वा
त्येत्यनुक्रमण्यां॥ ॥ नक्षैराचार्यैः स्वस्ति वाच्य। ततो धाना होमं संपाद्य नक्षैर्नक्षविशेषैराचार्यैः स्वस्ति वा
चयेत्। स्वस्ति भवंतो ब्रुवंत्वित्यादिनाचार्यप्रसादयेत्तथा यथा स स्वस्तीति वदेत्॥ ॥ ॥ अष्टमः खंडः॥ ॥
अरण्ये समित्पाणिः संध्यामास्ते नित्यं वाग्यत उत्तरापराभिमुखोऽन्वष्टमदेशमा नक्षत्राणां दर्शना
त्। अरण्ये ग्रामाद्बहिरुदकसमीपे समित्पाणिः संयतपाणिर्नित्यं प्रत्यहं वाग्यतः वाग्यमयुक्तः उत्त १२५
रापराभिमुखः उत्तरादिक्कृतत्यं अभिमुखं यस्य सः एवंविधो ब्रह्मचारी भूत्वा अन्वष्टमदेशं अष्ट

मदेशमनु ऐशानीं दिशमनुलक्षीकृत्य आ नक्षत्राणां दर्शनात् नक्षत्रदर्शनं मर्यादीकृत्य संध्यां संधे
नवा संध्या तां एतन्नामकं कर्म आस्ते करोति। उपविष्ट एव। आसीनं न्यायं बाह्वृच्यमिति कल्पोक्तेः। अर
ण्य इति फलातिशयार्थः। सत्यव्रतः। गृहेष्वेकगुणा प्रोक्ता बहिस्तु द्विगुणा तथा। गवां गोष्ठे दशगुणा अ
ग्न्यगारे दशाधिका। समित्पाणिः कृतकरसंपुटः। यतः स एवाह। अथाचम्य कुशैर्युक्त आसने समुपस्थि
तः। करसंपुटकं कृत्वा संध्यां नित्यं समाचरेत्। नित्यमित्यनेनाकरणे दोषश्रवणात्। यमः। संध्याही
नोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत्कुरुते कर्म न तस्य फलमाप्नुयात्। उत्तरापरेत्यत्र। गृह्यादीशा
न दिग्भागे संध्याकर्म बहिर्न विदितिव्यासदर्शनात्। अयं कालः सायंसंध्यायाः। एवं प्रातरिति प्रातःसंध्या
या वक्ष्यमाणत्वात्। यतः सायमादिप्रातरपवर्गमिति श्रुतिदर्शनाच्च। संध्या स्मृत्युक्ता यथोक्ता॥ ॥ अ

तिक्रांतायां महाव्याहृतीः सावित्रीं स्वस्त्ययनानि च जपित्वा। अतिक्रांतायां संध्यायां समाप्तायां महाव्याहृ
तीर्भूर्भुवः स्वरित्यादिकाः प्रसिद्धाः सावित्री प्रसिद्धा स्वस्त्ययनानि आ नो भद्राः कया न इत्यादिकानि जपित्वा
गृहमागच्छेदरण्यादिति वाक्यशेषः। चकारादन्यान्यपि पौराणानि स्तोत्राणि जप्यानि। आ नो भद्रीयमा
युष्यं वैश्वदेवं जपन्मुनिरिति। तथा। कयेति वामदेव्येन कुर्यात्स्वस्त्ययनं निशि इत्यादीन्यपि विधानोक्ता
नि जप्यानि॥८॥ एवं प्रातः प्राङ्मुखस्तिष्ठन्नामंडलदर्शनात्। संध्यामास्त इत्यनुवर्तते। एवं पूर्वसूत्रो
क्तप्रकारेण प्रातरुषसि प्राङ्मुखः पूर्वाभिमुखस्तिष्ठन् आ मंडलदर्शनात् मंडलदर्शनं मर्यादीकृ
त्य संध्यामास्ते करोति। अयं जपकालः। व्यासः। पूर्वतः संध्यां सनक्षत्रां मध्यमां स्नानकर्मणि। सादित्यां ११६
पश्चिमां संध्यामुपासीत यथाविधि। तदुक्तं वा तत्र स्थितो जपेत्सदा कालमादित्याभिमुखो द्विजः। ॐका

रं पूर्वमुच्चार्य भूर्भुवः स्वस्तथैव च। गायत्रीं प्रणवश्चांते जपस्यैष विधिः स्मृत इति। तत्रैव। अस्तं तु सं
ध्यस्योदये प्रायश्चित्तं स्मर्यते। आदित्योऽस्तमियाद्यस्य संध्योपास्तिमकुर्वतः। स्नात्वा प्राणांस्त्रिरा
म्य गायत्र्यष्टशतं जपेत्॥९॥ ॥नवमः खंडः॥ ॥उदिते प्राध्ययनं। नित्यं वाग्यत इत्यनुवर्तते। उदिते
आदित्ये वाग्यमयुक्तः। प्राध्ययनं प्रकर्षेणाध्ययनं नित्यं प्रतिदिनं वेदस्य कार्यं। तच्चाध्ययनं व्याहृ
तिगायत्रीपूर्वकं कार्यं। ॐकारं व्याहृतीस्तिस्रः सावित्रीं च तदित्यृचं। मनसैतामनुद्रुत्य वेदादिं स
मुपक्रमेदित्यृग्विधाने॥१०॥ अहरहः सायंप्रातः। वक्ष्यमाणमग्निकार्यं अहरहः प्रतिदिनं माणवक
स्य सायंप्रातर्भवति। नित्याधिकारेऽप्यनुवृत्ते अहरहः पुनर्वचनं सायंप्रातरिति कालद्वयविवेच
नार्थं। न कालत्रयेपीत्येतदर्थं॥११॥ अग्निमुपसमाधाय परिसमुह्य पर्युक्ष्य दक्षिणं जान्वाच्य। लो

किकाग्निं प्रणयनधर्मेणोपसमाधाय स्थापयित्वा तस्याग्नेर्यथोपरिसमुह्य त्रिः पर्युक्ष्य दक्षिणं
जान्वाच्य निपात्य वक्ष्यमाणां समिद्धोमं माणवकः कुर्यात्। अग्निमुपसमाधायेत्युक्तत्वाङ्गसंस्कारं
कृते स्थले अग्निस्थापनं। चतुरस्रं गोमयेन स्थंडिलमुपलिप्येत्युक्तलक्षणः संस्कारः। पाणिना सोदके
न त्रिः प्रमार्ष्टि तत्समूहनमित्याचक्षते इत्युक्तधर्मेण परिसमूहनं। त्रिः पर्युक्षणं सेचनं च त्रिः। दक्षिणं
जान्वाच्येति पुनर्वचनं केवलसमिद्धोमादावपि एतद्भवतीति ज्ञापनार्थं। अग्नये समिधमाहार्षं बृहते
जातवेदसे। स मे श्रद्धां च मेधां च जातवेदाः प्रयच्छतु स्वाहा। एधोस्येधिषीमहि समिदसि तेजोसि ते ११७
जो मयि धेहि स्वाहा। समिद्धो मां समर्द्धय प्रजया च धनेन च स्वाहा। एषा ते अग्ने समित्तया वर्द्धस्व चा
प्यायस्व। वर्द्धिषीमहि च वयमा च प्यासिषीमहि स्वाहेति। समिधमिति मंत्रलिंगात्समिधां होमः।

मंत्रपृथक्त्वात्कर्मपृथक्त्वमिति न्यायात्। अग्नये समिधमित्यादिभिश्चतुर्भिः स्वाहाकारान्तैर्मंत्रै
र्माणवकश्चतस्रः समिधो जुहुयात्॥८॥ अथ पर्युक्षण। अथ समिद्धोमानंतरं अग्निं पर्युक्ष्य त्रिः। त्रि
स्त्रिरेकैकं पर्युक्ष्य कृत्वा वेति सूत्रात्॥८॥ अग्नेः श्रद्धां च मेधां चाविनिपातं श्रुतं च मे। ईडितो जातवेदा
अयं शुनं नः संप्रयच्छत्वित्यग्निमुपतिष्ठते तिष्ठन्। अग्नेः श्रद्धामिति मंत्रेण माणवकोऽग्निमुपतिष्ठ
ते तिष्ठन् उपस्थानं कुर्यात्। तिष्ठन्नादित्यमुपतिष्ठत इति सूत्रादुपस्थानं तिष्ठता कार्यं। सोपर्यत्र ४४
तत्राप्यविस्तं वृद्धसंप्रदायानुष्ठितं त्र्यायुषं पंचभिर्मंत्रैः प्रतिमंत्रं ललाटे हृदये दक्षिणस्कंधे वामे च ततः
पृष्ठे च पंचसु भस्मना त्रिपुंड्रं करोति। माणवकोऽग्न्युपस्थानं कृत्वा भस्मना सोदकेन रक्षया त्रिपुंड्रं
त्र्यायुषं जमदग्नेरिति पंचभिर्मंत्रैः प्रतिमंत्रं। मंत्रं मंत्रं प्रति इति प्रतिमंत्रं पंचसु स्थलेषु ललाटादिषु ८१

करोति।ललाटहृदयदक्षिणस्कंधवामस्कंधपृष्ठादिषुत्रिपुंड्रंकरोति।कीदृशंत्रिपुंड्रं।सोमपर्णैर्व
तेपरिशिष्टेनाषितं।परिभाषितंपुनःकीदृशं।वृद्धसंप्रदायैःपूर्वैश्चिषिभिरनुष्ठितंकृतं।उक्तंच
वीरभद्रपद्धतौश्रुतिस्थ।त्र्यायुषाणिकुरुतेनभस्मनाललाटेदक्षिणेंसेतथासव्येहृत्कंठे।त्र्यायुषमि
तिप्रतिमंत्रं।त्र्यायुषाणित्रिपुंड्राणि।पद्मपुराणेशंभुवचनंरामंप्रति।पापंनाशयतेकृत्स्नमपिज
न्मशतार्जितं।भस्मनासर्वपापानांस्मरणाच्चमहेद्विजः।भस्मेतिचसमाख्यातंतस्यधारणमुत्तमं॥
यथाविधिललाटेवैवह्निवीर्यप्रधारणात्।नाशयेल्लिखितांयामींपटस्थामिवहव्यभुक्।कंठेचधार
णात्कंठभोगादिकृतपातकं।बाहोर्बाहुकृतंपापंवक्षःस्थमनसाकृतं।नाभ्यांशिश्नकृतंपापंपृष्ठेगु १८
दकृतंतथा।पार्श्वयोर्धारणाद्वामपरस्त्र्यालिंगनादिजं।तद्भस्मधारणान्नश्यंस्तंसर्वत्रैवत्रिपुंड्रकं।

ब्रह्मविष्णुमहेशानांत्र्यग्नीनांचधारणं।गुणलोकत्रयाणांचधारणंतेनवैकृतमिति।कालाग्निरु
द्रोपनिषदि।मानस्तोकइतिसमुद्धृत्यत्र्यम्बकोदेवीरितित्र्यायुषमितिचशिरोललाटवक्षस्कंधेष्विति।त्रिभि
स्त्र्यायुषैस्त्र्यंबकैस्तिस्रोरेखाःप्रकुर्वीतेति।त्रिपुंड्रंब्राह्मणोविद्वान्मनसापिनलंघयेत्।श्रुत्याविधी
यतेयस्मात्तत्त्यागीपतितोभवेत्।मध्यमानामिकांगुष्ठैर्ललाटेभस्मनाकृतं।तत्त्रिपुंड्रंभवेच्छस्तंमहा
पातकनाशनं।इतिलौगाक्षिसूत्रे।बृहन्नारदीये।त्रिपुंड्रधारिणोयेचतेवैभागवतोत्तमाः।रुद्राक्षा
लंकृतायेचविष्णुनामाभिमंत्रिताइति॥ठ॥सएतेषांवेदानामेकंद्वौत्रीन्सर्वान्वाधीतेयएवंकृत्वाग्नि
मुपतिष्ठते।यःपुरुषःकृत्वाअन्यमपिहोमंकृत्वाअग्निंउपतिष्ठते।उपस्थानंकरोति।एवमुक्तप्रका
रेणत्रिपुंड्रंकरोतिसपुरुषोवेदानांचतुर्णांमध्येएकंद्वौत्रीन्सर्वान्वाअधीते।अयमर्थः।एकत्र

अ त्रिपुंड्रधारणादेकवेदाध्ययनमधीते।एवंद्वयोर्द्वौत्रीन्धीते।त्रिषुत्रीन्वाचतुर्षुचतुरः।पंचसुचतुर्णाम
प्यध्ययनमधीते।तस्माद्यत्रहोमस्तत्रावश्यकंत्रिपुंड्रधारणं।ततस्तद्वयोरितिजपः।वीरनंदबालबो
धिन्यामुक्तत्वात्॥१०॥ ॥दशमःखंडः॥ ॥अथव्रतादेशनं।अथानंतरंव्रतादेशनंशुक्रियशाखारत्रा
तिकोपनिषद्रूपाणांव्रतानामादेशनंकथनंमाणवकस्याचार्येणकर्त्तव्यं।तद्वक्ष्यतइतिशेषः।
।ॐ।।तस्योपनयनेनकल्पोव्याख्यातः।तस्यव्रतादेशस्यउपनयनेनकल्पःइतिकर्त्तव्यताकलापो
व्याख्यातःसइहातिदिश्यते।असंयुज्यविधानत्वात्त्रयाणांवर्णानांयद्यद्यस्यविहितंचर्मसूत्रा
दितत्तस्यव्रतेष्वाश्यं।तथाचस्मृतिः।यद्यस्यविहितंचर्मयत्सूत्रंयाचमेखला।योदंडोयच्चवसनं ११९
तत्तदस्यव्रतेष्वपीति॥ॐ।नसावित्रीमन्वाहाएषुव्रतेषुआचार्योमाणवकायसावित्रीनान्वाहाउ

पनयनविधेरंतर्गतसावित्रीप्रदानस्यप्राप्तत्वान्निषिध्यते॥ॐ॥दंडप्रदानांतमित्येके।एकेआचार्या
एतद्व्रतादेशनंकर्मदंडप्रदानांतंभवतीत्येवंवदंति।तेषांमतेवरोदक्षिणेत्यादिनभवति।दंडप्रदाना
नंतरमुक्तत्वात्॥ॐ॥उदगयनेशुक्लपक्षे।तद्व्रतादेशनंउदगयनेउत्तरायणेशुक्लपक्षेविधेयं।
नान्यदाकाले।पूर्णेपिकालेकालप्रतीक्षाकर्त्तव्या॥ॐ॥अहोरात्रंब्रह्मचर्यमुपेत्याचार्योमांसाशी
ब्रह्मचारी।आचार्यःअहोरात्रंब्रह्मचर्यंमैथुननिवृत्तिमुपेत्यसंपाद्यअमांसाशीमांसाशनरहितः
पूर्वदिनेकर्मदिनेचाहोरात्रंब्रह्मचारीअमांसाशीचभवेत्ततस्तद्व्रतादेशनंकरोति॥ॐ॥चतुर्दशीं
परिहाप्याष्टमींवा।चतुर्दशीमष्टमींपरिहाप्यत्यक्त्वाव्रतादेशनंकार्यं।वकाराज्जलयज्ञादिकंचत्यक्त्वा
विधेयं।एतदपिशुक्लपक्षएव॥ॐ॥आद्योत्तमेचैके।परिहाप्येत्यनुवर्त्तते।आद्याचउत्तमाचआद्यो
त्रयोदश्यादिचत्वारिसप्तम्यादित्रयस्तथा।चतुर्थ्येकादशीनीषोक्ता।अष्टावेतागजाननाः।२

आश्विने दशमी शुक्ला द्वितीया ज्येष्ठमासके। चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृता इति ॥२

त्तमे। तिथौ आद्या प्रतिपत्। उत्तमा पौर्णमासीति परिहाप्य व्रतादेशनं कार्यं इत्येके मन्यंते। चकारा
त्सोपपदा सक्ता ॥ ८ ॥ यां वान्यां मन्प्रशस्तां मन्येत तस्यां शुक्रिये ब्रह्मचर्यमादिशेत्। आचार्यः यां वा
अन्यां चतुर्दश्यादिभ्यः अन्यां द्वितीयादिकां तिथिं न प्रशस्तां मन्येत नानि नक्षत्राणि तैः प्रशस्ता
पुष्यहस्तादिनि तस्यां तिथौ शुक्रिये अध्येतव्ये ब्रह्मचर्यं त्रिरात्रादिरूपं आदिशेत्। वाशब्दो वि
कल्पार्थः अथवा एतासाम ष्टम्यादीनां मध्ये यां तिथिं नक्षत्रादिना प्रशस्तां मन्येताचार्य इति वा।
तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणमिति विशेषोक्तेः। शुक्रियशब्दोत्राध्ययनवाचीत त्सं
बंधेनेदमपि व्रतं शुक्रियमुच्यते। त्रिशुक्रियो ब्रह्मायस्योनयतः श्रोत्रियास्त्रिपुरुषमिति स्मृ १२०
ते। श्रुतिश्च। स शुक्रस्य तन्वो वेद तिस्र इति ॥ ८ ॥ त्रिरात्रं ब्रह्मचर्यं चरेद्द्वादशरात्रं संवत्सरं वाया।

वद्वा गुरुर्मन्येत। अत्र शुक्रियव्रते ब्रह्मचर्यं ब्रह्मचारित्वं त्रिरात्रं द्वादशरात्रं संवत्सरं वा यावत्
गुरुराचार्यो मन्येत इच्छेत् तावदेव धारयेत्। त्रिरात्रादि विकल्प आचार्येच्छया। नमाणवकेच्छया।
८। शाक्वरं तु संवत्सरं। उशब्दो नियमार्थः। शुक्रियव्रतादनंतरं शाक्वराख्यं व्रतं नियमेन संवत्स
रं चरेत्। न त्रिरात्र द्वादशरात्राद्याचार्येच्छया पि विकल्प्यः ॥ ८ ॥ व्रातिकमौपनिषदं च। शाक्वरानंत
रं व्रातिकं महाव्रतनामकं व्रतं नियमेन संवत्सरं चरेत्। तथा अपनिषदं नाम व्रतं व्रातिकादनंतरं
सांवत्सरिकं चरेत्। चकारोत्र संवत्सरशब्दानुकर्षणार्थः। केचिदत्र यौगिकी व्रताख्येत्याहुः। सावित्र्या
इदं सावित्रं। शुक्रियस्येदं शुक्रियं। व्रतस्येदं व्रातिकं। उपनिषदामिदमौपनिषदं। पूर्वोक्ते काले चरिते
ब्रह्मचर्ये शौयो बार्हस्पत्यां तेवेदे नूक्ते रहस्यं श्रावयिष्यन्कालनियमं चादेशेन प्रतीयेत। काले त्रिरात्र

संवत्सरादिके पूर्णे सति शुक्रियशाक्वरादीनां चतुर्णां व्रतानां कालः पूर्णे काल इति विशेषणं च
तुर्णां व्रतानां।शंयोर्बार्हस्पत्यांतैद्वितीयतच्छंयोरेत्यंतेअथिमित्यारभ्यविदेअनुउक्तेसतिशुक्रि
यव्रतस्यकालः।तस्माच्छंयोर्बार्हस्पत्यांतइतिविशेषणंशुक्रियस्यैव।रहस्यंमहानाम्नीमहाव्रतोप
निषद्रूपंश्रावयिष्यन्नशाक्वरव्रातिकौपनिषदानांयथाक्रमंकालः।तस्माद्रहस्यंश्रावयिष्यन्निति
विशेषणंशाक्वरव्रातिकौपनिषदानां।आदेशेनवक्ष्यमाणेनयथायथंकालंकर्मणोविमोकादि
कंनियमंचउद्दीक्षणिकायांवाग्यमादिकंप्रतीयेतजानीयात्तंब्रह्मचारिणः॥२१॥ ॥एकादशःखंडः॥
कृतप्रातराशस्यापराह्णेपराजितायांदिशि।कृतःप्रातःआशःअशनंयेनसः।तस्यब्रह्मचारिणःअ १२२
पराह्णेमध्याह्नादनंतरं।अपराजितादिक्कृऐशानीतस्यांएतत्कर्मकर्तव्यमितिशेषः।कृतप्रातरा

श्री

शस्येत्येतद्ब्रुवन्ब्रह्मचारिणःसायंप्रातर्भोजनंदर्शयतिभिक्षापूर्वकं।अनुक्तवतस्तस्यनसंस्कारः।
तथावक्ष्यतिच।ब्रह्मचारीचतेत्रयः।अअंतएवसिध्यंतीति॥७॥हुत्वाचार्योथैनंयास्वेवदेवतासुपरी
त्तोनवतितास्वेवैनंपृच्छत्यग्निविंद्रआदित्येविश्वेषुचदेवेषुचरितंतेब्रह्मचर्यमिति।आचार्योपराह्णे
स्थापितेग्नौआज्यभागांतंकृत्वा।हुत्वापुरस्तात्संज्ञमहाव्याहृतिचतुष्टयं।अथानंतरंअयंब्रह्मचारी
यास्वेवदेवतासुअग्न्यादिकासुपूर्वंपरीत्तोदत्तोनवतितास्वेवदेवतासुएनंमाणवकंपृच्छति।पूर्वमु
पनयनसमयेअहंत्वोनावपशुएतंतइत्यादिनाअग्न्यादिकासुदत्तस्तस्मात्तास्वेवैनंपृच्छति।अग्नावि
न्द्रइत्यारभ्यतेब्रह्मचर्यमित्यंतेनमंत्रेणपृच्छत्याचार्यः।एवमन्येष्वपिशाक्वरादिषुब्रह्मचर्यपालनार्थं।
परिपूर्वोदिदातिस्तन्निष्ठाप्रत्ययांतोनिक्षेपवर्त्ततेपूर्वमसौतासुनिक्षेपमिवापितस्तस्मात्॥८॥च

रितंमोरइति प्रत्युक्तोचरितंमोरइति आचार्येण दृष्टे माणवकेन तथैव प्रत्युक्ते प्रत्युत्तरिते॥ ४॥ प
श्चादग्नेः पुरस्तादाचार्यस्य प्राङ्मुखे स्थिते हतेन वाससाचार्यः प्रदक्षिणं मुखं त्रिः परिवेष्टि। अग्नेः पश्चा
दाचार्यस्य पुरस्तात्प्राङ्मुखे स्थिते हतेन नूतनवाससा वस्त्रेण ब्रह्मचारिणो मुखं साक्षि त्रिः परिवे
ष्टयेत् ततः॥ ५॥ उपरिष्टाद्दशाः कृत्वा यथा न संस्रंस्येत। वस्त्रस्य दशाः प्रांतभागा उपरिष्टात्कृत्वा तथा
बध्नीयाद्यथा न संस्रंस्येत अधस्तान्न पतति तथा विधेयं॥ ६॥ त्रिरात्रं समिदाधानं भिक्षाचरणमधः
शय्यां गुरुशुश्रूषां वा कुर्वन्वाग्यतो प्रमत्तोरण्ये देवकुले अग्निहोत्रे वोपवसस्वेति। आदिशेन प्रतीयेत
तुक्तं प्राकृतदाह। आचार्यो ब्रह्मचारिणमादिशति त्रिरात्रं त्रिरात्रपर्यंतं। अरण्ये ग्रामाद्बहिः देवकुले १२२
देवतायतने अग्निहोत्रे अग्न्यगारे वा उपवसस्व संवासं कुरु इति आदिशति। किं कुर्वन् वाग्यतो वा

ग्यमयुक्तः। अप्रमत्तः प्रमादरहितः॥ समिदाधानं अग्नये समिधमित्यादिकं भिक्षाचरणं यथोक्तं अधः
शय्यां अधःशायित्वं गुरुशुश्रूषां गुरुसेवां च अकुर्वन्। अहरहः समि [illegible] दाधानं भिक्षाचरणमधःश
य्या गुरुशुश्रूषेति ब्रह्मचारिणो नित्यानीति प्राप्तस्य प्रतिषेध उच्यते। अनेन वचनेन। चकारादेक
त्ये रात्रमपि। अहोरात्रं ब्रह्मचर्यमुपैत्युक्त्वा त्र। ततो महाव्याहृतिचतुष्टयं हुत्वा वैकल्पिकं स्विष्टकृ
तं च हुत्वा सप्तकादिकर्म समापनीयं। एतस्य कर्मणः उद्दीक्षणिकेति संज्ञा लोके। ततः उपनयन
वदग्निं संस्थाप्योर्ध्वाङ्गुलिं हृदये निधायेत्यंतं कृत्वा मम व्रत इत्यारभ्य मह्यमित्यंतं जपित्वा सांवत्सरिक
स्य त्रिरात्रस्य द्वादशरात्रस्य चरूस्य वा शुक्रियस्य ब्रह्मचर्यस्य देवदत्त इति माणवकं संबोध्य
ऐंद्रीमावृतमित्यादि उपनयनवत्कर्मसमाप्तिः। एतच्छुक्रियपक्षचतुष्टयं आचार्यस्येच्छया विकल्पः॥

इतः शाक्करकं कर्म॥८॥ अत्र हौकेतानेव नियमांस्तिष्ठतो रात्र्यामेवोपदिशंति शाखोवथारण्ये। अ
त्रारण्ये देवकुलेग्निहोत्रे वा तिष्ठतो ब्रह्मचारिणस्तानेव नियमान्पूर्वोक्तान्समिदाधानादीन्रात्र्यामेकस्या
मेवोपदिशंतीत्येके आचार्याः॥ न त्रिरात्रे। एकरइतियहरणाद्विकल्पः॥९॥ आचार्यो मांसाशी ब्रह्मचारी।
आचार्यो मांसाशान रहितो ब्रह्मचर्ययुक्तश्च त्रिरात्रमेकरात्रं वा स्यात्॥१०॥ त्रिरात्रे निवृत्ते रात्र्यां वा
ग्रामान्निष्क्रमन्नेतानीक्षेतानध्यायान्। त्रिरात्रे निवृत्ते अतीते रात्र्यां वा एकस्यां निवृत्तायां ग्रामात्।
निष्क्रमणं कुर्वन् एतान्वक्ष्यमाणान् अनध्यायान् अनध्यायरूपान्नेक्षेत नावलोकयेत्॥११॥ पि
शितामं चंडालं सूतिकां रजस्वलां तेदनिमयहस्तकांछाश्यानं सर्वाणि चशावरूपाणि यान्यास्येन प्र १२३
विशेयुः स्वस्यवासान्निरसन्। नेक्षेतेत्यनुवर्तते। स्वस्यवासात् निवासस्थात् निर्गच्छन्नेतानि नेक्षेत। पि

शितामं आममांसं। चंडालोंत्यजातिः। सूतिकां सद्यःप्रसूतामंतर्दशाहात्। रजस्वलां प्राक्त्रिरात्रात्।
तेदैनिंलोहितं। अपहस्तच्छिन्नहस्तः। अपहस्तः छिन्नकर्णादीनामुपलक्षणार्थः। बहुवचननिर्देशाद
धाद्ययोपि नेक्षितव्याः। श्मशानं मनुष्यदाहस्थानं। सर्वाणि शवरूपाणि च नेक्षेत। लोके सिंहसर्पादीनि
शवरूपाण्युच्यंते। तेषां सर्पादीनां मध्ये यान्यास्येन मुखेन प्रविशेयुः बिलं तान्यनध्यायरूपाणि
नेक्षेत। अन्ये तु शवबध्यां मृतमनुष्यं वदंति तद्दाहात्तद्रूपाणि श्वसृगालादीनि मृतसमानानि शेयानि। ते
षां दर्शने चानध्यायः। यान्यास्येन प्रविशेयुरित्युक्तत्वात्। सिंहव्याघ्रादिदर्शने चानध्यायः। नेतुमुखे
दी छत्वा बिलं प्रविशंति। प्रागुदीच्यां दिशमुपनिष्क्रम्यस्थंवैदेशे प्राङ्मुख आचार्य उपविशति। स्वगृहादा
चार्यः प्रागुदीचीं दिशं ऐशानीं दिशं उपनिष्क्रम्य गत्वा लोकसंकीर्णदेशं परित्यज्य ऐशानीं दिशं गत्वा उ

वोद्देशे संमार्जनादिभिः शोधिते प्रदेशे आचार्यः प्राङ्मुखः पूर्वाभिमुख उपविशति॥ क॥ उदित आदि
त्येऽनुवाचनधर्मेण वाग्यतायोष्णीषिणे ब्रूयात्। उदिते उदयं प्राप्ते आदित्ये सूर्ये अनुवाचनधर्मेण वाग्य
ताय वाग्यमयुक्ताय उष्णीषिणे उष्णीषसहिताय अन्वाह महानाम्नीः आचार्यो माणवकाय। अनुवा
चनधर्मेणेत्युक्तत्वात् प्राङ्मुख आचार्यः प्रत्यङ्मुख इतर इत्येवमादिकं भवति॥ क॥ महानाम्नीष्वेवैष नि
यमः। एषोऽनुवाचनधर्मलक्षणो उष्णीषबंधनलक्षणश्च नियमो महानाम्नीष्वेव। न महाव्रतादिषु॥ क॥
अथोत्तरेषु प्रकरणेषु स्वाध्यायमेव कुर्वत आचार्यस्येतरः शृणोति। अथानंतरं उत्तरेषु प्रकरणेषु
व्रात्तिकौपनिषदादिषु आचार्यस्य स्वाध्यायमध्ययनं कुर्वत एव इतरो ब्रह्मचारी शृणोति। न ब्रह्मचा १२४
रिणा पठनीयं। अपि तु महाव्रतरहस्ययोः श्रवणं विधेयं। शाक्करादीनां त्रयाणां व्रतानां मंडलप्रवेश।

दिको विशेषविधिः षष्ठेऽध्याये वक्ष्यामः॥ क॥ उष्णीषं भाजनं दक्षिणां गां ददाति। माणवक आचार्या
य उष्णीषं शिरोवेष्टनवस्त्रं भाजनं ताम्रमयं गां गोदानं दक्षिणां दक्षिणात्वेन कर्मसमृध्यर्थं ददाति।
दक्षिणाद्दक्षतेः समर्द्धयतिकर्मण इति यास्कः॥ क॥ त्वं तमित्युत्त्रावीति च प्रणवेन वा सर्वं वा आचार्यस्तां दि३
दक्षिणां त्वं तमिति मंत्रेण उञ्चादिवीति वा मंत्रेण प्रतिगृह्णाति। ब्रह्मचारिणः कांस्यस्य निषेधात्ता
म्रमयं। व्यासः। ब्रह्मचारी यतिश्चैव विधवा कांस्यभाजने। तांबूलचर्वणं चैव तुल्यं गोमांसभक्षणं। प्रण
वेन वा सर्वे उष्णीषादिकं प्रतिगृह्णाति। इतिकरणश्च मंत्रांतरस्युक्तत्वात् त्रयोपि मंत्राः प्रतिग्रहे। वाश
ब्दः प्रत्येकमभिसंबध्यते। त्वं तमिति मेधातिथिऋषिः ब्रह्मणस्पतिसोमेंद्रदक्षिणा देवताः गायत्री छं
दः। त्वं तं ब्रह्मणस्पते इत्ऋ उञ्चादिवीति दिव्योदक्षिणा वा ऋषिका ऋषी। दक्षिणा देवता। त्रिष्टुप्छंदः। उ

स्वादिविंदक्षिणावंतोअस्तु॥ तत्रप्रणवस्यब्रह्माऋषिःदैवीगायत्रीछंदःपरमेष्ठीदेवता।प्रणवःप्रसि
द्धः ॐमितिवासर्वमितिसूत्रोक्तेः॥७॥ अत्रहैकेवैश्वदेवंचरुंकुर्वतेसर्वेषुप्रकरणेषु।अत्रसर्वेषुप्रक
रणेषुआकरादिषुसमाप्तेषुवैश्वदेवंविश्वेदेवादेवताकंचरुंकुर्वतेएकस्युक्तत्वाद्विकल्पः॥८॥ यथा
पपरीतमितिमांडूकेयः।मांडूकेयआचार्यइतिमन्यते।यथापूर्वंपरीतःयासुदेवतासुमाणवकोनिक्षि
प्तोअग्नएतंतत्त्वादिभ्यस्ताभ्यएवचरुंकुर्यात्।अयमर्थः॥पूर्वंअग्नएतंतेइतिमंत्रेणाग्न्यादिदेवतासु
त्य निक्षिप्तःतस्मात्।अग्नीद्वादितिविश्वेभ्योदेवेभ्यश्चरुंनिर्वपेदित्यर्थः॥मांडूकेयग्रहणंपूजार्थं॥९॥ ॥
द्वादशःखंडः॥ ॥अथातोदंडनियमाः॥ अथव्रतकथनानंतरमुपनयनादिष्वपनिषदाद्यंतेषुकर्म १२५
सुदंडप्रदानमावश्यकंअतःकारणाद्दंडनियमाउच्यंतइतिवाक्यशेषः॥दंडप्रदानांतमिदंकृत्स्तु

कृत्वात्॥१॥ नांतरागमनंकुर्यादात्मनोदंडस्यच।आत्मनोदंडस्यचांतरामध्येगमनंमार्गावकाशंक
स्यापिनकुर्यात्नदद्यात्॥२॥ अथचेद्दंडमेखलोपवीतानामन्यतमच्छिद्येतवातस्यतत्रा
यश्चित्तंयदुद्वाहेरथस्य।अथचेत्संभावनायां।यदिचेत्दंडमेखलोपवीतानांमध्येअन्यतमत्एक
तरत्विशीर्येतविशीर्णंभवतिछिद्येतछिन्नंवाभवतितत्रदातस्यदंडादेःउद्वाहेविवाहकरणेर
थस्यांगविशरणेछेदनेवायदुक्तंप्रायश्चित्तंतदिहापिभवतियदिसंधानयोग्यंभवतितदाअभिव्य
यस्वेतिपरिदध्यात्दंडंत्वंचिदितियंथिंकुर्यात्स्वस्तिनइतिजपः।यथादंडप्रतिकरणंस्वस्तिनो
मिमीतामितिपंचर्चेनजपश्च।मौंज्युपवीतयोश्छिन्नयोःशीर्णयोश्चअभिव्ययस्वेतिसंधायत्वंचि
द्विमित्यनेनग्रंथिकरणंस्वस्तिनोमिमीतामितिजपश्च।स्वस्तिनोमिमीतामितिदंडंप्रयच्छति।सं

विदस्यमितिग्रंथिमित्युक्तत्वात्स्वस्तिनोमिमीतामितिपंचर्चेनपतिरितिपूर्वमुक्तत्वात्॥७॥मेखला
वेदसंधेयानवत्यन्यांकृत्वानुमंत्रयते।वेत्संभावनायां।विद्यदिमेखलात्रसंधेयासंधानयोग्यानभवति
तदान्यांमेखलांकृत्वावक्ष्यमाणमंत्रेणानुमंत्रयते।अनामिकाग्रेणस्पर्शंकुर्यात्।कर्मप्रदीपे।
स्पृष्ट्वानामिकाग्रेणकुविदालोकयन्नपि।अनुमंत्रणीयंसर्वत्रसदैवमनुमंत्रयेत्॥७॥मेध्यामे
ध्याविज्ञागर्ह्रेदेविगोप्त्रेसहस्वति।मेखलेस्कन्नमच्छिन्नंसंतनुष्वव्रतंमम।त्वमग्नेव्रतभृच्छुचिरग्नेदेवां
इहावह।उपयज्ञंहविश्चनः।व्रतानिबिभ्रद्व्रतपाअदाभ्योभवानोदूतोअजरःसुवीरः।दधद्रत्नानि
सुमृडीकोअग्नेगोपायनोजीवसेजातवेदइति।मेध्यामेध्यइत्यादिभिस्त्रिभिर्मंत्रैर्मेखलामनुमं १२६
त्रयतेहस्तेनस्पृष्ट्वावदक्षिणेन।अथतंआचार्योभिक्षांवक्तंवाचयति।यत्रोपदिश्यतेकर्मकर्तुरंगं

नतूच्यते।दक्षिणस्तत्रविज्ञेयःकर्मणांपारगःकरइतिकर्मप्रदीपे॥७॥उपवीतंचदंडेबध्नाति।च
यद्यथोयद्युपवीतंछिन्नंभवतितदादंडेबध्नाति।नूतनंपरिधाययावद्व्रतविसर्गात्॥७॥तदप्येतत्।
दंडेबध्नातीत्यनुवर्तते।तत्पूर्वबद्धंउपवीतंएतत्कृष्णाजिनंदंडेबध्नातिछिन्नं।नूतनमन्यंगृहीत्वा।अपि न२
त्वाद्वान्मेखलांचछिन्नांनूतनामन्यांगृहीत्वादंडेबध्नाति॥७॥यज्ञोपवीतंदंडंचमेखलामजिनंतथा।
जुहुयादप्सुव्रतेपूर्णेवारुण्यर्चारसेनवा।व्रतेपूर्णेसमाप्तेयज्ञोपवीतंदंडंमेखलांअजिनंअप्सु
उदकेषुवारुण्यावरुणदैवतयाऋचाप्राथम्यात्नहितेरूवमित्यनयाजुहुयात्निक्षिपेत्॥७॥का
त्रीखंडे।जीर्णंकमंडलुंदंडमुपवीताजिनेअपि।अश्वेतानिविनिक्षिप्यगृह्णीतान्यत्समंत्रवत्।
रसेनवाविदानांरसभूतेनप्रणवेनवाजुहुयात्।आजीगर्तिःशुनःशेपःपशुर्षिः।वरुणोदेवता।त्रि

१२

ष्टुच्छंदः । नहितेक्षत्रं न सहो न मन्युं इति ॥ १२ ॥ ॥ त्रयोदशः खंडः ॥ ॥ अथ वैश्वदेवः । अथ शब्दोऽधिकारा
र्थः । अथेत्यनेन गृहस्थोऽधिक्रियते । देवताः पुरुषं गृह्या इति वक्ष्यमाणत्वात् । वैश्वदेवाधिकारी
स्यात् गृहस्थः सहनीयर्ययेतिकारिका । ब्रह्मचारिप्रकरणे अस्माभिर्वचनं कार्यादिना प्रोषित
स्याचार्यस्य पितुर्वाऽग्न्यविद्यत्वाद्ब्रह्मचारी तदीयं वैश्वदेवं कथं कुर्यादित्यत आह । तस्मादयं वैश्व
देवः पाकयज्ञान्तर्गतः । वैश्वदेवविहीनस्य निंदापि स्मर्यते । वैश्वदेवविहीना ये आतिथ्येन विवर्जिताः ।
सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः ॥ धर्माः । इहलोके त्वहीनां स्युः काकयोनिं व्रजंति ते । इति का
वीखंडे ॥ ८ ॥ व्याख्यातो होमकल्पः । व्याख्यात उक्तो यो होमकल्पः स इह वैश्वदेवे ज्ञेयः । अग्निका १२१
र्यकरणे यो होमकल्पः परिसमुह्य पर्युक्ष्य दक्षिणं जान्वाच्येत्यादिकः स निरुष्टत्वादिह ज्ञेयः । व्या

पृष्ठे हृणादिरहितस्य सर्वः ४
पाणिरेव तदा सिंस्पृशति कात्यायनः ॥ २

ख्यातः प्रतिश्रुते होमकल्प इत्युक्ते प्रतिश्रुतं विधानं प्राप्नोति तन्निवृत्त्यर्थं व्याख्यातो होमकल्प इ
त्युक्तं । होमे पात्राण्युक्तत्वात् पाणिना होमः । दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः इत्युक्तत्वात्का
त्यायनेन ॥ ८ ॥ वैश्वदेवस्य सिद्धस्य सायंप्रातर्गृह्येऽग्नौ जुहुयात् । प्रातः शब्दोऽत्राहर्वाची । प्रातर्दिवसे
सायं रात्रौ होमानंतरं गृह्येऽग्नावावसथ्ये सिद्धस्य सिद्धान्नस्य पक्वस्य । कीदृशस्य सिद्धस्य वैश्वदेव
स्य विश्वेषां सर्वेषां देवानामर्थे उपक्लृप्तस्य । विश्वे देवाः सर्वे देवा इति यास्कः । अयमर्थः । देवार्थे प
क्वमन्नं वैश्वदेवार्थे योज्यं । न पित्र्यर्थे । पित्र्यर्थे पक्वं पित्र्यर्थमेव योज्यं न वैश्वदेवार्थे निषेधश्रवणात् ।
पित्र्यर्थे निर्वपित्वाकं वैश्वदेवार्थमेव वचिति लौगाक्षिः । पैठीनसिः । पितृपाकात्समुद्धृत्य वैश्वदेवं तु साग्नि
कः । आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति ॥ मनुः । सायमन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत् । वैश्व

देवं द्विनामेतत्सायंप्रातर्विधीयते। सच वैश्वदेवः साग्निना पितृकर्मणः पूर्वं कर्तव्यः। श्राद्धात्पूर्वं तु
कुर्वीत वैश्वदेवं च साग्निकः। एकादशाहिकं भुक्त्वा तत्रान्ते विधीयत इति शालंकायनः। दीपि
कायां। भिन्नाग्नेर्नतु वैश्वदेवं मनुश्राद्धवरे साग्निकः। पश्चाद्भूतमखादीति। वैश्वदेवहोमः केवलो
नवति। बलिदानं पितृकर्मणो ते नवति। मनुः। उद्धेषणं तु तन्निष्ठेद्यावद्विप्रा विसर्जिताः। ततोऽन्वष्ट
लिं कुर्याद्वंतकारादिकं तथेति। कर्मप्रदीपे। सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च। अनश्नतापि स
ततमन्यथा किल्बिषी भवेत्। तथा सर्वेषु पाकयज्ञेषु पित्र्यरहितेषु वैश्वदेवः परः। न पूर्वं अनंतात्र
मपद्वतौ। सर्वेषु पाकयज्ञेषु वैश्वदेवः परो भवेत्। अन्यत्र पितृयज्ञात्तु तत्रान्ते विधीयते। साग्निनो
धि० १ प्रवासे पितृष्टोदि विधानेन कार्यः। मनुः। प्रवसेदाहिताग्निश्चेत्कदाचित्कालपर्यये। यस्मिन्

ग्नो भवेत्याको वैश्वदेवस्तु तत्र वै। प्रवासे साग्निकस्यापि सति पाके त्वयं विधिरिति कारिका।
सप्तेः समारोपे कृते लौकिकाग्नौ पृष्टोदि विधानेन वैश्वदेवः। यज्ञपार्श्वे। एकहोमे कृते वह्नौ स
मारूढे कथं भवन। पंचयज्ञविधानं च लौकिकाग्नौ विधीयते। पचनं यद्धि कुर्वीत प्रवासे वाग्निमा
न्द्विजः। समारोपे कृते वाग्नौ वैश्वदेवं तु लौकिके। स्मृतिसमुच्चये। पत्नी वा यजमानो वा प्रवासिग
तौ स्त्रयोः। समारोपे कृते कुर्याद्वैश्वदेवं पराग्निना। सच वैश्वदेवो हविर्द्रव्यैः कार्यः। कारिका। तिल
श्रां० मुद्गमसूरांस्तु मुक्त्वा त्रीब्यं न यज्ञियं। सस्यं प्रियंगुश्यामाकागोधूमाएव शौककेः। व्यासः। हविष्ये
षु यवा मुख्यास्तदनु व्रीहयः स्मृताः। माषकोद्रवगौरादीन्सर्वालाभेपि वर्जयेत्। काशीखंडे। निः
ष्पावं कोद्रवान्माषान्कलायांश्चणकांस्तथा। तैलपाकं चपकान्नं सर्वं लवणं वर्जयेत्। श्राद्ध

तूएरि१ मटर१ बरटी१

कोश्चमसूरांश्चवर्त्तुलान्वैरटांस्तथा॥उक्तशेषंपर्युषितंवैश्वदेवेविवर्जयेत्।तच्चघृताक्तंहोमयेत्।
२। श्लोककात्यायनः॥उद्धृत्यहविषासिच्यद्विष्णुघृतादिना।स्वशाखाविधिनाहुत्वातच्छेषेणबलिंह
रेत्।चतुर्विंशतिमतेव्यासश्च।जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितं।दध्यक्तंपयसाभ्यक्तंतदन्ना
वंमनसापिवा।अलाभेयेनकेनापिफलशाकोदकैरपि।पयोदधिघृतैःकुर्याद्वैश्वदेवंस्कवेणतु।ह
स्तिनाम्नादिभिःकुर्याद्दद्भिरंजलिनाजले।बह्वृचपरिशिष्टे।शाकंवायदिवापत्रंमूलंवायदिवाफलं
संकल्पयेद्यदाहारेतानग्नौजुहुयादपि।स्मृतिरपि।यदन्नानस्यैवजुहुयात्सर्वंवाइदमग्नेरन्नंस्वे
नैवतदन्नेनाग्नौस्त्रीणातीति।कारिका।तत्रपक्वाथजुहुयाद्धविष्यंभोज्यमेवच।उक्तंयदन्नःपुरुष १२७
स्तदन्नास्तस्यदेवताः॥यदन्नःपुरुषोत्युक्तेस्तदन्नास्तस्यदेवताइतिभारते।यदिसक्तारेणहोमस्तदा

यस्मिन्कस्मिं।श्चिदग्नावित्याश्वलायनस्मृतिः२

बौधायनेनविशेषउक्तः॥अंगाराञ्जस्यमिश्रांस्तुउद्धृत्योत्तरतोनलात्।जुहुयाद्वैश्वदेवंतुयदिक्षारा
दिमिश्रितमिति।इहयेग्नावितिनियमार्थं।नलौकिकेऽयमितितात्पर्यार्थोयत्तुलौकिकेग्नौवैश्वदेवस्त
दाकारिकोक्तोभिन्नः।स्वाचारवतुर्दशीपरिशिष्टोक्तस्वकार्यः॥का।अग्नयेस्वाहा।सोमायस्वाहेंद्रा
ग्निभ्यांस्वाहा।विष्णवेस्वाहा।भरद्वाजधन्वंतरयेस्वाहा।विश्वेभ्योदेवेभ्यःस्वाहा।प्रजापतयेस्वाहा।दितये
स्वाहानुमतयेस्वाहा।अग्नयेस्विष्टकृतेस्वाहेतिहुत्वैतासांदेवतानां।अथयदस्यादिनिर्दशाभिर्मंत्रैः
स्वाहाकारांतैःप्रतिमंत्रंहुत्वात्रिःपर्युक्ष्य।पर्युक्ष्यहुत्वाचेतिसूत्रितत्वात्।एतासांहुतानांदेवताना
मेववक्ष्यमाणान्बलीन्हरेत्॥छ॥अथवास्तुमध्येबलिंहरेद्देताभ्यश्चैवदेवताभ्योनमोब्रह्म
णेब्राह्मणेभ्यश्चवास्तोष्पतेप्रतिजानीह्यस्मानितिवास्तुमध्येवास्तोष्पतयेच।बलिमितिबह्वृच

सर्वाश्वाप्ततो दक्षिणा तर्ह्येतत् सूत्रितत्वात्

वनार्थे एकवचनं। अथ होमानंतरं वास्तुमध्ये गृहमध्ये बलिं हरेत् दद्यात्। एताभ्य एव हुताभ्यो अग्न्या
दिकाभ्यो देवताभ्यो नमः शब्दयुक्ताभ्यो बलीन्हरेत्। कुत एतत्। अन्यत्र बलौ नमः शब्ददृष्टत्वात्। अ
ग्न्यादीनां देवतानां मंत्राणामंते नमः शब्दः प्रयोज्यः। अग्नये नम इत्याद्यस्य अग्नये स्विष्टकृते नम इ
त्यंतं दक्षिणत आरभ्य उदक्संस्थं बलीन्गृहमध्ये दद्यात्। उत्तरत उपचार इति सूत्रितत्वात्। तत उदक
स्पर्शः। स्विष्टकृद्रौद्रमंत्रत्वात्। रुद्रः स्विष्टकृदिति श्रुतेः। रौद्रं तु राक्षसं पित्र्यमित्युक्तत्वाच्च॥ रौद्रं
राक्षसमासुरमाभिचारणिकं मंत्रमुक्त्वा पित्र्यमात्मानं वालभ्याप उपस्पृशेदप इति कात्यायनः। त
तो द्वितीयपंक्तौ तथैव नमो ब्रह्मणे ब्राह्मणेभ्यश्च बलिद्वयं दद्यात् यथाक्रमं नमः शब्दः सर्वत्रांते १३०
प्रयोक्तव्यो यत्रोक्तो न भवति। वास्तोष्पते प्रतीत्यनया ऋचा वास्तुमध्ये गृहमध्ये बलिं हरेन्नमोंतया।

वास्तोष्पते प्रतीत्यस्य वसिष्ठ ऋषिः। वास्तोष्पतिर्देवता त्रिष्टुप् छंदः। वास्तोष्पते प्रतिजानीह्यस्मान्स्वा
वास्तोष्पतये नम इत्यपि मध्ये॥ ७॥ अथ दिशां प्रदक्षिणं यथारूपं बलिं हरति। अथ मध्यबलिदानानं
तरं दिशां प्रदक्षिणं गृहस्य चतुर्णां दिशां प्रादक्षिण्येन प्राचीमारभ्य यथारूपं यथाक्रमेण स्वेन
स्वेन मंत्रेण वक्ष्यमाणेन देवतावाचकेन मंत्रेण बलिं हरेद्दद्यात्॥ ८॥ नम इंद्रायेंद्रेभ्यश्च नमो य
माय याम्येभ्यश्च नमो वरुणाय वारुणेभ्यश्च नमः सोमाय सौम्येभ्यश्च नमो बृहस्पतये बार्हस्पत्ये
भ्यश्च। नम इंद्राय ऐंद्रेभ्यो नमः इति पूर्वस्यां। नमो यमाय। याम्येभ्यो नमः इति दक्षिणस्यां। उदकस्प
र्शोऽनयत्र। पितृणामधीश्वरत्वाद्यमो पितृस्वरूपः। तस्मात्तन्मंत्रजपे उदकस्पर्शः। मंत्रपृथक्त्वात्क
र्मपृथक्त्वमिति न्यायादुनयत्राप्युदकस्पर्शः। नमो वरुणाय वारुणेभ्यो नम इति पश्चिमायां। नमः सो

मायसोमेभ्योनमइतिउत्तरस्यां।नमोबृहस्पतयेबार्हस्पत्येभ्योनमइतीशानतः॥अत्रसर्वत्राप्यु
त्तरतउपचारइत्येव।एवंबलिदानंदिक्षुकृत्वाततः॥ ॥अथादित्यमंडले।अथादिक्षुबलिदानानंत
रंगृहएवआदित्यमंडलेआदित्यमंडलरूपेमंडलाकारेबलीन्हरेद्वक्ष्यमाणत्वात्॥ ॥नमोदित
यआदित्येभ्यश्चनमोनक्षत्रेभ्यऋतुभ्योमासेभ्योर्द्धमासेभ्योहोरात्रेभ्यःसंवत्सरेभ्यः॥इत्यष्टौबलीन्
मंडलाकारेणदद्यात्।अनुक्तेषुनमःशब्दोंते॥ ॥पृथ्व्यैपथिकृतेधात्रेविधात्रेमरुद्भ्यश्चेतिदेहली
षु।देहलीषुद्वारशोभासुचतुरोबलीन्दद्यात्।पृथ्व्यैपथिकृतेनमइतिदेहल्यां।धात्रेनमइतिदेहल्युप
रिभागे।विधात्रेनमइतिदक्षिणपार्श्वे।मरुद्भ्योनमइत्युत्तरपार्श्वे।एवंबलिदानंकृत्वा।ततः।विष्ण १३२
वेदृषदि।विष्णवेनमइतिदृषदिपेषण्यां।वनस्पतयइत्युलूखले।वनस्पतयेनमइत्युलूखलेब

पादतोभद्रकाल्यै

लिदानं॥ओषधीभ्यइत्योषधीनांस्थाने।ओषधीभ्योनमइत्यनेनओषधीनांस्थानेधान्यकोष्ठे॥पर्जन्या
याद्भ्यइतिमणिके।पर्जन्यायनमः।अद्भ्योनमः।इतिमणिकेउदकुंभेबलिदानद्वयं।नमःश्रियैशय्या
योशिरसिपाद तोभद्रकाल्यै।शय्यायांखट्वायांशिरसिनमःश्रियैइतिबलिंदद्यात्॥अनुगुप्तेदेशे
नमःसर्वान्नभूतये।अनुगुप्तेदेशेमूत्रपुरीषोत्सर्गस्थानंगृहपृष्ठतः।तत्रनमःसर्वान्नभूतयइतिब
लिंहरेत्।उदकस्पर्शः।कुत्सितप्रदेशगमनात्॥ ॥अथांतरिक्षेनक्तंचरेभ्यइतिसायमहस्स्वरेभ्य
इतिप्रातर्येदेवासइतिच।अथतत्रदेशादागमनोत्तरंअंतरिक्षेनक्तंचरेभ्योनमइतिसायंरात्रौ
बलिदानं।अहस्स्वरेभ्योनमइतिप्रातर्दिवसे।येदेवासइत्यनयानमोंतयाबलिदानंअंतरिक्षे।व
कारात्अंतरिक्षेएव।परुच्छेपऋषिः।विश्वेदेवादेवता।त्रिष्टुप्छंदः॥येदेवासोदिव्येकादशस्थश्र॥

अविज्ञाताभ्योदेवताभ्यउत्तरतोधनपतयेच।उत्तरतःअविज्ञाताभ्योदेवताभ्योनमः।धनपतयेनमः।
चकारादुत्तरतएव॥छ॥प्राचीनावीतीदक्षिणतःशेषंनिनयतियेअग्निदग्धाइति।प्राचीनावीतीकृता
पसव्योदक्षिणतोदक्षिणभागेशेषंउर्वरितंयेअग्निदग्धाइत्यनयापितृतीर्थेननिनयति।निनयती
त्युक्तत्वादुदकसहितं।बलिमिमंहरेदित्यवगम्यते।उदकव्यतिरेकेणनिनयनंकर्तुंनशक्यते।त
स्मात्।पितृमंत्रत्वात्स्वधाशब्दःप्रयोज्यो।तेननमःशब्दश्च।येअग्निदग्धाइतिअस्यऋषिःपितरोदेवता
त्रिष्टुप्छंदः।येअग्निदग्धायेअनग्निदग्धाः।।२।।छ।।देवपितृनरेभ्योदत्वाश्रोत्रियंभोजयेत्।देवाःवि
श्वेदेवाः।पितरःस्वकीयाःपितृपितामहप्रपितामहाःमातामहप्रमातामहवृद्धप्रमातामहाश्च। १३२
नराःसनकादयःएभ्योभागान्प्रसेकंदत्वाश्रोत्रियंएकशाखाध्यायिनंभोजयेत्।ततआयुष्यक

सायंकालेवैश्वदेवानंतरंबलिदानमात्रंकर्तव्यं।देवपितृनरेभ्योदत्वाइत्यादिभागकल्पनानविधेया।प्रातः
कालेनित्यश्राद्धसिध्यर्थंभागकल्पनाविधेयान्यायमिति[illegible]

रणं।कुलेत्युक्तत्वात्।तद्वंयोरित्यादिकास्तुतिश्च।पितृमातामहानांभागकल्पनानित्यश्राद्धप्रति
निधित्वेन।यदानित्यश्राद्धंकरोतिअमावास्यामहालयश्राद्धादौचपितृमातामहभागकल्पनानवि
धेया।तदातुदेवानांनराणांचभागकल्पनाकर्त्तव्या।विशिष्ठावाराज्ञवामथैनंभागकल्पनाच।श्रोत्रिय
ब्राह्मणभोजनमपिनित्यश्राद्धपक्षे।श्रोत्रियंछंदोधीतेइतिपाणिनीयः।।छ।।ब्रह्मचारिणेवाभिक्षां
दद्यात्।वाविकल्पार्थो।श्रोत्रियभोजनाभावेब्रह्मचारिणेवाभिक्षांग्रासंदद्यात्।सब्रह्मचारीनै
ष्ठिकोवाउपकुर्वाणोवा।ग्रासमात्राभवेद्भिक्षाचतुर्ग्रासश्चपुष्कलः।पुष्कलानिचत्वारिहं
तकारःप्रकीर्त्तितः।इत्युक्तत्वात्।।छ।।अनंतरंसौवासिनीगर्भिणीकुमाराश्चविप्रांश्चभोज
येत्।श्रोत्रियभोजनाद्यनंतरंवाआयुष्यकरणं।एवंकुलेत्युक्तत्वात्।ततोनंतरंसौवासिनीस्वयं

देस्थितां अविधवां पुत्रादिमन्तीं कां स्त्रियं गर्भिणीं संयुक्तां स्त्रियं कुमारान् आमौंजिबंधनात्।
स्थविरान्। अश्नीतः। ईदृशे एवमादीन् भोजयेत्। कुमारकस्तु विज्ञेयो बुधैरामौंजिबंधनात्। यावद्वृतस्तु
वार्द्धक्यं ततः स्थविरतामतेति स्मृतिसागरे। काशीखंडे। कुमाराश्च सुवासिन्यो गर्भिण्यातिरुग्णा
रा ४ दिताः। अतिथेनोद्दिष्टोऽप्येते भोज्या नात्र विचारणा॥ ८॥ श्वभ्यः श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि। श्वानः
कुक्कुरास्तेभ्यः। श्वपचाश्चांडालादयस्तेभ्यः वयांसि पक्षिणस्तेभ्यः। चकारात्कृमियक्ष्मप्रभृतयस्ते
भ्योन्नं गृहाद्बहिर्बलीनावपेत् दद्यात्। तत्र यक्ष्मणे बलिमपसव्येन। पितृभ्यो यक्ष्मणे समिमे
तिकाशिका। मनुः। शुनां च पतितानां च श्वपचां पापरोगिणां। वायसानां कृमीणां च शनकैर्निक्षि १३३
पेद्भुवि॥ ८॥ इति नानवन्नमश्नीयात्। इति पूर्वोक्तप्रकारेणानवन्नमखंडितं देवेभ्योऽदत्वान्नं

ग्रंथांतरे। यक्ष्मणे भो दक्षिणदिशा घटमीत तन्न इति भुवद्।:आरोग्यमस्य ततो न स्या। क्षायरोद्राघयेश्रित
भिलिशेद्रे बलिर्भुवो

नाश्नीयात्। पितृदेवमनुष्येभ्योऽदत्वाश्नात्यमृतं गृहीति स्कांदे॥ ८॥ नैकः। अश्नीयादित्यनुवर्त्तते।
एक एव बंधुरहितो नाश्नीयात्। महाभारते। एकं संपन्नमश्नाति वस्त्रे वासः स्वलंकृतं। असंविभज्य
न्न तेभ्यः कोन्नृशंसतरस्ततः॥ ८॥ न पूर्वं अश्नीयादित्यनुवृत्तौ। बंधुभ्यः पूर्वं प्रथमतो नाश्नीयात्॥ ८॥
तदप्येतद्देवोक्तं मोघमन्नं विंदते अप्रचेता इति। तदपि पूर्वोक्तं एतत् न पूर्वमश्नीयादिति इत्याकुल्या
मोघमन्नमित्येतया उक्तं। तगर्थोज्ञातुमशक्यत्वात्प्रतिपाद्यते। भिक्षुर्नैषिरदातारं कृपयन्दातारं।
स्वस्तु वं त्रिष्टुप्छंदः। सान्नदानप्रशंसां करोति मोघमिति। यः अप्रचेताः न प्रकृष्टचेतो यस्य स पुरुषो
मोघं व्यर्थमेवान्नं विंदते प्राप्नोति। इदमहं सत्यं यथार्थमेव ब्रवीमि वदामि। न केवलं व्यर्थमेव प्राप्तिः
इति न। अपितु। सोन्नलाभस्तस्य पुरुषाधमस्य वध इत्। वध एव वज्र एव ज्ञेयः। वधः। अर्क इति वज्र

पंचयज्ञविधानंतु न कुर्यान्मृत्युजन्मनोरिति संवर्तवचनात् सूतके वैश्वदेवस्यापि हानिः। छंदोगानां
तु दाक्षिणात्यानां तु होमोऽस्ति निषिद्धे। यज्ञाद्देवानिवर्तते इति स्मृतेः परिसंख्या नार्था। यज्ञे एवाभिवर्तते नान्यत्रेति
तेनाग्नौ चाद्दाव्यपि निषिद्धस्य पाकस्य किंचिदन्नं स्थालीमग्नौ प्रक्षिप्यत इति सर्वदर्शी। इत्यादि स्थालीमेव ... दितिभाजे

नामासकः। यः अर्यमणं देवं न पुष्यति। अर्यमणमित्युपलक्षणं देवान् अर्यमादीन् हविःप्रदानेन न
पुष्णाति। नो नापि सखायं समानख्यानं पुष्णाति। अत एव स केवलाघः केवलमघं पापमेव यस्य स ए
वंविधो ज्ञेयः। केवलादी केवलं स्वयमेवान्नमश्नाति। न देवपितृमनुष्येभ्यो ददाति स केवलमघमेव
प्राप्नोति। तस्याघमेव निष्पद्यते नैहिकं नामुष्मिकं च फलं भवति तस्माद्यथाकथंचिद्देवपितृमनुष्येभ्यो
दत्वान्नं भुंजीयात्॥१४॥ ॥चतुर्दशः खंडः॥ ॥षण्णां वेदर्घ्याणामन्यतममागच्छेद्गोपशुमजं मन्नं वा यथा
न्यतमं मन्येत तत्कुर्यात्। षडर्घ्यान् वक्ष्यत्याचार्यर्त्विक्श्वशुरो राजा स्नातकः प्रिय इति सूत्रे सूत्रिताः। ए
ष्वर्घ्येषु तेषां षण्णामर्घ्याणां मध्ये चेत् यदि अन्यतमः एकः आगच्छेत् तदा तस्मै आगताय गोपशुं शूलगव
प्रकरणोक्तेतिकर्तव्यताकलापसहितं प्रतिषिद्धविधानेन वा संपादितं तत्कुर्यात्। अर्घाय योग्या अर्घ्या

स्तेषां वा शब्दः प्रत्येकमभिसंबध्यते। गोपश्वभावे अजं संपादयेद्विधिना। अजाभावे यत् सामान्यत
मं सदृशान्नमं मांसादिकमन्नं मन्येत तत्कुर्यात्॥१५॥ नामांसोऽर्घः स्यात्। अमांसो मांसरहितोऽर्घो
न स्यान्न भवति। तस्मान्मांसाभावे मांसप्रतिनिधित्वेन तदनुरूपमन्नं मांसादिकं कुर्यात्॥१६॥ अधि
यज्ञमधिविवाहं कुरुतेत्येव ब्रूयात्। सप्तम्यर्थे द्वितीया। अधियज्ञे अधिविवाहे च गोपश्वादौ कर्तव्ये कु
रुतेत्येव ब्रूयादाचार्यादिः। मधुपर्के च सोमे च पितृदैवतकर्मणि। अत्रैव पशवो हिंस्या नान्यत्रेति व
चनप्रामाण्यात्। महाप्रस्थानगमनं गोपशुश्च सुराग्रहः। अग्निहोत्रहवण्याश्च लेहो लीढा परिग्रह इ
ति कलियुगे निषिद्धत्वान्न गोपशुकरणं। तत्प्रतिनिधित्वेन अजपशुरेव कर्तव्यः। अथवान्नमेव मां
सादिकं ज्ञेयं। गोरित्युक्तेऽकुरुतेति ब्रूयादिति सूत्रं। क्रियमाणे गोपशौ इति ब्रूयात्। यदा गोपशुर्न

तदामातारुद्राणामितिजपित्वाॐमुत्सृजततृणान्यत्त्वित्येवब्रूयात्॥इतिसूत्रेसूत्रितत्वात्॥आचा ७
र्यायाग्नेयः॥अभ्यागतायाचार्यायआग्नेयःअग्निदेवताकःपशुःकार्यः॥पशोःक्रियमाणेउपाकरणप्रो
क्षणपर्यग्निकरणमित्यादिसूत्रोक्तपशुहिंसनप्रकारंकुर्यात्॥सचप्रकारोऽष्टकाप्रकरणेवक्ष्यते।
प्रतिश्रुताविधानेनवाकार्यः॥७॥ऋत्विजेबार्हस्पत्यः॥यज्ञेवृतोहोत्रादिर्ऋत्विक्तस्मैअभ्यागतायबृ
हस्पतिदेवताकःपशुःकर्तव्यःपूर्वोक्तविधिना॥७॥वैवाह्यायप्राजापत्यः॥वैवाह्यःश्वशुरस्तस्माआग
तायप्रजापतिदेवताकःपशुःकर्तव्यः॥७॥राज्ञऐंद्रः॥अभ्यागतायराज्ञेइंद्रदेवताकःपशुःकर्तव्यः॥७॥
प्रियायमैत्रः॥अभ्यागतायप्रियायजामात्रेमित्रदेवताकःपशुःकर्तव्यः॥७॥स्नातकायैंद्राग्नः॥अभ्याग १३५
तायस्नातकायत्रिविधायइंद्राग्नीदेवताकःपशुःकर्तव्यः॥विद्यास्नातकोव्रतस्नातकोविद्याव्रतस्ना

तकइतित्रिविधस्तस्मै॥७॥यद्यप्यसकृत्संवत्सरस्यसोमेनयजेतकृतार्घ्याएवैनंयाजयेयुर्नाकृतार्घ्याः॥
संवत्सरस्येत्यत्रसप्तम्यर्थेषष्ठी॥यद्यपियजमानोयागादिकर्त्ताअसकृत्पुनःपुनःसंवत्सरेसंवत्स
रेसोमेनाग्निष्टोमलक्षणेनयज्ञेनयजेतयागंकरोतितथापिकृतार्घ्याःकृतमधुपर्काएवएनंयजमा
नंयाजयेयुर्यागादिनाऋत्विजःअकृतार्घ्याअकृतमधुपर्कानयागंकारयेयुः॥सोमइत्युपलक्षणं।
पशुबंधचातुर्मास्यादिभिरपिसंवत्सरेपूजितास्तथापिकृतमधुपर्काएवद्वितीयेयजनेयाजयेयु
र्नापूजितायागंकारयेयुः॥अयमर्थः॥संवत्सरेसोमपशुबंधचातुर्मास्यादिभिर्यजमानोयजेततेषु
पूजिताअपिऋत्विजोद्वितीयेसोमयागादिकेपूजार्हाएव॥अपितुतेनमधुपर्केणपूजिताःसर्वकालं
पूजितानभवंतीत्यर्थः॥अन्येआचार्यश्वशुरराजास्नातकजामातरःसंवत्सरंसकृत्कृतेनार्घेणकृता।

घ्नो भवति। संवत्सरानंतरमघ्नेयो ग्या:॥ ऋत्विगाचार्यादीनां एतावान्विशेषो भवति। संवत्सरे संवत्सरे
सोमयाजीति श्रुते:॥छ॥ तदपि भवति। तदपि पूर्वोक्तं गोपश्वादिहिंसनं भवति ग्रंथांतरे दृश्यते। २५।
॥ ॥ पंचदश: खंड:॥ ॥ मधुपर्के च सोमे च पितृदैवतकर्मणि। अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनु:।
मधुपर्केषल्लां मध्ये अन्यतमायाऽभ्यागताय क्रियमाणो मधुपर्क:। सोमे अग्निष्टोमो सोम इत्युपलक्षणं।
पशुबंधचातुर्मास्यादिष्वपि। पितृकर्मणि श्राद्धादौ। दैवकर्मणि देवीपूजादौ अत्रैव कर्मणि पशव:
गोपश्वजादयो हिंस्या हिंसनीया मारणीया: नान्यत्र स्थले हिंस्या इति मनु: स्मृतिद्रष्टा ऋषिरब्रवीत्। का २३ १३६
त्री खंडो। यागार्थं पशुहिंसा या सा स्वर्ग्या नेतरा क्वचित्। मखार्थं ब्रह्मणा सृष्टा: पशुद्रव्यमृगौषधी:।
निघ्नन्न हिंसको विप्रस्तासामपि स्तु नागति:। पितृदेवक्रतूक्तं तं मधुपर्कार्थमेव च। तत्र हिंसाप्यहिंसा

स्याद्धिंसान्यत्र सुदुस्तरा। भारते। महानवम्यां ये देव्या हन्यंते महिषादय:। सर्वे ते स्वर्गतिं यांति घ्नतां
पापं न विद्यते। भवानीप्रांगणे येषां प्राणा याता युधिष्ठिर। तेषां स्वर्गे चिरं वासो वीरास्ते ह्यमरसां प्रिया:
॥छ॥ आचार्यश्च पिता चोभौ सखा चानतिथिर्गृहे। ते यद्विदध्युस्तत्कुर्यादिति धर्मो विधीयते। आचार्य
आचारग्राहयिता। पिता भरणपोषणकर्त्ता एतौ उभौ। च अनंतरं सखा समानख्यानो मित्रं एते त्रयो
पि गृहे आगता अनतिथि: अतिथित्वेन न मंतव्या:। अपि तु गृहस्थितं धनमृणादिकं निवेदनीयं ते
भ्य:। ततस्ते त्रयोपि यत् विदध्युर्यद्विधानं कुर्यु राज्ञापयेयुस्तत्ते अविचार्य कुर्यात्। इति धर्मो विधी
यते उच्यते॥छ॥ नैकग्रामीणमतिथिं विप्रोष्यागतमेव च। उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोपि
वा। एकग्रामीणं एकग्रामस्थितं अतिथिं न विद्यात् जानीयात्। तमप्येकग्रामीणं विप्रोप्यविशेषेण

न

प्रवासंकृत्वाआगतंगृहेअतिथिंविजानीयात्॥पुनःकीदृशं॥गृहेउपस्थितंसमागतंनमार्गेमिलि
तं॥गृहशब्दस्यविवरणं॥यत्रगृहेवनस्पतौवाभार्याकलत्रं॥अपिवाअग्नयोअग्निहोत्रस्ययत्रातंगृ ग्नयः
हं॥ननिवासस्थलमेव॥नगृहंगृहमित्याहुर्गृहिणीगृहमुच्यतेइतिस्मृतिः॥जायेदस्तंमघवन्त्सेदुयो
निरितिश्रुतिः॥अतिथिस्त्यतितोगृहान्नैवतस्मिन्नेतितिथिषुपरकुलानीतिवागृहाणीतिवेतिनैरुक्ते॥
वैयाघ्रपद्यः॥अचिंतितमनाहूतंवैश्वदेवेव्यवस्थितं॥अतिथिंतंविजानीयान्नैकग्रामनिवासिनं॥६॥
अग्निहोत्रंबलीवर्दौकालेचातिथिरागताः॥बालाश्चकुलवृद्धाश्चनिर्दहंत्यपमानिताः॥अग्निहोत्रंपंचा
ग्निरूपंत्रेताग्निरूपंवा॥बलीवर्दावृषभाः॥बलीवर्दाइत्युपलक्षणं॥सर्वेपिपशवः॥दृश्याक्रांतःपृष्ठबंधः २२१
१कन्म कावरजस्वला॥देवताश्चसनिर्माल्याहंतिपुण्यंपुराकृतमितिपद्मपुराणे॥बालाःअष्टवर्षतोवाक्॥

अष्टवर्षान्नवेद्बालस्ततःपौगंडकःस्मृतइतिस्मृतेः॥कुलवृद्धाःपितृव्यकादयः॥एतेऽग्निहोत्राद
यःअपमानिताःदुरुपचरिताःनिर्दहंतिनिःस्त्रीकुर्वंति॥संप्राप्तेवैश्वदेवांतेसोतिथिःस्वर्गसंक्रमः॥
अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्त्तते॥सतस्यदुष्कृतंदत्वापुण्यमादायगच्छति॥७॥अनड्वान
ग्निहोत्रंचब्रह्मचारीचतेत्रयः॥अश्नंतएवसिद्ध्यंतिनैषांसिद्धिरनश्नतां॥अनड्वान्बलीवर्दःपश्वा
दिः॥अग्निहोत्रंपूर्वोक्तरूपं॥ब्रह्मचारीउपकुर्वाणोनैष्ठिकश्च॥तेत्रयःअश्नंतएवखादंतएवसि
द्ध्यंतिसिद्धिंकुर्वंति॥अनश्नतांअखादतामेषांअनुत्पत्तीनांसिद्धिर्गृहेनस्यान्नवेति॥८॥
देवताःपुरुषंगृहस्थंअहरहर्गृहमेधिनं॥भागार्थमुपसर्पंतितान्योनिर्वप्तुमर्हति॥गृहस्थावास्तुप्र
कृतयोदेवताःगृहमेधिनंपंचमहायज्ञानुष्ठानशीलंपुरुषंअहरहःप्रतिदिनंभागार्थंस्वीयं॥

श्रार्थेनं पुरुषमुपसर्पतीति आगच्छंति। तस्मात्ताभ्यो देवताभ्यो निर्वप्तुं दातुमर्हतीति योग्यो भवति॥
६६॥ ॥षोडशः खंडः॥ ॥ ये एनान्यप्युंछतो नित्यमग्निहोत्रं च जुह्वतः। सर्वं सुकृतमादत्ते ब्राह्मणो
नर्चितो वसन्। एवं विधस्यापि गृहमेधिनो गृहे सायमागतस्यातिथेः पूजा न भवति तदा तस्य पु
ण्य हानिर्भवति। ये एनान्यपि उंछतः उंछवृत्तिं कुर्वतो नित्यं सदा अग्निहोत्रं जुह्वतो गृहमेधिनो गृ
हे वसन् ब्राह्मणोतिथिः अनर्चितः पूजारहितो गच्छति तदा तस्य पुरुषस्य सर्वं सुकृतं आदत्ते गृह्णा
ति तस्मात् सायमागतस्यातिथेः पूजनमावश्यकं। याज्ञवल्क्यः॥ अप्रणोद्योतिथिः सायमपिवा १३८
भूतृणोदकैरिति। तस्माद्दाकुर्न सायमतिथिरुपरुध्यत इति श्रुतिस्तैत्तिरीया॥ ६॥ उदपात्राद्वु
दातव्यमाकाष्ठाज्जुहुयादपि। आसूक्तादनुवाकाद्वा ब्रह्मयज्ञो विधीयते। गृहमेधिना आ उदपात्रात्।

उदकपात्रात् उदकमपि देयमभ्यागतायातिथये आपदि। अग्निहोत्रे आकाष्ठात् काष्ठं मर्या
दीकृत्य जुहुयात्। आसूक्तात्। सूक्तं मर्यादीकृत्य आ अनुवाकात् ब्रह्मयज्ञो ब्रह्मयज्ञजपो
विधीयते। उच्यते। अत्र मनुः। संप्राप्ताय त्वतिथये प्रदद्यादासनोदके। अन्नं चैव यथाशक्ति स
त्कृत्य विधिपूर्वकं। एतदशक्तिविषयं॥ ६॥ नोपवासः प्रवासे स्यात्पत्नी धारयते व्रतं। पुत्रो भ्राता
यवा पत्नी शिष्यो वास्य बलिं हरेत्। प्रवासे यजमानस्य उपवासो व्रत्याशनं न स्यात्। पत्नी गृहे व्र
तं व्रत्याशनादिकं धारयते। व्रते पूर्वोपवसति रत्र व्रताचरणार्थः। अस्य गृहमेधिनो बलिं वैश्व
देवादिकं पुत्रो हरेत् पुत्राऽसन्निधाने भ्राता। तदसन्निधाने पत्नी। तदसन्निधाने शिष्यो वा। पूर्व
स्य पूर्वस्यासंभवे उत्तरोत्तरः॥ ६॥ वैश्वदेवमिमं ये उ सायं प्रातः प्रकुर्वते। ते अर्थैरायुषा कीर्त्या

प्रजाभिश्च समृद्धायुरिति। ये पुरुषाः धर्मपूर्वोक्तं वैश्वदेवं सायंप्रातः प्रकुर्वंते कुर्वंतीति ते वैश्वदेवक
र्तारः। अथैर्द्धनैरायुषा वेदोक्तेन शतायुर्वै पुरुष इत्यादिना कीर्त्या सत्कीर्त्या प्रजाभिः सुप्रजाभिः स
मृद्धायुः समृद्धा भवंति। मत्स्यपुराणे। वैश्वदेवस्य होमेन देवतानामर्चनेन च। आयुषा प्रजया वेदैर्यु
ज्यते च धनेन चेति। इति करणं वैश्वदेवप्रकरणसमाप्तिसूचनार्थं॥१७॥ ॥सप्तदशः खंडः॥ ॥ब्रह्मच
री प्रवत्स्यन्नाचार्यमामंत्रयते। आचार्येणानुज्ञातो ब्रह्मचारी नैष्ठिक उपकुर्वाणश्च तीर्थाद्यर्थं वा प्रव
त्स्यन् प्रवासं गंतुमिच्छन्नाचार्यं गुरुमामंत्रयते आज्ञां याचयति वक्ष्यमाणविधिना॥छ॥ प्राणाप
नयोरित्युपांश्वोमहं वस्यामिनो इत्युच्चैः। आभ्यां मंत्राभ्यां गुरुं प्रतिवदति। ॐ प्राणापानयोः इत्युपां २२ए
श्व। ॐ अहं वस्यामिनो इत्युच्चैर्वदेत्॥छ॥ प्राणापानाउरुव्यचास्त्वया प्रपद्ये तं देवाय त्वा गोत्रेप

२खे रिददामि देव सवितरेषते ब्रह्मचारी तं ते परिददामि तं गोपायस्व तं मा मृध इत्युपांशु। प्राणापा स्व
नाउरुव्यचेत्यारभ्य मामृध इत्यंतं मंत्रमाचार्य उपांशु उक्त्वा ततः। ॐ स्वस्तीत्युच्चैराचार्यः स्व
स्तीत्युच्चैराचार्यः। आचार्यः ॐ स्वस्ति इतीमं मंत्रमुच्चैराहेति वाक्यशेषः। द्विरभ्यासोऽध्यायपरिसूच
नार्थः॥ ॥अष्टादशः खंडः॥१८॥ ॥इति श्रीमत्सकलविद्वज्जनमंडलीमंडनद्विवेदिश्रीश्रीपति
सुतद्विवेदिश्रीकृष्णजीत्तनयनारायणविरचिते रत्नप्रदीपके नाम्नि द्वितीयोऽध्यायः समाप्तः॥छ॥
दैतेयकांतासुकृशानुरूपं नक्ष्यानतेषु प्रियसौम्यमूर्तिं। निर्वाणनिश्रेणिमजं वरेण्यं वंदे नृसिं
हं भुवनैकनाथं॥छ॥ स्नानं समावर्त्स्यमानस्य। समावर्त्स्यमानस्य गुरोः सकाशात् समावर्तनं कुर्व
तो ब्रह्मचारिणः आभ्युदयिकं कृत्वा तन्मौंजीत्यागबंधन इति गार्ग्योक्तेः। वक्ष्यमाणविधिना स्नानं

न्नवतीतिवाक्यशेषः॥छ॥आनडुहमित्युक्तंतस्मिन्नुपवेश्यकेशाञ्श्मश्रूणिवापयतिलोमनखा
नि च।आनडुहंरोहितंचर्मोदग्रीवंप्राग्ग्रीवंवोत्तरलोमेतिसूत्रेउक्तं।तस्मिंश्चर्मणिमाणवकमु
पवेश्य।केशाः शिरःस्थिताः श्मश्रूणिमुखस्थितानिलोमानिकक्षोपस्थस्थानिनखाहस्तपाद
स्थाः॥छांदसोलिंगव्यत्ययः॥एतानिवापयतिमुंडापयति।शिरसिशिखारक्षणं।अशिखोमुंड इ
तिनिषेधात्।समावर्तनेतिकर्मणोनामधेयं॥छ॥व्रीहियवैस्तिलसर्षपैरपामार्गैःसदापुष्पी शंखाहु
भिस्तुद्वाप्य।तंकृत्तोद्वापनंमाणवकंएतैरुद्वाप्यउद्वर्तनंकृत्वा॥व्रीहियवैरेकत्रपिष्टैःस्तिलस
र्षपैरेकत्रपिष्टैरपामार्गैरेकत्रपिष्टैःसदापुष्पीभिःशंखपुष्पीभिरुद्वर्तनयोग्यैःकृत्वोद्वर्तयेत्। १४०
भिन्नसमासनिर्देशात् भिन्नंभिन्नंपेषणंउद्वर्तनंच॥आपोहिष्ठीयेना…भिषिच्य।आपोहिष्ठीये

नस्तकेननवभिःकुंभैःप्रत्यवंएकैकेनकुंभेनयथासंख्यंएनंमाणवकंअभिषिच्यअभिषेकं
स्नानंकारयित्वा।मंत्रपृथक्त्वात्कर्मपृथक्त्वमितिन्यायात्।दंडंमेखलामजिनंउपवीतंशिरोन्ना
गेत्यक्त्वा॥छ॥अलंकृत्य।तिलकाभरणपुष्पमालाभिरलंकृत्यततः॥छ॥युवंवस्त्राणीतिवाससी
परिधाय।युवंवस्त्राणिइतिमंत्रेणवाससीअधरमुत्तरीयंचपरिधायमंत्रावृत्तिःकर्मभेदात्।दी
र्घतमाऋषिःमित्रावरुणौदेवतेत्रिष्टुप्छंदः।युवंवस्त्राणिपीवसावसाथे।।ततोयथोक्तमंत्रेण
पवीतंदेयंमाणवकायाचार्येण।अथास्मैनिष्कंबध्नात्यायुष्यंवर्चस्यं।अथवस्त्रोत्तरीयोपवीतपरिध
नानंतरंअस्मैमाणवकायआयुष्यमितिमंत्रेणनिष्कंसुवर्णकुंडलादिआभरणंबध्नाति।विहव्य
ऋषिःविश्वेदेवादेवताअनुष्टुप्छंदः।आयुष्यंवर्चस्यंशरः॥छ॥ममाग्नेवर्चइतिवेष्टनं।ममाग्नइतिमं

त्रेण चार्यो माणवकाय शिरोवेष्टनं बध्नाति। विहव्य ऋषिः विश्वेदेवा देवता त्रिष्टुप् छंदः। ममाग्ने वर्चो
विहवेष्वस्तु अरंक ॥ इषं इष्टं हम हनेति छत्रं। इषं इष्टं हमिति मंत्रेण चार्यो माणवकाय छत्रं प्रयच्छति।
कक्षीवान् ऋषिः उषो देवता त्रिष्टुप् छंदः। इषं इष्टं हम हनाया त्यक्त श्री आरोहतं उपानहौ। आरोहतेति मं
त्रेण चार्यो माणवकाय उपानहौ प्रयच्छति। संकुसुक ऋषिः त्वष्टा देवता त्रिष्टुप् छंदः। आरोहत आयुर्जरसं
वृणाना ॥ ऋ॰ १ ॥ कं॰ ॥ दीर्घसत्र स्त्वं कुशाइति वैणवं दंडमादत्ते। दीर्घसत्र इति मंत्रेण चार्यो माणवकाय
वैणवं वेणोर्विशास्य दंवैणवं दंडमादत्ते प्रयच्छति। वैणवदंडग्रहणात्पूर्वं दंडे मेखलामजिनं उपवीतं
च बध्नान्हित्ते रुत्र मित्यनया प्रणवेन वा उदके निक्षिपेत् ॥ कं॰ ॥ प्रतिलीनस्तु दहरासीत। महाव्याहृ १४१
तिचतुष्टयं कृत्वा वैकल्पिकं स्विष्टकृतं कृत्वा महाव्याहृति सर्वप्रायश्चित्तं कर्मशेष समापनं त

६२

तस्तदह स्तस्मिन्नहनि प्रतिलीनो गुप्त गृहे स्याति ष्ठेत् न वृथा पर्यटनं कार्यं ॥ कं॰ ॥ वनस्पते वीड्वंगः आ स इस्ते
भ्यां र तिरथमारोहेत्। वनस्पतेश्वास इस्तेत्या मंत्राभ्यां यथाक्रमेण दक्षिणवामाभ्यां चरणाभ्यां रथं मारोहे
आरोहेत्। आरोहणं करोति। वनस्पत इत्यस्य गर्ग ऋषिः प्रस्तोकस्य दानस्तुतिर्देवता त्रिष्टुप् छंदः। व रथे र
स्पते वीड्वंग इत्यस्य आसइत्यस्य आस ऋषिः इंद्रो देवता अनुष्टुप् छंदः। आसइत्काम हा असि त्वं यमन
गवा वा पशुना वा अर्हयेयुस्तत्पूर्वमुपतिष्ठेत। यत्र गृहे स्नातकं माणवकं गवा गोपशुना वा पशु
नाऽन्नादि पशुना वा अर्हयेयुः पूजयेयुर्बंधिवास्तत्सर्वं तद्गृहं उपतिष्ठेत गच्छेत। यत्र गते प्रत्याख्यानं
न भवति तद्गृहं एव पूर्वं गच्छेत् द्विवीश्वा बाल्कन्यया वा अर्हयेयुर्येन तेषां गृहे गच्छेत ॥ कं॰ ॥ गोभ्यो वा सम
वेतैत फलवतो वा वृक्षात्। अर्घदातृणामभावे गोभ्यः मंगलरूपाभ्यः सकाशात् समावर्तेत प

यीवर्त्तनं करोति वा। अथवा फलवतः फलयुक्ताद्वृक्षादाम्रादेर्वा समावर्त्तेत। शाकुनरूपत्वात्। इंद्र
श्रेष्ठानि द्रविणानि धेहि स्योना पृथिवि भवेत्यवरोहति। इंद्रश्रेष्ठानीत्यनया दक्षिणेन पादेन स्योना
पृथिवीत्यनया वामेन पादेन माणवको रथादवरोहति उत्तरति। इंद्रश्रेष्ठानीत्यस्य प्रजापतिर्ऋषिर्देवता छं
दांसि प्रातर्जपप्रकरणे दर्शितानि। स्योना पृथिवीत्यस्य मेधातिथिर्ऋषिः द्यावापृथिव्यो देवते गायत्री छं
दः। स्योना पृथिवि भवेत्यस्य ईक्षितमन्नं तदहर्ज्जीत। तदहस्तस्मिन्नहनि ईक्षितं अनीष्टमन्नं यथानि
पि२ त्वक्षितं तज्जनीत। नमध्वादिनिषेधः॥ ८॥ आचार्याय वस्त्रयुग्मं दद्यात् उष्णीषं मणिकुंडलं दंडोपानहं छ
त्रं वा। आचार्याय गुरवे माणवको वस्त्रयुगं पूर्वं यत्परिहितं उष्णीषं शिरोवेष्टनं मणिकुंडलं मणि
प्रधानं कुंडलं दंडं वैणवं उपानहं उपानद्युगलं छत्रं दद्यात्। चकाराद्भूम्यादीनि दानानि सति संभ

वेदेयानि। प्रथमः खंडः॥ १॥ ॥ अगारं कारयिष्यन्निहाग्नावाधाय दिशः परिष्टक्कामीत्युदुंबरशा
खया त्रिः परिलिख्य मध्ये स्थंडिले जुहोति। गृहस्थो अगारं गृहं कारयिष्यन् उदुंबरशाखया इ
ग्नावाधायेत्यनेन मंत्रेण तां गृहभूमिं त्रिः परिलिख्य सर्वत उल्लेखनेन शोधयित्वा तस्या भूम्या मध्ये
स्थंडिलं चतुरस्रं चतुर्विंशत्यंगुलं संपाद्य तत्र वक्ष्यमाणप्रकारेण जुहोति। भूशुद्धिर्मार्जनाद्दा
हात्कालाद्गोक्रमणादपि। सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनादिति याज्ञवल्क्यः। गृहकरणमा
कार्त्तिक ३ सनियमो रत्नमालायां। आषाढचैत्राश्वयुजोर्ज्जमाघज्येष्ठेषु च प्रोष्ठपदेषु नूनं। निकेतनानां घ
टनं नृपाणां योगेश्वराचार्यमतेन निषिद्धं। शोको धान्यं मृतिः पशुद्रव्यं वृद्धिर्विनाशो युद्धं भृ
त्यकृतिरथ धनं श्रीश्च वह्निर्भयं च। लक्ष्मीप्राप्तिर्भवति नवनारंभकर्त्तुः क्रमेण चैत्रादीनां मुनि

त्रिशितिफलं वास्तुशास्त्रोपदिष्टं। वास्तुशास्त्रे। चैत्रे शोककुलं कर्त्ता वैशाखे तु धनान्वितः। ज्येष्ठे गृहीवि
नश्येत नश्यं तिपशवः स्तुचौ। श्रावणे धनवृद्धिस्यात्तन स्येनश्यते गृही। कलहस्त्वाश्विने मासि भृत्य
नश्यति कार्तिके। मार्गशीर्षे धनप्राप्तिः सहस्ये काम्यसंग्रहः। माघे न वेह्वग्निभयं फाल्गुने श्रीरनुत्त
मकर४ मा। नारदः। कर्कनक्रहरिकुंभगतेर्के पूर्वपश्चिममुखानि गृहाणि। तौलिमेषवृषवृश्चिकयाते दक्षि
णोत्तरमुखानि च कुर्यात्। अन्यथा यदि करोति दुर्मतिर्व्याधिशोकनयननाशमश्नुते। मीनचापमिथु धन४
कन्या३ नांगनांगते कारयेन्न गृहमेव भास्करे। लल्लः। नीचस्थिते देवगुरौ न कुर्याद्विवाहचौलव्रतदीक्षणादी
न्। यात्राप्रतिष्ठाखनुवास्तुपूजा धनुस्थिते केंद्रकैषु गेचतद्वत्। वृद्धगार्ग्यः। मीने धनुषि सिंहे च स्थिते १४३
सप्ततुरंगमे। क्षौरमन्नं न कुर्वीत विवाहं गृहकर्म च। वास्तुनिबंधे। नीचस्थे वक्रसंस्थे अतिचरगते वा

रवि२
कुं२ मीन२

बालवृद्धास्तगे वा संन्यासो यज्ञयात्राव्रतनियमविधिः कर्णवेधोपि दीक्षा। मौंजीबंधोंगनानां परिण
यनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते च। तथा। गोदा
वर्युत्तरतो यावद्भागीरथी तटं च याम्यं। सिंहस्थिते देवगुरौ नैव विदध्याद्विवाहादि। आदिशब्द
र्या४ द्व्रतबंधादीनां ग्रहणं। गंगाया उत्तरे कूले गोदावर्यास्तु दक्षिणे। विवाहादौ देवगुरुः सिंहस्थोपि
न दुष्यति। नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे। गंडक्याः पश्चिमे पारे मकरस्थो न दोषकृत्।
रत्नमालायां। रविणा सन्निरन्ध्रे यांग्रहाणामस्तमुच्यते। ततो वार्धकं मौढ्यं बाल्यं प्रकीर्तितं।
यां२ मौढ्यात्पूर्वावस्थायां वार्द्धकं ऊर्ध्वावस्थायां बाल्यं। गौरावं प्राक् पंचाहं पश्चाद्दशदिनं स्मृतं। प्राग्दिशि पश्चि
मेद्धलं पश्चिमायां पंचवासरौ दृढं। प्रागुदिते पंचरात्रं वा। पश्चादुदिते दश दिनं शैशवं। एतच्छुक्रस्य

गुरोरपि बाल्यं दृढत्वं च तत्रैवोक्तं। शैत्यावं वा ईदृकं पक्षं प्राक्पश्चाच्च दृढहस्यते॥ आगुरुत्तः शिष्यरक्ष
स्त्रितयं सितत्स्यात्पश्चाद्दशाहमथ पंचदिनानि दृढ्ढः॥ प्राच्योऽउपक्रममरेंद्रगुरुस्तुपक्षे प्रागप्यवा
गपि वदंति वसिष्ठमुख्याः इति ग्रंथगौरवान्न बहु लिखितं। एवमुक्तप्रकारेण गुरुशुक्रयोरस्ताद
न्यतमस्मिन्काले शुक्लपक्षे मासे च गृहारंभं कारयीत॥ ॥ कोसिकस्यासिकायते ग्रामकामो जुहो
मि स्वाहा॥ अस्यां देवानामसि नामधेयमितः प्रजाताः पितरः परेताः॥ विरालज्जुहुक्त्र्यामकामो तदेवा
नां किंचनांतरेणस्वाहेति॥ संमार्जनाद्याज्यभागांतं कृत्वा कोसीतिद्वाभ्यां मंत्राभ्यां द्वे आज्याहुती
प्रतिश्रुताविधिनाहुत्वा कर्मसमाप्तिं कुर्यात्॥ जुहोतीत्युक्ते सर्पिः प्रतीयेतेति न्यायात्॥ अत्राज्यभाग ॥ १४८
स्विष्टकृतां विकल्पः॥ नाज्याहुतिषु नित्यावाज्यभागौ स्विष्टकृच्चेत्युक्तत्वात्॥ ततः॥ ॥ स्थूणागर्तान्खान

यित्वा॥ स्थूणागर्ताः स्थूणार्थं खातं नार्थं गर्तादरस्तात्पूर्वादिचतसृषु दिक्षु दिशो मध्ये चैकं गर्तं खान
यित्वा॥ एवं चतसृषु दिक्षु द्वारशाखानिमित्तं द्वौ द्वौ गर्तौ निखयौ मध्ये चैको गर्तः एवं नवगर्तान्खानयि
त्वा ततः॥ ॥ उदमंथानासिंच्य॥ तेषु नवसु गर्तेषु उदकमिश्राः सक्तवः उदमंथास्तानासिंच्य तेषां अ
सेचनं कृत्वा ततः॥ ॥ इमां विमिन्वे अमृतस्य शाखां मधोर्धारां प्रतरणीं वसूनां एनां शिशुः क्रंदत्या
कुमारएनां धेनुः क्रंदतु नित्यवत्सेत्युदुंबरशाखां घृतेनाक्तां दक्षिणे द्वार्ये गर्ते निदधाति॥ द्वास्नि
वौ द्वार्यौ तयोर्यो दक्षिणस्तस्मिन्द्वार्ये द्वारि स्थगर्ते इमां विमिन्व इति मंत्रेण व साऽहत्यं तेन घृते
नाक्तां सिक्तां उदुंबरशाखां पूर्वस्यां दिशि निदधाति स्थापयति॥ ॥ इमामुच्छ्रयामि भुवन
स्य शाखां मधोर्धारां प्रतरणीं वसूनां। एनां शिशुः क्रंदत्याकुमारएनां धेनुः क्रंदतु पाकवत्सेत्यु

स्थ२

त्तरतः ॥ इमामुच्छ्रयामीत्यनेन मंत्रेण वत्सा इत्यंतेन पूर्वस्यां दिशि उत्तरतो द्वितीयेगर्त्ते घृताक्तामौ
दुंबरीं शाखां निदधाति ॥ ७ ॥ एवं द्वयोर्द्वयोर्दक्षिणतः पश्चादुत्तरतः । एवमुक्तप्रकारेणाद्याभ्यां मंत्राभ्यां
यथाक्रमेण दक्षिणतो दक्षिणस्यां दिशि द्वे घृताक्ते उदुंबरशाखे निखनति । एवं पश्चात्पश्चिमायां
दिशि समंत्रे द्वे शाखे घृताक्ते निखनति । एवं उत्तरत उत्तरस्यां दिशि द्वे शाखे समंत्रके आदधाति । ए त्र४
वमष्टौ शाखाः पूर्वादिक्रमेण निखेयाः ॥ ८ ॥ इमामहमस्य वृक्षस्य शाखां घृतमुक्षंती मम्रते मिनो
मि । एनां शिशुः क्रंदत्याकुमारस्त्रा स्यंदंतां धेनवो नित्यवत्सा इति स्थूणाराजमुच्छ्रयति । मध्ये वर्त २४५
मानां स्थूणां स्थूणाराजः । सकलगृहस्य नारकत्वात् । इमामहमित्यनेन मंत्रेण वत्साः इत्यंते
न तं स्थूणाराजमुच्छ्रयति स्थापयति ॥ ९ ॥ एनं कुमारस्तरुण आवत्सो भुवनस्परि । एनं परिस्रुतः

कुंभ्या आदध्नः कलशैर्गमन् ॥ द्वितीयः खंडः ॥ २ ॥ ॥ इहैव स्थूणे प्रतितिष्ठ ध्रुवाश्वावती गोमती सी
लमावती क्षेमे तिष्ठ घृतमुक्षमाणे इहैव तिष्ठ निमिता तिल्विला स्यादिरावती मध्ये पोषस्य तिष्ठंतीं
मा त्वा प्रापन्नघायवः । उपहूता इह गाव उपहूता अजावयः । अथो अन्नस्य कीलाल उपहूतो गृ
हेषु नः । रथंतरे प्रतितिष्ठ वामदेव्ये प्रत्यस्व बृहति स्तभायेति स्थूणाराजमभिमृशति । एनं कुमा
र इत्यास्यंस्तभायेत्यंतेन षलवसानयुक्तेन मंत्रेण स्थूणाराजं मध्ये स्तंभं अभिमृशति तत्र संमर्श
नं करोति ॥ १० ॥ संमितस्य स्थूणाः संमृशति । संमितस्य संम्यक्निष्पादितस्य गृहस्य स्थूणाः स
र्वाः प्राच्यादिदिक्षु स्थिता वक्ष्यमाणैर्मंत्रैः संमृशति तासां संस्पर्शनं करोति ॥ ११ ॥ सत्यं च श्रद्धां चे
ति पूर्वां । सत्यं च श्रद्धां च इत्येताभ्यां मंत्राभ्यां पूर्वप्राक्तने शाखे क्रमेणाभिमृशेत् ॥ १२ ॥ यत्तस्य दक्षि

अपरे पश्चिम[illegible]तने शाखे क्रमेण २

णा चेति दक्षिणे। यज्ञश्च दक्षिणा चेत्येताभ्यां मंत्राभ्यां दक्षिणे दक्षिणतने शाखे क्रमेणाभि
मृशेत्॥छ॥ बलं चौजश्चेत्यपरे। बलं च ओजश्चेत्येताभ्यां मंत्राभ्यां [illegible] निमृशे
त्॥छ॥ ब्रह्म च क्षत्रं चेत्युत्तरे। ब्रह्म च क्षत्रं चेत्येताभ्यां मंत्राभ्यां उत्तरे उत्तरस्य शाखे अभिमृशेत्॥छ॥
श्रीस्तूपो धर्मः स्थूणाराजः। अभिमृशेदित्यनुवर्तते। श्रीस्तूप इत्यनेन स्तूपं वास्तुमध्यमभिमृशे
त्। धर्मः स्थूणाराज इत्यनेन स्थूणाराजो मध्यस्तंभस्तं अभिमृशेत्॥छ॥ अहोरात्रे द्वारफलके।
अहोरात्रे इत्येताभ्यां मंत्राभ्यां द्वारफलके द्वाराणां फलके अधःकाष्ठं उत्तरकाष्ठं च क्रमेणाभिमृ १४६
शेत्। अत्राप्यभिमृशेदित्यनुवर्तते॥छ॥ संवत्सरोपिधानं। अभिमृशेदित्यनुवर्तते। संवत्सर इत्यने
न मंत्रेणाऽपिधानं कपाटमभिमृशेत् क्रमेण॥छ॥ उद्धासमुद्र इत्यस्य क्रमं अश्मानं स्तूपस्याधस्ता

न्निखनेत्। उद्धासमुद्र इत्यनेनाभ्यक्तं घृताक्तं अश्मानं पाषाणं स्तूपस्य स्थूणाराजस्यालवालस्या
धस्तान्मूले निखनेत्। उद्धेत्यस्य प्रतिरथ ऋषिः। सुपर्णो देवता। त्रिष्टुप् छंदः। उद्धासमुद्रोऽरुषः सुप
र्णः॥ स्त्र॥ ॥तृतीयः खंडः॥३॥ ॥वास्तोष्पतीये कर्मणि। वास्तोष्पतीये गृहप्रवेशाख्यकर्मणि विधिं
व्याख्यास्याम इति वाक्यशेषः॥छ॥ अग्निं दधामि मनसा शिवेनायमस्तु संगमनो वसूनां मा नो हिंसीः
स्थविरं मा कुमारं त्रातो नो भव द्विपदे शं चतुष्पदे इति गृह्यमग्निं बाह्यत उपसमाधाय। पूर्वनिवासस्थ
लात्। प्रवेशेन नवेश्मन इत्युक्त्वा हृद्धिश्राद्धं विधाय। आवसथ्याग्निमानीय नूतनगृहस्य बाह्यतोऽग्निं
दधामीति मंत्रेणाग्निमुपसमाधाय उपस्थाप्य वह्निमाणं कुर्यात्। प्राकृतस्याग्निं प्रणयामीति मंत्रस्या
रासार्थं अग्निं दधामीति ग्रहणं। संपूर्णमंत्रस्य कथनं अन्यत्र मंत्रमध्ये ऊहाकरणज्ञापनार्थं पुनः पठनं॥

॥७॥ प्रागग्रेष्वनवेषु कुशेषूदकुंभं नवं प्रतिष्ठाप्य। प्राकूत्रग्राणि येषां तेष्वनवेष्वग्रेषु कुशेषूदकुं
भं नवं नूतनमुदकुंभमपां पूर्णं कलशमश्मेरुत्तरतः प्रतिष्ठाप्य। उत्तरत उपाचार इति न्यायादुत्तरतः
स्थापनं॥८॥ अरिष्टा अस्माकं वीरा मा परासेचि नो धनमित्यभिमंत्र्य। अरिष्टा इत्यारभ्य धनमि
तेन मंत्रेण तमुदकंस्थमुदकुंभमनामिकाग्रेणाभिमंत्र्य संस्पृश्य। कर्मप्रदीपोऽस्पृशन्नाभि
य५ कायेण क्वचिदालोकेन्नपि। अनुमंत्रणीयं सर्वत्र सदैवमनुमंत्रयेत्॥९॥ रथंतरस्य स्तोत्रियेण
पुनरादायं ककुप्कारं तिस्रः पूर्वाह्णे जुहोति। अभि त्वा शूरेत्येतस्य तृचस्य रथंतरस्तोत्रियं संज्ञा। १४१
अभि त्वा शूरा नित्वा पूर्वपीतय इति स्तोत्रियानुरूपौ प्रगाथौ रथंतरस्येति सूत्रे सूत्रितं। प्रगाथ
स्तु द्वाभ्यामृग्भ्यां भवति। शौनकः। अथ प्रगाथा बृहतीसतोबृहत्यौ बार्हत इति। बृहती पूर्वा ककुब्वा

च१ सतोबृहत्युत्तरा। तं प्रगाथ इत्याचक्षते इति सूत्रे। स्तोत्रियस्तुतिस्त्रिभिर्ऋग्भिः संततानि मिलितानि भ
र्भवति प्रगाथातिरेकेण। प्रगाथस्तु द्व्यृचात्मकत्वाद्विहारेण तृचात्मकत्वोद्विहारेण तृचात्मकः
स्तोत्रियो भवति। तथा सूत्रे सूत्रितं च। तृचास्तोत्रियानुरूपाः प्रगाथान्यविहाय्येति। विहारस्तु ए
वं। पूर्वबृहत्याश्छंदस्काम्ऋचमविहृतां उक्त्वा। ततस्तस्याश्चतुर्थं पादं उत्तरस्याः सतोबृहत्याः प्रथ
मेन पादेन संधायावस्येत्। ततो द्वितीयाया द्वितीयेपादेवसानं विधेयं। एवं द्वितीया ऋक्। ततो द्वि
न तीयाया द्वितीयपादेन तृतीयं पादं संधायावसानं विधेयं। ततो द्वितीयाश्चतुर्थेपादेवसानं। एवं या१
तृतीया ऋक्। एवं विहारेण तिस्रः ऋचो भवंति। तथा च सूत्रे। बृहतीं शस्त्रोत्तमं प्रत्यादायोत्तरस्याः प्र
थमेनावसाय द्वितीयेन प्रणुत्य तं प्रत्यादाय तृतीयेनावसायोत्तमेन प्रणौति ता स्तिस्रो भवंति। बृ

सू
हतीपूर्वोत्तरे ककुभाविति।अथ यद्बृहत्या प्रतिपद्यते बार्हतो वा एष य एष तपति तदेनं स्वेन रूपे
ण समर्द्धयति द्वितिस्रः करोति पुनरादायं तत्प्रजात्यै रूपमिति श्रुतेः रथंतरस्य स्तोत्रियेणानिरुक्तेन
तत्प्रगाथलक्षणेन प्रगाथं ककुप्कृत्वा इति ककुप्कारं पुनरादीयते तत्पुनरादायं विहारोक्तमार्गेण
तिस्र ऋचः कृत्वा तानि स्तोत्रियः निर्लोपिः पूर्वोक्ते आज्याहुतिधर्मेणानुहुयात्।पाक्षिकाज्यभागौ स्विष्टकृ
च्च।नाज्याहुतिषु नित्या वाज्यभागौ स्विष्टकृच्च स्रुक्तत्वात्।यथा।अभित्वा॰न स्तुषः स्वाहा।कारो तेदे स्य.ला१४
ममंत्राणामिति सूत्रात्।ईशानमिंद्र तस्थुषो न त्वावाँ अन्यो दिव्यो न पार्थिवः न जातो न जनिष्यते स्वा
हा।नजातो न जनिष्यते अश्वायंतो मघवन्निंद्र वाजिनः।गव्यंतस्त्वा हवामहे स्वाहा।वसिष्ठऋषिः इंद्रो दे १४८
ता।बृहतीछंदः।उत्तरयोः ककुभौ।।विहारधर्मत्वात्।जुहोति स्रुक्के सर्पिः प्रतीयेते तिन्यायादाज्याहुतयः

स्य
स्विष्टकृदादिकर्मशेषं समापनं।।८।।वामदेव्यं मध्यंदिने।स्तोत्रियेण तिस्रो जुहोतीत्यनुवर्तते।वामदेव्यं
कया नश्चित्र इति स्तोत्रियेण विकृतेन मध्यंदिने मध्याह्ने तिस्र आज्याहुतीर्जुहोति।वामदेव्यमैत्रावरु
णस्य कया नश्चित्र इति सूत्रे सूत्रितं।अत्र उप्रगाथा नावाद्विहारेन।स्तोत्रियत्वात्तिस्र ऋचः।कया नश्चि
त्रः कया त्वं न इति स्तोत्रियानुरूपाविति सूत्रे सूत्रितत्वात्।ऋचाः स्तोत्रियानुरूपाः प्रगाथान्यरिहाय्ये
तिसूत्रे।वामदेवऋषिः इंद्रो देवता गायत्री छंदो द्वयोः।अभीषुण इत्यस्याः पादनिचृद्गायत्री।कयान
श्चित्र आनुवत्।।९।।तस्मिन्नेवाग्नौ आज्यभागौ तं कृत्वा कया नश्चित्र इत्याज्याहुतयस्तिस्रो हुत्वा स्विष्ट
कृदादिशेषं कर्म समापनं।आज्यभागः स्विष्टकृतो विकल्पः पूर्ववत्।।८।।बृहतोपराह्णे।आज्यभागौ
तं कृत्वा तस्मिन्नेवाग्नौ ततः स्तोत्रियेण पुनरादायं ककुप्कारं तिस्रो जुहोतीत्यनुवर्तते।अपराह्णे बृह

तःस्तोत्रियेणत्वामिद्धीत्यनेनविहारमार्गेणतिस्रस्त्वचःकृत्वापूर्ववत्।आज्याहुतीर्जुहोति।त्वामिद्धि
हवामहेत्वंह्येहिचेरवइतिबृहतइतिसूत्रेसूत्रितं।त्वामिद्धिषलूनाप्रागाथमितिशौनकोक्तत्वाच्च।
त्वामिद्धिहवामहे॰स्ववर्तःस्वाहा।त्वांकाष्ठास्ववर्तःस॰॰त्वंनश्चित्रवज्रहस्तधृष्णुया।महस्तवानोअ
द्रिवःस्वाहा॥२॥महस्तवानोअद्रिवोगामश्वंरथ्यमिंद्रसंकिर।सत्रावाजंनजिग्युषेस्वाहा॥३॥शंयु
र्ऋषिः।इंद्रोदेवताबृहतीछंदः।उत्तरयोःककुभौ।विहारधर्मत्वात्।ततःस्विष्टकृदादिकर्मसमापनं।आ
ज्यभागस्विष्टकृतांविकल्पःपूर्ववत्॥७॥महाव्याहृतयश्चतस्रोवास्तोष्पतइतितिस्रोमीवहावास्तो
ष्पतेवास्तोष्पतेध्रुवास्थूणासौविष्टकृतीदशमीस्थालीपाकस्यचरोःरात्रौएतादशाहुतयोहोतव्याः॥ २४७
स्थालीपाकस्येत्युक्तत्वाद्गृहगासादनप्रोक्षणानिनभवंति।वास्तोष्पतयेजुहुयादित्युक्तामिश्रतिग्रहणं।

रात्रौ।२

आसादनप्रोक्षणेतथैवभवतः।विकृतिलाक्षसप्तदशासमिधः।आज्यभागौहुत्वा।ततश्चतुर्गृहीत
धर्मेणनवाहुतयःस्थालीपाकस्य।चतस्रोमहाव्याहृतयोऽमूरादयःप्रसिद्धाः।वास्तोष्पतेप्रतीतिति
स्रः।अमीवहेत्येका।वास्तोष्पतेध्रुवेत्येका।एवंनवाहुतयः।दशमीआहुतिःसौविष्टकृती।स्विष्टकृ
तश्चयंसौविष्टकृती।दशमीग्रहणंसंदेहव्युदासार्थं।वास्तोष्पतेप्रतीतिचतसृणांवसिष्ठऋषिः।वा
स्तोष्पतिर्देवतात्रिष्टुप्छंदः।अमीवहेत्यस्यगायत्री।आद्यागायत्रीत्युक्तत्वाच्छौनकेन।वास्तोष्पते
प्रतिजानीह्यस्मान्ऋचः३।अमीवहावास्तोष्पतेऽश्नं।वास्तोष्पतेध्रुवेत्यस्याऋषिर्विविक्तऋषिः।वास्तोष्प
तिर्देवताबृहतीछंदः।वास्तोष्पतेध्रुवास्थूणांत्र१एकासौविष्टकृती।चतस्रोव्याहृतयः।एवंमहा
व्याहृतयोदशाहुतयः।एवंपूर्वाह्णमध्याह्नापराह्णरात्रिकर्माणिएकस्मिन्नहनिभिन्नतंत्रकाणि।

त्रिप्रत्र।१

सकृत्प्रतिष्ठिते ग्रामे कर्माणि कार्याणि। ततः स्विष्टकृत्। ततो वास्तुदेवतानां स्थापनप्रकारो वास्तुशा
स्त्रे। देवताः पंचकं तत्र चत्वारिंशत्समन्विताः। पूजयित्वा यथान्यायं तानाह शृणु हस्तुपाविशोत्। एकाशीति
पदं कृत्वा रेखाभिः कनकेन वा। पश्चात्पिष्टेन उल्लिखेत्सूत्रेणालोक्य सर्वतः। दश पूर्वापरा रेखा दश
वै चोत्तरायताः। सर्ववास्तुविभागेषु विज्ञेया नवका नव। एकाशीतिपदं कृत्वा वास्तुवित्सर्ववास्तुषु।
पदस्थान्पूजयेद्देवांस्त्रिंशत्पंचदशैव तु। द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चांतस्त्रयोदश। तत्र मंडल
प्रकारः। तत्र समभूमौ सुधालिप्तानि समांतरालानि दश सूत्राणि पातयेत्। तथैव दश दक्षिणोत्त
राणि यतानि ततश्च नवकोष्ठकासु नवपंक्तिषु सर्वमेकाशीतिपदं मंडलं संपद्यते। तत्र मध्यमको २५०
ष्ठकनवकमुत्सृज्य एकमेव पदं विदध्यात्। ततुरःस्थितं च पार्श्वस्थितकोष्ठद्वयान्यामेकीकुर्यात्।

आग्नेयं त्वेकमेव। एवं दक्षिणपश्चिमोत्तराणि त्रीणि त्रीण्येकीकृत्य कोणेष्वेकैकं परित्यज्य ब्रह्मस्था
न२ नस्य परिधिं निष्पादयेत्। ब्रह्मस्थ ईशानादिकोणेष्वेकैककोष्ठकान्येवं चत्वारि पदानि परित्यज्य प्राच्या
दिदिक्षु कोष्ठकाभि श्रेणी [illegible] भूतानि पंच पंच पदानि विदध्यात्। ततश्च पंचचत्वारिंशत्पदानि निष्पद्य
ते। मध्ये नवपदस्त्वेकश्चत्वारस्त्रिपदाः स्मृताः। विंशतिस्त्वेकपदिकास्तावंतो द्विपदाः स्मृताः। एवं प्रति
ष्ठिता देवाश्चत्वारिंशाच्च पंच च। नामतस्तान्प्रवक्ष्यामि स्थानानि च निबोधत। ईशानकोणादिसुरान्पू
जयेत्क्रमशो नव। शिखी चैवाथ पर्जन्यो जयंतः कुलिशायुधः। सूर्यः सत्यो भृशश्चैव आकाशो वायुरेव च।
पूषा च वितथश्चैव बृहत्क्षत्रयमावुभौ। गंधर्वो भृंगराजश्च मृगः पितृगणस्तथा। दौवारिकोथ सुग्रीवः पु
ष्पदंतो जलाधिपः। असुरः शोषपापौ च रोगो हि मुख्य एव च। भल्लाटः सोम नागश्च अदितिश्च दितिस्त

ग२

था ॥ बहिर्द्वात्रिंशदेते तु तद्दंतश्चतुरः स्मृताः ॥ आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥ अर्यमा सविता चै
व विवस्वान्विबुधाधिपः ॥ मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥ अष्टमस्त्वापवत्सस्तु परितो ब्र
ह्मणः स्मृताः ॥ अत्र द्वात्रिंशत्पदे बहिः परिधौ प्रथममीशानकोणे शिखिनं संस्थाप्य प्रदक्षिणक्र
मेण पर्जन्यादिदेवान्स्थापयेत् ॥ तदंतश्चतुर इति ॥ पर्जन्यात्पश्चिमे एककोष्ठके पदे आपः ॥ आका
शात्पश्चिमे सावित्रः ॥ दौवारिकात्पूर्वस्मिञ्जयः ॥ पापात्पूर्वस्मिन्रुद्र इति ॥ बहिःपरिधिरंतश्चतु
रो देवान्स्थापयेत् ॥ ततो ब्रह्मण इति मध्यपदस्थितस्य ब्रह्मणः पुरस्तादर्यमणं संस्थाप्य प्रदक्षि
णक्रमेणाष्टौ देवान्स्थापयेत् ॥ अथोपसंहरति ॥ आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ॥ पदिका २५१
नां तु वर्गोऽयमेवं कोणेष्वशेषतः ॥ तन्मध्ये तु बहिर्विंशद्द्विपदास्ते च सर्वदा ॥ अर्यमा च विवस्वांश्च

तएकं२ चत्वारि३

मित्रः पृथ्वीधरस्तथा ॥ ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वतः ॥ पदिकानामित्यादि ॥ अयमेकप
दानां पंचानां देवानामीशानकोणे वर्गः संपद्यते ॥ एवमाग्नेयादिकोणेष्वपि एकपदाः पंच पंच देवता
भवंति ॥ तन्मध्ये बहिरिति कोणमध्ये ब्रह्मा ॥ परिधौ विंशतिर्द्विपदा भवंति ॥ अर्यमादयश्चत्वारस्त्रि
पदाः ॥ मध्ये ब्रह्मा नवपद इति ॥ एवं पंचचत्वारिंशद्देवानां स्थापनं पूजनं च विधेयं ॥ पंचचत्वारिंशद्देवा
नां नैवेद्यानि हेमाद्रितो ज्ञेयानि ॥ एवं पूर्वाह्णमध्याह्नापराह्णरात्रिकर्माणि तस्मिन्दिने कर्तव्यानि ॥ नि
त्यानि ॥ यद्येतानि चत्वारि कर्माण्येकतंत्रेण क्रियंते तदा प्रातर्मध्याह्नेऽपराह्णे सायं वा तदातीतका
लानामुत्कर्षेणागतकालानां वापकर्षेण प्रायश्चित्तपूर्वकं कार्याणि ॥ व ॥ ज्येष्ठं पुत्रमादाय जायां
च सह धान्यः प्रपद्येत ॥ ततः सुदिने नूतनगेहे प्रवेशं कुर्यात् ॥ ज्येष्ठं पुत्रमादायाग्रे कृत्वा जायां स्त्रियं चाग्रे

कृत्वा सहधान्योधान्यान्यूँन्नानि तैः सहितः प्रपद्येत प्रविशेत्। ततो यः कुंभः पूर्वं स्थापितो गृहमध्ये
संयजमानेन पूर्णो धार्यः। जायया वर्द्धापनपात्रं नालिकेरकुंकुमश्वेतपुष्पदूर्वासहितं अक्षतयुक्तं
च धार्यं। ज्येष्ठपुत्रेण देवतापीठं गृहीतं नेरिक्तं च धार्यं। स्नुषया कुलदीपको धार्यः। कनिष्ठपुत्रा भ्रात्रा
दयः शिष्याश्च धान्यान्यन्नगोमहिष्योघश्वरथादिकं गृहीत्वा प्रविशंति। एतल्लौकिकाचारान्मंत्रलिं
गाच्चानुष्ठानं। सहपशुभिः सहरायस्पोषेण सहयन्मे किंचास्ति तेनेति मंत्रलिंगं। ततो वक्ष्यमाणमं
त्रेण गृहं प्रविशेत्॥ ॥ इंद्रस्य गृहाः शिवा वसुमंतो वरूथिनस्तानहं प्रपद्ये सह जायया सह प्रजया
सह पशुभिः सहरायस्पोषेण सहयन्मे किंचास्ति तेन। अनेन मंत्रेण नवगृहे प्रविशेद्यजमानः। त १५२
तः प्रति दैवतं वास्तुदेवतानां द्विजभोजनसंकल्पः। सप्तकादिकर्मसमापनं॥ चतुर्थः खंडः॥४॥ ॥

ग्रामं ग्राम्यं मंत्रिवं शिवं क्षेमाय वः शांत्यै प्रपद्येऽनयन्नोऽस्तु ग्रामो माऽरण्याय परिददातु विश्वमहाय मा
परिदेहीति ग्रामान्निष्क्रामन्नायदि ग्रामाद्ग्रामांतरं गमनं केनचित्प्रयोजनेन तदा ग्रामं ग्राम्यमित्येव
मादिकं परिदेहि इत्यंतं मंत्रं निष्क्रामन्निष्क्रमणं कुर्वन्नूजपेत्॥ ॥ अरण्य ग्रामाय परिददातु महं
विश्वाय मा परिदेहीति ग्रामं प्रविशन्नरिक्तः। अरिक्तः अरिक्तः समित्पुष्पकुशादिसहितो गृहपति
र्यदा प्रयोजनं कृत्वा पुनर्ग्रामं प्रविशति तदा अरण्यमित्यारभ्य परिदेहि इति ग्रामं प्रविशन्प्रवे
शनं कुर्वन्जपेत्॥ ॥ गृहाज्ञद्रांसुमनसः प्रपद्ये वीरघ्नो वीरतरः सुवीरान् इरां वहंतो घृतमुक्षमा
णा अन्वेष्वहंसुमनाः संविशेयमिति सदा प्रवचनीयः। गृहान्नद्रानित्येवमादिकं संविशेयमित्यंतं मं
त्रं गृहे प्रविशता गृहिणा सदा सर्वदा प्रवचनीयः प्रवक्तव्यः। एतद्विधानं अन्यं संयुज्य विधीयमानत्वा स्वा

ग्निकानां निरग्निकानाम नाहिताग्नीनां न भवति॥ क॥ पंचमः खंडः॥ ५॥ ॥ अनाहिताग्निः प्रवत्स्यन् गृहान्स
मीक्षते। अनाहिताग्निः कृतावसथ्योऽगृहपतिः कार्यवशात्प्रवत्स्यन्प्रवासं कुर्वन् गृहान् निवासस्थाना
नि समीक्षते वक्ष्यमाणेन मंत्रेण पश्यतीत्यर्थः॥ क॥ इमान्मे मित्रावरुणौ गृहान्गोपायतं युवं। अविनष्टा
न्विक्षुतान्पूषैनानभिरक्षत्वस्माकं पुनरागमात्। इमानित्यारभ्यागमादितीमं मंत्रं जपन्नपश्यति गृहा
म५ न्॥ क॥ अपि पंथामगन्महीति च जपति। गृहावलोकनानंतरं अपि पंथामित्यृचं जपति पथि स्वस्त्ययनार्थं।
चकारादन्योऽपि मंत्राः कृतिकर्दितादिकाः पथि स्वस्त्ययनकारका जपेत्। ऋजिश्वा ऋषिः विश्वेदेवा १५३
देवता अनुष्टुप्छंदः॥ अपि पंथामगन्महि स्वस्ति॥ षष्ठः खंडः॥ ६॥ ॥ अथ प्रोष्यायन्गृहान्समीक्षते। अनाहि
ताग्निरित्यनुवर्त्तते। अथ प्रवासकरणानंतरं प्रोष्य प्रवासं कृत्वा आयन् आगच्छन् गृहान्समीक्षते पश्य

ति अनाहिताग्निर्वक्ष्यमाणेन मंत्रेण॥ क॥ गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि। ऊर्जं बिभ्रद्वः
सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥ येषामध्येति प्रवसन्येषु सौमनसो बहुः॥ गृहानुपह्वयाम
हे ते नो जानंतु जानतः॥ उपहूता इह गाव उपहूता अजावयः॥ अथो अन्नस्य कीलाल उपहूतो गृहेषु नः॥ गृ =७३
हा मेत्यारभ्य गृहेषु न इति मंत्रकलापेन गृहान्समीक्षते प्रवासादागतो यजमानः॥ क॥ अयं नो अग्निर्भ
गवानयं नो नगवत्तरः॥ अस्योपसद्य मा रिषामायं श्रैष्ठ्ये दधातु न इति गृह्यमग्निमुपस्थाय॥ अयं न इ
त्यारभ्य दधातु न इति मंत्रेण गृहे भवो गृह्याग्निरावसथ्याख्यस्तमुपस्थाय उपस्थानं कृत्वा ततः गृह्याग्र
हणादाहिताग्नेरपि श्रौतोपस्थो नानंतरं गृह्याग्नेरप्युपस्थानार्थः॥ क॥ कल्याणीं वाचं प्रब्रूयात्। कृ
तापराधेष्वपि पुत्रादिषु कल्याणीं कल्याणयुक्तां वाचं वाणीं प्रब्रूयात्। क्रोधवशाद्गालिप्रदानादि

प नविधेमिति नियमः॥ ॥७॥ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इति पाद्यं प्रति
ग्रहः॥ विराजो दोहोसीति मंत्रेण पाद्यं पादार्थमुदकं शिष्यपुत्रादिनिर्दिष्टं तत्प्रतिग्रहणे अयं मंत्रो ज्ञेयः॥ ॥
सप्तमः खंडः॥ ७॥ ॥ अनाहिताग्निर्नवं प्राशिष्यन्नाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यः स्वाहाकारेण
गृह्येग्नौ जुहुयात्॥ अनाहिताग्निः कृतावसथ्यो यजमानो नवं नवान्नं व्रीहियवश्यामाकरूपं प्राशिष्यन्न
न्नेन कर्तुमिच्छन् आग्रयणदेवताभ्यः ऋतुकाभ्यः स्विष्टकृच्चतुर्थीभ्यः स्विष्टकृद्देवचतुर्थी यासां ताभ्य
स्तिसृभ्यो देवताभ्यः इंद्राग्नी विश्वेदेवा द्यावापृथिवी एतन्नामकाभ्यः स्वाहाकारेण नाममंत्रेण गृह्ये
ग्नौ आवसथ्याख्ये जुहुयात् होमं कुर्यात्॥ यत्रायाति स होतव्यः स एवाग्निः श्रुतेरित्युक्तत्वात्॥ प्रथमा १५४
रंभे त्रिष्वपि आग्रयणेषु एकमेवाभ्युदयिकं कुर्यात्॥ कारिका॥ सर्वेषाग्रयणेष्वेकं संस्कारो ह्येक एव स इति॥
रिति२

अनाहिताग्निर्ग्रहणादाहिताग्नेरेतदाग्रयणं नवान्नेष्टानंतरं भवति॥ गृह्येग्नाविति ग्रहणात् लौकि
के॥ स्वाहाकारेणेत्युक्तत्वाच्छ्रौतमंत्रनिवृत्तिः नाममंत्रैरेव होमः॥ व्रीहियवयोराग्रयणे एतदुक्तं देवता
त्रयं भवति॥ श्यामाकाग्रयणे एक एव सोमो देवता॥ अत्र स्थालीपाकविधानेनाग्रयणत्रयमपि विधे
यं॥ ग्रहणसादनप्रोक्षणेषु॥ इंद्राग्निभ्यां विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां जुष्टमिति व्रीहियवयोराग्र
यणे॥ श्यामाकाग्रयणे सोमाय जुष्टमित्यादि॥ प्रधानहोमे॥ इंद्राग्निभ्यां स्वाहा॥ विश्वेभ्यो देवेभ्य उपांशु॥
स्वाहेत्युच्चैः॥ द्यावापृथिवीभ्यां॥ उपांशु॥ स्वाहेत्युच्चैः॥ ततः स्विष्टकृत्॥ इति व्रीहियवयोः॥ सोमाय स्वाहा॥
स्विष्टकृत्॥ इति श्यामाके॥ सौमी श्यामाके इष्टिर्वैणुयवी चेति खंडे सूत्रितं॥ वैश्वदेवद्यावापृथिवीयो
श्चोपांशु इति॥ अथात आग्रयणस्येत्यारभ्य त्रिभिः खंडैः ऋतावुक्तं॥ अत्र व्रीहियवयोः प्रथमजो वत्सो

दक्षिणा।श्यामाकाग्रयणेमधुपर्केदक्षिणाभवति।अथयत्प्रथमजंगांददाति।तथा।अथयन्मधुप
र्केददातिइतिश्रुतौ।होमोत्तरंनवान्नप्राशनेविधिमाह।।॥प्रजापतयेत्वाग्रहंगृह्णामिमह्यंश्रियेम
ह्यंयशसेमह्यमन्नाद्यायेतिप्राशनार्थीयमभिमंत्र्य।प्रजापतयेत्वेत्यारभ्यान्नाद्यायेत्यनेनमंत्रेणप्रा
शनार्थीयंप्राशनार्थस्येदंप्राशनार्थीयंहविःशेषंहस्तेनाभिमंत्र्यसंस्पृश्यततःस्पृशन्ननामिका
ग्रेणकृविदालोकयन्नपि।अनुमंत्रणीयंसर्वत्रसदैवमनुमंत्रयेदितिकर्मप्रदीपे।।॥भद्रान्नःश्रेयः
समनैष्टदेवास्त्वयावशेनसमशीमहित्वा।सनोमयोभूःपितवाविशस्वशंनोभवद्विपदेशंचतुष्पदेइ
त्यग्निरन्युस्त्रिश्चत्रिःप्राश्नाति।हुतशेषस्यभागत्रयंकृत्वाप्रथमतःस्थाप्य।भद्रान्नइतिमंत्रेणचतुष्प १५५
दइत्यंतेनअग्निरुदकेरन्युद्धृत्यअन्युद्धरणंसेचनंकुर्वन्त्रिःप्राश्नातियजमानः।कर्मण्ययस्कान्मंत्रथ

त्कमितिन्यायात्प्रथमंभागंप्रजापतयइत्यनेनाभिमंत्र्यभद्रान्नइत्यनुस्यूतन्प्राशयेत्।एवंद्वितीयं
तृतीयंच।प्राशनप्राशनांतेआचमनंअविरोधात्।अत्रत्रिःशब्दःसिंहावलोकनन्यायेनोभयत्राऽ
न्युद्धरणेप्राशनेवासंबध्यते।।॥अमोसिप्राणतदृतंब्रवीम्यमोसिवीडंसिप्रविष्टः।सामजरांरोगम प्र१
पनुद्यशरीरादमामैधिमामृधामइंद्रेतिहृदयदेशमभिमृशति।अमोसीत्यारभ्यमइंद्रेत्यनेन
मंत्रेणप्राशनानंतरंहृदयदेशंप्रदेशमभिमृशतिस्पृशति।उदकस्पर्शः।आलभ्यात्मानमेवचेत्युक्त
त्वात्।आत्मानंचालभ्योपस्पृशेदपइतिकात्यायनः।।॥नाभिरसिमाबिभीथाःप्राणानांग्रंथिरसि
माविस्रसइतिनाभिं।अभिमृशतीत्यनुवर्तते।नाभिरसीत्यारभ्यविस्रसइतिमंत्रेणनाभिमभिमृश मृ२
ति।।॥भद्रंकर्णेभिरितियथालिंगं।अभिमृशतीत्यनुवर्तते।भद्रंकर्णेभिरितिमंत्रेणकर्णौद्वि

सर्वांगेष्वग्निमर्शनं यथालिंगं अग्निमृशति। नदंकऐभिरित्यस्य गोतम ऋषिः। विश्वेदेवा देवता त्रि
ष्टुप्छंदः। नदंकऐभिर्निःसृष्णुयामृदेवाः ऋ१॥ क॥ तच्चक्षुरित्यादित्यमुपस्थाय। तच्चक्षुरिति मंत्रेणादि
त्यं सूर्यमुपस्थाय ततः कर्मशेषं समापयेत्। तच्चक्षुरिति मंत्रस्य वसिष्ठ ऋषिः सूर्यो देवता। पुर उष्णि
क्छंदः। तच्चक्षुर्देवहितं ऋ१॥ ॥अष्टमः खंडः॥८॥ ॥परिवः सेन्या ह्यधाद्या द्वंजं तु घोषिण्यः समानस्तस्य
गोपतेर्गावो अन्नोन वो रिषत्। पूषा गा अन्वेतु न इति गाः प्रतिष्ठमाना अनुमंत्रयेत। अग्रेऽश्वो ऋग्गे
वक्ष्यति तदर्थं गोसंबंधि कर्म वदति। परिव इत्यस्य ऋषिर्दित्यं तेन मंत्रेण। पूषा गा इत्यृचा सहितेन
गार प्रतिदिनं प्रतिष्ठमाना अवर्ती गंतुं प्रवृत्ता अनुमंत्रयेत। हस्तसंस्पर्शं कुर्यात्। असंयुज्य विधीयमा १५६
नत्वाद्दाहितानेरनाहिता येऽश्वेत द्भवतीति ज्ञायते। पूषा गा इत्यस्य भरद्वाज ऋषिः। पूषा देवता गायत्री

छंदः। पूषा गा अन्वेतु नः ऋ१ परिपूषेति परिक्रांतासु। अनुमंत्रयेदित्यनुवर्त्तते। परिक्रांतासु गोच
रभूमौ परिक्रमणं गमनं कुर्वत्सु गोषु परिपूषेत्यनया अनुमंत्रयेत्। आलोकयेत्। कविंदालोकयन्न
पीति कर्मप्रदीपे। पूर्वोक्तान्येव ऋषिदैवतछंदांसि। परिपूषा परस्तात् ऋ१ छः॥ यासामूधश्चतुर्विलं मधोः
पूर्णं घृतस्य च। ता नः संतु पयस्वतीर्बह्वीर्गोष्ठे घृताच्य इत्या गावो अग्मन्निति च प्रत्यागतासु अनु
मंत्रयेदित्यनुवर्त्तते। यासामूध इति मंत्रेण आ गावो अग्मन्निति सूक्तेन प्रत्यागतासु गोचरभूमौ गा
त्वा आगतासु गोषु अनुमंत्रयेद् आलोकयेत्। यासामूध इत्यस्य शबर ऋषिः गावो देवता अनुष्टुप्छंदः
पूर्वोक्तौ मंत्रौ। आ गाव इति सूक्तस्य भरद्वाज ऋषिः। गावो देवता द्वितीयाया इंद्रो देवता षष्ठीसप्तम्योः
सोमो देवता। शेषाणां चतसृणां प्रथमा तृतीया चतुर्थी पंचमीनां गावो देवता। प्रथमा त्रिष्टुप् द्वितीया
अर

तृतीयाचतुर्थ्योर्जगत्यः।शेषास्त्रिष्टुभः।आगावोअग्मन्नुतभद्रमक्रन्निति॥८॥उत्तमाममाकुर्वन्त।
अनुमंत्रयेदित्यनुवर्त्तते।आगावइतिसूक्तस्यात्रमामष्टमीमृचमुपेदमित्येतां।अमाशृहेगोष्ठेकुर्वन्त्य
नुमंत्रयेत्।आलोकनंकरोति।अमादामा।हविरितिष्टहनामसुपागात्।उपेदमित्यस्यानरद्वाजऋ
४ पादानां षिः।पाक्तत्र्याएणंगावोदेवता।अंत्यपादस्येंद्रोदेवता।अनुष्टुप्छंदः।उपेदमुपपर्चनेनंस्त्र॥९॥मयो
भूर्वातइतिसूक्तेनगोष्ठगताः।अनुमंत्रयेदित्यनुवर्त्तते।मयोभूरितिचतुर्ऋचात्मकेनगोष्ठगताःप्रा
प्तागावोऽनुमंत्रयात।येगत्यर्थास्तेप्राप्त्यर्थास्तेज्ञानार्थाधातवः।मयोभूरितिसूक्तस्यशबरऋषिः।गावो
देवताः।त्रिष्टुप्छंदः।अस्मिन्सूक्तेयासामूधइतिद्वेऋचौखिलेनवतः।यासामूधउपमेत्वित्यनयोर्ऋचोर्गावो १५९
देवतेपूर्वोक्तेः।उपमेत्वस्याःपङ्क्तिश्छंदः।यासामूधइत्यनुष्टुप्।एवंमयोभूर्वातइतिसूक्तेनद्वौमयोभू

पार्श्व३

र्वातोअभिवातूस्राः॥१०॥ ॥नवमःखंडः॥९॥ ॥याफाल्गुन्याउत्तरामावास्यासारेवत्यासंपद्यते
तस्यामंकर्णलक्षणानिकारयेत्।फाल्गुन्याःपौर्णमास्याउत्तरायाअमावास्यासाऽमारेवत्यारेवतीनक्षत्रे
णसंपद्यतेसंपन्नायुक्ताभवतितस्याममायांगवांकर्णादिषुअंकलक्षणानिसांकेतिकानिचिह्नानि
दात्रादिनिर्वक्ष्यमाणमंत्रेणकारयेत्।इत्यादिदिनि॥१॥भुवनमसिसहस्रपोषमिंद्रायत्वाअवोद
य५ दत्।अक्षतमस्यरिष्टमिलान्नंगोपानंयावतीनामिदंकरिष्यामिभूयसीनामुत्तमांसामांक्रियास
मिति।भुवनमित्यारभ्यक्रियासमित्यंतेनमंत्रेणगवांचिह्नंकुर्यात्।अकबद्धत्वेमंत्रावृत्तिःकार्या॥
॥२॥याप्रथमाप्रजायेततस्याःपीयूषंजुहुयात्संवत्सरीणंपयउस्त्रियायाइत्येताभ्यामृग्भ्यां।तासुगो
षुयाप्रथमाप्रथमंप्रजायेतप्रसूयेततस्याःपीयूषंसद्यःक्षीरंप्राग्दशाहात्संवत्सरीणंपयइत्या

न्यां मंत्रान्यांस्थालीपाकधर्मेण जुहुयात्। अत्राज्यभागांतं कृत्वा संवत्सरीणं पय इति द्वे आहुती हुत्वा
स्विष्टकृदादिकर्म समापनं। केचन आहुतिद्वयमेवमन्यंते। प्रसूतायां गोर्दशाहात्प्राक् क्षीरं प्रतिषिद्ध
मपि वचनाद्धोमविधानं। मनुः। अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा। आविकं संधिनीक्षीरं विव
त्सायाश्च गोः पयः। गौतमः। गोश्च क्षीरमनिर्दशायाः सूतके ...ऽजामहिष्योश्चेति॥ ८॥ यदि यमौ प्रजा
येत महाव्याहृतिभिर्हुत्वा यमसूं दद्यात्। यदीति संभावनायां। यदि चेत्तासु गोषु यमौ युग्मौ प्रजायेत
प्रसूयेत तदा महाव्याहृतिभिश्चतस्र निर्हुत्वा यमसूं यमप्रसूतां गां द्विजाय दद्यात्। अत्राज्यभागांतं कृ
त्वा महाव्याहृतिचतुष्टयं हुत्वा स्विष्टकृतं हुत्वा कर्मशेषं समाप्य यमप्रसवित्रीं गां दद्यात्। जुहोतीत्युक्ते १५८
सर्पिः प्रतीयेतेति वचनादाज्याहुतिधर्मः। सा गौः सदक्षिणा देया। न ह्येवादक्षिणं कर्म किंचिदस्तीति शौन

क इति स्वविधाने उक्तत्वात्। आज्यभाग स्विष्टकृतां विकल्पः। नाज्याहुतिषु नित्या वाज्यभागौ स्विष्टकृ
च्चेति उक्तत्वात्। दशमः खंडः॥ १०॥ ॥ अथ वृषोत्सर्गः॥ अथानंतरं वृषोत्सर्गः वृषस्य वक्ष्यमाणलक्षण
स्य उत्सर्ग उत्सर्जनं वृषोत्सर्गाख्यं कर्मोच्यत इति वाक्यशेषः। स च काम्यो नित्यश्च। कौन्या क्रियते स ८२
काम्यः। यदकरणे प्रत्यवायः स नित्यः। एकादशाहादौ अत्रोच्यमानः स नित्यः कामनाभावात्। स
चाभ्युदयिकपूर्वकः कार्यः। संस्कारकाणां सर्वेषामारंभे श्राद्धमिष्यते। अनिष्ट्वा तु पितॄन् श्राद्धे वैदि
कं नारभेत्स्मृतेरिति कारिका। तस्य कालमाह॥ ८॥ कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाश्वयुज्यस्य का
र्त्तिकी न वा कार्त्तिकी। तस्यां पौर्णमास्यां कार्यः। वा अथवा आश्वयुज्यस्य आश्विनस्य मासस्य रेवत्यां
रेवतीनक्षत्रं यदा भवति। तदा कार्यः। यद्वा। आश्वयुज्यस्य पौर्णमासी तस्यां रेवतीयुक्तायां कार्यः।

[illegible]

एतेसंभवापेक्षया विकल्पाः।। शाखांतराद्वैत्र्यां वैशाख्यां वा ग्नविष्यो न्नरे। कार्त्तिक्यामथवामाघ्यामय
नेवायुधिष्ठिर। चैत्र्यां वापि तृतीयायां वैशाख्यां द्वादशीष्विवा।। विष्णुधर्मे। आश्वयुक्शुक्लपक्षस्य पंचद
श्यां नराधिप। कार्त्तिके प्यथवामासि तृषोत्सर्गं तु कारयेत्। ग्रहणे हे महासुख्ये तथा चैवायनद्वये। विषु
वद्वितये चैव मृताहे बांधवस्य च। ठ सृ नेन्नीलकं ठं वै कौमुद्याः समुपागमे। कौमुदी आश्विन कार्त्तिके
योः पौर्णमासी। मत्स्यपुराणे। कार्त्तिक्यामथ वैशाख्यां फाल्गुन्यामष्टकासु च। आश्वयुज्यामथाषा
ढ्यां माघ्यां चैत्र्यामथापि वा।। अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः। वैधृते च व्यतीपाते मन्वादिषु यु
गादिषु। दिनक्षिद्रेषु संक्रांतौ क्रांतिसाम्ये तथैव च। मातापित्रोः क्षयाहे तु विशेषेण प्रशस्यते। यदा
वित्तं च वित्त च तीर्थपात्रं तथैव च। तदैव दानकालः स्यान्नान्यत्किंचिद्विचारयेदिति संभवापेक्षया का
लाद्व ग्रहणं विधवापरं। मधवायाः पुनर्वत्मास्य वृषोत्सर्गो न भवस्येव। किंतु
गोदान मात्रं। तथा च निर्णयसिंधौ ~~[illegible]~~ संग्रहे। पतिपुत्रवती नारी भर्तुरग्रे

ला ज्ञेयाः।। छ।। गवां मध्ये सुसमिद्धमग्निं कृत्वाज्याहुतीर्जुहोति। गवां मध्ये गोष्ठे न्नूसंस्कृते प्रदेशे सु
समिद्धं प्रज्वलितं अग्निं आवसथ्याख्यं कृत्वाऽऽज्याहुती वक्ष्यमाणा जुहोति। आज्याहुतीश्चरुप्रधाना
जुहोति। इतिकर्त्तव्यतामूयस्त्वाच्चरुप्रधानं तंत्रं। चरुः पौष्णः पिष्टमयः कर्त्तव्यः। तस्माद्यं पूष्णे चरुं कु
र्वंति प्रपिष्टानामेव कुर्वंतीति शतपथे श्रुत त्वात्। ग्रहणादौ पूषा गा अन्वेतु इत्यादि। ईशानको
णे रुद्रकलशस्थापनं। एवमाज्यभागांतं कृत्वा।। छ।। इहरतिरिह रमध्वं स्वाहा। इहधृतिरिह स्वधृतिः
स्वाहा। उपसृजं धरुणं मात्रे धरुणो मातरं धयन्। रायस्पोषमस्मासु दीधरत्स्वाहा। पूषा गा अन्वेतु न
इति पौष्णस्य जुहोति। एता आज्याहुतयः इहरतिरेका १ इहधृतिरिति द्वितीया २ इतिकरणात्मंत्रांतर
तिकल्पे उक्तत्वात्तिस्र आज्याहुतयः। पूषा गा इत्यनेन मंत्रेण चतुर्गृहीतधर्मेण पौष्णस्य चरोरेकाहुतिः मा
छ १

३ उपसृजं धरुणमिति तृतीया २
२ स्वाहांतत्वान्नैते सोमदैवत्याः गणितामितु तत्वात २

जुहोति॥ आ रुद्रान्जपित्वा॥ ईशानेस्यापितेरुद्रकलशेरुद्रान्मंत्रान्जपित्वाततः॥ रुद्रदेवताकामंत्राः स्थ
लगवप्रकरणेसूत्रेउक्ताः॥ कद्रुद्रायेमारुद्रायातेपितरिमारुद्रायस्थिरधन्वनइतिचसूक्तानि॥ इतिसू
त्रेसूत्रितं॥ चकारात्त्र्यंबकमंत्रश्च॥ कद्रुद्रायेतिनवर्चस्यसूक्तस्यकण्वऋषिः॥ रुद्रोदेवता॥ तृतीयाया
मित्रावरुणौदेवते॥ सप्तम्यष्टमीनवमीनांसोमोदेवता॥ गायत्रीछंदः॥ अंत्यानुष्टुप्॥ कद्रुद्रायप्रचे
तसे॥ ऋ० ९॥ इमारुद्रायेत्येकादशर्चस्यसूक्तस्यकुत्सऋषिः॥ रुद्रोदेवता॥ नवत्रिष्टुभः॥ द्विजगत्यौ॥ इमारुद्रा
यतवसेकपर्दिने॥ ऋ० ११॥ आतेपितरितिपंचदशर्चस्यसूक्तस्यगृत्समदऋषिः॥ रुद्रोदेवता॥ त्रिष्टुप्छंदः॥
आतेपितर्मरुतांसुम्नमेतु॥ ऋ० १५॥ इमारुद्रायेतिचतुरर्चस्यसूक्तस्यवसिष्ठऋषिः॥ रुद्रोदेवता॥ जगतीछं १९०
दः॥ अंत्यात्रिष्टुप्॥ इमारुद्रायस्थिरधन्वनेगिरः॥ ऋ० ४॥ वसिष्ठोरुद्रोनुष्टुप्त्र्यंबकंयजामहे॥ १॥ एतेरुद्र

मंत्रास्तान्जपित्वा॥ एकेरुद्रंजपित्वेतिपठंति॥ तन्मतेपूर्णेरुद्रजपः॥ तद्यथा॥ प्रणवः॥ व्याहृतयः॥ गाय
त्री॥ आपोहिष्ठा ९ एतोन्वृतंचसत्यं ३ शंवतीः ४ स्वस्तिनोमिमीतां ७ स्वादिष्ठया १० आघातेजपोयं॥
ततोवेदादिः॥ अग्निमीले ९ ततःपंचांगानि॥ येनेदंभूतं ६ सहस्रशीर्षा १६ अहंरुद्रेभिः ८ नतमंहो ८
आस्तु॥ शिवानः ३॥ विभ्राड्बृहत् ४ प्रधानानि॥ कद्रुद्राय ९ इमारुद्रायतवसे ११ आतेपितः १५॥
इमारुद्रायस्थिरधन्वने ४ अंगानि॥ सोमारुद्रा ४ जराबोधतद्वि ३ नमोमहद्भ्यः ३ रुद्राणामेति ३
प्रवःपांतरघुमन्यवः ३ आवोराजानं २ कद्धिष्ण्यासु २ हंसःशुचिषत् १ कथामहेरुद्रियाय १ तमु
ष्टुहियःस्विषुः १ भुवनस्यपितरं १ रथीतमंकपर्दिनं १ रुद्रस्यये ३ अस्मिरुद्राः १ प्रवोअच्छारिरिचे १ इ
त्युत्तरांगानि॥ एवंरुद्रसूक्तसंख्या॥ ७॥ ऋक्संख्या ७७॥ निगदः॥ सूक्तानामृक्संख्या १६८॥ ऋचवश्च ७७

२ त्र्यंबकयगा० २

निगदाः।१।एवंन्नक्तसंख्यास्येपनिगदश्चएवं।२९६।ऋग्विधाने।ॐकाराद्यास्त्रुताजस्वासावित्रीवतदित्स्वंच।आ
पोहिष्ठेतिसूक्तंतुशुद्धवत्योघमर्षणं।शंवत्यःस्वस्तिमत्यश्चपावमान्यस्तथैवच।सर्वत्रैतत्प्रयोक्तव्यमादौ
वंतेचकर्मणइति।अग्निमीलेयेनेदंसहस्रशीर्षाअहंरुद्रेभिराशुःशिशानोविभ्राट्पतंगइतिनिगदा।
कद्रुद्रायेमारुद्रायातेपितरिमारुद्रायस्थिरधन्वनइतिचसूक्तानि।सोमारुद्राथारयेथांजराबोधत
न्नमोमहद्भ्योरुद्राणामेतिप्रवःपांतंरघुमन्यवआवोराजानंकद्विष्ण्यासुद्देहंसःशुविषत्कयामदेरुद्रिया
यतमुष्टुहियःस्विषुर्नुवनस्पतिनरंरथीतमंकपर्दिनरुद्रस्ययेस्मेरुद्राःप्रवोच्छारिरिचेत्र्यंबकमिति
रुद्रपरिशिष्टे।ऋषिदैवतछंदांसिपरिशिष्टेज्ञेयानि।नंदासुमनसाचैववसुशीलाचसुनंदिका।सुरभी।२९७
पंचमीप्रोक्ताःवृषोत्सर्गविधानतः।ततोवृषस्यानयनं।ततोवारुणैर्मंत्रैरापोहिष्ठादिभिर्वृषोपर्यभिषेकः।।

वृ १

नंदादिपंचमातृस्थापनं।२

ततोन्यासःपुरुषसूक्तेन।अर्द्धचंद्राकृतिंकृत्वाकुंकुमेनललाटके।जपेतमूर्तिमान्विप्रोहिनगवानि वृ०१
ति।कर्पूरागुरुगंधैश्चोपलेपयेत्।वृषगायत्र्याप्रार्थना।तीक्ष्णशृंगायविद्महेवेदपादायधीमहि।तन्नो
वृषःप्रचोदयात्।धर्मस्त्वंवृषरूपेणजगदानंदकारक।अष्टमूर्तेरधिष्ठानमतःपाहिसनातन।ततोग्रीवा
यांपदघंटाचामरवस्त्रकुंडलमुकुटमदनफलांगदादिनिर्बंधयित्वामधुपर्कार्हणं।वृषलक्षणमाह। ७॥
एकवर्णोद्विवर्णोत्रिवर्णोवा।एकोवर्णःशुक्लादिर्यस्यसःतंवा।द्वौवर्णौशुक्लपीतादिकौयस्यसःतंवा।
त्रयोवर्णाःशुक्लरक्तकृष्णादिकायस्यसःतंवा।वाशब्दःप्रत्येकमभिसंबध्यते।मत्स्यपुराणे।श्वेतोरक्त
श्चकृष्णश्चगौरःपाटलएववा।रक्ताक्षःकपिलोयश्चरक्तशृंगगलोभवेत्।श्वेतोदरःकृष्णपृष्ठोब्राह्मण
स्यप्रशस्यते।स्निग्धवर्णेनरक्तेनक्षत्रियस्यप्रशस्यते।कांचनाभेनवैश्यस्यकृष्णःशूद्रस्यशस्यते।स

वैषामेववर्णानांसर्वेसर्वार्थसाधकाइति॥छ॥योवायूथंछादयति।योवृषोयूथंस्वकीयवत्सतरी
वर्गंस्वपरिमाणेनशोभयावाछादयति।अथ॥करोतितंवावृषभंअलंकृत्येति।सिंहावलोकनन्याये
नसर्वत्राप्यनुषज्यते।आदित्यखंडे।जीववत्सायाःपुत्रंसर्वलक्षणोपेतंनीलंलोहितंवापुंसंपादेषु छ३
सर्वश्चुक्तंपूथस्याछादकमिति॥छ॥यंवायूथंछादयेत।यूथंवत्सतरीवर्गोयंवृषभंछादयेत्वत्सन
तयाआवृत्यतिष्ठतितंवावृषमित्यलंकृत्येतिपूर्ववत॥छ॥रोहितोवैवस्यात।वाशब्दःपूर्वानुकर्ष
णार्थः।पूर्वोक्तनामध्येरोहितोलोहितोवर्णेनियोभवतिसएवस्याद्भवति।एवकारकरणादाचार्या
णांलोहितएवाभिप्रेतइतिलक्ष्यते॥छ॥सर्वांगैरुपेतोयूथेवर्चस्वितमःस्यात।सर्वांगैःसर्वैरंगैर्हे १६२
मपादादिनिर्यत्रंपेतोयुक्तोभवतियश्चयूथेगवावर्गेवर्चस्वितमोऽतिशायेनतेजस्वीभवतितमेववृष

ममलंकृत्येत्यर्थः।आदित्यखंडे।तस्यताल्वोष्ठदंतानासूरस्टंगरनाफाश्चये।अव्यक्तवर्णाङ्कस्वास्यव्या
घ्रनस्मनिनाश्चये।धांकृरध्रसवर्णाश्चतथामूषकसन्निभाः।कुब्जाःकाणास्तथाखंजाःकेकरा
क्षास्तथैवच।विषमश्चेतपादाश्चउद्भ्रांतनयनास्तथा।नैतेवृषाःप्रमोक्तव्याग्रहेधार्याःकथंचनेति
॥छ॥तमलंकृत्य।तमुक्तलक्षणंवृषमलंकृत्यवस्त्रमाल्यनूपुरहेमपट्टिकाग्रैवेयकघंटाचामरादिभि
र्भूषणैर्भूषयित्वा।शिवधर्मोत्तरे।रक्तपीतैश्चकुसुमैःकुंकुमाद्यैश्चवर्णकैः।यथाशोभंसमालभ्य
विभवैःप्रजयेद्वृषं।पट्टवस्त्रैर्विचित्रैश्चयथाशोभमलंकृतं।कार्यंशृंगद्वयंतस्यसहस्रचमरान्वितं।
पट्टंशिरसिसौवर्णंचंद्रचंद्रकभूषितं।ग्रैवेयकेणदिव्येननानारत्नोपशोभितं।घंटांकांस्यमयींश्च
द्धांगलेबध्नीतसुस्वनां।खुरैःसौवर्णरूप्यैश्चकेयूरांगदभूषितमिति॥छ॥पृथसुख्याश्चतस्रोवत्स

तयोस्ताश्चालंकृत्य सो। पृष्ठे गवां समूहे मुख्या गुणैः श्रेष्ठा गर्भधारणयोग्याश्चतस्रो वत्सतर्यस्ताश्च अलं
कृत्य घंटाचामरकिंकिणीहेमपट्टादिभिराभरणैर्भूषयित्वा॥ चकारादष्टौ वा। अष्टौ वाथ चतस्रो वा
यथालाभमथापि वेत्यादित्यपुराणात्। देवीपुराणे। चतस्रो वत्सिका नद्ध्वैवासंनवतोपि वा। विवाह
येत्कवत्सर्या नीलेन नवतेसदा। सौरपुराणे। अष्टनिधेनुनियुक्तश्च उर्निरथवाक्रमाते। त्रिहायनी नि
धन्या निःसुरूपाभि श्वश्रोनिस्तः। सर्वोपकरणोपेतउत्सृष्टव्यो विधानतः इति। तथा वृषस्वरूपं कूर्मपुरा
णे। उन्नतस्कंधककुदः ऋजुलांगूलवालधिः। नवाष्टदशसंख्ये स्तुतीक्ष्णाग्रैर्दशनैः शुभैः। मल्लिकाक्षश्च
मा क्रव्यो सहेपि धनधान्यदः। इंद्रनीलाभपृष्ठश्च त्र्याबलः पंचकालकः। पृथुकर्णो महास्कंधः स्नक्ष्णरोमा च २६३
यो भवेत्। मार्जारपादः कपिलो धन्यः कपिलपिंगलः। श्वेतो मार्जारपादश्च तथा मणिनिभेक्षणः। करटः पि

गलश्चैव श्वेतपादस्तथैव च। श्वेतपादः शिराश्चैव द्विपादः श्वेत एव च। आकर्णमूलाच्छ्वेतं तु मुखं यस्य प्र
काशते। नंदीमुखः स विज्ञेयो रक्तवर्णो विशेषतः। भूमौ कर्षति लांगूलं सुस्थूला चैव वालधिः। लोहितो
यस्तु वर्णेन मुखे पुच्छे च पांडुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते। चरणाश्च मुखं पुच्छं
यस्य श्वेतानि गोपतेः। लाक्षारससवर्णश्च तन्नीलमिति निर्दिशेत्। पारिजाते। एकं वृषं लक्षणसं
युक्तं गृहोद्भवं नीतमथापि राजन्। मुक्त्वा न शोचेन्मरणं महात्मन्मोहे मतिं वाहम तो निधास्ये॥ एतत्
करणे गाथा यमगीता। एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृ
जेत् इति ग्रंथविस्तरभिया बहुन लिखितं। एवं विधं वृषं वत्सतर्यश्चालंकरणीया॥ का। एतं युवानं
पतिं वो ददामि तेन क्रीडंतीश्चरथ प्रियेण। मा वः शाप्त जनुषा सं विदाना रायस्पोषेण समिषा मदेम स्वा।

दिति। एतं युवानमित्यारभ्य मदेम स्वाहेत्यंतेन मंत्रेण तमुत्कलरूपं वृषमुत्कलरूपाणां वत्सतरीणां म
ध्ये समुत्सृजेत्तासां च। वृषं समुत्सृजेत्तासां च मिति शांखस्मरणात्। वृषवत्सतरीणां पुच्छेन तर्पणं विधेयं तदुक्तं या
तराश्रये पिंडदानप्रकारस्य॥ ॥ नभ्यस्थेनुमंत्रयते मयोभूरित्यनुवाकशेषेण। नभ्यस्थेनाभौ नैव न
भ्यं मध्यं तत्स्थे वृषेने वत्सतरीमध्यस्थे वृषेनेसति मयोभूरित्यनुवाकशेषेणानुमंत्रयते अवलोक
यति। क्वचिदवलोकयन्नपीति कर्मप्रदीपे स्मरणात्। मयोभूः शं वरः का स्त्रीवंतो गाव्य मित्यारभ्य नमः शौ
नकायेत्यंतं अनुक्रमणीखंडं पठित्वा मयोभूरित्यारभ्य सुसहासतीत्येतत्पर्यंतं पठित्वा वलोकयेदि
ति॥ ॥ सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान्भोजयेत्। सर्वासां गृहस्थितानां गवां पयसि दुग्धे पा १६४
यसं पायसान्नं श्रपयित्वा ब्राह्मणान्भोजयेत्। ब्राह्मणानिति बहुवचनात् त्र्यांतरपरिप्राप्तात्। कूर्मपुराणे।

कुर्याद्ब्रह्मादिभोज्यं तु एकादशशतानि वा। अथवा तु शतं भोज्यं दद्याद्दन्नमवारितं। उत्सृष्टे वृषभे दद्या
च्चतुर्दशापदानि तु। शय्यां सोपस्करां चैव दद्याद्दानानि वै दश। चतुर्दश तथा विप्राः सत्पात्रा वेदपारगाः।
उमामहेश्वरप्रीत्यै परिधाप्याः स्वशक्तितः। धुर्वसस्य वत्तीं दद्याद्वृषलांगलसंयुतां। दद्याच्च सप्तधान्यानि क
पिला गौः सवत्सिका। आचार्यं पूजयेच्चैव सपत्नीकं विचक्षणः। एवं यथोक्तविधिना यस्तु नीलं समुत्सृजे
त्। यावत्तद्रोमसंख्या स्यात्तत्संततिकुलेषु च। तावद्युगसहस्राणि शिवलोके महीयते। ततो वृषनमानी
य त्र्यश्रेरुत्तरतः स्थितं। सव्यस्फिक् निलिखेच्चक्रं शूलं वा ह्येतद्दक्षिणे। कुंकुमेनांकयित्वादौ ब्राह्मणः सुसमा
हितः। तप्तेन धातुना पश्चाद् यस्कारो कयेद्वृषमिति॥ ॥ एकादश्याः खंडः॥२२॥ ॥ ऊर्द्ध्वमाग्रहायण्यास्तिस्रो
ष्टका अपरपक्षे त्र्याग्रहायणी मार्गशिरपौर्णमासी। तस्या ऊर्द्ध्वमनंतरं अपरपक्षे कृष्णपक्षे पक्षेषु तिस्रः

अष्टका अष्टम्यां भवंतीति वाक्यशेषः॥ अत्राष्टकाशब्दः कर्मवचनो पिकालोपलक्षको ज्ञेयः॥ यथाश्रवणेउ
क्ताश्रावणी तथाष्टसु उक्ता अष्टका उपलक्ष्यते। तत्र श्रुतिः॥ द्वादश्यां पौर्णमास्यो द्वादशाष्टका द्वादशामावा
स्या इति। तत्र द्वादशाष्टकासु अष्टकाख्यानि कर्माणि तिसृष्वेव भवंतीति नियम्यते। यथा विष्णुः॥ अमावास्या
स्तिस्रोष्टकास्तिस्रोन्वष्टका इति। अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु। तिस्रश्चान्वष्टकाः पुण्या
इति। विष्णुधर्मोत्तरे। आग्रहायण्यतिक्रांतौ कृष्णास्तिस्रोष्टकास्तथेति। छंदोगगृह्यकारिका। सकृदप्य
ष्टकादीनि कुर्यात्कर्माणि यो द्विजः॥ स पंक्तिपावनो भूत्वा लोकान्प्रैति घृतश्चुत इति। अत्राष्टकासु आभ्युद
यिकं न भवति। नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यत इति कारिकोक्तेः॥ क॥ तासां प्रथमायां शाकं जुहो १६५
ति। तासां तिसृणामष्टकानां मध्ये प्रथमायामाग्रहायण्युत्तरायामष्टम्यां शाकं कालशाकं वास्तुकं वा स्था

लीपाकधर्मेणावसथ्ये जुहोति। तत्र होममंत्रमाह॥ क॥ इयमेव सा या प्रथमा व्यौच्छदंतरस्यां चरति प्रवि
ष्टा। वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचंतां स्वाहेति। अनादिष्टदेवतात्वान्मंत्रगता उषा
देवता। तत्र ग्रहणासादनप्रोक्षणेषु उषसे जुष्टमिति सर्वत्र। आज्यभागांतं कृत्वा इयमेवेत्यारभ्य
सचंतां स्वाहेति चतुर्गृहीतधर्मेणाज्यस्य होमः प्रधानरूपः॥ अथ स्विष्टकृतः॥ अथ प्रधानहोमा
नंतरं स्विष्टकृतो होममंत्रो वक्ष्यमाणो ज्ञेयः॥ वृत्तस्त्वपि अष्टकासु स्विष्टकृन्मंत्रः प्रत्येतव्योष्टका
शब्दवाच्यत्वात्॥ क॥ यस्यां वैवस्वतो यमः सर्वे देवाः समाहिताः॥ अष्टका सर्वतोमुखी सा मे कामान्
तीत्रुपच्र। आकुस्त्रेग्रावाणो दंतान्यूधः पवमानः॥ मासाश्चार्धमासाश्च नमस्ते अस्तु सुमनाः सुरभिः स्वाहेति
यस्यामित्यारभ्य सुमनाः सुरभिः स्वाहेत्यंतेन मंत्रेण स्विष्टकृद्धर्मेण स्विष्टकृतं हुत्वा सप्तकादिकर्मशे

षसमापनं॥७॥ ॥द्वादशःखंडः॥१२॥ ॥मध्यमायांमध्यावर्षेच। मार्गपौषमाघस्यानांतिसृणामष्टकानांम
ध्येयामध्यमापौषकृष्णाष्टमीतस्यांअष्टकापित्र्याभवति वक्ष्यमाणेन। वक्ष्यमाणदेवताकात्पित्र्यदेवत मार
मध्या२ का। वत्रअनंतरंवर्षेवर्षस्यमध्यंमध्यावर्षा। चैत्रतोद्वादशमासात्मकंवर्षंभवतितन्मध्यस्थोभाद्रपदोमासः
षष्ठोभवति। तस्यकृष्णाष्टम्यांअपराह्णेऽष्टकाभवति। पितृकर्मत्वात्। अथयदपराह्णेपितृयज्ञेनचरंती
तिश्रुतेः। पूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणामपराह्णःपितृणांतस्मादपराह्णेददाति शतपथ। ती
तयोर्मध्यावर्षमध्यमाष्टकयोःसमानधर्मत्वात्सहकथनं॥८॥ महाव्याहृतयश्चतस्रोयेतात्कृषुरितिचतस्रो
नुहुत्यवपांजुहुयात्। अनयोरष्टकयोर्गोपशुरजपशुरितिपक्षाअग्रेवक्ष्यति। तत्रगोपशुपक्षेअजपशु १९६
पक्षेवस्थूलगवोक्तंविधानंवेदितव्यं। सचप्रकारोयथा। पूर्वेद्युःसप्तम्यांपूर्ववद्व्रतंकृत्वाश्रुदपक्षउपोष्य

तिसूत्रितत्वात्पूर्वेदिनेव्रतं। अष्टम्यांप्रातःअयंतेयोनिरित्यनयासमिधिअग्निंसमारोप्यप्रागुदीच्यां
दिशिसमेदेशेसुविस्तीर्णेरचितमंडपेहस्तमात्रंचतुरस्रंअवसथ्यंकुंडंविधायतत्रभूसंस्कारान्कृ
त्वापुरुपश्चाद्यंगीकृतमग्निमाहृत्यस्थापयेत्। प्रागुदीच्यांदिशीतिसत्रेसूत्रितत्वात्। तत्रकुंडात्पूर्वत
श्चतुर्हस्तमितांभूमिंत्यक्त्वाअर्थात्परिमाणमितिन्यायाच्चतुरस्रांसमांवेदिकांकृत्वाद्विहस्तंकुंडंच
तुरस्रंकुर्यात्। चतुरस्रंगोमयेनेतिपरिभाषितत्वात्। ततोवैश्वदेवंबलिरहितंकुर्यात्। पूर्वाह्णका
लीनत्वात्। इदंकर्मापराह्णिकंपितृकर्मत्वाद्यादौवैश्वदेवःसिद्धान्नेनकर्त्तव्यः। ततोमध्याह्नादनंत
रंउत्तरकुंडेपितृकर्मत्वादपसव्यधर्मेणदक्षिणामुखतयासव्यजानुनिपातनपूर्वकंसर्वंकर्मक
र्त्तव्यं। प्राचीनापवीतीपित्र्याणीतुकृत्वातु। पातयेदितरज्जानुपित्र्यन्यारिवरंत्सदेतिकर्मप्रदीपे। वच

जानु

ना२ नात्सव्यं धर्मः॥ अत्र दक्षिणादिक्प्राचीत्वेन कल्प्या। दक्षिणां प्राचीं पित्र्यस्तुक्तत्वात्। यदा प्राचीद
क्षिणा जाता तदाऽर्थात् उत्तरा प्राचीनिष्पन्ना॥ तथा पूर्वोत्तरा जाता। प्रतीची च दक्षिणां संपन्ना॥ सव्येन स्व ॥॥२
स्त्ययनांतं। प्रयोगोपसव्येन। अथोत्तरकुंडेऽपसव्येन भूसंस्कारान्कृत्वा सकृत्सकृत्। सकृदपसव्यं पि
त्र्य इति न्यायात्। ब्रह्मांडपुराणे। खंडनं पेषणं चैव तथैवोल्लेखनक्रिया। सकृद्देवपितॄणां स्याद्देवानां तु
त्रिरुच्यत इति। ततः पूर्वकुंडाद्द्वितीयकुंडे उद्धरणरूपमग्निप्रणयनं आहरणपक्षे। अरण्योर
भावात्। अरणिपक्षे पूर्वाग्निमरण्योः समारोप्य प्रागुदीच्यामागमनं। तत्र मंथनं। पूर्वकुंडे
स्थापनं। उत्तरकुंडे उद्धरणं। आहृतपक्षे रणिपक्षे चैकदेशोद्धरणं। न सर्वोद्धरणं। पश्चिमेग्नौ १६७
पूर्वेग्नाविति सूत्रे दर्शनात्। उभयत्राप्यग्निरक्षणं। पूर्वकुंडाद्द्वितीयकुंडं प्रतिगमनं सव्येन पितृक

दक्षिणाग्नौ। पश्चात्पूर्वाग्नौ। दक्षिणतो दक्षिणाग्नौ। प्रकृतत्वात् २

र्मान्नावात्। अग्निस्थापनमपसव्येन दक्षिणामुखतया। परिसमूहनं सकृदप्रादक्षिण्येन। सकृदप
सव्यं पित्र्यश्रुत्युक्तत्वात्। आ...कं। कुंडात्पूर्वतः प्रागग्रं। उत्तरतो दक्षिणतो ब्रह्मणः स्थापनं। प्रत्क्प्रा
दुत्तरतः प्रणीताप्रणयनं। स्तरणं प्रकृतिवत्। पवित्रच्छेदनमस्पृष्ट्वा णं ताभ्यां पर्युक्षणं सकृदप्रदक्षि
णं। सकृदपसव्यं पित्र्यश्रुत्युक्तत्वात्। मृद्धीनामित्याज्यस्थाल्यादानं। सव्येन पश्चिमकुंडं प्रतिगमनं।
अपसव्यधर्मेणाज्यस्थाल्यधिश्रयणं पश्चिमेग्नौ। उद्वासनं बर्हिष्युपरि। उत्पवनं प्रकृतिवत्। पूर्वस्या
ना१ ग्नेः पुरस्तात्पलाशशाखायाः सपल्लवाया निखननं दृढं विधेयं यूपस्थाने। यथा गोपशुरज्जपशुर्वा न
पातयति तथा निखेया। पुरस्तात्पलाशशाखां सपलाशां निखायेति सूत्रितत्वात्। तस्याः शाखाया उ
त्तरतः पशुस्थापनं। तस्या उत्तरतः पशुमुपस्थाप्येति सूत्रितं। पितृभ्यस्त्वा जुष्टमुपाकरोमि इति सनेन मं

त्रेण दर्भाग्रेण पशोरुपस्पर्शनमुपाकरणं विधेयं॥ पितृभ्यस्त्वा जुष्टं प्रोक्षामीति पवित्राभ्यां प्रोक्षणं।
पितृभ्यस्त्वा जुष्टं नियुनज्मीति मंत्रेण तं पशुं पलाशशाखायां द्विव्याममया द्विगुणया रशनया कौशया
पाशं कृत्वा तत्र रास्तृंगमभिबध्नाति युनक्ति नियोजयति। दृढबंधनं करोति। कात्यायनः। द्विगुणया रश
नया द्विव्याममया कौशया पाशं कृत्वा तं रास्तृंगमभिदक्षिणं बध्नातीति। ततः उल्मुकेन त्रिः प्रदक्षिणं तं प
शुं पर्यग्नीकृत्योदीचीं दिशं प्रतिनयेत्। आहवनीयोल्मुकमादायाग्नीत्त्रिः समंतं पर्येतीति कात्याय
नः। पर्यग्निकृतमुदंचं नयतीति सूत्रे सूत्रितं। ततः शमित्रा तस्य पशोः संज्ञपनं तथा विधेयं यथा शब्दं १६८
न करोति। प्राच्यां दिशि पशोः शिरः कृत्वा उत्तरायां दिशि पादौ कृत्वा तस्य मारणं विधेयं। अथ वा प्रती
च्यां दिशि शिरः कृत्वा उदक्पादौ च कृत्वा पशोः संज्ञपनं कार्यं। प्राक्शिरसमुदक्पादं प्रत्यक्शिरसं वोद

क्पादमरवमाणमिति सूत्रितं। तस्मिन्नेनं निघ्नंति प्रत्यक्शिरसमुदक्पादं प्राक्शिरसं वा संज्ञप्यमुदक्तं
तमयंतत्वा वयमानमिति कात्यायनः। दक्षिणाशिरसं प्रत्यक्पादौ पितृदेवत्य इति छंदोगगृह्ये विशेषः।
यदि वेष्टकं करोति तदा यत्पशुर्मायुमकृतोरो वा पद्भिरायते। अग्निर्मा तस्मादेनसो जातवेदाः प्रमुंचतु स्वा
हेत्याज्याहुतिर्जुहुयात्। रवमाणे जुहोतीति सूत्रे सूत्रितं। भूर्भुवः स्वः स्वाहा याश्चायश्चेते आहुती कृत्वा
यत्पशुरिति होतव्या। प्रत्यक्षविहितं चैकेषु देशेषु प्रायश्चित्तं तत्रोक्तं कुर्यात् सर्वप्रायश्चित्तं वाधिकारिके
विति सूत्रितत्वात्। ततः संज्ञप्तस्य पशोर्नाभिदेशप्रदेशादपोद्धरणं वपाश्रपण्या रूपयां छाद्य प्रक्षाल्य
द्वितीयशूलेश्रपणमभिघारणमुद्वासनं च वपायाः। वपामुद्धृत्य प्रक्षाल्य पूर्वेग्नौ श्रपयित्वाभिघार्योद्वा
स्येति सूत्रितं। ततस्त्रिः पर्युक्षणं। विष्णोर्हस्तोसीति कुशस्तंबयोर्ग्रहणं। सप्तदशासमिद्धोमः। मध्यावर्षे

धो॰२

भाद्रपदाष्टकायां। तिस्रो वा समि...नवंति। मध्यावर्षे ऽष्टके ति तिस्रो वा नवंतीति पंचमे ऽध्याये वक्ष्यमाणत्वा
त्। अन्यत्समानं। आघारौ हुत्वा आज्यभागौ च। आग्नेयः सौम्यः आज्यभागौ देवता यैव पां देवता यै हवि:
स्विष्टकृते चाज्याहुतिरनंतरं स्थालीपाकानामिति सूत्रोक्तेः। यातिरश्चीत्यादीनां चतुर्णां माज्याहुती
नां स्थाने महाव्याहृति चतुष्कस्य होम इति सूत्रभाष्यवीरभद्रपद्धति सूत्रपद्धतीनां मतं। तत्त्रीणि पला
शमध्यमपत्राणि बर्हिषि संस्थाप्य त्रिषूपस्तरणाभिघारणं विधायैतेषु पत्रेषु हिरण्यं निधाय वपास्था
पनं उपरि हिरण्यनिधानं प्रत्याभिघारणं चावपयाचरिष्यन्नुपस्तीर्य हिरण्यमवधाय वपामध्यन्नाहेंद्रा
ग्निभ्यां छागस्य वपायै मेदसोऽनुब्रूहीति हिरण्यमवदायेति कात्यायनः। त्रीणि पलाशपलाशानि मध्य
मानि संस्तीर्योपस्तीर्य वपामवधायाभिघार्येति सूत्रे सूत्रितं। ततो वपाहोमः। अनुद्रुत्य अनुद्रवणं कृत्वा

का॰२

वपां जुहुयात्। अनुद्रवणं नाम समस्तानां महाव्याहृत्यादीनां एकीकरणं। अनवसानतया अथ
वपि मंत्रान्पठित्वांते स्वाहाकारं कृत्वा वपां उपरितनां जुहुयात्। स्वाहाकारांते होममंत्राणामित्युक्तत्वाद
ते स्वाहाकारः। महाव्याहृतयश्च तत्र प्रसिद्धाः। ॐ भूर्भुवः स्वः भूर्भुवः स्वः। ये तातृषुः ये सत्यासः। अग्नि
ष्वात्ताः त्वमग्न ईलित इत्येवमष्टौ। महाव्याहृतीनामृषिदेवतछंदांस्युक्तानि। ये तातृषुरित्यासां त्रयाणां बर्हि
षि पितरो देवता। त्रिष्टुप्छंदः। अग्निष्वात्ता इत्यस्या जगती छंदः। ये तातृषुर्देवत्रा जेहमाना। ये सत्या
सो हविरदो हविष्याः। त्वं अग्निष्वात्ताः पितर एह गच्छत। त्वमग्न ईलितो जातवेदः। त्वरद्धवींषि स्वाहा। अयं
वपाहोममंत्रः। क। व ह वपां जातवेदः पितृभ्यो यत्रैनान्वेछ सुकृतस्य लोके। मेदसः कुल्या उप तान्स्रवं
तु सत्याः संतु यजमानस्य कामाः स्वाहेति वा। वाशब्दः पूर्वेण सह विकल्पार्थः। पूर्वो वा अयं वा वपाहोमम्मं

त्रः। ततस्त्रीण्यपि पलाशपत्राणि वपाश्रपण्यौ चाग्नौ प्रहरेत्। अनुप्रहरति पलाशानि वपाश्रपण्यौ
चेति सूत्रितत्वात्। पूर्ववत्पर्युक्षणं। उत्तराज्याहुतिः दर्शयितेप्रतिदर्शायस्वाहेति एका। तथा पर्युक्ष
णं ततः पश्चाश्चवदानानि निःकाशनीयानि। हृदयं जिह्वां क्रो। उत्सव्यसक्थिपूर्वेन डकं पार्श्वयं दहे क्लो
गुदमध्यं दक्षिणाश्रोणिरिति। दक्षिणसक्थिपूर्वेन डकं गुदं तृतीयाणि षष्ठं सव्याश्रोणिरित्यवदानानि।
ततः पश्चिमेग्नौ स्थालीपाकश्रपणं स्थालीपाकधर्मेण। पितृभ्यो जुष्टमिति गृहीत्वा चतुरो मुष्टीन्नाग्र
हणं हविषस्तत्वर्यादिष्टं मुष्टिचतुष्टयमिति कारिका। स तु त्रहाल्या योग्यं। तस्याग्रे तूत्तरतो वदानानि श्र
पयेत्। पश्चिमेग्नौ स्थालीपाकं श्रपयंस्तु उत्तरतो वदानानि इति सूत्रितं। तं श्रुतं स्थालीपाकं वसामव १७
दानानि संस्कृतमाज्यं चैकीकृत्य होमयेत्। अष्टाहुतिस्थालीपाकोवदानमिश्र इति वक्ष्यमाणत्वात्।

ति स्थालीपाकं यूषं मांसमाज्यं चैति संनिनीयेति सूत्रितं। यूषशब्देन वसोच्यते। पूर्ववत्पर्युक्षणं। स्थालीपा
कग्रहणाद्ग्रहणासादनप्रोक्षणानि भवंति। पितृकर्मत्वात् तिष्ठन्यो जुष्टंगृह्णामीति ग्रहणासादने। प्रो
क्षणं तु प्रणीतोदकात्। सर्वार्थत्वात्। ततः प्रधानहोमः। अष्टाका। महाव्याहृतयश्चतस्त्रोयेताश्चष्टुरिति च त
५४ स्रोष्टाहुतिः स्थालीपाकोवदानमिश्रः तृतीयार्थं प्रमा। एतैस्त्रतसृभिर्महाव्याहृतिभिर्ये ताश्चष्टुरिति च
तसृभिरष्टाहुतिः। अष्टाहुतिरूपोवदानमिश्रः। अवदानैर्हृदयादिभिर्मिश्रितः स्थालीपाकः। पिष्टती
र्थेन होतव्य इति शेषः। पित्र्ये च पितृतीर्थेन होमः। शिष्टः स्मृतेरिति कारिका। ऋषिदैवतछंदांसि प्रती
२२ कान्यप्युक्तानि। एवं अवदानधर्माः। एकः स्रुवः। वसासमांसाज्यमिश्रं एकमवदानं। उपरिष्टोस्रुवो। का
रिका। पित्र्याष्टकायां सर्वाणि वावदाय सकृत्स्रुचि। अभिघारो द्विरेवस्यात्सर्वत्र श्रुतिदर्शनादिति। म

ध्यात्सत्वस्सत्वस्सहावदधातिद्विरभिघारणमितिकात्यायनसूत्रोक्तेः॥ एवमष्टावप्यवदानानि॥ सर्वत्रांते स्वा
हाकारः॥ स्वाहाकारांते होममंत्राणामित्युक्तत्वात्॥ न स्वधाशब्दः॥ अनुक्तत्वात्॥ भूः स्वाहा॥ भुवः स्वाहा॥ स्वः
स्वाहा॥ भूर्भुवः स्वः स्वाहा॥ येतातृषु॰ सद्भिः स्वाहा॥ येसत्यासो॰ सद्भिः स्वाहा॥ अग्निर्घात्रा॰ दधातन स्वाहा॥ त्वमग्ने॰
हवींषि स्वाहा॥ ततो यस्यां वैवस्वत इत्यनेन स्विष्टकृत्॥ तत्सकृदवदधात्यथोपरिष्टाद्द्विराज्यस्याभिघारयती
तिशातपथे उक्तत्वादवदानमेकमेवावरो दक्षिणा॥ गौर्ब्राह्मणस्य वर इत्युक्तत्वाऔर्दातव्या॥ ततः सप्तका
दिकर्मशेषं समापनं॥ ठ॥ अंतर्हितागिरयोंतर्हिता पृथिवी मही मे॥ दिवा दिग्भिश्च सर्वाभिरन्यमंतः पि
तुर्दधेमुष्यै स्वाहा॥ अंतर्हिता मरुतवोहोरात्रैश्च संधिजाः॥ मासाश्चार्द्धमासाश्चान्यमंतः पितुर्दधेमुष्यै स्वाहा॥ ७२
यास्तिष्ठंति याः स्रवंति यादन्ना॰ परिसंस्कृषी॥ अग्निः सर्वस्य नर्ष्टेभिरन्यमंतः पितुर्दधेमुष्यै स्वाहा॥ यन्मे माता

ता॥ १ प्रलुलुभे विचरंत्यपतिव्रता॥ रितस्तन्मे पितावृङ्क्तां मातुरन्यो वपद्यताममुष्यै स्वाहेति वा महाव्याहृतीनां स्था
नेच तस्रोन्यत्रकरणस्य॥ अन्यत्रकरणेन्येजातः पुरुषस्तस्य च तस्रणां महाव्याहृतीनां स्थाने अंतर्हि
तागिरय इत्याद्याश्चतस्र आहुतयो वा भवंति॥ वाशब्दो विकल्पार्थः॥ अमुष्या इत्यत्र स्वमातुर्नामग्रहणं॥
अमुष्या इति चतुर्थीनिर्देशाच्चतुर्थ्यंतं॥ ठ॥ पायसो वा चरुः॥ वाशब्दः पशुना सह विकल्पार्थः॥ अनयोः
पित्र्याष्टकयोः पितृजातजारजातयोरपित्र्यविशेषात्पायसश्चरुः पयः प्रधानश्चरुर्वा कार्यः॥ यदा चरुस्त
दापि हृन्पोजुष्टमिति ग्रहणसादनप्रोक्षणानि कृत्वा चतुरो मुष्टीन्गृहीत्वा तिसृत्वत्रक्षालनं॥ त्रिर्देवेभ्यो
द्विर्मनुष्येभ्यः पितृभ्यः सकृत्प्रक्षालयेदिति वचनात्॥ ततश्चरोरुपरितनायामउज्ज्वालिकाया उपर्येकः स्क
वः॥ तामुत्तार्य पात्रांतरे प्रथमं अग्निघार्य मंडज्वालिकामुत्का उपर्यभिघारः कार्यः॥ ततश्चरोरभिघारः॥

उद्वासनं प्रत्यभिघारणं। आज्यभागौ तं कृत्वा। वपात्वेन तां तरिकां स्कंधिएकस्कवरर्द्विकां मुस्कंपार्यकं
स्कंधं मुक्त्वा वपाहोममंत्रयोरन्यतरेण वपां होमयेत्। ततः प्रधानः। एकस्कवः। एकमवदानं। उपरि द्विस्क
वौ। एवं महाव्याहृत्या षष्ठ्यावाहुतयो होतव्याः। यस्यां वैवस्वत इति मंत्रेण स्विष्टकृत्। अनुमतये स्वाहेत्या
ज्याहुतिः। ततः सप्तकादिकर्म शेषसमापनं। आग्नेयः सौम्य आज्यभागौ देवतायै वपां देवतायै हविः स्वि
ष्टकृते चाज्याहुतिश्चानुमतये स्थालीपाकानामिति सूत्रे सूत्रितत्वात्। पितृकर्मत्वाद्दक्षिणामुखेनापस
व्यधर्मेण विधेयं। प्राचीनापवीती पित्र्याणीत्युक्तत्वात्। कात्यायनः। प्राचीनावीतिना सर्वमपसव्यमत
द्रिणा। पितृसमानिधनात्कार्यं विधिवद्दर्भपाणिनेति। एवमाचार्यादिक्षुषड्द्युषलर्घ्येप्रागतेष्व आग्नेया १७२
दिषड्गुपस्तुतु आज्यभागौ न नवतः। देवतोद्देशेन वपाहोमः। न वपाहोममंत्रः पूर्वोक्तिः। देवतोद्देशेन

पशुवदानहोमः। स्विष्टकृद्दग्ध ये स्विष्टकृत इत्यनेन। यस्यां वैवस्वत इति मंत्रेण। अन्यत्समानं प
त्वाशाखेति। देवतायै वपां देवतायै हविः स्विष्टकृते चान्येषां पशूनामिति सूत्रोक्तेः॥ ४॥ अन्वष्टक्यं
पिंडपितृयज्ञावृता। अनयोरष्टकयोः श्व आगामिदिवसे नवम्यां [illegible] अन्वष्टक्यं नाम कर्म पिंडपितृ
यज्ञावृता पिंडपितृयज्ञस्यावृत्तत्क्रिया तया कार्यं। अयमर्थः। पूर्वं पिंडपितृयज्ञः। ततोन्वष्टक्यं श्राद्धमि
ति। स च पिंडपितृयज्ञोपराह्णे भवति। पिंडपितृयज्ञोपराह्णे मावास्यायामित्युक्तं। अयं च पिंडपितृ
यज्ञ आवसथ्य एव न त्वाहिताग्नेरपि। न दक्षिणाग्नौ। पित्र्याष्टकायांगत्वात्। आवसथ्याग्नेरुत्तर
तो दक्षिणामुखाग्नेः पूर्वतः आसादनं। शूर्पं स्थाली स्फ्यं। पात्री। उलूखलमुसले। सकृदाच्छिन्नमुष्टिद्व
यं। कुशाः। व्रीहयः स्रुवाज्ये। द्वादशांगुलं मेक्षणं। सूत्रं। उदकं। एतान्यग्नेर्दक्षिणसंस्था। निस्थापयेत्।

ततोग्नेः पश्चाद्दक्षिणतश्चान्कुशान्संस्थाप्य तेषु प्रागग्रं स्फ्यं निधाय तंडुलयुक्तां पात्रीं स्फ्ये निधाय तत्पुर
तो दक्षिणतश्च शूर्पे स्थालीं स्थापयित्वा पश्चादग्नेर्दक्षिणामुखः सव्यं जान्वाच्याप सव्ययुक्तः पितृपिताम
हप्रपितामहांश्च उद्दिश्य तान्समत्वानामश्रामर्यावदांते नुष्टं गृह्णामीत्युक्त्वान्युब्जेन हस्तेन पात्र्यास्तंडुला
न्स्था। स्थाल्यां गृह्णाति सकृत्तापुरस्ताच्छूर्पे स्थालीमाच्य सव्यं जानुनी चामुष्टिना व्रीहीन्गृह्णाति पितृन्ध्या
यन्निति सूत्रितं। तत्पुरस्ताद्दक्षिणतश्च शूर्पे स्थालीं करोति तत्। सव्यं जान्वाच्य पित्रादीनुद्दिश्य तान पस्म
रेत्। नामगोत्रे शर्मणे वाहं जुष्टं गृह्णामि चेति तत इति कारिका। ततोपसव्योत्तरीया दक्षिणामुखी पत्नी उलू
खले व्रीहीन्नावहंति श्रातं दुलीनावातात्। तंडुलांश्चासकृद्यजमानेनैव शूर्पस्थस्यान्नस्य निष्पवनं २७३
कार्यं ततस्तान्स्थाल्यां प्रक्षाल्य सकृत्स्वशाल्याग्नावधिश्रयेत्। अपसव्योत्तरीया सा वासीना दक्षिणा

मुखी। व्रीहीनातंडुलीनावातफलीकुर्यात्स धर्मिणी। केचित्तु वित्तुषान्कृत्वा फलीकुर्वंतित्तान्सकृत्। प्र
मानेवोद्धृपे शूर्पे निष्पुनात्यथ तेन तानिति कारिका। अधोबिलाष्टते च रौत्रसंस्कृते नैवाज्येनाभि
घार्य पत्न्याञ्चमुद्वास्या प्रदक्षिणं सकृत्परिसमुह्य अग्रगृहीतैर्दर्भैस्तीर्व्वतिथा। सकृत्पर्युक्ष्य यज्ञोपवी
ती प्राङ्मुखो दक्षिणं जान्वाच्य मेक्षणेनजुहोति। अभिघार्य प्रसच्चमुद्वास्यावसवि परिसमुह्य प [illegible]
र्यपर्युक्ष्य दक्षिणं जान्वाच्य यज्ञोपवीती प्राङ्आसीनो मेक्षणेनजुहोति। सकृत्परिसमुह्याग्निमीशाना इतिसत्त्रे ३।५
द्य प्रदक्षिणं। दर्भैरग्रगृहीतैश्चेतिकारिका। स्फ्यमापग्रहोर्वं धार्यौ। स्फ्यापग्र हस्तात्र मंत्रीयथाग्र यस्ते
त्रयपरितिकारिका। अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा। यमायांगिरस्वते पितृमते स्वा
हा। इति श्राद्ध। तित्रयं मेक्षणेन जुहोमेक्षणमग्नौ प्रहरेत्। अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृ

इष्ट्यर्कानंद्यः ३

ये रूपाणीति ४

मतेस्वाहायमायांगिरस्वते पितृमतेस्वाहेति मेक्षणमनुप्रहृत्येति सूत्रितं। ततो दक्षिणामुखो भूत्वा स्फ्ये
नाऽपहता असुरा रक्षांसि वेदिषद इति मंत्रेण मार्जनं कृत्वा स्फुरणं विधेयं। दक्षिणा दक्षिणाग्रे रपहृ
ता असुरा रक्षांसि वेदिषद इति स्फ्येनोल्लिख्यानुमुच्येति सूत्रितं। स्फ्येन शोधितस्य देशस्य दक्षिणार्धे
अग्नेरुल्मुकं निदधाति। ये रूपाणि प्रतिमुंचमाना असुराः संतः स्वधया चरंति। परापुरो निपुरो ये
भरंत्यग्निष्टांल्लोकात्प्रणुदात्यस्मादिति उल्मुकमुन्मृष्टस्य दक्षिणार्धे निधायेति सूत्रितं। स्फ्येन शो
धिते भूमे रेखाप्रदेशान्निवान्दक्षिणाग्रान्निधाय। मूले कुशान्सकृदाच्छिन्नानुन्मृष्टे निधायेति सूत्रितं। तेषु कु
शेषु मूलमध्याग्रदेशेषु पितृतीर्थेन पितृपितामहप्रपितामहानां नामगोत्रशर्मोच्चार्य संबुध्यंता २२४
निनामा निष्टहीता अवनेनिक्ष्व ये च त्वामत्रान्विति मंत्रेण पृथक्पृथगवनेजयति। असाववनेनिक्ष्व ये

सकृदाच्छिन्नान्कृत्वा कुशा ३

च त्वामत्रान्विति पितुर्नामादिश्य कुशोपरि निषिंचत्यवाचीनपाणिनैवं दक्षिणतः पितामहस्य प्रपिता
महस्य चेति। अवनेजनं कृत्वा स्थाल्या एव पिंडान्बिल्वमात्रांस्त्रीन्पिंडान्पित्रादीनुद्दिश्य गोत्रनामशर्मो
च्चार्य एतत्ते ये च त्वामत्रान्विति मंत्रेण यथावनिक्तस्थलेषु पितृपितामहप्रपितामहानां पिंडान्दद्यात्॥
असावेतत्ते ये च त्वामत्रान्विति पिंडान्यथावनेजितं निधायेति सूत्रितं। यदि द्वौ पितरौ बीजक्षेत्रियौ भव
तस्तदा एकस्मिन्पिंडे द्वौ उपलक्षीकृत्य पिंडं दद्यात्। एवं पितामहप्रपितामहयोरपि। उभावेकस्मिन्नि
त्नेदश इति सूत्रितं। द्विपितुः पिंडदानं स्यात् पिंडे पिंडे द्विनामता। षण्णामानि त्रयः पिंडाः केवलांस्तु कृत्ये
हनीति यमः। जीवत्पितुर्नास्ति। जीवंतं हित्वाय विद्यमानपितामहायापि नास्ति। न जीवपितुरस्ति न जी
वंतमहित्वायेति सूत्रं। न जीवंतमतिक्रम्य किंचिद्दद्यादिति श्रुतेः। पिता येभ्यो ददाति तेभ्यो वा दद्याद्धोमांत

मेवकर्त्तव्यःकेनारंभोवा विधेयः।येभ्योवापितातेभ्यःपुत्रोहोमंतंवेतिसूत्रितं।अनारंभोवेतिकात्यायनः।
ततोत्रपितरोमादयध्वं यथाभागंपितरआवृषायध्वं।इतिजपेत्।उदङ्ग्यावर्त्तनंकृत्वाप्राणांस्त्रिरायमेत्।
उदङ्ग्यावृत्यत्रिरातमनादासिचेतिसूत्रितं।दक्षिणावर्त्तनंकृत्वाअमीमदंतपितरोयथाभागमवीवृषतइ
तिजपेत्।पूर्ववदवनेजनं।तथैवावनेज्येतिसूत्रितं।नमोवइतिदत्त्वाञ्जिःपितॄनंजलिनाप्रार्थयेत्।यत्रपित
रइतिगृहान्प्रार्थयेत्।एतद्वइतित्रिषुपिंडेषुपृथक्पृथक्मंत्रावृत्त्यासूत्रतंतून्दद्यात्।नमोवःपितरोजी
वायनमोवःपितरःशोषायनमोवःपितरोघोरायनमोवःपितरोरसायनमोवःपितरोबलायनमोवः
पितरोमृत्यवेनमोवःपितरोमन्यवेनमोवःपितरःस्वधायैनमोवःपितरःपितरोनमोवइतिपितॄन्प्रार्थ २७५
अ१ येत्।येपितरःपितरःस्थयूयंतेषांश्रेष्ठाभूयास्थयेइहपितरोमनुष्यावयंतेषांश्रेष्ठाभूयास्मयात्रपितरःस्व

य१

धायुष्माकंसायइहपितरएधतुरस्माकंसगृहान्नःपितरोदत्तइतिगृहान्प्रार्थयेत्।नमस्कारैरंज
लिनादद्यान्निःप्रार्थयेत्पितॄन्कृत्वासंवाचयेत्रेतिगृहान्प्रार्थयते।ततइतिकारिका।एतद्वःपितरोवासो
वध्वंपितरइतित्रीणिसूत्राण्युपन्यस्येतिसूत्रितं।एतद्वइतिमंत्रेणत्रिषुपिंडेषुतंत्रतः।मंत्रावृत्त्यापृथ
क्तंतून्स्त्रीनेवप्रक्षिपेच्चनातून्।इतिकारिका।ऊर्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतंस्वधास्थ
तर्पयतनःपितॄन्।इतिमंत्रेणोदकशेषंनिनयेत्पिंडसन्निधौ।तदूर्जमितिमंत्रेणनिनयेत्पिंडसन्निधा
वितिकारिका।ततस्तान्पिंडानवघ्रायपात्रमाधायस्वयंप्राश्नीयाद्द्विजायवादद्याद्भुवाक्षिपेन्म
ध्यमपिंडंपत्नीपुत्रकामाप्राश्नाति।अवघ्रायपिंडानवघ्रायप्राश्नीयाद्ब्राह्मणायवादद्यादपोवाभ्यव
हरेन्मध्यमंपिंडंपत्नीपुत्रकामाप्राश्नीयात्।आधत्तपितरोगर्भंकुमारंपुष्करस्रजंयथेहपुरुषोसत्।

सक्रदाक्षिन्नमूलेक्षितिपद्दुतिकारः।

२ जीवेद्ध्या दिघगादि संवंगकुपरि[illegible]

इत्यनेन मंत्रेण प्राश्रीयात्पत्नी॥ उल्मुकसकृदाच्छिन्नान्यग्नौ प्रहरेत् उल्मुकमग्नौ कृत्वा सकृदाच्छिन्ना
ननुप्रहरेदिति सूत्रितं। एवं पिंडपितृयज्ञं कृत्वान्वष्टकाश्राद्धं कुर्यात्। एतच्च श्राद्धं नवदैवत्यं कार्यं। आश्व
धर्मः। महालयेगयाश्राद्धे वृद्धौ चान्वष्टकासु च नवदैवत्यमत्रस्यात् शेषं षाट्पौरुषं विदुः। महालयपर्शति
पदं अतिक्रांतपरं। ब्रह्मपुराणे। अष्टकासु च कर्तव्यं श्राद्धं हेमंतिकासु च। अन्वष्टकासु क्रमशो माता
पूर्वं तु दिष्यत इति वचनात् प्रथमं मातृपार्वणं द्वितीयं पितृपार्वणं तृतीयं मातामहपार्वणं चेत्यनेन
क्रमेण श्राद्धं कुर्यात्॥ ॥इति त्रयोदशः खंडः॥१३॥ ॥उत्तमायामपूपान्जुहोति। उत्तमायामष्टकायां
माघकृष्णाष्टम्यां अपूपान्पुरोडाशवत्सह श्राकृत्वा जुहोति। प्रातःकाले। प्रातर्यन्त्रेतन्महावृक्षायां सू १३६
र्यआतपति स होमकालः स्वस्त्ययनतमः सर्वासामावृत्तामित्युक्तत्वात्। अपूपानितिबहुवचनात्त्रय॥

घृतपक्वानि तिपद्धतिकारः २ ा।र

ना२

प्रथमायां शाकं जुहोति। उत्तमायामपूपां जुहोतीत्युक्तत्वात् प्रथमोत्तमयो[illegible]रष्टकयोः शाका
पूपहविषोरन्याज्यापश्वादिकं न भवति विशेषविधानात्॥ छ॥ उक्तश्चातिरात्रश्च सघः की छंदसा सह।
अपूपस्त्वदष्टकेन मंस्त सुमना अग्निखिस्वाहेति। आचमनाद्याज्योत्पवनांतं कृत्वा। अपूपानित्युक्तत्वा
त्। अपूपाः पिष्टानामेव संभवंति न तंदुलादीनां। तस्माद्धविषि मुख्यत्वाद्यवतंदुलयोरन्यतरपि
ष्टैरपूपा न भवंति। अनुक्तत्वाद्देवता मंत्रगता अष्टकैव॥ ॥ अग्न्यासादनप्रोक्षणानि भवंति। अष्ट
कायै स्वाहेत्युक्तामीति चतुर्ग्रहणमासादनप्रोक्षणअपणानि। घृतानामभिघारणं। उदगुद्वा
सनं प्रत्यभिघारणं। विकृतित्वात् सग्रदत्तासामिधेन्यः। आज्यभागांतं कृत्वा प्रधानहोमः। अवदा
नधर्मेणापूपतो द्विर्द्वे अवदाय उक्थ्यं इति मंत्रेण प्रधानाहुति होतव्या। ततोयस्यां वै वस्व त इति

मंत्रेण स्विष्टकृत्। सप्तकादिकर्मशेषसमापनं॥ ८॥ गोपशुरजपशुस्थालीपाको वा। अत्र वा शब्दः
प्रत्येकमभिसंबध्यते। मध्यममध्याष्टकयोरेते विकल्पाः। गवा वा पशुना वा यजेते तिस्रोऽष्टकांतरे।
शाकरूपेणापि विकल्पाः। गोपशुः करणशाकौ अजपशुः। तदशक्तौ पूर्वोक्तः पायसश्चरुः। तदशक्तौ ५२
स्थालीपाकश्चरुः। तथा चोक्तं। स्थालीपाकं पशुस्थाने कुर्याद्यद्यानुकल्पिकं। अपयेत्तं सवत्सायाः
स्तरुण्याः गोः पयसीति। अपि वा गोर्ग्रासमाहरेत्। अपि वेत्यनेनापरः पक्षः सूच्यते। गोपश्वाद्य
भावे गोः स्वप्तये ग्रासं ग्रासमात्रं यावता तृप्तिर्भवति तावन्मात्रं यवसमाहरेत् दद्यात्। वृषनंदे
न्वोर्लिंगस्याविवक्षितत्वात् नियमो न। केचनाऽत्रापि सिंहावलोकनन्यायेन एषा मेष्टका इति मंत्र २११
माहुः॥ ८॥ अपि वारण्ये कक्षमपादहेदेषा मेष्टकेति। अपि वेत्यपरः पक्षः। अरण्ये ग्रामाद्बहिः

निस्स...पनार्थौ ४

त्वा कक्षं तृणसमूहं अपादहेत् ज्वालयेत्। एषा मेष्टका इति इति मंत्रेण। एते पूर्वोक्ताः पक्षाः सर्व
पाक्षाशक्त्या योज्याः॥ ८॥ न त्वेव न कुर्वीत न त्वेव न कुर्वीत। अत्र द्वौ नञौ प्रतिषेधार्थौ प्रकृतार्थं गम
यतः। न कुर्वीतेति न अपि तु कुर्वीतैव। तु शब्दादेवशब्दाच्च नियमः। नेति प्रतिषेधार्थौ यो नाष्टा
४या यामिति यास्कः। अष्टकादर्शपूर्णमासवन्नित्यत्वज्ञापनार्थं त्विवशब्दौ आचार्येण पठितौ। द्विरभ्या
सोऽध्यायपरिसमाप्तिसूचनार्थः। अपि वा गोर्ग्रासमाहरेदपि वारण्ये कक्षमुपाध्यायः यादेषा
मेष्टकेति न त्वेव न कुर्वीतेति छंदोगगृह्ये। बोधायनेनाने केविकल्पा उक्ताः। क्षीरोदनेन वा रूप्यो
दनेन वा नवत्यामफलैः प्रधानमात्रं हिरण्यप्रदानं वापि वा पि वा गोर्ग्रासमाहरेदपि वान्वानेन्य
उदकुंभाना हरेदपि वा मंत्रानधीयीतापि वाग्निना कक्षमुपोषेदेषा मेष्टकेति न त्वेवानष्टकः स्यादिति।

चतुर्दशाखंडः॥१४॥ ॥इतिश्रीमत्सकलविद्वज्जनमंडलीमंडनद्विवेदिश्रीश्रीपतितत्सुतद्विवेदिश्री
कृष्णजीतत्तनयनारायणविरचितेश्राद्धप्रदीपेकेनाध्येतृतीयोध्यायःसंपूर्णः॥समाप्तश्राद्ध॥ ॥ ॥
हेल्लानिरुत्साहितदानवेंद्रंप्रह्लादभक्ताभयसंप्रणेतं।नत्वानुगम्यंसुमुखारविंदंवंदेनृसिंहंभु
वनैकनाथं॥मासिमासिपितृभ्योदद्यात्।मासिमासिअमायांअर्थमासिपितृभ्योदद्यात्श्राद्धमि
तिशेषः॥मासस्तुद्वाभ्यांपक्षाभ्यांभवति।मार्कंडेयपुराणे।निमेषैर्दशभिःकाष्ठाःसाष्टभिस्त्वकलाः
पुनः॥त्रिंशत्काष्ठाकला।त्रिंशत्रिंशद्भिःस्यान्मुहूर्त्तकं।अहोरात्रंमुहूर्त्तास्तिसृणांत्रिंशत्तुवैस्मृतं।त्रिं
शतातैरहोरात्रैःपक्षौद्वौमासउच्यतेइति।सचमासःसावनसौरचांद्रनाक्षत्रादिभेदेनचतुर्विधोमा
सः।सावनस्त्रिंशद्भिर्दिनैर्भवति।सौरस्तुसंक्रमाद्दासंक्रांतिर्भवति।चांद्रोदर्शांतः।नाक्षत्रस्तुसर्व १७८

नक्षत्रपरिवर्त्तनेन।ब्रह्मसिद्धांते।चांद्रःशुक्लादिदर्शांतःसावनस्त्रिंशताद्दिनैः।एकराशौरविर्याव
कालंमासःसभास्करः।सर्वर्क्षपरिवर्त्तैस्तुनाक्षत्रोमासउच्यते।ऋष्यशृंगः।विवाहव्रतयज्ञेषुसौरंमानंप्र
शस्यते।पार्वणेत्वष्टकाश्राद्धेचांद्रमिष्टंतथाब्दिके।गार्ग्यः।सौरोमासोविवाहादौयज्ञादौसावनःस्मृतः॥
आब्दिकेपितृकार्येचचांद्रोमासःप्रशस्यते।स्मृत्यंतरे।दैवेकर्मणिपित्र्येचमासःचांद्रमसःस्मृतइति।ब्र
ह्मसिद्धांते।अमावास्यापरिच्छिन्नोब्राह्मणस्यतुमासकः।संक्रांतिपौर्णमासीभ्यांतथैवनृपवैश्ययोः
रित्यादिवचनात्पितृकार्येचांद्रोमासोज्ञेयः॥मासोद्वाभ्यांपक्षाभ्यांशुक्लकृष्णाभ्यांभवति।दक्षः।पक्षौपू
र्वापरौशुक्लकृष्णौमासस्तुतावुभाविति।तस्ययाअंतिमातिथिरमावास्यातस्यांश्राद्धमिति।प्रोक्तामा
तुलस्यांतइतिहारीतः।सचचांद्रोद्विधामासः।शुक्लपक्षादिःकृष्णपक्षादिर्वामंडनः।कृष्णपक्षादि

मांसंनांगीकुर्वंतिकेचन।येपीछंतिनतेषांवाऽदृष्टो।विंध्यस्यदक्षिणे।दीपिका।द्विधासद्भिरेवोक्ताःसि
श्रो॰२ तासितौविंध्याद्दक्षिणतोखिलैरपिबुधैःकृष्णादिर्नेष्यते।अत्रदेशतोव्यवस्था।अमानामरश्मिश्चंद्रक
लालोकेप्रतिष्ठिता।यस्यांसोमोवसत्यस्याममावास्याततःस्मृतेतिवसिष्ठः।गोभिलः।सूर्याचंद्रमसोः
परःसंनिकर्षःसामावास्येति।तस्यांपितृभ्यःश्रद्धयादीयतेतच्छ्राद्धमित्यर्थः।तत्रपार्वणेपुरूरवार्द्रवसं
ज्ञिताविश्वेदेवाभवंति।वसुरुद्रादित्यसंज्ञकाःपितरः।पिंडप्रदानेवरुणप्रजापत्याग्निसंज्ञकाःपितरः।
पुरूरवाश्चार्द्रवाश्चपार्वणेसमुदाहृतौ।वसुरुद्रस्तथादित्यःपित्रादित्रितयेक्रमात्।मातामहादिमात्रा
दित्रिकेचस्मृतिमर्हति।पिंडदानेतुवरुणप्रजापत्यनयस्तथेति।पितृभ्योदद्यादित्यर्थःचतुर्थीबहुवच १७७
ननिर्देशःससौकर्यार्थंब्राह्मणाभोज्यंतामितिवत्।यथाब्राह्मणाःप्रत्येकंभोज्याएवंपितरोपिप्रत्ये

कंपितृपितामहप्रपितामहाअपिभोज्याः।तथाचास्मिंछ्राद्धेमातामहादित्रयोपिभवंति।वृद्धपराश
रः।पितरोयत्रपूज्यंतेतत्रमातामहाध्रुवं।अविशेषेणकर्तव्यंविशेषान्नरकंव्रजेत्।एतदुक्तंभ
वतिएतच्छ्राद्धंषड्दैवत्यं।कात्यायनः।कर्षूसमन्वितंमुक्त्वातथान्यच्छ्राद्धषोडशं।प्रत्याब्दिकंचशेषेषु पं
पिंडाःस्युःषडितिस्थितिः।तच्छ्राद्धंकथंकुर्यादित्यतआह।का।ब्राह्मणान्वेदविदोयुग्मानवराद्योनि
त्यवद्युपवेशयेत्।पूर्वेद्युस्तद्दिनेवाब्राह्मणान्द्विजान्वेदविदःमंत्रब्राह्मणात्मकतत्त्वार्थज्ञान्।मंत्रब्रा
ह्मणयोर्वेदइत्युक्तत्वात्।अयुग्मान्विषमसंख्याकान्।अवरार्द्धान्।अवरार्द्धशब्दोनिकृष्टवच...
नेयःअवरार्द्धाःसंख्ययाकृत्वान्यूनाःयेषुयेषुपार्वणेषुअवरार्द्धास्तान्।अतद्गुणसंविज्ञानोबहु
व्रीहिः।एवंनिकृष्टपक्षेएकैकेपार्वणेत्रयस्त्रयइत्यर्थः।उत्तमपक्षेगौतमः।नववरान्भोजयेदयुजो

यथोक्तमाह मूर्द्धन्निन्योगुणवंतमिति। एतद्वचनव्याख्या हेमाद्रिश्राद्धखंडेवलोकनीया। विस्तरभि
यान लिखिता। तन्मते तु एकैकस्य पित्रादेः स्थाने नव नव वा सप्त सप्त वा पंच पंच वा त्रीस्त्रीन्वैकैकं वा
भोजयेत्। यदा तु नव नव पित्रादिवर्गे गृहीतास्तदा एकपार्वणे सप्तविंशतिः। मातामहपार्वणे च स
प्तविंशतिः। विश्वेषां देवानां दशदश। एवं विश्वेषां देवानां संख्याक्रमेणादश्या। षट्षट्चतुर्द्धेकादिकल्पा।
एवं विश्वेदेवा विंशतिः। एवं नवपक्षे चतुःसप्ततिः। ७४। यदा तु सप्त सप्त पित्रादिवर्गे तदा एकविंशतिः।
मातामहवर्गे चैकविंशतिः। विश्वेदेवा अष्टौ अष्टौ। षोडश। एवं सप्तपक्षे अष्टपंचाशत्। ५८। यदा तु
पंच पंच पित्रादिवर्गे तदा पंचदश। मातामहवर्गे च पंचदश। विश्वेदेवाः षट् षट्। द्वादश। एवं पंचप १८०
क्षे द्वाचत्वारिंशत्। ४२। यदा तु त्रयस्त्रयः पित्रादिवर्गे तदा नव। मातामहवर्गे च नव। विश्वेदेवाश्चत्वार

श्चत्वारः। अष्टौ। एवं त्रयपक्षे षड्विंशतिः। २६। यदा तु एकैकः पितृवर्गे तदा त्रयः। मातामहवर्गे च त्रयः।
विश्वेदेवा द्वौ द्वौ। चत्वारः। एवं एकपक्षे दश। १०। यदा तु पार्वणं प्रति एकैकस्तदा पितृवर्गे एकः। माताम
हवर्गे चैकः। विश्वेदेवा एकैकः। द्वौ एवं चत्वारः। यदा तु पार्वणं प्रत्येकैकः। तत्र वा वैश्वदेविकमिति व
चनादेको विश्वेदेवाः। एवं त्रयः। अथवा पार्वणद्वयं मिलित्वा एकः। एको विश्वेदेवाः। एवं द्वौ। अथ [illegible]
एक एव पार्वणद्वयार्थी विश्वेदेवानामर्थे अन्न संकल्पः। अपि वा भोजयेदेकं ब्राह्मणं वेदपारगं। यद्दे
कं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्। अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च इति वसिष्ठः। पितृवदितिक
निष्ठमध्यमवृद्धान्पितृपितामहप्रपितामहस्थाने द्विजान् उपवेशयेदिति तात्पर्यार्थः। एवं यथोक्तान्द्विजा
न्पूर्वदिने तद्दिने वा निमंत्रयित्वा। देवलः। श्वः कर्तास्मीति निश्चित्य दाता विप्रान्निमंत्रयेत्। निरामिषं

५२ सकृद्धुत्वा सर्वं तु कृजनेष्टहे। असंनवैधकर्वी ब्राह्मणांस्तान्निमंत्रयेदिति॥ छ॥ अयुग्मान्युदपात्राणि
तोलैरवकीर्य। पूर्वं वैश्वदेवो बलिरहितः॥ लौगाक्षिः॥ पक्वांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः॥ पित्र्य
ज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः॥ पक्वांतं कर्माग्न्यन्वाधानं। शालंकायनः॥ श्राद्धात्प्रागेव कुर्वीत वैश्व
देवं तु साग्निकः॥ एकादशाहिकं मुक्त्वा तत्र ह्यंते विधीयते। परिशिष्टे। संप्राप्ते पार्वणश्राद्धे एकोद्दि
ष्टे तथैव चाश्रयतो वैश्वदेवस्यात्पश्चादेकादशेहनीति। ततो ष्टहबलिं कुर्यादित्यनेन मनुवच
नेन श्राद्धांते बलिदानं। ततः पिंडपितृयज्ञः॥ देवलः॥ अकृते वैश्वदेवे तु स्थालीपाकः प्रकीर्तितः॥
अन्यत्र पितृयज्ञात्तु सोपराह्णे विधीयते। पिंडपितृयज्ञानंतरं श्राद्धं मामावास्यं। कात्यायनः॥ पि २८१
तृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षये ग्निमान्। पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकं। स्व वैश्व

देवः श्राद्धात्स्य कथा केन। लौगाक्षिः॥ पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च। वैश्वदेवं न पित्रर्थं न दार्शं
वैश्वदेविकं। न दार्शमित्यनेन तद्विकृतीनां नित्यनैमित्तिककाम्यश्राद्धानामुपसंग्रहो लक्ष्यते। वैश्व
देविकमित्यनेन भूतयज्ञादयः॥ पैठीनसिः॥ पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः॥ आसुरं तद्भवे
च्छ्राद्धं पितॄणां नोपतिष्ठति। निरग्निकस्य श्राद्धशेषेणान्नेनांते वैश्वदेवः॥ भविष्यत्पुराणे। श्राद्धं कृत्वा
महाबाहो ब्राह्मणांश्च विसर्ज्य च। वैश्वदेवादिकं कुर्यात्ततो भरतसत्तम। अन्यद्भूयांतराज्ञेयं। ततः
श्राद्धे ब्राह्मणान्वैश्वदेविकान् पूर्वाभिमुखान् पित्र्यान्तु दक्षिणामुखानुपवेश्य नियमश्रावणाया स्न ८१
प यथास्मृति तु कं श्राद्धमारभेत्। आसनदानानंतरं आवाहनं वैश्वदेवपूर्वकं। एकोद्दिष्टे आवाहननि
षेधात्पार्वणे भवति। नावाहनमिति वक्ष्यमाणत्वात्। ततोर्घदानं। तत्र अयुग्मानि विषमसंख्या

कानित्रीणि दक्षिणाग्रतया उदग्याग्राणि उदकार्थपात्राणि ताम्राणि पर्णानि वा तिलैः कुशैस्तिलै
व२ रैः कीर्य अवकिरणं मिश्रणं कृत्वा। अयुग्मान् कृत्वा तत् पितॄणां। तत्पूर्वं विश्वेषां देवानां युग्मपात्र
बां३ पूरणं यवैरवकिरणं। अन्यत्र पवित्रस्थापनं। विश्वेदेवानां द्वे द्वे पितॄणां त्रीणि त्रीणि मध्यमानुयानि
पात्रे स्थाप्यानि। विश्वेषां देवानां कर्म सर्वं सव्येन। पितॄणामपसव्येन। यत्तु पार्श्वे यवैस्तु विकीर्या
नि ५ यत्नाजने सपवित्रके। शंनो देवीरयः क्षिप्त्वा यवोसीति यवांस्तथा। देवशालाके देवानां पूजा पुष्पादि
भिस्तथेति। पितृपात्रे विशेषोयं तिलोसीति तिलांस्तथा। तिस्रो तिस्रः शलाकास्तु मध्यमानुयानि वेशये
दिति वसिष्ठः।।क।। असावेतत्ते इत्युक्त्वा द्विजानां पाणिषु निनयेत्। द्विजानां पाणिषु हस्तेषु १८२
अर्घ्यपात्रस्थितमुदकं या दिव्या इतिमंत्रांते असाविति पितुः संबुध्य तन्नामान्ते द्वितीयाचार्यं ततोर्घ

मिति नि। नयेत्। पितामहप्रपितामहमातामहवर्गस्य चैवं पूर्वं विश्वेदेवानां। ततः पितॄणां।
ब्रह्मपुराणे। ततो वामेन हस्तेन गृहीत्वा चमसान्क्रमात् पितृतीर्थेन तत्तोयं दक्षिणेन च पाणि
ना। दत्तं दत्तोदके हस्ते विप्राणां च पृथक् पृथक्। दद्यान्मंत्रेण पश्चात् या दिव्या आप इत्यपि। स्कां
दे नागरखंडे। चंदनं गंधपुष्पाणि धूपं दत्वा यथाक्रमं। सपवित्रेषु हस्तेषु दद्यादर्घं समाहितः।
या दिव्या इति मंत्रेण स्वाहाकारसमन्वितं। उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः। आसना
घादिकं दद्यात् सर्वमेव यथाविधीति।।क।। अत ऊर्ध्वमलंकृतान्। अत ऊर्ध्वं अर्घदानादूर्ध्वं गंध
वदनादिनिरलंकृतान् अलंकारयुक्तान् कृत्वा द्विजान् विश्वेदेवपूर्वकं पितृद्विजान्। सौरपुराणे।
प्रदद्याद्गंधमाल्यानि धूपवासांसि शक्तितः। ब्रह्मवैवर्त्ते। यज्ञोपवीतं दातव्यं वस्त्राभावे द्विजानतः।

पितॄणां वस्त्रदानस्य फलं तेनाप्नुते खिलं। आदित्यपुराणे। पितॄन्समुद्दिश्य वासो निर्दद्याद्यज्ञोप
वीतकं। यज्ञोपवीतदानेन विना श्राद्धं तु निःफलं। देवलः। यज्ञोपवीतं विप्राणां स्कंधान्नैवावतारये
त्। गंधादिपूजासिध्यर्थं दैवे पित्र्ये च कर्मणि। चंदनं ललाटे एव देयं। गात्रानुलेपनं पश्चाद्दीयत्वेन
वक्ष्यमाणत्वात्। पुष्पमाला शिरसि देया। न कंठे। मनुः। ललाटे पुंड्रकं दद्यात्स्कंधे मालां तथैव
च। निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिं। न नियुक्तः शिखावर्जं माल्यं शिरसि वेष्टयेदिति। अ
लंकारा देयाः। विष्णुधर्मोत्तरे। गंधैः पुष्पैश्च धूपैश्च वस्त्रैराभरणैस्तथा। अर्चयेद्ब्राह्मणान्भक्त्या श्र
द्दधानः समाहितः। एवं विश्वेदेवानां पितॄणां मातामहानां चोद्देशेन द्विजानलंकृतान्कृत्वा। ततः लो १८३
के श्रेष्ठतरं वस्तु आत्मनश्चापि यत्प्रियं। सर्वं पितॄणां दातव्यं तदेवाक्षयमिच्छतेति श्राद्धखंडे। अत्रा

चमने विधेयं। मनुः। श्राद्धारंभेऽवसाने च कुर्यादाचमनं कृती। विकिरे पिंडदाने च पादशौचा
र्चनांतयोः। तेषु प्रथममेव द्विः शेषाणि तु सकृत्सकृत्। आचांतः प्राक्कुशान्स्पृष्ट्वा पाणिना वन्यांस्तु
धारयेत्। सर्वकर्मापसव्येन षट्सु स्थानेषु वर्जयेत्। आशीःप्रदक्षिणास्वस्तिप्रणाममर्जदक्षिणाः। ज
मदग्निः। अपसव्येन कर्तव्यं सर्वं श्राद्धमतंद्रितः। सूक्तस्तोत्रजपं मुक्त्वा विप्राणां च विसर्जनं। आ
आमंत्राग्नौ कृतान्ने च। आमंत्र्य पृष्ट्वा द्विजान्ब्राह्मणान् अग्नौ करिष्य इत्येवं पृष्ट्वा अन्नं उदनं अ
ग्नौ आवसथ्ये कृत्वा ततः। चकाराद्धृतान्नं। अथ सवीत्यारम्याहुतित्रयहोमः। अग्नौकरणहोमः ८२
संपादनीयः। अप्रदक्षिणं परिसमूहनं परिस्तरणं च अप्रदक्षिणं। पर्युक्षणं वा। प्रादक्षिण्यं सकृत्स
र्वत्र। मेक्षणेन होमः कार्यः। अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा। यमायांगिरस्व

तेपितृमतेस्वाहा।मेक्षणहोमः॥अग्नौकरणशेषंपितृणांपिंडार्थंचदेयं।नविश्वेषांदेवानां।यमः॥
अग्नौकरणशेषंतुपित्र्येषुप्रतिपादयेत्।प्रतिपाद्यपितृणांतुनदद्याद्वैश्वदेविके।ब्रह्मांडे।अ
ग्नौकरणशेषंतुनदद्याद्वैश्वदेविके।नहिस्मृताःशेषभाजोविश्वेदेवाःपुराणगैः॥वृद्धवसिष्ठः॥
पित्र्यविप्रकरेहुत्वाशेषंपात्रेषुनिक्षिपेत्।पिंडेभ्यःशेषयेत्किंचिन्नदद्याद्वैश्वदेविके॥४॥अस
वेततस्त्यक्तुदिव्यभोजयेत्।अन्नमित्यनुवर्त्तने।पितृवच्छनंद्विजवच्छनंआत्मवच्छनंवा।अ
सावितिपितुःसंबुद्ध्यंतंनामानुदिश्यआचार्यैरेतत्परिविष्टंपरिवेष्यमाणंवांचवेःस्वधांजनमन्नंते
इतिभोजयेत्।द्विजानितिशेषः॥एवंपितामहप्रपितामहमातामहवर्गेषुवैश्वदेवपूर्वकंदानं।अ १८४
त्रान्नेद्विजांगुष्ठनिवेशनंइदंविष्णुरितिपंचभिःकार्यं।यदिष्टंजीवतस्तस्यासीदात्मनस्तद्विजस्य वा।

तत्रदेयंवसर्वान्नंमांसंवापिसुसंस्कृतमितिकार्ष्णाजिनिः॥अथविधाने।इदंविष्णुरितीमाभिःपंच
भिःश्राद्धकर्मणि।अंगुष्ठमन्नेवगाह्येतेनरक्षांसिबाधतइति।ततोब्राह्मणाययथासुखमश्नीध्वं॥
॥५॥जुंजानेषुमहाव्याहृतीःसावित्रींमधुवातीयांपितृदेवत्याःपावमानीश्चजपेत्।भुंजानेषुभो
जनंकुर्वत्सुविप्रेषुयजमानोयज्ञोपवीतीमहाव्याहृतीश्चतस्रः॥सावित्रींगायत्रींमधुवातीया।म
धुवातेनयुक्ताःपितृदेवत्याःपितरोदेवतायासांताःउदीरतामित्यादि।पावमानीःपवमानोदेवता
यासांताःस्वादिष्ठयेत्यादिमंडलस्थाजपेत्।जपंकरोति।चकाराद्राक्षोघ्नीर्वैष्णव्यश्चनिगमः॥भुं जदेगणतिर
जत्सुजपेत्पवित्रमंत्रान्ऋग्यजुःसामेतिहासपुराणानि।राक्षोघ्नीःपावमानीरुदीरतामवरेमध्यं
न्नवतीश्वमंत्रान्द्वादशाक्षराष्टाक्षरप्रभृतीनिति।गोतमोविश्वेदेवागायत्री।मधुवाताऋतायतेरी

शंखः। पितरस्त्रिष्टुब्जगत्येकादश॥ उदीरतामवर उत्परास॥ इत्र२४ स्वादिष्टयादश। मधुच्छंदाइत्या
दि। स्वादिष्टयेत्यादिपवमानं॥ ८॥ उक्तवस्तुपिंडान्दद्यात्। उक्तवस्तु विशेषस्तु अग्निप्रसंगे उक्तः। काला
यन॥ तृप्तास्थेति पृच्छति। तृप्ताः स्मः इति प्रत्युक्ते। पिंडान्पितृपितृवर्गमातामहवर्गयोः कल्पोक्तप्रका
रेण दद्यात्। अपहता इत्यारभ्योल्मुकादिस्तरणावनेजनपिंडदानावनेजनप्रकारेण दद्यात्। सा
ग्नेस्त्वपनो मार्जनं। निरग्नेः कुशेन। ब्रह्मांडे। वज्रेणाथ कुशैर्वापि कुर्याद्युन्मार्जनं ततः इति। पारस्कर
कारान्यास्तु हिरण्येनाथ कुशैर्वापि महीं द्विजः इति। तदुन्मार्जनं पार्वणे समृतं। ब्रह्मांडे। खंडनं पेषणं
चैव तथैवोल्लेखनं क्रिया। सकृदेव पितॄणां स्याद्देवानां तु त्रिरुच्यते। एवमुल्लेखनं कृत्वास्तरणावने १८५
जनपिंडदानादि पिंडपितृयज्ञोक्तप्रकारेण दद्यात्॥ ८॥ पुरस्तादेके। पिंडानित्यनुवर्तते। एके आश्व

योः द्विजभोजनात्पुरस्तात् प्रथमतः पिंडान्दद्यादिति वदंति। एक इति ग्रहणादाचार्याणामयं पक्ष
स्तेन। तथा च मनुस्मृतिः। पिंडनिर्वपणं केचित्पुरस्तादेव कुर्वते। पितृमातामहानां च श्राद्धे दद्याद्वि
त्या ३ मत्सरः॥ मनुः। त्रींस्तु तस्माद्धविःशेषात्पिंडान्कृत्वा समाहितः। औदकेन विधानेन निर्वपेद्दक्षिणामुखः।
॥ ८॥ पिंडान्पश्चिमेन तत्पत्नीनां किंचिद्दत्त्वा तद्भार्यायै। पिंडानित्यनुवर्तते। पिंडान्पित्रादिदेशेन दत्त्वान्पश्चि पु४
मेन पश्चिमनामेकं किंचिद्दर्भादिकमंतर्धायव्यवधानं कृत्वा तत्पत्नीनां मातृपितामहीप्रपितामहीनां
पिंडान्दद्यात्। एवं मातामहादिपिंडान्पश्चिमतो मातामहीप्रमातामहीवृद्धप्रमातामहीनां पि
डान्दद्यात्। संग्रहभाष्यकारः। तत्पत्नीनां पिंडाः इह पश्चिमाः स्युरिति। मत्स्यपुराणे। ततः कृत्वांतरे
दद्यात्तत्पत्नीभ्यः कुशान्बुधः। तद्वत्पिंडादिकं कृत्वा आवाहनविसर्जनं। नागरखंडे। श्वशुरस्या

अतोयस्मा च्छिरः प्रच्छादनक्रिया। पुत्रैर्दनैर्णसा कार्यामातुरस्तुदपार्थिनि। एवं पिंडदानं दर्भादेप
र्वणं सपिंडीकरणं च विहाय सर्वत्र मातृणां देयं। कर्णसमन्वितं सूक्ता तथान्यं बूयाद्यपो डशी। प्रत्य
रि.ति.२ हिकं च शेषेषु पिंडाः स्युः षलिति स्थितिर्निषेधात्। ततो हस्तलेपं पिंडमूलेव घर्षयेत्। पिंडमूले उलेप
येदिति स्मृतिदर्शनात्॥ ५॥ ब्राह्मणेः शेष्यः शेषं निवेदयेत्। कृतनुन्नपिंडशेषमन्नं तु केभ्यो ब्रा
ह्मणेभ्यो निवेदयेत्। एवं निवेदने। शेषमन्नं किं क्रियतामिति पृष्टे। इष्टैः सहनुज्ञतामित्युक्ते। तद्ब्रा
ह्मं। अन्यथोक्तेन यमः। ततोनुक्तवतां तेषामन्नशेषं निवेदयेत्। तेयद्ब्रूयुस्तथा कुर्यादनुज्ञातस्तु ते
द्विजैः। ततः। प्रत्यवनेजनादि स्मृत्युक्तं यथोक्तं श्राद्धं समापयेत्॥ ७॥ अग्नौकरणादि पिंडपितृयज्ञे १८६
न कल्पो व्याख्यातः। अग्नौकरणादिकल्पः कलापइति कर्तव्यतासमूहः। पिंडपितृयज्ञेन पिंडपितृ

यज्ञोपराह्णइत्यादिना व्याख्यातः सइहापि ज्ञेयः। अग्नौकृत्वान्नं चेति यदुक्तं तत्सर्वं कल्पतो विशे
यं। कल्पैकत्वात्। अवसविपरिसमुह्येत्यारभ्य सकृदाच्छिन्नहोमांतं सर्वमतिदिश्यते॥ प्रथमः खं
डः॥१॥ ॥अथात एकोद्दिष्टं। अथशब्दः पार्वणनिवृत्त्यर्थ एकोद्दिष्टविधायकत्वं। अतश्चानंत
६ यार्थः। अतः पार्वणश्राद्धकथनानंतरमेकोद्दिष्टमुच्यत इति वाक्यशेषः। एकउद्दिष्टो यस्मिंश्रा
दि॰ द्धे तदेकोद्दिष्टं। कस्य। एकमुद्दिश्य पयच्छ्राद्धमेकोद्दिष्टमुदीरितं। त्रीनुद्दिश्य यदा श्राद्धं पार्वणं मु
नयो विदुः॥ ७॥ एकपवित्रं। एकं पवित्रमस्मिन्निति एकपवित्रं। अत्र एकपवित्रं वदता पार्वणेप
त्रत्रयं त्रयं न वतीति सूचितं। एकार्घैकपवित्रमिति याज्ञवल्क्यः। अनंतर्गर्भिणं साग्रं कोशं द्विद
लमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचिदिति कात्यायनः॥ ७॥ एकार्घः एकोर्घोस्मिन्निति

कार्घे। पार्वणे ऽर्घ्यमनुदपात्राणीत्यस्यापवादः। एकार्घमेकपवित्रमिति विष्णुः॥ ॥ एकपिंडं।
एकः पिंडो ऽस्मिन्नित्येकपिंडं। त्रुक्रवस्तु पिंडानित्यस्यापवादः। एकपिंडो विधीयत इति पाद्मे॥ ॥ ना
वाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्न उपतिष्ठतामित्यक्षय्यस्थाने। अत्र एको
द्दिष्टे आवाहनं न। अत्रावाहननिषेधात्पार्वणे ऽर्थादावाहनं सिद्धं। अत्राग्नौकरणं न। अग्नौक
रणस्यापवादः। अत्र विश्वेदेवा न। अत्रनिषेधात्पार्वणे विश्वेदेवा भवंतीति सूचना। अत्र तृप्तिप्रश्नः स्व
दितमिति प्रश्नो भवति। सुस्वदितमिति प्रत्युक्तिः। अक्षय्यस्थाने उपतिष्ठतामिति वदेत्। याज्ञवल्क्यः॥
एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं। आवाहनाग्नौकरणरहितं ह्यपसव्यवत्। मार्कंडेयपुरा १८७
णे। मृताहनि तु कर्तव्यमेकोद्दिष्टं शृणुष्व तत्। दैवहीनं तथैकार्घं तथैवैकपवित्रकं। आवाहनं न

मिताक्षरायां प्रायश्चित्ताध्याये। ऊर्ध्वं त्रिपक्षाद्यः कुर्यान्नताह्न्येव तद्भवेत्। अ
धस्तु कारयेद्दाहं दाहिताग्नेर्द्विजन्मनः।

कर्तव्यमग्नौकरणवर्जितं। प्रेतस्य पिंडमेकं च दद्यादुच्छिष्टसंनिधौ। अक्षय्यमुदकस्थाने तथा चैवोप
तिष्ठतामिति॥ ॥ अभिरम्यतामिति विसर्गः। अभिरम्यतामिति मंत्रेण विसर्ग उत्सर्जनं ब्राह्मणानां
मिति शेषः। विसर्गे चाभिरम्यतामिति पाद्मे। मार्कंडेयः। इति ब्रूयात्प्रयत्नेन कर्ता विप्रविसर्जने। अभि
रम्यतामिति ब्रूयाद्ब्रूयुस्ते ऽभिरताः स्म हे॥ ॥ संवत्सरमेवं प्रेते। एवमुक्तप्रकारेण प्रेते मृते पित्रादौ सं
वत्सरं संवत्सरपर्यंतं सपिंडनात्प्राक् एकोद्दिष्टं कार्यं। अयमर्थः। पित्रादौ मृते संवत्सरपर्यंतं प्रति
मासिकानि श्राद्धान्येकोद्दिष्टविधिना कार्याणि। कूर्मपुराणे। एकं पवित्रमेकोर्घः पिंडमेकं तथैव च।
एवं मृताह्निकं कर्तव्यं प्रतिमासं तु वत्सरं॥ ॥ चतुर्थं विसर्गश्च। संवत्सरानंतरं सपिंडीकृते सति चतुर्थ
स्य प्रपितामहपितुर्विसर्गो विसर्जनं भवति। चकारात्प्रथमस्य सपिंडनविधिना संसर्गः (कार्यः। स्र

चतुर्थं।

बी

याहे पार्वणैकोद्दिष्टयोर्विधानाद्यथाकुलं पार्वणं वैकोद्दिष्टं वा कार्यं। वृद्धवसिष्ठः। सपिंडीकर
णादूर्द्ध्वं यत्र यत्र प्रदीयते। भ्रात्रे नमित्रे पुत्राय स्वस्वामिने मातुलाय च। गुरवे चानवेक्ष्य ह्येमकोद्दि
ष्टं न पार्वणं। एतेषामेकोद्दिष्टमेव। प्रेतपक्षे विशेषः। प्रेतपक्षे प्रमीतौ चेत्पित्रोः कुर्वीत पार्वणं। पितृव्य
भ्रातृपुत्राणामेकोद्दिष्टं न पार्वणं। तथा पितामहस्य पितामह्याश्च पार्वणमेव नैकोद्दिष्टं। आचारति
लके। पितामहस्य वै श्राद्धे पितरं न परित्यजेत्। पितामह्याश्च वै श्राद्धे मातरं न परित्यजेत्। एकोद्दि
ष्टं न कर्त्तव्यं पितामह्याः कदाचन। एकोद्दिष्टं च कर्त्तव्यं यदि माता च जीवति। पितामहपदं प्रपितामह
हस्याप्युपलक्षणं। सापत्नमातुर्विशेषः। सापत्नमातुः कुर्वीत एकोद्दिष्टं न पार्वणं। अपुत्राया वि १८८
शेषेण पार्वणं सह या मृता। पुलस्त्यः। पर्वकालो मृता ह्यस्य यद्येकत्र द्वयं भवेत्। पार्वणं तत्र कर्त्त

व्यं नैकोद्दिष्टं कथंचन। अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः। पार्वणं तस्य कर्त्तव्यं नैकोद्दि
ष्टं कदाचन। क्षयाहे पार्वणैकोद्दिष्टयोर्विकल्पः। पैठीनसिः। एकोद्दिष्टं तु कर्त्तव्यमौरसेन मृतेहनि।
सपिंडीकरणादूर्द्ध्वं मातापित्रोर्न पार्वणं। यमः। सपिंडीकरणादूर्द्ध्वं प्रतिसंवत्सरं सुतः। एकोद्दिष्टं
प्रकुर्वीत पित्रोरन्यत्र पार्वणं। इत्यादीन्येकोद्दिष्टविधायकानि। पार्वणपराणि च। शातातपः। स
पिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा। प्रतिसंवत्सरं विद्वांश्छागलेयोदितो विधिः। जमदग्निः। आपा
द्यसहपिंडत्वमौरसो विधिवत्सुतः। कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेहनि। शाट्यायनः। सहपिं
डक्रियायां तु यः पुत्रोधिकृतः पितुः। स एव दर्शवच्छ्राद्धं विदधीत मृताहनीत्यादिपार्वणविधायका
व नि तस्मात्पूर्वोक्तैव व्यवस्था। विधवाया विशेषः। पुत्राभावे पतिश्राद्धं पत्नी कुर्यात्समंत्रकं। समंत्रकमि

तिवेदमंत्रान्यमंत्रसहितं।स्त्रीशूद्राणाममंत्रकमिति।गरुडपुराणे।सुमंतुः।अपुत्रे संस्थिते क
त्रीनन्नवेच्छ्राद्धकर्मणि।तस्य पत्न्यपि कुर्वीत तस्याः पिंड्यं पार्वणं तथा॥ननु।अपुत्रा ये मृताः केचित्स्त्रि
यो वा पुरुषा हि वा।तेषां सपिंडनाभावादेकोद्दिष्टं न पार्वणमिति निषेधात्कथं पार्वणं।अत्र निषेधः स्त्री
व्यतिरिक्तकर्तृविषयः॥पत्नीकर्तृत्वे लौगाक्षिः।सर्वासामेव पत्नीनां पत्न्यः स्वभर्तॄणाममंत्रकं।सपिंडीकर
णं कुर्युस्ततः पार्वणमेव च।स्मृत्यंतरे।अपुत्रापुत्रवद्दद्यात्पुत्रवत्यपि भर्तरि।उदकं पिंडदा
नं च जलमेव तु पुत्रिणी॥विधवायाः पार्वणचतुष्टयमुक्तं।स्मृतिसंग्रहे।चत्वारः पार्वणाः प्रोक्ता वि
धवायाः सदैव हि।स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च।ततो मातामहानां च श्राद्धदानं तथा नघ। १८८
श्वश्रूणां च विशेषेण मातामह्या अपि स्मृतं।विशेषेण कालतीर्थविशेषेणेत्यर्थः॥विस्तरासंभवे

पार्वणद्वयमुक्तं तत्रैव।भर्तृहीना तु या नारी कुर्वीत पार्वणद्वयं।एकं तु भर्तृपक्षस्य पितृपक्षस्य
वापरं।अनुपनीतपुत्रविषये विशेषः।स्कंदे नागरखंडे।पित्रोरनुपनीतोपि विदध्यादौरसः सुतः।
और्ध्वदैहिकमन्ये तु संस्कृताः श्राद्धकारिणः।अन्ये चात्र पुत्रादयः संस्कृता अधिकारिणः।पुत्रो
जन्मत एवाधिकारी।तथा।चौलादर्वागाह्निकादर्वाक् कुर्यात्पितृमेधिकं।आह्निकात्प्रथमवर्षात्
र्ध्वं।सुमंतुः।पुत्रस्योत्पत्तिमात्रेण संकुर्यादृणमोचनात्।पितरं नाह्निकाच्चौलात्पितृमेधेन कर्मणा
।तृतीयसंवत्सरादूर्ध्वं मंत्रवत्तत्समाचरेत्।पुत्रोरनुपनीतोपि मंत्रवत्पितृमेधिकं।यद्यसौ स्यात्तदू
ढः स्याद्यदि स्याच्चत्रिवत्सरः।तथा।कृतचूडस्तु कुर्वीत उदकं पिंडमेव च।स्वधाकारं तु कुर्वीत
वेदोच्चारं न कारयेत्।प्रमीतपितृको बालो नाप्यादिष्टव्रतस्तु यः।स्वधाशब्देन सा तस्य युज्यते पैत्

कीक्रिया। नह्यस्य विद्यते किंचित्कर्म आमौंजिबंधनात्। नचाग्निं व्याहरेद्दूरं स्वधानिनयनादृते।
स्वधानिनयने पित्रोः श्राद्धं। व्याघ्रः। कृतचूडोनुपेतस्तु पित्रोः श्राद्धं समाचरेत्। उदाहरेत्स्वधाकारं न
त॰र॰३ तु वेदाक्षराण्यसौ। इत्यनुपनीतपुत्राधिकारः। एवममावास्यामहालयकृष्णपक्षाष्टकाश्राद्धादौ
पार्वणद्वयं कुर्यादनुमासिके चैकपार्वणं। प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स नान्यपीति याज्ञवल्क्य।
वचनात्। मृतनिमित्तानि श्राद्धानि सपिंडनादर्वाक् एकोद्दिष्टविधिना कार्याणि। बृहस्पतिः। सपिंडी
करणादर्वाक् कुर्याच्छ्राद्धानि षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु। अद्वादश प्रतिमास्या
निद्वादशाहं त्रैपक्षिकं ऊनषाण्मासिकमूनाब्दिकं चेति षोडश। षड्विंशश्राद्धानि दशाहश्राद्धा १९०
न्येवं प्रथमा षोडशी। एकादशाहे त्वानि ब्रह्मविष्णुरुद्राणां त्रीणि यमस्यैकं तत्पुरुषस्यैकं एवं

षोडशी द्वितीया। मासिकाद्यानि तृतीया षोडशी। नवश्राद्धानि वा यमः। तृतीये पंचमे चैव नवमै
कादशे हनि। यदत्र दीयते जंतोस्तन्नवश्राद्धमुच्यते। नवश्राद्धान्यनुतिष्ठेदेकोद्दिष्टविधानतः।
प्रेतकल्पे। आशिषो द्विगुणादर्भाः स्वस्त्यस्तु प्रणवस्तथा। अग्नौकरणमुच्छिष्टश्राद्धे वैश्वदे
विकं। विकिरं न स्वधारम्यं पितृशब्दो न विद्यते। अनुशाब्दं न कुर्वीत नावाहनमथोल्मुकं। आसी
मांतं न कुर्वीत नमस्कारं प्रदक्षिणं। अष्टादश पदार्थास्तु प्रेतश्राद्धे विवर्जयेदिति॥ ॥ ॥द्विती
यः खंडः॥ ॥२॥ ॥अथ सपिंडीकरणं। अथैकोद्दिष्टविधेरनंतरं सपिंडीकरणाख्यं श्राद्धमुच्य
त इति वाक्यशेषः। प्रेतस्य मृतस्य पित्रादेः पितृभिः सह पिंडनं मेलनं सपिंडीकरणं। तस्य कालः
नाह॥ ॥ संवत्सरे पूर्णे त्रिपक्षे वा। तत्सपिंडीकरणं पूर्णे संवत्सरे त्रिपक्षे वा कार्यं। त्रिपक्षस्तृतीयः

परस्तत्र सार्द्धमासे वा ॥ अथ वा त्रिभिर्द्दिवसैरूनः पक्षस्त्रिपक्षो द्वादशाहस्तं वा ॥ आश्वलायनः ॥ अ
थ सपिंडीकरणं संवत्सरांते द्वादशाहे वेति ॥ बौधायनः ॥ अथ सपिंडीकरणं संवत्सरे पूर्णे त्रिपक्षे
तृतीये मासि षष्ठे सप्तमे वैकादशे मासि द्वादशाहे वैकादशेह्नि वेति ॥ खादिरगृह्ये ॥ अथ सपिंडी
करणं त्रिमासे द्विमासे एकमासे र्द्धमासे वेति ॥ छ ॥ यद्वहर्वा वृद्धिरापद्येत ॥ यदहर्यस्मिन्नहनि वृद्धि
र्मंगलं उपस्थितं न वतितदा वा सपिंडीकरणं कार्यं ॥ स्मृत्यंतरे ॥ द्वादशेहनि षष्ठे वा त्रिपक्षे वा त्रिमा
सि वा ॥ एकादशे पि वा मासि मंगलं स्यादुपस्थितं तथा साग्निकेन एकादशाहे दर्शो प्राप्ते तत्र सपि १९५
डनं कार्यं ॥ सपिंडीकरणं विना पिंडपितृयज्ञासिद्धेः ॥ अतः सपिंडनं कृत्वैव पिंडपितृयज्ञः कार्यः ॥ वृ
द्धवसिष्ठः ॥ प्रथमास्यादमावास्या मृताहाद्द्वादशे यदि ॥ सपिंडीकरणं तत्र कुर्यादेव सुतो ग्निमान् ॥ यदा

सपिंडनकर्त्ता साग्निकः प्रेतो पि साग्निकस्तदा द्वादशाहे ॥ गोभिलः ॥ साग्निकस्तु यदा कर्त्ता प्रेतो वाप्यग्निमा
न्भवेत् ॥ द्वादशाहे तदा कार्यं सपिंडीकरणं सुतैः ॥ सुमंतुः ॥ प्रेतश्चेदाहिताग्निः स्यात्कर्त्ता वानग्निमान्भवेत् ॥
सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयके ॥ अस्थिते श्वशारीरस्य द्वादशाहः प्रशस्यत इति वचनात् द्वाद
शाहे वा ॥ छ ॥ चत्वार्युदपात्राणि सतिलगंधोदकानि कृत्वा ॥ चत्वारि उदपात्राणि अर्घपात्राणि तिलगं
धोदकैः सहितानि कृत्वा ततः ॥ याज्ञवल्क्यः ॥ गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयमिति ॥ छ ॥ त्रीणि पि
तॄणामेकं प्रेतस्य ॥ चत्वार्युदपात्राणीत्युक्तं तेषां विवरणमाह ॥ त्रीण्यर्घपात्राणि पितॄणां मृतस्य पितृ
पितामहप्रपितामहानामेकैकं ॥ एकं मृतस्य प्रेतस्यार्घपात्रं ॥ एवं चत्वारि ॥ अत्र सपिंडीकरणे विश्वेदेवां
देवानामर्थे द्वौ विप्रौ नियोजयेत् ॥ पित्रर्थे त्रयः प्रेतार्थे एकः ॥ एवं षड्विप्रान्निमंत्र्य ॥ छ ॥ प्रेतपात्रं पितृ

घर्घपात्रे ३ त्रेषा सिंचति। ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां। ये
समानाः समनसो जीवा जीवेषु मामकाः। तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः॥ समानो मंत्र इति द्वा
भ्यां। पितृपात्रेषु त्रिषु पितृपितामहप्रपितामहपात्रेषु प्रेतपात्रात्पवित्रमुत्का मुत्का प्रेतपात्रमर्घपा
त्रं ये समाना इति मंत्रचतुष्टयेन तेषु प्रत्येकमासिंचति आसेचनं करोति। अयमर्थः। प्रेतार्घीय
त्रं प्रेतपितुरर्घपात्रे स्थापयेत्। प्रेतार्घदानानंतरमर्घत्रयं शारस्पाः। ततो ये समाना इति मंत्रचतुष्ट
यं पठित्वा अमुकगोत्रस्य प्रेतस्य अर्घाः अमुकगोत्रस्य पितुः पितुः अमुका अमुकशर्मणः अर्घैः
सह संयुज्यतां॥ इति द्वितीयार्घः। एवं तद्देवपवित्रं पितुः पितामहार्घमुत्का ये समाना इति मंत्रचतुष्ट १५२
यं पठित्वा अमुकगोत्रस्य प्रेतस्यार्घाः अमुकगोत्रस्य पितुः पितामहस्यामुकामुकशर्मणः इति पू

एवं[illegible]पिंडप्रति २५

र्ववत्। इति तृतीयार्घः। एवं तद्देवपवित्रं पितुः प्रपितामहार्घमुत्का ये समाना इति पूर्ववत्पठित्वा अमुक
गोत्रस्य प्रेतस्यार्घाः अमुकसगोत्रस्य पितुः प्रपितामहस्यामुकामुक इति पूर्ववत्। इति चतुर्थार्घः।
केचन पवित्रस्य खंडत्रयं कृत्वा त्रिषु पात्रेष्वेकैकं स्थापयेदिति वदंति तत्तदाचारतो ग्राह्यं। एवमासेचनं
पितृपात्रेषु कार्यं। तथा च याज्ञवल्क्यः। अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्। ये समाना इति द्वाभ्यां
शेषं पूर्ववदाचरेत्॥ ८॥ पितुः प्रभृति तद्वत्पिंडान्कल्पयित्वार्घे पिंडं त्रिषु विभजेत्। पितुः प्रभृति पि
डान्कल्पयित्वा पितुः पितृपितामहप्रपितामह पिंडान्कल्पयित्वा दत्वा तद्वत् अर्घपात्रवत्। अर्घपिं
डं प्रेतपिंडं विभजेत्। त्रिधा समं विभज्य त्रिषु पिंडेषु विभजेत् संसृजेत्। अयमर्थः। प्रेतपिंडं हेमश
लाकया त्रिधा कृत्वा उत्तरस्मात् स्थितं प्रथमं खंडं गृहीत्वा ये समाना इति मंत्रचतुष्टयं पठित्वा अमुकगो

त्रस्यप्रेतस्यपिंडांशः।गोत्रस्यपितुःपितुःअमुकामुकशर्मणः।पिंडेनेतिपूर्ववत्।इतिप्रेतपिंडप्रथमश
कलस्यदक्षिणपृष्ठेपितुःपितृपिंडोपरिसंयोजयेत्।एवंद्वितीयखंडस्यदक्षिणपृष्ठेपितुःपितामहपिं
डेयेसमानाइतिपठित्वामुकगोत्रस्यप्रेतस्यपिंडांशः।अमुकगोत्रस्यपितुःपितामहस्यामुकामुकशर्म
णः।पिंडेनेतिपूर्ववत्।।इतिद्वितीयखंडं।।तृतीयखंडस्यदक्षिणपृष्ठेयेसमानाइतिपठित्वागोत्रस्य
प्रेतस्यपिंडांशः।गोत्रस्यपितुःप्रपितामहस्यामुकामुकशर्मणइतिपूर्ववत्।इतितृतीयंखंडं।।छ।।एवं
मातुर्भर्तुर्भार्यायाःपूर्वमारिण्याःसत्रिभिःपिंडैःप्रक्षिप्य।एवमुक्तेनप्रकारेणपूर्वमारिण्याःपूर्वमृता
मातुःएभिःस्त्रिभिःपिंडैःप्रक्षिप्यप्रेतपिंडंसंसृज्यसपिंडनंकार्यं।भ्रातुरित्यस्यपूर्वमारिण्याइत्यत्र १०३
लिंगव्यत्ययः।पूर्वमृतस्येत्यर्थः।भार्यायाअपिअपुत्रायाःसपिंडीकरणमेवमेव।मातुःसपिंडी

[illegible]विशेषण[illegible]मातुःसपिं[illegible]नारायण[illegible]तव्यः॥२४॥
× एवंयत्रयत्रोहःकर्तव्योनभवतितत्रतत्रोहंकार्यः।सपिंडनविधौसुमंतुः।पितापितामहेयोज्यःपूर्णेसंवत्सरेसुतैः ×५

करणंपितामहीप्रपितामहीवृद्धप्रपितामहीभिःसार्द्धंकर्तव्यं।पितामह्यादिभिःसार्द्धंसपिंडीकरणं
स्मृतमितिस्मृतेः।ज्येष्ठभ्रातुरपुत्रस्यपुत्रवत्कनिष्ठेनभ्रात्रासपिंडनंकार्यं।अपुत्रायाभार्यायाःश्वश्रू
दिभिःसहकार्यं।यमः।अपुत्रायांमृतायांतुपतिःकुर्यात्सपिंडनं।श्वश्र्वादिभिःसहैवास्याःसपिंडीकरणं
भवेत्।मातुःसहगमनेसपिंडनंपत्यासहकार्यं।पूर्वंपितुःसपिंडनंकृत्वाततोमातुःसपिंडनंपत्यास
हकार्यं।यमस्मृतौ।पत्याचैकेनकर्तव्यंसपिंडीकरणंस्त्रियाः।सामृतापिहितेनैक्यंगतामंत्राहुतिव्रतैः।
पितामहइतिप्रपितामहवृद्धप्रपितामहयोरुपलक्षणार्थः।तथापितरिमृतेपितामहेविद्यमानेप्रपिता
महपूर्वकास्त्रयपिंडादेयाः।ब्रह्मांडे।मृतेपितरियस्याथविद्यतेचपितामहः।तेनदेयास्त्रयःपिंडाःप्रपिता
महपूर्वकाः।तेभ्यश्चपैतृकःपिंडोनियोक्तव्यश्चपूर्ववत्।एवंमृतेपितरिपितामहप्रपितामहौजीवत

स्तदापितयोः परतरेषां पिंडदानं विधेयं। कात्यायनः। व्युत्क्रमाच्च मृते देयं येन्य एव ददात्यसाविति। यच्च
व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिंडतेति तन्मातृपितृभर्तृव्यतिरिक्तविषयं। स्कांदे। अक्रमेण मृता
नां तु सपिंडीकृतिरिष्यते। यदि माता यदि पिता भर्ता वा व्युत्क्रमान्मृतः। मात्रादिव्यतिरिक्तस्यापि व्युत्क्र
ममृतस्य सपिंडनमुच्यते। गोभिलः। अनुत्क्रमकालेथ पितुर्व्युत्क्रमेण मृते सति। आमेन वापि सापिंड्यं
हेम्ना वापि प्रकल्पयेत्। अथ पितृमरणे पितामहप्रपितामहयोर्यः कश्चिदसंस्कृतस्तस्य संस्कारं कृत्वा
ताभ्यां सपिंडनं कुर्यात्। अथ योत्रादिना पितामहादेः सपिंडीकरणं पितामहसंबंधिनः पितुरारभ्य त्रि
पुरुषं कर्तव्यं। अथ मातुः सपिंडीकरणं पितामह्यादिभिः कुर्यात्। पितामह्यां जीवंत्यां प्रपितामह्यादि १९४
भिः कार्यं। ब्राह्मे। मातर्यग्रमृतायां च विद्यते च पितामही। प्रपितामहि पूर्वं तु कार्यं तत्राप्ययं विधिः।

॥छ॥ एतत्सपिंडीकरणं। एतदुक्तं सपिंडीकरणं। यतः सपिंडनाभावे दोषः श्रूयते। देवलः। पितरौ हि मृ
तौ यस्य देहस्तस्याशुचिर्भवेत्। न दैवं नापि पित्र्यं च यावत्पूर्णो न वत्सरः। स्नानं चैव महादानं स्वाध्या
यश्चाग्नितर्पणं। प्रथमेब्देन कर्तव्यं महागुरुनिपातने। प्रेतकल्पे। मृते पितर्यब्दमध्ये लुप्यते मातृकी
क्रिया॥ अथ मातुर्विपत्तिः स्यात्पितृकार्यं न लुप्यते। तथा। तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकं॥
अब्दमध्ये न कुर्वीत महागुरुविपत्तिषु। भिक्षुर्भिक्षां न गृह्णाति यावत्पिंडान्न मेलयेत्। स्वगोत्रेपि गु
चिस्तावद्यावत्पिंडान्न मेलयेदिति दोषश्रवणात् सपिंडनं विधेयं। एतच्च सपिंडनं प्रेतश्राद्धं पुनः
भवति विभक्तधनेषु भ्रातृषु एकेनैव कृतेनालं। न सर्वैः कार्यं। तत्र स्मृतिः। नवश्राद्धं सपिंडत्वं श्राद्धा
न्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि। वायुपुराणे। श्राद्धानि षोडशादत्वा न तु कुर्वी

गरुडपुराणे पितृपिंडसंयोजनाघ्राणो
हस्थतो विजातीयपिंडकरणेनामतेषुपिं
डसंयोजनादिमप्येवातत्वेनो श्रुतेवेद।

इदं च कनिष्ठो यदा साग्निकः गृहे वृद्धिश्राद्धं वा उपस्थितं ज्येष्ठो देशांतरे वा निरुद्धः तदा कनिष्ठे न कर्त्तव्यमित्येतत्परमिति निर्णयसिंधुकाराशयः ॥४ मरणे इति यावत्

त्सपिंडनं। प्रोषिता वासिते पुत्रः कालादपि चिरादपि। प्रोषितस्य वासिते प्रवासावसाने चिरकालेपि पुत्र एव सपिंडनं कुर्याज्ज्येष्ठः। यदि श्राद्धानि कनिष्ठभ्रात्रादिना कृतानि तदापि सपिंडनं ज्येष्ठपुत्रेणैव कार्यं। यदि देशांतरवशात् तृतीयवत्सराद्धा कनिष्ठभ्रात्रादिना सपिंडनं कृतं तदा ज्येष्ठेनापि पुनः सपिंडनं द्वि तशाब्दवर्जितं कार्यं। विश्वामित्रः। यवीयसा कृतं कर्म प्रेतशाब्दं विहाय च। तज्ज्यायसापि कर्त्तव्यं सपिंडीकरणं पुनः॥ कुरुक्षेत्रे गयायां च वाराणस्यां प्रयागके। सपिंडैरसपिंडैर्वा कृतं यस्त्रेतकर्म तत्॥ नावर्त्यं तत्सुतैः सर्वं सपिंडीकरणं विना॥ सपिंडीकरणं कुर्यात्प्रेतशाब्दं विहाय च॥ धर्मतत्त्वगुंफे॥ देशांतरस्थौ पितरौ मृतौ चेदन्यः प्रकुर्याद्दखिलं तु पैतृकं। दाहं विना तच्च पुनश्च सर्वं ज्येष्ठः प्रकुर्यादनुजैः सपिंडनं॥ व्युत्क्रमान्मृतस्य पित्रादेः सपिंडनं पुनः कार्यं। हेमाद्रिश्राद्धखंडे॥ अत्र प्रपितामहादिनिःशावाचार्याः ॥ दशाहाच्च बहिः पित्रोर्मरणे श्रूयते यदि॥ कृत्वा सौवपनं दद्यादृर्भग्रैथेस्तिलोदकं॥ ॥पितृशब्देन तश्राद्धं कुर्यादेकादशेऽहनि॥ सपिंडीकरणं नाम तत्र पार्वणवद्भवेत्॥ ॥संवत्सरे॥ कृतं कनीयसा वापि श्राद्धेय स्य सपिंडनं॥ ज्येष्ठेपि हि सुतः कुर्यात्सपिंडीकरणं पुनः॥ ॥पुनः सपिंडीकरणं श्राद्धं पार्वणवद्भवेत्॥ अर्घ्यसंयोजनेनैव

डीकरणे कृते पि पितामहो परमे सति तदर्थैद्धदैहिके सपिंडीकरणं ते कृते पुनः पितामहेनापि सह पितुः सपिंडीकरणं कर्त्तव्यं। अन्यथा अमावास्यादिकालानुष्ठेयं श्राद्धं न निष्पद्यत इत्युक्तः॥ ध्रियमाणायां पितामह्यां मातुः सपिंडीकरणे यथोक्तः पितुः सपिंडीकरणे न्यायमेवानुसंधेयः। ब्रह्मपुराणे। मातर्यथ मृतायां तु विद्यते च पितामही। प्रपितामही ततः सर्वं तु कार्यं तत्राप्ययं विधिरिति। अत्र सपिंडनश्राद्धे अग्नौकरणं न भवति। तदुक्तं कारिकायां। सपिंडीकरणे वा नातो मौकरणाद्यपीति। पि ५ नाग्नौकरणमित्येकोद्दिष्टे निषिद्धत्वात् नप्रेतैकोद्दिष्टमिश्रितत्वादग्नौकरणं न भवतीत्यर्थः॥ तृतीयः खंडः॥३॥ ॥अथाभ्युदयिकं। अथातः सपिंडीकरणोत्तरं आभ्युदयिके अभ्युदयेन वमाभ्युदयिकं श्राद्धमुच्यत इति वाक्यशेषः। गार्ग्यः। पुत्रोत्पत्तिप्रतिष्ठासुतन्मौंजीत्यागबंधने। चूडायां

कारिकाकारः। यावत्स्यान्नाग्निसंबंधस्तस्याग्निरथापि वा। तावद्वृद्धिषु सर्वासु सांकल्यं श्राद्धमाचरेदिति।

वविवाहेष्वाभ्युदयं भवेत्। प्रतिष्ठासु देवारामवापीकूपतडागादिषु। कात्यायनिः। कन्यापुत्रवि
वाहेषु प्रवेशे नववेश्मनः। नामकर्मणि बालानां चूडाकर्मादिके तथा। सीमंतोन्नयने चैव पुत्रादिमुखद
र्शने। नांदीमुखान्पितृगणान्पूजयेत्प्रयतो गृही। देवलः। गार्ग्यश्च। अग्न्याधानाभिषेकादाविष्टापूर्ते त्रि
यासु तो। वृद्धिश्राद्धं प्रकुर्वीत अश्रमग्रहणे तथा। आदित्यादेनदर्शपौर्णमाससोमचातुर्मास्यादीनां
हणं। अत्र पितृगणां नांदीमुखसंज्ञेत्युच्यते। हेमाद्रौ। वृद्धौ श्राद्धं नरः कुर्वन्वृद्धिं नित्यमुपाश्नुते। वृद्धौ समर्च
ये द्विजान्नित्यं नांदीमुखान्पितृन्। अत्र श्राद्धाधिकारी। जातकर्मादिप्रथमविवाहपर्यंतं पुत्रस्य संस्कारेषु
पितास्वपितृभ्यो दद्यात्। कात्यायनः। स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु। पिंडानोद्वहनात्तेषां तस्या १९६
भावे तु तत्क्रमात्। तस्य पितुरभावे तदपत्यानां संस्कारकर्मणि तत्क्रमात्पितृक्रमाद्दद्यादेयः पुत्रादिः सं

स्वमातृस्योपिर

स्काराधिकारी। याज्ञवल्क्यः। असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैरिति। स्मृत्यंतरे। पित्रोस्तु
जीवतोः पुत्रः कुरुते दारसंग्रहं। पितुर्नांदीमुखं प्रोक्तं न पुत्रस्य कदाचनेति तत्रथम विवाहपर्यंतं। द्वि
तीयादिविवाहे स्वयं श्राद्धमाभ्युदयं कुर्यात्। उशनाः। नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः। अ
तऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं। अकरणे दोषश्च। वृद्धौ न तर्पिता ये स्तु देवतागृहमेधिनः। तद्दा
नमफलं सर्वमासुरो विधिरेव सः। यदा उत्तसुतमन्यः संस्करोति तदा तस्य जनकस्यैव दानं। पितरि जीव
ति पातित्यदोषयुक्ते वा यतौ वा। पितरो जनकस्येज्यायां वृद्धतमना हितं। समाहितव्रतः पश्चात्स्वान्यजेतापि
तामहान्॥ ॥ आपूर्यमाणपक्षे पुण्याहे। तदाभ्युदयिकं आपूर्यमाणपक्षेषु शुक्लपक्षे पुण्याहे शुभनदि
ने कार्यमिति शेषः॥ ॥ मातृयागं कृत्वा। अत्राभ्युदयिकश्राद्धे पार्वणचतुष्टयं भवति। तत्र मातृयागो
द्वौ दो तीर्थं च संन्यस्तेतास्त्वि पतिते सति। येस्य एक पितादद्यात्रेभ्यो दद्यात्स्वयं सुतः।
तेभ्यः पितुः पार्वणं चतुष्टयेभ्य द्रष्टव्यं। २

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेंद्राणी चामुंडा सप्तमातरः। इति वसोर्धारा देवताः।

भा २

मातृयजनं पूर्वं कृत्वा मातृपार्वणं पूर्वं कृत्वा ततः पित्रादित्रीणि पार्वणानि। चतुर्विंशतिमते। मातृपूर्वान्पि
तृनर्च्य ततो मातामहानपि। मातामहीस्ततः पश्चाद्युग्मा भोज्या द्विजातयः। मत्स्यः। उत्सवानंदसंतानयज्ञो
द्वाहादिमंगले। मातरः प्रथमं पूज्याः पितरस्तदनंतरं। ततो मातामहानां च विश्वेदेवास्तथैव च॥ ॥ युग्मा
न्वेदविद उपवेश्य। अत्र श्राद्धे युग्मान्युग्मरूपान्द्विजान्वेदविदः वेदज्ञान् उपवेश्य पार्वणचतुष्टयार्थं
अष्टौ द्विजान्विश्वेषां देवानां चतुर एवं द्वादश विप्रानुपवेश्य ततः। यमः। अन्वष्टक्ये पितृभ्यश्च तत्स्त्रीभ्यश्च
सदैवतं। तान्यस्त्वदैवतं होते भ्यश्चापि सदैवतं॥ ॥ पूर्वाह्ने। एतदाभ्युदयिकं पूर्वाह्ने कुर्यात। अत्रिः। पूर्वा १२७
ह्ने वै न वेद्वृद्धिं विना जन्म निमित्तकमिति। पूर्वाह्नलक्षणमाह। गोभिलः। पूर्वाह्नः प्रहरं सार्द्धं मध्याह्नः प्रहरं
तथा। आतृतीयादपराह्नः सायाह्नश्च ततः परं। भिन्नकालेपि श्रूयते। वसिष्ठः। पूर्वेद्युर्मातृकं श्राद्धं कर्माहे

ततः श्राद्धमुदयसन्निधौ न कर्तव्यं रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा। संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते। इति मनुवचनात्

पैतृकं तथा। उत्तरेद्युः प्रकुर्वीत मातामहगणस्य तु। ततो मातामहीनां च श्राद्धमुक्तं तु नांदिकं। वृद्धशा
तातपः। पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे। श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तांत्रिकं। एकस्मिन्नपि दि
ने क्रियमाणानां कालभेदेनानुष्ठानमाह। शातातपः। पूर्वाह्ने मातृकं श्राद्धं मध्याह्ने पैतृकं तथा। ततो मा
तामहानां च वृद्धौ श्राद्धत्रयं स्मृतं। एवंविधं कालस्याप्यसंभवे। वृद्धमनुः। अलाभे भिन्नकालानां नांदीश्रा
द्धत्रयं बुधः। पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्ने मातृपूर्वकं॥ ॥ प्रदक्षिणमुपचारः। अत्र उपचारः अनुष्ठानं प्रद
क्षिणं प्रादक्षिण्येन कुर्यात्। उत्तरत उपाचारः आम्नायानि दैवकर्माणि। उत्तरीदैवे प्राचीमेवेकश्त्ये तेषा
मयमपवादः। याज्ञवल्क्यः। एवं प्रदक्षिणावृत्तो वृद्धौ नांदीमुखान्पितॄन्। यजेत दधिकर्कंधुमिश्रान्पिंडा
न्यवैः क्रिया। आश्वलायनः। प्रदक्षिणावृत्तमिति॥ ॥ पितृमंत्रवर्जं जपः। अत्र श्राद्धे जपः पितृमंत्रवर्जं। पि

भविष्यपुराणे। पिंडनिर्वपणं कुर्यान्न वा कुर्याद्विचक्षणः। वृद्धिश्राद्धे कुलाचारं देशकालाद्यपेक्षया दि
तथा। अग्नौकरणमर्घ्यं चावाहनं चावनेजनं। पिंडश्राद्धे प्रकुर्वीत पिंडहीने निवर्त्तते। गजपा। पि
डनिर्वपरहिते यत्र श्राद्धं विधीयते। स्वधावाचनलोपोस्ति विकिरस्तु न लुप्यते। अक्षय्यदक्षिणा स्वस्ति
वाच्यं पुनः सौमनस्यमप्या

त्रमंत्रा उशंतस्त्वेत्यादिकास्तद्वर्जं त्रिकाजपः कार्यः। परिशिष्टे मधुमधितियस्तत्र त्रिर्जपो त्रितुमिच्छतः। इच्छेतीमिति।
गायत्र्यनंतरं सौत्रमधुमंत्रविवर्जितं। गायत्र्यनंतरं सौत्रमधुमंत्रविवर्जितं। मधुवाता ऋतवा स्थाने उपास्मा
इति कीर्त्तयेत्। भुंजानेषु तु विप्रेषु जपेत्स्वस्त्ययनानि तु ॥ छ ॥ तजवोदर्भाः। अत्र दर्भाः कुशास्तजवः सरल
न मध्यनुग्राः युग्मा स्युः। आश्वलायनः। प्राङ्मुखेभ्यउदङ्मुखो दद्यादुदङ्मुखेभ्यः प्राङ्मुखो द्वौ द्वौ दर्भौ वि
ति ॥ छ ॥ यवैस्तिलार्थः। अत्र तिलार्थोऽपहता इत्यादिको यवैः कार्यः। यजेत दधिकर्कंधुमिश्रान्पिंडान्यवैः क्रि
येति याज्ञवल्क्यः। यवोसीत्यूहः प्रुष्ठेति च न स्वधां प्रयुंजीतेति कात्यायनः ॥ छ ॥ दधिबदराक्षतमिश्राः पिंडाः।
अत्र पिंडा दधिबदराक्षतैर्मिश्राः कार्याः। यजेत दधिकर्कंमिश्रान्पिंडान्यवैः क्रियेति याज्ञवल्क्यः ॥ छ ॥ नांदी १९८
मुखाः पितरः प्रीयंतामित्यक्षय्यस्थाने। अत्र अक्षय्यस्थाने स्थले नांदीमुखाः पितरः प्रीयंतां इत्यूहः कार्यः।

छ नांदीमुखान्पितॄनावाहयिष्ये इत्यावाहने २
अर्च्यदाने नांदीमुखेभ्यः पितृभ्य आ
वाहयिष्ये इत्यूहः कार्यः ॥ २

॥ छ ॥ नांदीमुखान्पितॄन्वाचयिष्य इति वाचने। अत्र वाचने स्वधावाचने नांदीमुखान्पितॄन्वाचयिष्य इत्यूहः
कार्यः ॥ छ ॥ संपन्नमिति तृप्तिप्रश्नः। अत्र तृप्तिप्रश्ने संपन्नं इति प्रश्नः कार्यः। सुसंपन्नं इति प्रत्युक्तिः। पूर्वं मधुरं
भोजयित्वा ततः प्रश्नः। भविष्यत्पुराणे। मधुरं भोजनं दद्यान्न वान्नं परिवेषयेत्। रक्तपुष्पं तिलांश्चैव अपस
व्यं च वर्जयेत्। ब्राह्मे। ब्राह्मणेभ्यस्ततो दद्यान्मधुरं भोजनं स्वकं। गुडमिश्रं यवपिष्टं सवज्रं ह्योदनं परं। आमि
षं पायसं चैव वर्जयेन्नांदिसंज्ञके ॥ छ ॥ समानमन्यदविरुद्धमिति। अन्यदनुक्तं अविरुद्धं अविरोधि समा
नं पार्वणेन सहेत्यर्थः। यथा अग्नौकरणादिकं। अत्राग्नौकरणे सव्येन सहलसमूहनादिन वर्तिकारिका।
तथा नु दयिक श्राद्धे पूर्वं स्याद्देवधर्मतः। समूहनादि सव्येन सहल्यांवप्रदक्षिणं। हेमाद्रौ ॥ वृद्धौ समर्च
येद्विप्रान्नित्यं नांदीमुखान्पितॄन्। संपादितो विशेषस्तु शेषं पार्वणवद्भवेत्। पित्रादित्रयपत्नीनां नो

जनन्यां विद्यमानायां यस्तु पितामही। मातृघ्नः स विज्ञेयो श्राद्धं नांदीविना कृतं।।१।। केचिन्मनेत्युक्तं।।

ज्या मातृः प्रति द्विजाः।। अत्र पत्नीग्रहणाज्जनन्यां सत्यां सापत्नमातुरपि देयं।। तदुक्तं स्मृतिसंग्रहे।। सापत्न
मातुः कुर्वीत एकोद्दिष्टं न पार्वणं। जनन्यां विद्यमानायां वृद्धिश्राद्धे तु पार्वणं।। अत्र द्विजानां वे योषितो पिनो
ज्याः।। गरुडपुराणे।। मातृश्राद्धे तु विप्राणां मनवे तु कुलान्विताः। पतिपुत्रान्विताः साध्वी योषितोष्टौ तु दाह
ताः।। चतुर्थः खंडः।।४।। अथोपाकरणं। अथानंतरमुपाकरणं उपाकर्म वक्ष्यत इति वाक्यशेषः। अत्रानुद
यिकं कारिकामतेन भवति। नोपाकर्मण्यसंस्कृते रिति। आत्मनो मंत्रसिद्ध्य इत्यात्मनो मंत्रसिद्ध्यर्थं विध
ानत्वत्यपि। तेन विकल्पः।।७।। ओषधीनां प्रादुर्भावे। तदुपाकरणं ओषधीनां तृणवीरुदादीनां प्रादुर्भावेऽप्य
तो सति भवति। अथातोध्यायोपाकर्मौषधीनां प्रादुर्भाव इति श्रुतेः।।७।। हस्तेन श्रवणेन वा। हस्तेन नक्ष १९
त्रेण श्रवणेन वा नक्षत्रेण वा कार्यं। याज्ञवल्क्यः।। अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा। हस्तेनौ

षधिभावे वा पंचम्यां श्रावणस्य तु। पारस्करः।। बह्वृचाः श्रवणर्क्षे तु हस्तर्क्षे सामवेदिनः। हस्त श्र
योर्दिनद्वये शुक्लकालव्यापित्वपरविद्धं कुर्यात्।। निगमे। तपोहं स्तुत्तराषाढा उपाकर्मणि वैस्तवे। धनि
ष्ठा मिश्रिते कार्यमुपाकरणसंज्ञितं। व्यासः।। श्रवणे न तु यत्कर्म उत्तराषाढसंज्ञितं। संवत्सरकृतो ध्या
यस्तत्क्षणादेव नश्यति। धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत्। तत्कर्म सफलं विद्यादुपाकरणसं
ज्ञितं। हस्तस्य द्वैधे चित्रायुक्ते कुर्यात्।। तदुक्तं परिशिष्टे। धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रर्क्षसमन्वितं। श्र
वणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः।। बह्वृचानां तु श्रवणे एवोपाकरणं। बह्वृचाः श्रवणर्क्षे तु हस्त
र्क्षे सामवेदिन इति गोभिलः।। तथा ग्रहणसंक्रांत्यदूषिते काले उपाकर्म विधेयं।। गार्ग्यः।। पर्वण्योदयि
के कुर्युः श्रावण्यां तैत्तिरीयकाः।। बह्वृचाः श्रवणे चैव ग्रहसंक्रांतिवर्जिते। स्मृतिस्थ।। उपाकर्म न कुर्वी

रक्रमास्सामग्र्यं ज्ञुविदिः॥ ग्रहसंक्रांतियुक्तेषु हस्तश्रवणपर्वसु। अथ वेदोपसंयुक्तेपर्वणि स्याद
पक्रिया। दुःखशोकामयग्रस्तो राष्ट्रे तस्मिन्द्विजोत्तमः। तस्मिन्दिने वेग्रहणसंक्रांतीनवेयातांतदाका
लांतरेकार्यं॥ यदि स्याच्छ्रावणं पर्वग्रहसंक्रांतिदूषितं। स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु। स्मृ
तिमहार्णवे। संक्रांतिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत्। उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिः।
अत्रतुशाखाबहुत्वोपलक्षणार्थः। संक्रांत्यादिवेधोऽर्द्धरात्रात्परतस्तदा वेधदोषो न। देवलस्मृतिः। अ
र्द्धरात्रादधस्तस्मिन्संक्रांतिग्रहणं यदि। उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति। श्रावणशुक्लपं
स्मृ १ चम्यां हस्तयुक्तदिनं भवति। तत्र दीपिका। नभोमासः सिता पंचमी॥ ग्राह्या वाजसनेयिनां बह्वृचां तु रवेर्हस्ते वि २००
ताकेवलाचान्या ह्युता तिथिरिति। श्रावणे कर्कलग्नग्रहादिदूषिते सर्वमाद्रेकुर्युः। परिशिष्टे। अष्टौ

वा २

षधयस्तस्मिन्काले तु न भवंति चेत्। तदा भाद्रपदे मासि श्रवणेन तदिष्यते। हस्तश्रवणादि दुष्टं चेत्प्रो
ष्ठपद्यां कार्यं। वसिष्ठः। अथातः स्वाध्यायोपाकर्म श्रावण्यां प्रोष्ठपद्यां भवति। मनुः। श्रावण्यां प्रोष्ठपद्यां वा
प्युपाकृत्य यथाविधि। युक्तश्छंदांस्यधीयीत विप्रो मासार्द्धपंचमान्। अतः स्वकाले दुष्टे कालांतरे कार्यं
पारक्यमविरोधि यदिति न्यायात्कर्मणो लोपो न कार्यः। अत्र केचित्पर्वणि ग्रहणे च तु र्द्दशीस्थे श्रवणेन
कार्यमिति वदंति। त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवं॥ मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोरि
तिवचनात्। स्मृत्यंतरे प्रकारांतरेण वेध उक्तः। द्वादश्यां द्वितीयां तु वेधइंदुग्रहे मतः। एकादश्यां दि
तः सौरेस्य तु थीतः प्रकीर्तितः। खंडग्रहे तयोः प्रोक्तमन्यत्र दिनद्वयं॥ दिनद्वयं पूर्ववृत्ति रंध्रग्रहे खंडग्रहे त
योरिति। तदयुक्तं। नित्ये नैमित्तिके जाप्ये होमे यज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्य

६३

तइतिवचनात्।भविष्योत्तरे।संप्राप्ते श्रावण्यां तु पौर्णमास्यां दिनोदये।स्नानं कुर्वीत मतिमान् श्रु
तिस्मृतिविधानतः।ततो देवान्पितॄंश्चैव तर्पयेत्परमांभसा।उपाकर्मांगिचैवोक्तऋषीणां चैव तर्पणं।
कुर्वीत ब्राह्मणः श्राद्धं देवानुद्दिश्य भक्तितः।उपाकर्मणि चोत्सर्गे ऋषीन्संपादर्न महर्षयः।कार्ष्णाजिनिः
उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च।ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः।बौधायनः।गौतमा
दीनृषीन्सप्तकृत्वा दर्भमयान्पुनः।पूजयित्वा यथाशक्ति तर्पयेद्वंशमात्मनः।अत्र गौतमादीनितिश
ब्दश्चाखोक्तानामृषीणामुपलक्षणार्थः।एतदुपाकर्म पूर्वाह्णे एव भवति।नापराह्णे।प्रचेताः।भवेत्तूप
तिः पूर्णिमायां पूर्वाह्णे एवेति।गार्ग्यः।सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः।छंदोगा मिलिताः कुर्यु २२
रुत्सर्गं सर्वछंदसां।शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकं।एतत्सामगविषयं।तस्मादुपाकर्मांतरं वै

श्वदेवः कर्त्तव्यः।एतदुक्तं समूहकर्तव्यत्वादपराह्ण एव जायते तन्निरासार्थमुपाकर्मांतरं वैश्वदेवकरणा
र्थं च विशदं कृतं।न पूर्वं तो वैश्वदेवः।ततो आगत्य गृहे आवसथ्याग्नौ लौकिकाग्नौ वा आज्यसंस्कारांतं कृ
त्वाग्रहणं।।क।।अक्षतसक्तूनां धानानां च दधिघृतमिश्राणां प्रत्यृचं वेदेन जुहुयादिति हैक आहुः।अ
कृता अकंडिताः सक्तवः तेषां।अकंडितानां भृष्टानां यवानां पिष्टं सक्तुशब्देनोच्यते।भृष्टयवा धानाः।उक्त
ते।दधिघृतमिश्राणां दधिघृते मिश्रितानां प्रत्यृचं सर्वस्य च प्रतिऋचि प्रत्यृचं वेदेन संहितायाः आहुति
धर्मेण जुहुयात् होमं कुर्यात् इति एके आचार्या आहुः।इति संज्ञावनायां।एकग्रहणं स्वीयमतं न।आ
हुतीनां सार्द्धदशसहस्राणि अशीत्यधिकानि सपादानि भवंति।अनुवाकानुक्रमण्यां चरणव्यूहे वा।न
वे दशसहस्राणि ऋचां पंचशतानि च।त्रवामशीतिपादश्चैतत्पारणमुच्यते इति।स्वाहाकारांते होममंत्रः

णा मित्युक्तत्वात्स्वाहाकारेणहोमः॥ ॥ सूक्तानुवाकाद्याभिरिति वा। सूक्ताद्याभिस्तिसृभिरनुवाकाद्याभिस्ति-
सृभिश्चत्वं जुहुयादिति वा। केचिदाहुः। सूक्तादिमन्त्रा ऋचो वेदे सप्तदशाधिकं सहस्रं आहुतयः। अनुवाका-
स्व १ क्रमण्यां। सहस्रमेतत्सूक्तानां निश्चितं खैलिकैर्विना। द्वासप्तचपंचाशतं शति। अनुवाकादिमन्त्रा ऋचो वेदे द्व-
वाशीतिः एता आहुतयश्च। अनुवाकानुक्रमण्यां। पंचाशीतिर्दाशतय्येऽनुवाका दृष्टाः पुराणैर्महर्षिभिर्म-
हात्मभिरिति। एवमाहुतिशतान्येकादशाहुतिद्वयं च जुहुयादिति पक्षांतरं॥ ॥ अध्यायार्षेयाद्याभि-
र्ति मांडूकेयाः। अध्यायाद्याभिस्तिसृभिश्चतुःषष्टिभिर्वा जुहुयात्। आर्षेयाद्याभिस्तिसृभिर्वा जुहुयात्। अध्याया-
नां चतुःषष्टिरित्यनुवाकानुक्रमण्यां। ऋषिणा दृष्टानि सूक्तान्यार्षेयाणि तेषामाद्याभिस्तिसृभिर्वा जुहुया- २०२
दिति मांडूकेयाचार्यमतं॥ ॥ अथ हस्माह कौषीतकिः। अथेति पूर्वोक्तपक्षाणां निराकरणार्थः। इति

निश्चयार्थे कौषीतकिराचार्य आह स्म वदति स्म॥ ॥ अग्निमीळे पुरोहितमित्येका। एकाहुतिरग्निमी-
ळ इत्यादिका स्वाहाकारांतेन होतव्या। स्वाहाकारांते होममंत्राणामिति सूत्रोक्तत्वात्। अग्निमीळेम-
धुच्छंदा अग्निर्गायत्री। अग्निमीळे पुरोहितं॥१॥ ॥ कुष्मंनकस्तदब्रवीदावदंस्त्वं शकुने भद्रमावदस्तूष्ण-
ना जमदग्निना धामंते विश्वं भुवनमधिश्रितं [illegible]ता नायज्ञं यज्ञियाः सुत्रामियो नः स्वो अरणः प्रतिचक्ष्व
विचक्ष्वाग्ने याहि मरुत्सखाय त्वे राजन्हुतं हविरिति ऋचाः। कुष्मंनक इत्यादयस्त्वचो मंडलांत्यमन्त्रा [illegible]
स्त्वमग्ने वृषन्नित्याद्यो मंडलादिमन्त्राश्च प्रत्यृचं होतव्याः। मंडलांत्यमन्त्रा मंडलादिमन्त्रा एवं हुता वि-
ज्ञेयाः। अत्र ग्रहणे विशेषः। अग्नये पृथ्वीसूर्येभ्योऽग्नये शकुंतकायाग्नये मित्रावरुणाभ्यामग्नये मरुद्भ्यो-
ऽग्नये देवेभ्योऽग्नय इंद्रासोमाभ्यामिंद्रायाग्ना मरुद्भ्यः सोमपवमानाय सोमायाग्नये विश्वेभ्यो देवेभ्यो जुहु

शृह्णामि।आसादनप्रोक्षणेतथैवमवतः।हविषःप्रक्षालनंन।अर्थलोपात्।अधिश्रयणमपिन।
संस्कारादीनांसिद्धानांग्रहणात्।तदुपकल्पितंहविर्दधिघृतमिश्रंकुर्यात्।एकस्रुवेण।निघारयेद्ध
स्यादधिश्रयणाभावेसंस्कारादौलेकमंजनमितिकारिका।अवदानधर्मैःप्रधानंचतुर्गृहीतधर्मेण
जुहुयात्।कुष्ठुंनकोगस्त्योवृणस्सूर्योनुष्टुप्।कुष्ठुंनकस्तदब्रवीत्।२।त्वमग्नेगृत्समदोग्निर्ज
गती।त्वमग्नेद्युभिस्त्वमाशुशुक्षणिः।३।अवदग्गृत्समदःश्राकुंतकोजगती।आवदंस्त्वंश।कुने
नद्रमावद।४।सोमस्यमाविश्वामित्रोग्निस्त्रिष्टुप्।सोमस्यमातवसंवक्ष्यग्ने।५।गृणानाजमद
ग्निर्मित्रावरुणौगायत्री।गृणानाजमदग्निना।६।त्वांह्यग्नेवामदेवोग्निरष्टिः।त्वांह्यग्नेसदमित्सम २०३
न्यवः।७।धामंतेवामदेवोग्निर्जगती।धामंतेविश्वंभुवनमधिश्रितं।८।अबोध्यग्निर्बुधगविष्ठिरो

वग्निस्त्रिष्टुप्।अबोध्यग्निःसमिधाजनानां।९।गंतानएवयामरुन्मारुतोतिजगती।गंतानोयज्ञंय
ज्ञियाःसुशमि।१०।त्वंह्यग्नेभरद्वाजोग्निस्त्रिष्टुप्।त्वंह्यग्नेप्रथमोमनोता।११।योनःस्वंपायुर्देवानुष्टुप्।
योनंस्वोअरणः।१२।अग्निंनरोवसिष्ठोग्निर्विराट्।अग्निंनरोदीधितिभिररण्योः।१३।प्रतिवत्सवसि
ष्ठइंद्रासोमावनुष्टुप्।प्रतिचक्ष्वविचक्ष्व।१४।माचिदन्यगाथइंद्रोबृहती।माचिदन्यद्विशंसत।१५।अग्ने
याहिसोनरिरग्नामरुतोनुष्टुप्।आग्नेयाहिमरुत्सखा।१६।स्वादिष्ठयामधुच्छंदाःपवमानसोमोगाय
त्रीस्वादिष्ठयामदिष्ठया।१७।यत्रेराजन्कश्यपःपवमानसोमःपंक्तिः।यत्रेराजन्चरुंहविः।१८।अग्नेबृह
स्त्रितोग्निस्त्रिष्टुप्।अग्नेबृहन्नुषसामूर्ध्वोअस्थात्।१९।तच्छंयोरावृणीमहइत्येका।तच्छंयोरित्येतया
एकाहुतिर्होतव्या।इतिकरणःप्रधानहोमसमाप्तिसूचनार्थः।तच्छंयोःशंयुर्विश्वेदेवाःशक्वरी।तच्छंयो

राष्टगणी महेश्वर। अग्निमीळ इत्यारभ्य तर्क्ष्यो रित्यंता विंशतिराहुतीर्जुहुयात्। ततः स्विष्टकृद्धर्मेण स्विष्टकृ
दाहुतिः। ॐ। हुतशेषाद्धविः प्राश्नंति दधिक्राव्णो अकारिषमित्येतया। दधिक्राव्ण इत्येतयर्चा हुतशेषाद्द
विषाद्धविः सर्वे प्राश्नंति प्राशनं कुर्वंति। प्राश्नंतीति बहुवचनादाचार्यः शिष्याः प्रशिष्याश्च॥ ॐ॥ आचम्यो
पविश्य। हविःप्राशनोत्तरमाचम्याचमनं विधायोपविश्य वक्ष्यमाणं कुर्यात्। प्राशनोत्तरं सर्वेषां इदमा
पश्शितिष्टचेन मार्जनं। इतरां यजमानपंचमाः प्राश्या मार्जनाद्वाग्यमन मिदमापश्शितिष्टचेन पवित्रवतिमा
र्जयंत इति सूत्रे। कल्पैकत्वान्मार्जनं। अथ यज्ञोपवीतोत्तरे लोंशाश्चाति ब्रह्मसवेजपो ब्रह्मणैवैनंतिद्धमय
त्यथयत्पवित्रवतिमार्जयंते शांति वैनेषु जमापश्शिति ब्राह्मणे। ॐ। महाव्याहृतीः सावित्रीं वेदादि प्रभृतीनि २०४
स्वस्त्ययनानि च जपित्वा। आचार्यप्रमुखाः शिष्याः सर्वे यथावकाशमुपविश्य। महाव्याहृतीः भूर्भुवः स्वरि

त्येताः सावित्रीं तत्सवितुरित्येतां। वेदादिं अग्निमीळ इति सूक्तं एतत्प्रभृतीनि एतदादि स्वस्त्ययनानि स्वस्ति
नाह्वयुक्तानि आनो भद्रा इत्यादीनि सूक्तानि। चकारात् अस्य वामीं प्रभृतीनि च जपित्वा ततः। आदिशब्दाद य
ध्यायानामादिपादान् संहिता ब्राह्मणारण्यकानां। शिक्षाकल्पो व्याकरणं निरु[illegible]क्तं छंदो ज्योतिषमिति ष
७० डंगानामप्यादिपादान्यठेयुः। आचार्यस्वस्ति वाच्या। शिष्या आचार्यं स्वस्ति भवंतो ब्रुवंत्विति। दिनास्वस्ति
वाच्य आचार्यपरितोषार्थं दक्षिणां दत्वा आचार्येणोंस्वस्तीत्युक्ते ततः। ॐ। तदपि भवति। तदपि परिशि
ष्टोक्तं स्वस्तिवाचनं इह भवति। अनुष्ठानदृढीकरणार्थं तदपि भवतीत्युक्तं। ॐ। अयातयामतां प्राप्तां सा
रत्वं छंदसां तथा। इच्छंत ऋषयोपश्यन् नुपाकर्मतपोबलात्। छंदसां वेदानां सारत्वं सामर्थ्यं तथाप्याय
जनं छंदसां तथा। छंदसां अयातयामतां पूर्णसारतां इच्छंतं कामयमाना ऋषयो द्रष्टारो वसिष्ठाद्यास्तपो मंत्र

बलात्तपसः सामर्थ्येन उपाकर्मैतत्कर्म अपश्यन् दृष्टवंतः । कीदृशीं ऊर्जां । अयातयामतां । यातयामं
गतरसमित्यमरकोशः । तस्य भावः यातयामता । न यातयामता अयातयामता तां । पूर्णरसतामित्यर्थः ।
यतश्छंदसामनेन कर्मणा सारत्वं ऊर्जा च भवतीति तपसा ऋषिभिर्दृष्टमेतत्कर्म । अतो वर्षं सर्वैः प्रति
वर्षमेतत्कार्यमिति तात्पर्यार्थः ॥ तस्मात्षट्कर्मनित्येनात्मनो मंत्रसिद्धये । उपाकर्तव्यमित्याहुः कर्मणां
सिद्धिमिच्छता । यस्मादृषिभिश्छंदसां ऊर्जासारत्वायातयामत्वहेतोरिदं कर्म दृष्टं तस्मात्कर्मणां धर्मार्थकाम
मोक्षकारणभूतानां सिद्धिफलमिच्छता कामयमानेन षट्कर्मनित्येन षट्कर्मसु यजनयाजनाध्ययना
ध्यापनदानप्रतिग्रहभूतेषु नित्येन अव्यग्रेण विप्रेण आत्मनः स्वस्य मंत्राणां सिद्धये प्राप्त्यर्थं उपाकर्त २०५
व्यं उपाकर्माख्यं कर्म कर्तव्यमित्याहुराचार्याः सर्वे ॥ उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं भवेत् । अष्ट

कासु त्वहोरात्रमृत्वंत्यासु च रात्रिषु ॥ उपाकर्मणि कृते उत्सर्गे कर्मणि च कृते त्रिरात्रं त्रिदिनं क्षपणं छंद
सां विरामे अनध्यायो भवेत् । उत्सर्गे त्रिरात्राहोरात्रपक्षिणीनां सह विकल्पः स्मृत्यंतरात् । मनुः । यथाशा
स्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः । विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्निशमिति । अष्टकासु तिसृषु चतु
र्थ्वा च अहोरात्रं अनध्यायः । अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु इति कूर्मपुराणे । हेमंतशिशि
रयोश्चतुर्णामपरपक्षेऽष्टका इति श्रुतेः । उत्वाद्वा त्रिरात्रं सप्तम्यादिदिनत्रयं । ऋतूनां षण्णां तिसृणां वांत्या
सु रात्रिषु अनध्यायः । रात्रिशब्दोऽहोरात्रपरः । ऋतूनामंत्या रात्रयश्चतुर्दश्यः । पौर्णमास्यां ऋतुसंधिविधाना
त् । तस्मादृतुसंधिषु प्रयुज्यंते ऋतुसंधिषु हि व्याधिर्जायत इति श्रुतेः । फाल्गुन्यामृतुसंधिविधानमुक्तं ।
चतुर्दशीं परिहाप्याष्टमीं चाधीत्य मेवैक इति सूत्रेण चतुर्दशी पौर्णमासी प्रतिपदां सामान्येनानध्या

येद्वितीयायामर्धादनध्यायः॥ त्रिरात्रमनध्यायस्त्वत्राशौचे। यदाहोरात्रमनध्यायस्तदाद्वितीयायां। यदा
त्रिदिनं तदापौर्णमास्यां प्रतिपद्द्वितीयासु अनध्यायः॥ ७॥ ॥ पंचमः खंडः॥ ॥ ५॥ माघशुक्लप्रतिपदि। माघ
शुक्लप्रतिपदि उत्सर्गो स्वकर्म भवति। मनुः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि॥ ८॥ अपराजितायां दि मे ३
शि। एतत्कर्म अपराजितायामेवान्यां दिशि कर्त्तव्यं। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिरिति याज्ञ
वल्क्यः॥ ९॥ बह्वोषधिके देशे। बह्वोषधिके प्रचुरौषधियुक्ते देशे प्रदेशे एतत्कर्म विधेयं। हरिततृणप्रदे
शे वा। एतदुत्सर्जनं छंदसां सर्वात्मिना न कार्यं। यदाह मनुः। अतः परं तु छंदांसि शुक्लेषु नियतः पठेत्। वे
दांगानि रहस्यं च कृष्णपक्षेषु वै पठेत्॥ १०॥ उदुत्यं जातवेदसं चित्रं देवानां नमो मित्रस्य सूर्यो नो दिवस्पा २०६
त्विति सौर्याणि जपित्वा। इति एतानि सौर्याणि सूर्यदेवताकानि चत्वारि सूक्तानि जपित्वा। प्रस्कण्वः सूर्यो

त्यस्य चौरोगायत्र उपनिषद्वंत्योर्द्वचः शान्नु अप्रस्याधानवगायत्र्यो त्वास्वतस्तोऽनुष्टुभः। उदुत्यं जातवेदसं
रा१३। कुत्सः सूर्यस्त्रिष्टुप्। चित्रं देवानामुद्गादनीकं। ६। अभितपाः सूर्यो जगती। नमो मित्रस्य वरुण
स्य चक्षसे। ना१२। चक्षुः सूर्यो गायत्री। सूर्यो नो दिवस्पातु ऋ ५ इति जपित्वा ततः॥ ११॥ शासइत्थामहाँ असी
ति प्रदक्षिणं प्रत्यृचं प्रतिदिशं प्रत्यस्य लोष्ठान्। शासइत्थेति पंचभिर्ऋग्भिः प्राचीमारभ्य प्रत्यृचं। प्रत्यृचं
प्रति इति प्रत्यृचं। प्रतिदिशं। दिशं दिशं प्रति इति प्रतिदिशं। लोष्ठान् सकृल्लोष्ठान् प्रत्यस्य प्रतिक्षेपणं कृत्वा।
ततः। अस्तुरूपरो। प्राच्यादिचतुर्दिक्षु पंचमन्तु परि एवं पंचमलोष्ठान्निक्षिप्य। शासइत्थेत्यनुष्टुप्। शासइत्था
७। महाँ असि त्वपततः॥ १२॥ अथ मीस्तु देवाः सि देवताः। अद्य मेधेव तर्पयित्वा प्रतिपुरुषं च पितृन्। तस्याद्रीनु द्विव्य
उदकेन तर्पयित्वा प्रतिपुरुषं। पुरुषं पुरुषं प्रति इति प्रतिपुरुषं पितृन्। पितृपितामहप्रपितामह

मातामहप्रमातामहवृद्धप्रमातामहांस्तर्पयेत्।पितरोयत्रपूज्यंतेतत्रमातामहाध्रुवमितिस्मृतेः।स्व
षीन्मधुच्छंदःप्रभृतीन्।छंदांसिगायत्र्यादीनि।देवताअग्न्यादिकाः।श्रद्धामेधेएतसंज्ञकेदेवते।एतान्पि
तॄंस्तर्पयित्वा।ततोद्विजभोजनादिविधेयं।एतदुत्सर्जनमुपाकर्मदिनेपिभवति।अत्यंतरात्।स्वादि
रत्र्यहे।एतदुत्सर्जनंकुर्यादुपाकर्मदिनेथवेति।कुर्याद्वैतदुपाक्रियांविधिनेतिदीपिका।।छ।।छंदांसि दि ४
विश्राम्यंत्वर्द्धसप्तमान्मासान्।उत्सर्गकर्मानंतरंछंदांसिवेदान्अर्द्धसप्तमान्मासान्अर्द्धःसप्तमो
येषांतेअर्द्धसप्तमामासाः।तान्सार्द्धषण्मासानित्यर्थः।तान्मासान्विश्रामयंतिअनध्ययनेनछंदांसि
विश्रामंअवसानंकुर्युरित्यर्थः।अर्द्धसप्तमान्वेतियजुर्गृह्ये।विश्रामयंतीतिबहुवचनात्सर्वेपिसाचार्याः २०१
शिष्याअनध्यायंकुर्वंति।।छ।।अर्द्धषष्ठान्वा।वाशब्दःपूर्वोक्तिविकल्पार्थः।मासानित्यनुवर्त्तते।अर्द्धःषष्ठो

येषांतेअर्द्धषष्ठाः।तान्मासान्विश्रामयेयुर्वा।अर्द्धपंचमान्मासानधीत्योत्सर्जनंनिपंचार्द्धषष्ठान्वेतिहारीत।। अ
अर्द्धषष्ठान्मासानधीत्योत्सृजेयुरितियजुर्गृह्ये।एतदुपाकर्मोत्सर्गंचप्रतिवर्षंकुर्यात्।कात्यायनः।
प्रत्यब्दंयदुपाकर्मसोत्सर्गंविधिवद्द्विजैः।क्रियतेछंदसांतेनपुनराप्यायनंभवेदिति।।छ।।अधीयीरंस्त्र
दहोरात्रमुपरम्यप्राध्ययनं।वेत्ययमर्थो।यदिअवश्यंअधीयीरन्स्तदात्र्यहोरात्रंएकंदिनमुपरम्यवि
रामंकृत्वाप्राध्ययनंकुर्युः।सर्वे।अनध्यायविकल्पःपाठशक्त्यसमर्थानांविज्ञेयं।मनुः।यथाशास्त्रंतुकृ
त्वैवमुत्सर्गंछंदसांबहिः।विरमेत्पक्षिणींरात्रिंयद्वाप्येकमहर्निशं।चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेवसर्व
दा।दुर्मेधानामनध्यायस्त्वेतरागमनेषुचेति।।छ।।षष्ठःखंडः।।६।। ।।अथोपरमं।अथउत्सर्गानंतरंउपर
मंअनध्यायंवक्ष्यामइतिवाक्यशेषः।लिखितः।छिद्राण्येतानिविप्राणांयेनध्यायाःप्रकीर्त्तिताः।छि

विद्युत्स्तनयित्नुवर्षास्वितिपाठे तु कस्येवर्षेवदितिसार्धं ५

२७५

दैन्यस्तवतिब्रह्मब्राह्मणेनयदर्जितं।तत्कालितस्परद्धांसिश्रियंब्रह्मयशोबलं।सर्वमादायगच्छतिवज्रंय
ताशितंफलं॥७॥उत्पातेष्वाकालं।उत्पाताःपांसुवृष्ट्यादयस्तेषुआकालंकालमभिव्याप्यइतिअका
लं।अनध्यायः।तत्कालमारभ्ययावत्परेद्युःकालस्तावदनध्यायइत्यर्थः॥८॥अन्येष्वद्भुतेषुच।आ
कालमित्यनुवर्तते।अन्येष्वद्भुतेष्वमूर्तेषुगोस्तंगेषुधूमदर्शनादिषुचआकालमनध्यायः॥९॥
विद्युत्स्तनयित्नुवर्षासुत्रिसंध्यं।विद्युत्सौदामिनीप्रसिद्धा।स्तनयित्नुर्मेघः।अवर्षासुवर्षाकालव्यतिरिक्ते
षुएवंसुऋतुषुविद्युत्स्तनयित्नुवर्षेविज्ञातेत्रिसंध्यंअहोरात्रमनध्यायः।त्रिसंध्यशब्देनाहोरात्रमुच्य
ते॥१०॥एकांश्राद्धभोजने।संध्यामित्यनुवर्तते।श्राद्धभोजनेएकांसंध्यांनाधीयीत।अत्रसंध्याशब्देना २०७
हःशेषोरात्रिश्चलक्ष्यते।तेनश्राद्धभोजनोत्तरंयावत्प्रातरनध्यायः।नभोजनात्प्राक्॥११॥दशाहमघस

एवंद्रुमिश्रदकेत्येकेइत्यापस्तंबस्य
श्रोत्रधाकांतराश्रोणोऽध्ययनादिकंसर्वं २

च तकेषु।अघंसपिंडसोदकयोर्मरणंतत्र।सूतकंजननाशौचंतेषुदशाहमनध्यायः।मृतदिनात्जन्मदिना
च्चदशाहमनध्यायः।चकारस्त्रिरात्रैकरात्रादीनांविकल्पार्थः॥१२॥चतुर्दश्यमावास्ययोरष्टकासुच।चतु
र्दशीउभयपक्षगा।अमावास्याप्रसिद्धा।अमावास्यासाद्वयोर्यत्योर्मासि।तयोरनध्यायः।अष्टकासु
चतत्सद्धपिनाध्येयं।अष्टकाशब्देनसप्तम्यादिदिनत्रयंलक्ष्यते।ब्राह्मेउपपुराणे।अष्टकास्तुसमाख्याताःस
प्तम्यादिदिनत्रयं।शास्त्रंतत्रनाधीयीतव्रतबंधंविवर्जयेत्।तस्मात्त्रिदिनमष्टकास्वनध्यायः।चकारा
त्कृष्णपक्षगाप्रतिपत्तत्रापिनाधीयीत।प्रतिपत्सुचतुर्दश्यामष्टम्यांपर्वणोर्द्वयोः।अनध्यायंप्रकु
बु र्वीतमन्वादियुगादिषुइतिहारीतः॥१३॥वासरेषुत्रयेषुच।नानोनवानिनिनम्यानि।नानिशब्दोमध्यवच
नः।वासराणिदिनानि।वासरंस्वसराणिइत्यहर्नामसुपाठात्।मध्यस्थानांपंचत्रिंशमध्यस्थानांत्रयाणां

ग्रीष्मवर्षाहेमंतानामादिमं तान्यहानि तेषु नाधीयीत। त्रिनाभिचक्रं ऋतुः संवत्सरो ग्रीष्मो वर्षा हेमंत इतिया
स्त्रीचकाराः सर्वेषामप्यादिमं तान्यहानि तेष्वपि नाध्ययनं। ऋतूनामादिमं तेषु दिनेषु नाधीयीरन् इति वि
ष्णुस्मरणात्॥ ॥ आचार्येवोपरते दशाहं। सन्निधौ आचार्येऽपरते मृते दशाहं नाध्ययनं ग्रीष्मायणां। च
काराद् आचार्यपत्नीमपि मृतायां। उपनीय ददद्वेदमाचार्यः स उदाहृत इति मनुः॥ ॥ श्रुत्वा त्रिरात्रं। अ
सन्निधौ आचार्यं मृतं श्रुत्वा त्रिरात्रमनध्यायः॥ ॥ तत्पूर्वाणां च। स आचार्यः पूर्वो येषां तेन तत्पूर्वा आचा
९३ र्यपुत्रा यस्तीर्थमरणे त्रिरात्रं नाध्ययनं। चकारादेकरात्रमपि। मनुः। त्रिरात्रं चाप्यनध्याय आचार्ये संस्थि
ते सति। तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिरिति॥ ॥ प्रतिग्रहे श्राद्धवत्। प्रतिग्रहे श्राद्धार्थप्रति २०९
ग्रहे श्राद्धवत् प्रतिग्रहोत्तरं यावत् आ तर अनध्यायः॥ एकांश्राद्धभोजनं इत्युक्तत्वात्। अन्नमापो मूलफलं

तिवत्समाणत्वात्॥ ॥ सब्रह्मचारिणि। समानो ब्रह्मचारी सब्रह्मचारी। तस्मिन्नुपरते अहोरात्रं ना
ध्ययनं॥ ॥ प्रेतमनुगत्वा। सपिंडमसपिंडं वा प्रेतं अनुगत्वा तद्दिने नाध्ययनं। गमनोत्तरं। अनुगम्येच्छ
याप्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलं स्पृष्ट्वाग्निमहोरात्रं विरोधनमिति लघुः॥ ॥ पि
तृभ्यश्च निधाय पिंडान्। पार्वणश्राद्धे पितृभ्यः पिंडान्निधाय दत्वा एकाहं नाध्ययनं। पितृभ्यः पिंडानि
ति बहुवचनमविवक्षितं। एकोद्दिष्टश्राद्धेपि पिंडं दत्वा एकाहमनध्यायः॥ ॥ निशां। निशा ना
मध्यरात्रपरः तत्र सकलकर्मानधिकारात्। रात्रेर्मध्यस्थप्रहरद्वयेनाध्ययनं। महानिशा तु विज्ञेया
मध्यस्थं प्रहरद्वयमिति दक्षः। दानं प्रतिग्रहो होमः स्वाध्यायः पितृतर्पणं। महानिशायां नो कुर्याद्भो
जनं देवपूजनमिति जाबालिः॥ ॥ संध्यां। संधौ नवा संध्या। तां अध्ययनरहितां कुर्यादित्यर्थः। मद्द

र्त्तमात्रा विज्ञेया संध्याकालत्रये॥ इति स्मृतिमंजरी॥ मनुः॥ आहारं मैथुनं निद्रां संध्याकाले विव
य २ र्जयेत्। कर्म चाध्ययनं चापि तथा दानं प्रतिग्रहं॥ तावंतं कालं नाध्येयमित्यर्थः॥ ८॥ पर्वसु॥ अष्टमी च
ध ३ चतुर्दश्यमावास्या पौर्णमासी रविसंक्रांतिषु नाध्ययनं॥ विष्णुपुराणे॥ चतुर्दश्यष्टमी चैव अमावास्या
च पूर्णिमा॥ पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव च॥ बौद्धायनः॥ पर्वसु नाध्येयं न मांसमश्नीयान्न च
स्त्रियमुपेयान्न तृणं छिंद्यादिति॥ ८॥ अस्तमिते॥ अस्तमिते आदित्ये घटिमात्रं नाध्येयं शाखांतरात्।
सूर्येऽस्तमिते शुक्रं त्वर्द्धं विरमेत् पूर्वं चाध्ययनान्मैथुनं चावयानं चेति खादिरः॥ ८॥ शूद्रसन्निकर्षे॥ शूद्र
सन्निधौ नाध्ययनं॥ अमेध्यशवशूद्रांत्यश्मशानपतितांतिक इति याज्ञवल्क्यः॥ शूद्रपतितम्लेच्छर २१०
जस्वला चंडालादिसंनिधाने नाधीयीतेति विष्णुः॥ ८॥ सामशब्दे॥ सामगानशब्दे श्रूयमाणेऽनध्यायः॥

या १ मनुः॥ सामध्वनावृग्यजुषी नाधीत कदाचन॥ ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः॥ सामवेदः स्मृतः
पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः॥ ८॥ श्मशाने॥ श्मशानं मनुष्यदाहस्थानं॥ तत्र नाध्येयं॥ श्मशाने पति
तांतिक इति यमः॥ ८॥ ग्रामारण्ये॥ ग्राममेवारण्यं वनं तत्र नाधीयीत॥ न शूद्रसंनिकर्षे न देवायतनेन
ग्रामारण्ये न श्मशाने धीयीतेति निगमः॥ ८॥ अंतःशवे ग्रामे॥ अंतःशब्दो मध्यवाची॥ ग्राममध्यश
वे नाध्येयं॥ सगोत्रशवे वा॥ श्मशानांतःशवे सगोत्रे वा ग्रामे को विदारकपिंकच्छायामिति विष्णुः॥ म या ५
नुः॥ अंतर्गतशवे ग्रामे वृषलस्य च सन्निधाविति॥ ८॥ अदर्शनीयात्॥ अनवलोकनीयावपतितवै
रिसर्पप्रभृतीन्दृष्ट्वानध्यायः॥ अद्भुतान्यस्पृश्यमनुष्यान्पतितवैरिसर्पशोणितवर्षाग्निपातान्ना
वलोकयेद्दृष्ट्वा सुरनिंकोचनं च दद्यादिति प्रचेताः॥ ८॥ अश्रवणीयात्॥ गुरुदेवद्विजनिंदादिव

कचनारेति प्रसिद्धिः॥ ४

वनानि कृत्वा नाध्यायः॥ छ॥ अनिष्टघ्राणे। विण्मूत्रादिदुष्टगंधेनाध्येयं। बृहस्पतिः॥ दुष्टगंधे सनायां च
सेनायां ग्रामविप्लवे। नृत्यगीतमृदंगानां शब्दे चाध्ययनं नहि॥ छ॥ अतिवाते। वायोरतिवातिनाध्येयं। हा
रीतः॥ अतिवायौ महारथ्यां सुवर्षति थैवचेति॥ छ॥ अभ्रे प्रवर्षणे। प्रवर्षणे प्रवर्षणयोग्येऽभ्रे नो
ध्येयं वर्षास्वन्यत्र। अप्रवृत्ते ऽकालवर्षे हि द्व्यहे प्रवृत्ते तु चेति भारद्वाजः॥ छ॥ रथ्यायां। रथ्या जनसंचा
री मार्गस्तत्र गतो नाधीयीत। स्मृतिः॥ न मार्गस्थोऽणुकमात्रो नाजीर्णे न च सूतकीति॥ छ॥ वीणाशब्दे।
वीणा तंत्रीतस्याः शब्दश्रवणे नाध्येयं। बाणभेरीमृदंगानां वीणागर्दभयोः स्वे ऽशतिरहस्ये॥ छ॥ रथस्थः।
रथस्थो नाधीयीत। शातातपः॥ नाधीयीताश्वमारूढो न नावं न रथं खरं। न हस्तं न मनुष्यं च न चोष्ट्रं नैव २११
च हस्तिनं॥ छ॥ शूद्रवत्सुनि। शुनि कुक्कुरे निकटस्थे शूद्रवत्नाध्येयं। शूद्रसंनिकर्षइत्युक्तं प्रोक्तं।

ज्रीर श्वमार्जारयोः सन्निकर्षे नाधीयीतेति विष्णुः॥ छ॥ वृक्षारोहणे। वृक्षारोहणे नाध्येयं। न वृक्षं न मनुष्यं चे
ति शातातपः॥ छ॥ अवटारोहणे। अवटः कूपस्तत्रारोहणे नाध्येयं। अवटः। अवत इति कूपनामसु पा
ठात्। अप्सु। उदके प्रतिष्ठन्नाधीयीत। दक्षः॥ न वृक्षस्थो न तीर्थस्थो ऽप्सु नौस्थ सभासु च। बहुसंकीर्ण
मध्ये च नाधीयीत कदाचन॥ छ॥ क्रंदति। क्रंदति आक्रंदति मनुष्यादौ रोदिति आक्रुश्यमाने वा नाध्ये
यं। स्मृतिः॥ आक्रुष्टे रोदने वा परिवादे रोदने गीते सामध्वनौ नाधीयीतेति विष्णुः॥ आर्त्तायां। आर्त्तिः पीडा
तस्यां सत्यां नाध्येयं। मैथुने वमने वार्त्तौ इति शंखः॥ छ॥ नग्नः। विवस्त्रः॥ कच्छायवस्त्रो वा नाधीयीत।
नग्नः काषायवस्त्रः स्यान्नग्नः कौपीनकावृत इति कात्यायनिः॥ छ॥ उच्छिष्टः। अपवित्रो नाधीयीत।
उच्छिष्टः स्नानरहितो वेदाभ्यासं न कारयेदिति वेदस्वीकारे॥ छ॥ संक्रमे। पर्वताद्यालिकादेः संक्रमे सो

ति १

पाने स्थितो नाधीयीत। ऋ। केशश्मश्रुनिवापन आप्लानात्। केशानां मूर्द्धस्थितानां श्मश्रूणां कूर्चस्थि
तानां निवापने स्नानात्। आ अनध्यायः। केशश्मश्रुनिवापे च स्नानं नैमित्तिकं स्मृतमिति स्मृतिः॥ ऋ।
उत्सादने। उत्सादनं गात्राणामुद्वर्त्तनं तस्मिन् क्रियमाणे नाध्येयं। उद्वर्त्तने मलस्नाने वाभ्यंगे केशमुंड
न इति लिखितः॥ ऋ। स्नाने। स्नाने क्रियमाणे नाध्येयं। ज्वरे स्नाने च भोजन इति शंखः। ऋ॥ संवेशने
य ५ संवेशने मैथुनं तस्मिन् क्रियमाणे नाधीयीत। मैथुने शयने वांते ज्वरे स्नाने च भोजने। श्मश्रुकर्मणि चोत्स
र्गे नाधीयीत कदाचनेति लिखितः। ऋ। अभ्यंजने। तैलाभ्यंगे क्रियमाणे नाधीयीत। अभ्यंगे मैथुने स्ना
ने ज्वरे चोत्सादने तथेति विश्वामित्रः। ऋ। प्रेतस्पर्शिनि सूतिकोदक्ययोश्च शूद्रवत्। प्रेतस्य मृतस्य स्पर्शि २१२
नि पुरुषे शूद्रवत्संनिकर्षे नाध्ययनं। सूतिका प्रसूता प्राग्दशाहात्। उदक्या रजस्वला चतुर्थदिने प्राक्स्नाना

श्री १

त्तयोः स्पर्शिनि पुरुषे संनिकर्षे शूद्रवन्नाध्ययनं। चकारात्प्रेतस्पर्शे सूतिकास्पर्शे रजस्वलास्पर्शे
च नाध्ययनं। शूद्रसंनिकर्षे इत्युक्तं प्राक्। स्मृत्यंतरे। शवानुगमने प्रेतस्पर्शे पतितभाषणे। सूतिकोद
क्ययोः स्पर्शे स्पृष्टस्य निकटे तथेति॥ ऋ॥ अपिहितपाणिः प्रावृतहस्तो नाधीयीत॥ ऋ। सेनायां। सेना
विजयकटकं तत्र नाधीयीत। मनुः। न विवादे न कलहे न सेनायां न संगरे। न भुक्तमात्रे नाजीर्णे न वमि
त्वा न सूतके॥ ऋ। अनुज्ञाने ब्राह्मणे गोषु च। ब्राह्मणे अनुज्ञाने अधर्मेण गोदिसाधनार्थं नाध्येयं। गो
षु शुल्कादिना लाभार्थमवरुद्धासु अनभ्यस्तुरण्यादिना धीयीत। चकारात्सपिंडादिषु पिदायार्थ
अनभ्यस्तु नाध्येयं॥ ऋ। अतिक्रांतेष्वधीयीरन्। शूद्रादिषु अतिक्रांतेषु अपसृतेषु अधीयीरन् अध्य
यनं कुर्युः॥ ऋ। एतेषां यदि किंचिदकामोत्पातो न वेत्प्राणनायम्यादित्यमीक्षित्वाधीयीत। एतेषामन

ध्यायनिमित्तानां यदि किंचित् अकामोत्पातः अकामतः अनिष्टतः उत्पातउत्पत्तिर्भवेत तदा प्राणा
नायम्य प्राणायामां त्रीन्कृत्वा आदित्यं सूर्यमीक्षित्वा दृष्ट्वा अधीयीत अध्ययनं कुर्यात् ॥ वसिष्ठः ॥ सव्या
हृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिःपठेदायतः प्राणः प्राणायामः स उच्यते । अनिच्छापूर्वकम
नध्यायाध्ययने एतत्प्रायश्चित्तं । बुद्धिपूर्वके तु वसिष्ठः । पतितचंडालशूद्रश्वाशवश्रावणे त्रिरात्रं
वाग्यता अनश्नंत आसीरंस्सहस्रपरम गायत्रीमभ्यस्यंतः पूता भवंतीति विज्ञायत इति ॥ ८ ॥ वि
द्युत्स्तनयित्नुवर्षवर्जं कल्पे वर्षवर्द्धषष्ठेषु । कल्पसूत्रे अध्येतव्ये उपाकर्मकरणादूर्ध्वं वर्षवत् ।
अर्द्धषष्ठेषु सार्द्धपंचमासेष्वनध्यायः । परं तु विद्युत्स्तनयित्नुवर्षवर्जं ॥ ९ ॥ तदप्येतत् । तत्र शब्दः पूर्वो २१२
क्तानध्यायसूचनार्थः । अ पिशब्दः समुच्चये । तत्र पूर्वोक्तमनध्यायकलापं एतदपि अन्यस्मात् ।

दिषु दृश्यते ॥ ८ ॥ अन्नमापो मूलफलं यच्चान्यच्छ्राद्धिकं भवेत् । प्रतिगृह्यापि अनध्यायः पाण्यास्यो ब्राह्मणः
स्मृत इति । अन्नं अपक्वं । सिद्धान्नस्य निषिद्धत्वात् । आप उदकं । मूलानि आर्द्रककदली प्रभृतीनि । फ
लान्याम्रादीनि । एतदपि श्राद्धार्थं प्रतिगृह्य अनध्यायः । चकारः पुनरर्थे । पुनः अन्यत् एतद्व्यतिरिक्तं
दुग्धं दध्यादिकं श्राद्धिकं श्राद्ध संबंधि प्रतिगृह्यानध्यायः । अपिशब्दः किमु अर्थे । एतत्प्रतिग्रहे अन
ध्यायहेतुत्वे कारणं । श्राद्धदिने अध्ययननिषेधात् श्राद्धार्थप्रतिग्रहेप्यनध्यायः । कुतः । ब्राह्मणः
पाण्यास्यः पाणिरास्यं यस्यासौ पाण्यास्यः स्मृतः । यथा ब्राह्मणस्य मुखे अन्नादिकं दीयते तथैव ब्राह्म
णकरे इति कृत्वा पाण्यास्यः स्मृत इत्यर्थः । तथा यथा श्राद्धदिने श्राद्धात् प्राक् अन्नदानादि कृते श्राद्धे
प्राश्व पितरो गच्छंति न श्राद्धसमये आगच्छंति । तथा श्राद्धार्थप्रतिग्रहेपि श्राद्धदिने श्राद्धसिद्धिर्भवति ।

तिष्ठत्यानध्यायः॥ इति शाब्दोनध्यायप्रकरणसमाप्तिसूचनार्थः॥ सप्तमः खंडः॥७॥ ॥न्यायोपेतेभ्य
श्च वर्त्तयेत्॥ न्यायेन शिष्यधर्मेण उपेता प्राप्तास्तेभ्यः शिष्येभ्यो वर्त्तयेत्॥ अध्ययनं आचार्यः प्रवर्त्तयेत्॥
शिष्यधर्मा मनोवाक्कायकर्मभिश्शुश्रूषाभक्तिः॥ अद्रोहत्वं अचिलंनम्रत्वमिन्द्रियनिग्रहत्वं चेत्याज्ञवल्क्यः
कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः॥ अध्याप्याधर्मतःसाधुशक्ताप्तज्ञानवित्तदाः इति॥८॥ प्रा
ङ्मुखो दक्षासीन आचार्यो दक्षिणत उदङ्मुख इतरः॥ प्राङ्मुख उदङ्मुखो वा आसीन उपविष्ट आचार्यः
शिष्यमध्यापयेत्॥ आचार्यस्य दक्षिणतः उदङ्मुखः इतरः शिष्यः श्रोता पठेत्॥९॥ द्वौ वा॥ आचार्यस्य
दक्षिणत उदङ्मुखौ द्वौ वा शिष्यौ उपविशातः॥१०॥ भूयांसस्तु यथावकाशं॥ भूयांसो बहवः शिष्यास्तेतु २१४
दायथावकाशं सावकाशं उपविशेयुः॥ पारायणं वर्त्तयेद्ब्रह्मचारी गुरुः शिष्येभ्यस्तदनुव्रतेभ्यः अ

ध्यासीनो दिशमेकां प्रशस्तां प्राचीमुदीचीमपराजितां वा॥ एकः श्रोता दक्षिणतो निषीदेद्द्वौ वा भूयां
सस्तु यथावकाशमिति पार्षदं॥११॥ नोच्छ्रितासनोपविष्टो गुरुसमीपे शिष्यस्याध्ययनप्रकारः॥ गुरुस य
मीपे उच्छ्रिते उन्नतमे आसने उपविष्टः शिष्यो न पठेत्॥ नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ इति स्मृ
तिः॥१२॥ नैकासनस्थः॥ गुरुणा सह एकासनस्थः शिष्यो न पठेत्॥१३॥ न प्रसारितपादः॥ गुरुसमीपस्थः प्र
वर्त्तिते। गुरुसमीपे प्रसारितपादो विस्तीर्णपादः शिष्यो न पठेत्॥ न बाहुभ्यां जानू उपसंगृह्य॥ गुरुसमीपे शि ढ।
ष्यो बाहुभ्यां हस्ताभ्यां जानू उपसंगृह्य जान्वोरुपसंग्रहणं पर्ययष्टिकाबंधं कृत्वा नाधीयीत॥१४॥ नोपाश्रि
तशरीरः॥ गुरुसमीपे शिष्यो भित्त्यादावुपाश्रितं शरीरं यस्य स एतादृशः सन्नाधीयीत॥१५॥ नोपस्थ
कृतपादः॥ गुरुसमीपे उपस्थे उत्संगे कृतौ पादौ येन स एतादृशः शिष्यो न पठेत्॥१६॥ न पादकुमारि

वाचयित्स २

कांकृत्वा। गुरुसमीपे शिष्यः पादप्रसारणं एवं कुगरिकां तां कृत्वा न पठेत्। चरणं कुगरिका रूपं कृत्वा न प
ठेदित्यर्थः॥ ॥ अधीहि भो इत्युक्त्वाचार्यं ॐकारं प्रचोदयेत्। आचार्यो गुरुः। शिष्यमध्यापनार्थी। अधी
हि भो इति ब्रूयात्। तदुक्त्वा ॐकारं प्रणवं प्रचोदयेत्। प्रेरयेत्॥ ॥ ॐमितीतरः प्रतिपद्यते। इतरः शिष्यः ॐ
इति वाक्यं प्रतिपद्यते उच्चारणं करोति॥ ॥ तत्संततमधीयीत। तेन ॐकारेण संततं अविच्छिन्नं शिष्यो
धीयीत। अध्ययनं करोति॥ ॥ अधीत्योपसंगृह्य पादसमाप्तौ अधीत्याध्ययनं कृत्वा शिष्य आचार्यस्य
चरणोपसंग्रहणं कृत्वा ततः। ते धीहि भो इति चोदयंति गुरुं शिष्या उपसंगृह्य सर्वे इति पार्षदं॥ ॥ वि
रताः स्म भो इत्युक्त्वा यथार्थी। शिष्याः सर्वे भो इति आचार्यं संबोध्य विरताः स्म इति उक्त्वा यथार्थं य २२५
थाकार्यार्थं मूत्रपुरीषाद्युत्सर्गार्थं व्रजेयुः॥ ॥ विसृष्टं विरामस्तावदित्येके। विरताः स्मेत्यत्र विसृष्टं इत्यु

क्त्वा। विरामस्तावत् इत्युक्त्वा वा यथाकार्यं व्रजेयुरिति। एके आचार्याः समामनंति। एक इत्युक्तत्वाद्वि
कल्पः॥ ॥ नाधीयतामंतरा गच्छेत्। अधीयतां अध्ययनं कुर्वतां गुरुशिष्याणां अंतरा मध्येन गच्छेत्॥
शिष्योपि। गुर्वंतेवास्ययोर्मध्ये गच्छेद्यदि हि मानवः प्रायश्चित्तं तु तस्योक्तं प्राणायामशतत्रयमिति प्रा
यश्चित्तस्मरणात्॥ ॥ नात्मानं विपरिहरेदधीयानः। अधीयानः अध्ययनं कुर्वाणः शिष्य आत्मानं न वि ५४
परिहरेत्। शिष्येणाध्ययनं अंतरितं न कुर्यादित्यर्थः॥ ॥ यदि चेद्दोषः स्यात् त्रिरात्रमुपोष्याहोरात्रं वा सा
वित्रीमन्वावर्त्तयेद्यावच्छक्नुयाद्ब्राह्मणोन्यः किंचिद्यादहोरात्रमुपरम्य प्राध्ययनं। यदि कदाचित् आ
मं२ चार्यशिष्ययोरंतरा मार्जारादिगमनेन दोषः स्यात्तदा त्रिरात्रे त्रिदिनमुपोष्योपवासं कृत्वाहोरात्रं एकरा
त्रं चोपोष्य सावित्रीं गायत्रीमन्वावर्त्तयेत्। अन्वावर्त्तनमावृत्तिर्जपः। तं यथाशक्नुयात् यथाशक्ति जपि

ताब्राह्मणेभ्यःकिंचित्सुवर्णंदत्वा।ततोहोरात्रमुपरम्यवेदाभ्यासस्यावसानंकृत्वाततःस्वाध्ययनंप्र
ध्म कृष्टायनंपूर्ववद्विज्ञेयं।गौतमः।अंतरागमनेउपसदनंनकुलसर्पमंडूकमार्जाराणांत्र्यहमुपवासो
विप्रस्यप्राणायामोघृतप्राशनंचेतरेषांसावित्रीजपोवेति।मनुः।पशुमंडूकमार्जारश्वसर्पनकुला
खुभिः।अंतरागमनेविद्यादनध्यायमहर्निशं।श्वमंडूकमार्जाराहिनकुलांतरागमनेगायत्रीशतं
जपेदहोरात्रमुपोष्यत्रिरात्रंवाविप्रेभ्योदक्षिणांकांचनंदत्वाशुद्धः।पूतोनवतीतिवसिष्ठ।विश्वामि
त्रौ।एवंबुद्धिपूर्वाऽबुद्धिपूर्वहेतौप्रायश्चित्तविकल्पायथायथंयोजनीयाः।।८।। ।।अष्टमःखंडः।। ।।न
स्नातः।इतउत्तरंसमावृत्तोधिक्रियते।कृतसमावर्त्तनोगृहस्थउच्यते।गृहस्थोपिस्नातकःश्रूयते।सं २१६
वर्त्तःकुर्याद्गृह्याणिकर्माणिस्वनार्यापोषणंतथा।ऋतुकालाभिगामीस्यात्प्राप्नोतिपरमांगतिं।शेषा

धो१

न्नमृतुगामित्वंपंचयज्ञाःस्वकर्मच।तुल्यैश्चसहसंवं[illegible]गृहस्थस्यविधीयते।इतिमदनपारिजाते।स्ना
तःस्नातकोगृहस्थः।।९।।उपस्पर्शनकालेवगाह्यदेवतास्तर्पयति।उपस्पर्शनंस्नानंतस्यकालःस
मयःतत्रनद्यादौअवगाह्यअवगाहनंस्नानंकृत्वादेवताऋष्यादिकास्तर्पयति।उभाभ्यांहस्ताभ्यां
जलेन।उपस्पर्शनंस्नानमवगाहनमाप्लवनमितिपर्यायाः।कश्यपः।देवानृषीन्मनुष्यांश्चस्तुविः
पितृगणानपि।स्नातःसंतर्पयेद्विद्वान्स्वदाधाराहितेयतः।।यमः।द्वौहस्तौयुग्मतःकृत्वापूरयेदुदकां
जलिं।गोशृंगमात्रमुद्धृत्यजलमध्येजलंक्षिपेत्।यश्चवामाग्रेणकं।उभाभ्यामथपाणिभ्यामुदकंयः
प्रयच्छति।समूढोनरकंयातिकालसूत्रमवाक्शिराः।इतितच्छ्राद्धादिविषयं।तथाचकार्ष्णाजिनिः।
श्राद्धेविवाहकालेचपाणिनैकेनदीयते।तर्पणेनूनयेनैवविधिरेषसनातनः।इत्यादिवचनादुभाभ्यां हस्ताभ्यां

जलांजलीन्दद्यात्। सचस्नानसमयः पूर्वाह्ण इति स्मृतौ उक्तं। वसिष्ठः। पवित्रपाणिरेकाग्रः पार्श्वेनन
वलोकयन्न्। अरुग्दिवाचरेत्स्नानं मध्याह्ने स्नायि विशेषतः। मध्याह्ने स्नात्वा कृत्वा पूर्वाह्ने। इदं च तर्पणं य
ज्ञोपवीतिना कार्यं। इति यज्ञोपवीती तत्रैव वक्ष्यमाणत्वात्। यज्ञोपवीती दैवकर्माणि करोतीति इति कल्पो
क्तत्वाच्च। ऐशानीं दिशमीक्षमाणः तर्पयेत्प्राचीं वा। उत्तरां देवं प्राचीमेवेकइत्युक्तत्वात्। पित्र्यां दि
शमीक्षमाण इति वक्ष्यमाणत्वात्। एतत्स्नानांगं। अवगाह्य देवतास्तर्पयतीत्युक्तत्वात्॥ क॥ अग्निस्तृ
प्यतु। वायुस्तृ०। सूर्यस्तृ०। विष्णुस्तृ०। प्रजापतिस्तृ०। विरूपाक्षस्तृ०। सहस्राक्षस्तृ०। सोमः। ब्रह्मा। वेदाः।
देवाः। ऋषयः। सर्वाणि च छंदांसि। ओंकारः। वषट्कारः। महाव्याहृतयः। सावित्री। यज्ञाः। द्यावापृथिवी। २२७
नक्षत्राणि। अंतरिक्षं। अहोरात्राणि। संख्या। संध्या। समुद्राः। नद्यः। गिरयः। क्षेत्रौषधिवनस्पतिगंध

र्वाप्सरसः। नागाः। वयांसि। सिद्धाः। साध्याः। विप्राः। यक्षाः। रक्षांसि। भूतान्येवमंतानि तृप्यंतु। श्रुतिं तर्प
यामि। स्मृतिं तर्प०। धृतिं तर्प०। रतिं तर्प०। गतिं तर्पयं०। मतिं तर्प०। श्रद्धामेधे। धारणं च गोब्राह्मणं। स्था
३त्रि वरजंगमानि सर्वभूतानि तृप्यंत्विति यज्ञोपवीती। अग्निस्तृप्यत्वित्यारभ्य सप्तमंत्रास्तृप्यतु शब्दांतास्तेष्व
कैकमंत्रेण तृप्यतु शब्दांतेन एकैकमुदकांजलिं दद्यात्। सोमादिभिः प्रथमांतैर्विंशति मंत्रैः प्रत्येक
मेकैकमुदकांजलिं दद्याच्च। तेषु तृप्यतु शब्दो न वाच्यः। यथा सूत्रपाठात्। शेषभूतान्यपूर्वाणीत्यूह प्रति
षेधात्। क्षेत्रौषधिवनस्पतिगंधर्वाप्सरस इत्येकोंजलिं समानपाठात्। नागा इत्यारभ्य सप्तभिर्मंत्रैः
सप्तांजलयः। भूतान्येवमंतानि तृप्यंत्वित्येकोंजलिः। श्रुतिं तर्पयामीत्यारभ्य षड्भिर्मंत्रैः षडंजलयः।
श्रद्धामेधे इत्यारभ्य द्वितीयांतैस्त्रिभिर्मंत्रैस्त्रयोंजलयः। तर्पयामीति शब्दः प्राप्तोपि न भवति। शेषभूता

न्यपूर्वाणीतिसूत्रितत्वात्।स्थावरजंगमानिसर्वभूतानितृप्यंत्वित्येकोंजलिः।इतिअग्निरित्यारभ्यस्था
वरेत्यंतंयज्ञोपवीतीसव्यधर्मेणदेवतातीर्थेनषट्चत्वारिंशन्मंत्रैस्तर्पणंकुर्यात्।इतिशब्दोदेवतातर्पणस
माप्तिसूचनार्थः।भरद्वाजः।दक्षिणंबाहुमुद्धृत्यवामस्कंधेनिवेदितं।यज्ञोपवीतीत्युक्तंतद्देवकार्येषुश
स्यते॥छ॥नवमःखंडः॥९॥ ॥अथप्राचीनावीती।अथशब्दःआनंतर्यार्थोदेवतातर्पणानंतरंप्राचीनावी
तीअपसव्यधर्मेणतर्पणंकुर्यात्।भरद्वाजः।उद्धृतेवामबाहौचदक्षिणस्कंधमाश्रिते।प्राचीनावीतमित्यु
क्तंपित्र्येष्वेवकर्मसु॥छ॥पित्र्यांदिशमीक्षमाणः।पितृणामियंपित्र्यातां।दक्षिणामाग्नेयींवादिशमी
क्षमाणअवलोकयमानःपितृतीर्थेनतर्पयेत्।पूर्वयोर्विदिशोर्दक्षिणांप्राचीपित्र्यइत्युक्तत्वात्॥छ॥ २२८
शतर्चिनः।माध्यमाः।गृत्समदः।विश्वामित्रः।जमदग्निः।वामदेवः।अत्रिः।भरद्वाजः।वसिष्ठः।प्रगाथाः।पा

वमानाः।क्षुद्रसूक्तमहासूक्ताः।सुमंतुः।जैमिनिवैशंपायनपैलसूत्रभाष्यगार्ग्यबभ्रुबाभ्रव्यमंडुमां
डव्याः।गार्गी।वाचक्नवी।वडवा।प्रातिथेयी।सुलभा।मैत्रेयी।कहोलं।कौषीतकिं।महाकौषीतकिं।सुय
ज्ञंशांखायनं।आश्वलायनं।ऐतरेयं।महैतरेयं।भारद्वाजं।जातूकर्ण्यं।पैंग्यं।महापैंग्यं।बाष्कलं।गार्ग्यं
शाकल्यं।मांडूकेयं।महादमत्रं।औदवाहिं।महौदवाहिं।सौजामिं।शौनकं।शाकपूणिं।गौतमिं।येचा
न्येआचार्यास्तेसर्वेतृप्यंत्विति।शतर्चिनइत्यारभ्यप्रतिपदंभिन्नविभक्तिकाएकादशमंत्रास्तैरेका
दशांजलयः।क्षुद्रसूक्तमहासूक्ताइत्येकोंजलिः।सुमंतुरित्येकोंजलिः।जैमिन्यादिनवपदात्मकएकोमं
त्रस्तेनैकोंजलिः।गार्गीत्यारभ्यषण्मंत्रैःषडंजलयः।कहोलमित्यारभ्यद्वितीयांतैस्त्रयोविंशतिमंत्रैः
त्रयोविंशतिरंजलयः।यथापठिताएवमंत्राः।शेषभूतान्यपूर्वाणीत्यध्याहारप्रतिषेधात्।येचान्ये

आचार्या इत्येकोंजलिः। ग्रातर्श्चिन इत्यारभ्य ये चान्य इत्यंतं त्रिचत्वारिंशन्मंत्रैस्त्रिचत्वारिंशदंजलयः।
॥ ७ ॥ प्रतिपुरुषं पितरः। ये येषां पितरस्तेषां पुरुषं प्रति इति प्रतिपुरुषं तर्पणं कार्यं। पितृपितामहप्रपि
तामहाश्च। पितरो यत्र पूज्यंते तत्र मातामहा ध्रुवमिति न्यायात् मातामहप्रमातामहवृद्धप्रमातामहाश्च
स्वस्वनामनिरुद्दिश्य तर्पयेत्॥ ८ ॥ पितृवंशास्तृप्यंतु इत्येकोंजलिः मातृवंशास्तृप्यंत्विति च। मातृवंशास्तृ
प्यंतु इत्येकोंजलिः। इति करणं तर्पणसमाप्तिसूचकः। चकारः सनकादीनां सूचनार्थः। इत्येतत्स्नानां
गं तर्पणं। अवगाह्य देवतास्तर्पयती त्युक्तत्वात्। तथा मध्याह्नस्नानांते एतत्तर्पणं विधाय संध्यां कृत्वा
दि अग्न्यौ पितृपार्वणं तं पूर्ववत्तर्पयित्वा मातृपार्वणमातामहपार्वणमातामहीपार्वणानि च तर्पयित्वा २२९
पितृपितृव्यकांस्तथा स्वपितृव्यकान्भ्रातृन्गुरुपत्नीस्तर्पयित्वा ताश्च स्त्रियश्च तर्पयित्वा कं होसनकादी

दी

स्तर्पयित्वा च पुरुषसूक्तेन तर्पयेत्। नारसिंहपुराणे। स्वसूत्रोक्तेन संतर्प्य तर्पयेत्पितृदेवताः। पूर्वं स्वपि
तरस्तर्प्याः पश्चादन्यांश्च तर्पयेत्। सत्यव्रतः। पितृभ्यः प्रथमं दद्यात्ततो मातृभ्य एव च। ततो मातामहानां
च पितृव्यस्य सुतस्य च। सुहृत्संबंधिवर्गाणां श्वशुराणां तथैव च। आचार्याणां ततः कृत्वा आचार्याणी
भ्य एव च। वधूनां भ्रातृपत्नीनां शिष्यं मित्रं च तर्पयेत् इति। व्यासः। पूर्वं पित्रादयस्तर्प्यास्ततो मात्रादयो
पि च। ततो मातामहाश्चैव मातामह्यस्ततः परं। इदं च नित्यतर्पणं कुशतिलादिसाधनमुक्तं कुर्यात्। का
त्यायनः। अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः। प्रयतस्तर्पणं कुर्यान्मणिखड्गतिलैरपि। याज्ञवल्क्यः।
तिलानामप्यलाभे तु सुवर्णरजतान्वितं। तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वा पुनः। स्मृत्यंतरे। प्रागग्रैस्तर्प
येद्देवानुदगग्रैस्तु मानुषान्। तानेव द्विगुणीकृत्य तर्पयेत्स्वयतः पितृन्। अंजलिसंख्यां दद्यादाह्न एकैक

शौनकाश्वलायनः। ... सौत्रामणी ... स्त्रीन् जलांजलीन् इति।

मंजलिं देवा द्वौ द्वौ तु सनकादयः। अर्हंति पितरस्त्रीस्त्री स्त्रीणामेकैकमंजलीं। कूर्मपुराणे। देवता
नां तु सर्वासामेकैकोंजलिरिष्यते। ऋषीणामेक एव स्यान्मनुष्याणां द्वयं तथा। त्रिस्त्रिः पितृभ्यो दद्या
त्तु स्त्रीणां तु सकृदेव हि। त्रिस्त्रिर्मातामहानां तु एको द्विष्टे सकृत्सकृत्। नामादिग्रहणे विशेषः। बौधाय
नः। शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु। घोषांतं चैव वैश्यस्य दासांतं शूद्रजन्मनः। चतुर्णामपि व
र्णानां पुत्रीणां पितृगोत्रता। पितृगोत्रं कुमारीणामूढानां भर्तृगोत्रतेति। एवं पितृतर्पणं कृत्वा कंठेन
सनकादीनां भवति। विष्णुपुराणे। कृतोपवीती दत्वैवं नीवीती च भवेत्ततः। सनकश्च सनंदनश्च तृ
तीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथेति। पूर्वोक्तस्नानांगतर्पणं संभवे पुराणे। २२०
कंठभ्रवादितर्पणं कुर्यात्। तद्विधिः स्मृत्यंतराज्ज्ञेयः। इति तर्पणं॥ २०॥ ॥ दशमखंडः॥ ॥ नग्नां स्त्रियम्

क्षेतान्यत्र मैथुनात्। नग्नां विवस्त्रां स्त्रियं नेक्षेत न पश्येत्। स्त्रिया एव विवरं नेक्षेतेति ब्राह्मणे। मैथुनात्तु उ
पभोगादन्यत्र। नेक्षेतार्कं न नग्नां स्त्रीमिति याज्ञवल्क्यः। स्मृतिश्च। मुखेनोपधमेदग्निं नग्नां नेक्षेत योषितं। सं
३ॐ भोगे न च दोषः स्यादाहुतौ नाप्यमंगलं॥ २१॥ नादित्यं संधिवेलयोः। ईक्षेतेत्यनुवर्तते। संधिवेलयोः प्रातःसायं
कालयोरादित्यं सूर्यं नेक्षेत। मनुः। नेक्षेतोद्यंतमादित्यं नास्तं यंतं न मध्यगमिति॥ उद्यंतमेवैनं नेक्षेत। अ
यंतं चेति श्रुतेः॥ २२॥ अनार्तः। नेक्षेतेत्यनुवर्तते। अनार्तं वैरिणं मावेक्षेत। न आर्तः अनार्तः स्वां वैरिणं पति
तं सर्वपुरीषं मूत्रमेव च। श्लेष्माणमवटं रेतो नावेक्षेत तथाद्भुतमिति स्मृतेः॥ २३॥ अकार्यकारिणं। नेक्षेतेत्य
नुवर्तते। अकार्यं ब्रह्महत्यादि तत्करोति तं नेक्षेत। वैरिणं पतितमित्युक्तत्वात् पतितस्पर्शिनं। नेक्षेतेति वर्त
ते। प्रेतस्पर्शिनं सदैव मृतवोढारं नेक्षेत॥ २४॥ सूतिकोदक्याभ्यां न संवदेत्। सूतिका प्राग्दशाहात्तु

दक्याचतुर्थदिनस्नानात्।ताभ्यांनसंवदेत् मिथोजल्पंनकुर्यात्।नरजस्वलयानार्याइतित्रिविधा
ने।।छ।।एतैस्त्री।वकारःपूर्वोक्तानुकर्षणार्थः।एतैःपूर्वोक्तैरजस्वलादिभिर्नसंवदेत्।।छ।।उद्धृततेजांसिन
भुंजीत।उद्धृतनिःसारितंतेजोयेभ्यस्तानिनभुंजीत।पिण्याकमथितप्रभृतीन्यन्नानिच।नदिवोद्धृतसा
रंचनदध्येदधिनोनसीतिस्कांदे।।छ।।नयातयामैःकार्यंकुर्यात्।यातयामैर्गतरसैर्गतसत्वैःसहका
र्यंभोजनासनादिकंनकुर्यात्।यातयामंगतरसंइत्यमरः।।छ।।नसहभुंजीत।मंडूकप्लुतिन्यायेनना
र्येत्यनुवर्त्तते।नार्ययासहनभुंजीत।नाश्नीयाद्भार्ययासार्द्धंनैनामीक्षेतचाश्नतीं।क्षुवतींजृंभमाणांचन २२१
चासीनांयथासुखं।।छ।।नशेषं।नार्येत्यनुवर्त्तते।नार्ययाउच्छेषमन्नंनभुंजीत।ननार्युच्छेषंतु
अन्नमद्यादनापदीतिस्मृतिः।।छ।।पितृदेवतातिथिभृत्यानांशेषंभुंजीत।भृत्याःपरिचारिकाः।पित्रादीनां

दत्तशेषमन्नंभुंजीत।कुमाराश्चसुवासिन्योगर्भिण्योतिसंजाविताः।अतिथिशब्दितेप्येतेभोज्यानात्र
विचारणा।पितृदेवमनुष्येभ्योदत्वाश्नीत्यमृतंहविरितिस्मृतिः।एवंसम्यग्गृहस्थेनदेवताःपितरस्तथा।
संपूज्याहव्यकव्याभ्यामन्नेनातिथिबांधवाः।भूतानिभृत्याविकलाःपशुपक्षिपिपीलिकाः।भिक्षवो
पि याचमानाश्चयेचान्येगृहस्थिताःइतिब्रह्मपुराणे।।छ।।उंछशिलैर्मयाचितप्रतिग्रहैःसाधुभ्योयादि
तोवायाजनंवृत्तिः।ब्राह्मणक्षत्रियविशांउंछादिवृत्तिर्जीविकाज्ञेया।क्षेत्रगतसस्यानांस्वामिनाशिब्या
दिकंगृहेनीतंततःक्षेत्रभूमौपतितान्कणान्गृहीत्वापंचयज्ञान्कृत्वाभुजिक्रियाक्रियतेसाउंछाख्या।उं
छवृत्तिः।खलस्वामिनाखलगतंसस्यंगृहीतंततःखलगतान्कणानेकैकशोगृहीत्वाजीव्यतेसाशिला
ख्याशिलवृत्तिः।याच्ञांविनाव्यतिरेकेणधर्मलब्धेनधनेनान्नादिनावाजीव्यतेसाअमृतरूपाअयाचित

ध्या ३

ऋता

प्रतिग्रहवृत्तिः॥ साधुभ्यः सदाचारशीलेभ्यो याचितं यांच्याटनादिना धर्मलब्धेनान्नेन धनेन वा जीव्यते सा अ
मृतरूपा याचितप्रतिग्रहवृत्तिः। याजनं ब्राह्मणक्षत्रियविशां। अग्निहोत्रादियाजनेन लब्धधनेन जीव्यते सा
श्र अमृतरूपा याजनवृत्तिः॥ मनुः॥ स ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा। सत्यानृताभ्यामपि वा न श्ववृत्त्या क
दाचन। ऋतमुंछशिलं प्रोक्तममृतं स्याद्याचितं। मृतं तु नित्ययाच्ञा स्यात्प्रमृतं याजनं स्मृतं। एता वृत्तिर्वर्णत्र
सर्वे १ यस्य॥ ॥ पूर्वं गरीयः। एतास्य पूर्वं प्रथमं प्रथमं गरीयः प्रशस्तं। अयमर्थः। शिलादुंछो गरीयः। अयाचितप्रति
ग्रहाच्छिलः श्रेष्ठः। साधुयाचितादयाचितप्रतिग्रहः। याजनात्साधुयाचितः प्रतिग्रहः। एवमुत्तरोत्तरं श्रेष्ठं। जी
वेद्वापि शिलोंछेन श्रेयानेषां परः परः इति याज्ञवल्क्यः॥ ॥ असंसिध्यमानायां वैश्यवृत्तिर्वा। एतासां वृत्तीनां मध्ये २२२
एकस्यामपि असंसिध्यमानायां वृत्त्यां वैश्यवृत्तिः वाणिज्यादिवृत्तिर्वा भवति। कालिकापुराणे। कृषिगोरक्षवा

सर्वे ५

णिज्यमेतद्वैश्यस्य संमतमिति। क्षत्रवृत्तिमतिक्रम्यायमाचार्ये वैश्यवृत्तिं मन्यते। महाभारते। क्षात्रेणक
र्मणाजीवेद्वैश्यां वाप्यापदि द्विजः। निस्तीर्यतामथात्मानं पावयित्वा न्यसेत्पथि॥ ॥ अप्रमत्तः पितृदैवतका
र्येषु। आपद्यपि पितृकार्येषु दैवतकार्येषु अप्रमत्तः प्रमादरहितः स्यात्। पितृकार्याणि श्राद्धादीनि। दैवत
कार्याणि देवपूजावैश्वदेवादीनि। अत्रिः। प्रमादो नैव कर्त्तव्यः श्राद्धादिषु विपश्चिता। पूजने हवने नित्येऽति
थिसत्कारकर्मणि॥ ॥ ऋतौ स्वदारगामी। स्वदारान् ऋतौ रजोदर्शनमारभ्य षोडशादिनात्मके काले आ
द्यं चतुष्टयदिनं हित्वा स्वदारगामी स्वदारसेवी स्यात्। बौधायनः। ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति।
पितरस्तस्य तं मासं तस्मिन्रेतसि शेरते॥ ॥ न दिवा शायी। न दिवा दिवसे न शायीत स्वापं न कुर्यात्। नोच्छिष्टो न
दिवा स्वप्यात्संध्यायां न च भस्मनीति प्रचेता॥ ॥ न पूर्वापररात्रयोः। शायीतेत्यनुवर्त्तते। रात्रेः पूर्वप्रहरे रात्रेः पश्चि

मयामेवनध्यायीत।नदिवाप्रस्वपेज्जातु न पूर्वापररात्रकऽ इतिव्यासः।प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ
नयेत्।यामद्वयंशयानस्तु ब्रह्मभूयाय कल्पते।इतिदक्षः।।ळ।।नन्नमावनंतर्हितायामासीत।नग्नंतर्हिता अ
नंतर्हिता तस्यांभूमौ आस्तरणरहितायांनासीत नोपविशेत्।।ळ।।नित्योदकी।।नित्यंनिरंतरंउदकमस्यास्ती
ति नित्योदकी।जलयुक्तंपात्रंसदाधार्यंविप्रेणांभःकमंडलुरिति याज्ञवल्क्यः।।ळ।।यज्ञोपवीती।।नित्येत्यनु
वर्त्तते।यज्ञोपवीती नित्यंस्यात्।नित्यंउपवीतंधार्यं दाक्षायणीब्रह्मसूत्रीतियाज्ञवल्क्यः।।ळ।।न विरहदासा ये ५
यें।।नित्येत्यनुवर्त्तते।नित्यंआचार्यंनविरहयेत्।नत्यजेत्।।ळ।।अन्यत्रनियोगात्।नियोगात् आचार्यदेशात्
अन्यत्र आचार्यंनत्यजेत्।अयमर्थः।आचार्यदेशात् आचार्यंविरहयेत्।स्वतो न।।ळ।।अनुज्ञातो वा।।अनु २२३
ज्ञातः आज्ञप्तः आचार्येण आचार्यंविरहयेत्वा।।ळ।।११।। ।।एकादशः खंडः।। ।।अहरहराचार्यायाभिवादयेत्।। या १

अहरहः प्रतिदिनंआचार्याय अभिवादयेत्।अभिवादनंनमस्कारः।आचार्यसमीपंगत्वाप्रतिदिनंनमस्कु
र्यादित्यर्थः।।ळ।।गुरूनप्यस्य।।अभिवादयेतेत्यनुवर्त्तते।अ इरहस्य।अहरहस्य गुरून्यः पितृमातृज्येष्ठभ्रात्रादि
न्योभिवादयेत्।नमस्कुर्यात्प्रतिदिनमाचार्यमातरंगुरूमितिपारस्करः।।ळ।।समेत्यश्रोत्रियस्यवेदपाठशी
लस्य अभिवादनंकुर्यात्।समेत्येत्युक्तत्वात्प्रतिदिनमभिवादनंनित्यंन।एकांशाखांसकल्पांवाषड्भिरंगैरधी
त्य चाषट्कर्मनिरतो विप्रः सवै श्रोत्रियउच्यतइति मनुः।।ळ।।प्रोष्य प्रत्येत्याश्रोत्रियस्य।अभिवादयेतेत्यनुवर्त्तते।
प्रवासंकृत्वाप्रत्येत्यसमागत्याश्रोत्रियस्याभिवादनंकुर्यात्।तदभिवादनंकथमित्यपेक्षायामा -ह।।ळ।।असा
वहंभोइत्यात्मनोनामादिश्य व्यत्यस्यपाणी।असाविति प्रथमांतमात्मनोनामादिश्य उक्ता अहंभो इत्युक्ता
पाणी हस्तौ व्यत्यस्य व्यत्यासंकृत्वा अभिवादयेत्।अयमर्थः।स्वकायेनदक्षिणहस्तेनाचार्यादेर्दक्षिणंपा

दंसव्यहस्तेनसव्यंपादंसंस्पृश्य अमुकगोत्रः अमुकामुकशर्मा अहंभो३ अभिवादयामि इतिप्रयोगः॥
॥७॥ असौ३ इत्यस्यपाणी संस्पृश्याशिषमाशास्ते। उकार आदरार्थो वीप्सार्थो वा। आ चापादिः अस्य अ-
भिवादयितुः पाणी हस्तौ संस्पृश्य असौ इति अभिवादयितुर्नामामंत्रितं गृहीत्वा आशिषं आयुष्मान्भव सौ-
म्येत्यादिकां आशास्ते ददाति। पुनःपुनराशीर्ददाति। अभिवादयितुर्दक्षिणोत्तरौ हस्तौ स्वकीयदक्षिणो-
त्तराभ्यां हस्ताभ्यां संगृहीत्वा आशिषं ददाति हे यज्ञदत्त आयुष्मान्भव सौम्य ३ इति प्रयोगः॥८॥ नावृतो यज्ञं
गच्छेत्। ऋत्विक्त्वेनावृतो यज्ञमग्निष्टोमादिकं न गच्छेत् न व्रजेत्॥९॥ अधर्माज्जुगुप्सेत। अधर्मात् अ-
धर्मकारणात् परदारसेवनादेर्जुगुप्सेत् उद्विजेत। चकार आपद्यर्थे आपद्यपि यवनादिनाधृतोपि तत्रा- २२४
सक्तिर्न विधेया॥१०॥ न जनसमवायं गच्छेत्। जनसमवायं जनसमूहं संज्ञां न गच्छेत्। न व्रजेत्। सनावा

नप्रवेष्टव्येति याज्ञवल्क्यः॥११॥ नोपर्युद्दिष्टो समेत्य। यदिकदाचित्समेतोऽव्रजेत्तर्हि समेत्य एकवाक्यत-
यामिलित्वाकस्याप्युपरि उपघातार्थं नोद्दिशेत्। परोपघातार्थमिदमत्रकरणमिति तस्योपरि उद्देशं न
कुर्यात्। वक्रंवंवासमंजसमिति याज्ञवल्क्यः॥१२॥ अनाक्रोशकोऽपिशुनः कुलंकुलो नेति हेतिःस्यात्। स्या-
दितिप्रत्येकंसंबध्यते। केनचिदाक्रुष्टोपि गालितोपि अनाक्रोशनः परगालिप्रदान रतो न स्यात्। पिशुनः
परेणाद्दोषेपिकृते वा कृते वापि कृते परदोषख्यापको न स्यात्। कुलंकुलः कुलंकुलं गृहं गृहं गच्छतीति कुलं-
कुलो न स्यात्। निःकारणं गृहेगृहे अटनशीलो न स्यात्। यद्वा कुलः सकुलःपुत्रकलत्रादि सहितः कुलं
नीडाश्रयं जर्जरान्नतं वृक्षं न गच्छेदिति वा॥१३॥ इति हेतिः। इति अमुना प्रकारात् अस्य पुरुषस्य स्त्रियो वा हे-
तिश्चेष्टा तत्ख्यापको न स्यात्। परजनापवादख्यापको न स्यादित्यर्थः। समीक्षितमप्यसमीक्षितमितिवा

दीस्यादित्यर्थः॥ लिखितः॥ पैशून्यंपरदारांचक्रोशानंवंचनंतथा॥ वृथापर्यटनंचैवनरःसर्वत्रवर्जयेत्॥
॥टी॥ नैकश्चरेत्॥ एकोद्वितीयरहितोनचरेत्॥ नगच्छेत्॥ अध्वानमितियावत्॥ पंथानंनैककोयायान्नवाप्य
र्थंजलंपिबेदितिकाशीखंडे॥टी॥ ननग्नः॥ नग्नोनगच्छेत्॥ एकवस्त्रवसानोवाकाषायवस्त्रवसानोवा
वस्त्ररहितोवानग्नः॥ हेमाद्रौ॥ नग्नःकाषायवस्त्रःस्यान्नग्नोंष्ठकविवर्जितः॥ नग्नश्चाप्येकवस्त्रीस्यान्न
ग्नःकापालिकःस्मृतः॥टी॥ नापिहितपाणिः॥ अपिहितपाणिःनपिहितौपाणीयस्यासौ॥ अप्रावृतकरो
नस्यात्॥ कृतोत्तरासंगःस्यादित्यर्थः॥टी॥ देवायतनान्यप्रदक्षिणं॥ देवायतनानिदेवप्रतिमास्थानानिय
ज्ञस्थानानिचप्रदक्षिणंप्रादक्षिण्येनगच्छेत्॥ काशीखंडे॥ देवतायतनंविप्रंधेनुंमधुमृदंनृपं॥ व २२५
स्मृ॰रे॰रो॰१ योवृद्धंज्ञातिपूर्वंविद्यावृद्धंतपस्विनं॥ अश्वत्थंचैत्यवृक्षंचगुरुंजलभृतंघटं॥ सिद्धान्नंदधिसिद्धार्थंगच्छ

र्यात्प्रदक्षिणं॥टी॥ नधावेत्॥ वर्षतिपर्जन्येनधावेत्॥ नवीक्षेतात्मनोरूपमप्सुधावेन्नवर्षति॥ इतिस्मृतिकु
रंडिका॥टी॥ ननिष्ठीवेत्॥ अजस्रंआकस्मिकंवाअप्सुवाननिष्ठीवेत्॥ निष्ठीवनंउद्गिरणं॥ ष्ठीवनास्रक्कृ
त्रासृङ्मूत्ररेतांस्यप्सुननिक्षिपेत्॥ पादौप्रतापयेन्नाग्नौनचैनमभिलंघयेदितियाज्ञवल्क्यः॥ स्कांदे॥ विण्मू
त्रेष्ठीवनंनाप्सुकुर्याद्दीर्घजिजीविषुः॥टी॥ नकंडूयेत्॥ पुनःपुनःस्वीयमंगंनकंडूयेत्नघर्षयेत्॥टी॥ मू
त्रपुरीषेणावेक्षेत॥ मूत्रंचपुरीषंचमूत्रपुरीषे॥ तयोरवेक्षणंनविधेयं॥ ननिरीक्षेतविण्मूत्रेनोच्छिष्टःसंस्पृ
शेच्छिरइतिविष्णुः॥टी॥ अवगुंठ्यासीत॥ अवगुंठनंकर्णद्वंद्वकरणंकृत्वाआसीतउपविशेत्प्रकृतत्वात्मू
त्रपुरीषयोःकरणार्थं॥टी॥ नानंतर्हितायां॥ नअंतर्हितातृणादिनाभूःतस्यांतुविमूत्रपुरीषेनकुर्यात्॥
स्कांदेनागरखंडे॥ निरस्कृत्वाऽवनिंलोष्ठतृणपर्णादिनिस्तृतः॥ प्रावृत्यवाससामौलिंविद्वान्मूत्रमलंत्यजेत्॥

॥१०॥ यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा॥ यदि कथंचित् एकवस्त्रो द्वितीयवस्त्ररहितो मूत्रपुरीषे कुर्यात्तदा
यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषे कुर्यात्। कर्णे दक्षिणकर्णे। कात्यायनः॥ यत्रोपदिश्यते कर्म कर्तुरंगं
न तूच्यते। दक्षिणस्तत्र विज्ञेय इति। विष्णुः॥ घ्राणे स्यवेष्टयित्वा मृद्दारीं ग्रीवायामुपवीतमासज्य चरेत्
अंगिराः॥ कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबितं। विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितः॥ कर्णेनिधा
न यमेकवस्त्रविषयं॥ छ॥ नादित्यमभिमुखः॥ आदित्यं सूर्यमभिमुखो मूत्रपुरीषे न कुर्यात्। मनुः। गोवि
प्रसूर्यं वा ग्निचंद्रमसौ गुरून् अपि। अभिपश्यन्न कुर्वीत मलोत्सारविसर्जनं॥ छ॥ न जघनेन। आदित्य
मनुवर्तते। आदित्यं जघनेन पश्चात्कृत्वा मूत्रपुरीषे न कुर्यात्। मदालसा। नादित्यं जघने कृत्वा कुर्यान्मूत्र २२६
विसर्जनमिति॥ छ॥ अह[illegible] रुदङ्मुखो नक्तं दक्षिणामुखः। अहर्दिवसे उत्तरामुखः सन्। नक्तं रात्रौ द

क्षिणामुखः सन् मूत्रपुरीषे कुर्यात्। याज्ञवल्क्यः॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्र
पुरीषे तु रात्रौ चेद्दक्षिणामुखः॥ कर्णोपवीत्युदग्वक्त्रो दिवसे संध्ययोरपि। विण्मूत्रे विसृजेन्मौनी निशायां
दक्षिणामुखः इति स्मृतिः॥ छ॥ न वाप्सु श्लेष्म न च समीपे। अप्सु उदकेषु श्लेष्मश्लेष्माणं न कुर्यात्। अ
पां समीपे च न कुर्यात्। वशिष्ठः॥ वर्त्मगोष्ठादिषु। न तु मेहेन्नदीच्छायावर्त्मगोष्ठांबुभस्मस्विति याज्ञवल्क्यः।
॥ छ॥ न वृक्षमारोहेत्। वृक्षं वनस्पतिं नारोहेत्। न दुष्टं यानमारोहेद्वृक्षं कूपं तथैव चेति स्मृतिः॥ छ॥
न कूपमवेक्षेत। कूपं अवटं नावेक्षेत न पश्येत्। उदपानावेक्षणवृक्षारोहणफलप्रचयनसंध्यादि
त्यप्रेक्षणमात्मनो नेत्रं न कुर्यात् इति प्रचेताः॥ छ॥ न धुवनं गच्छेत्। धुवनं मनुष्यवधस्थानं न गच्छेत्।
रणगणं च धुवनं श्मशानं शून्यमार्गकं। न गच्छेदंतरा विप्रशिष्यौ ब्राह्मणयोस्तथेति क्रतुः॥ छ॥ न वै

वतुरमशानं। श्मशानं मनुष्यदाहस्थानं नैव गच्छेत्। एवशब्दः प्रकरणसमाप्तिसूचनार्थः। उत्राद्वात् अन्यं
ग्रामं निवासस्थानं च। शून्यं ग्रामं महारण्यं निवासं न व्रजेत् सदेति निगमः॥ ४॥ सवस्त्रोऽहरहराप्लवेत। अहर
हः प्रतिदिनं सवस्त्रो वस्त्रोत्तरीयसहितआप्लवेत स्नायात्। वस्त्रोत्तरीयसहितः स्नायात् घोंदिने दिने।
अन्यथा न नवे स्नानं गृहे देवतदमंत्रवत् इति पैठीनसिः॥ ४॥ आप्लुत्यावुदकोन्यद्वस्त्रमाच्छादयेत्। आ
प्लुत्य स्नात्वा अब्बुदकः अविगतोदकः अन्यद्वस्त्रं स्नानवस्त्रात् अन्यत् [illegible]त्रं आच्छादयेत्। परिदध्यात्। अ धो ५
द्रस्ववासः परिदधीतेति त्रिकाण्ड्यां। स्नात्वा न मार्जयेद्गात्रं अन्यद्वस्त्रं च धारयेदिति त्रिकांडे॥ १२॥ ॥ द्वादशः खं
डः॥ ॥ रोहिण्यां कृषिकर्माणि कारयेत्। कृषिकर्माणि कृष्यर्थकर्माणि भूमिगाहन लांगल वरत्रादीनि रो २२७
हिण्यां रोहिणीनक्षत्रे ब्राह्मणः कारयेत्। शूद्रादिना आपदि। स्वयं न कुर्यात्। असिसिध्यमानायां वैश्य

वृत्तिर्वा इत्युक्तत्वात्। विप्रः कृत्वा कृषिसेवां ब्राह्मण्यादेव हीयते। कृषेरपि नो स्वयं कुर्यात् कारयेच्छूद्रनाति नेति
शालंकायनः॥ ४॥ पुरस्तात्कर्मणां प्राच्यां क्षेत्रमर्यादायां द्यावापृथिवीयं बलिं हरेत्। गाहनादिकर्मणां पुर
स्तात् अग्रे प्राच्यां दिशि क्षेत्रमर्यादायां क्षेत्रसीमायां क्षेत्रखेटको द्यावापृथिवीयं द्यावापृथिव्यो देवते यस्या
सौ तं बलिं हविष्यान्नेन हरेत्। दद्यात् वक्ष्यमाणमंत्रेण। सीमा मर्यादेति यास्कः। बलिः पूजोपहारयोरिति को
षः॥ ४॥ द्यावापृथिवीयः पर्वान नमो द्यावापृथिवीभ्यामिति चोपस्थानं। द्यावापृथिवीयया। द्यावापृथिव्योरियं
द्यावापृथिवीया तया प्राथम्यात् मही द्यौरित्येतयास्तचा बलिं हरेत्। बलिं दत्वा नमो द्यावापृथिवीभ्यामिति क
ल्यो केन मंत्रेण द्यावापृथिव्योरुपस्थानं कुर्यात्। चकारात् मही द्यौरित्येतयाच। मेधातिथि द्यावापृथिव्यौ
गायत्री। मही द्यौः पृथिवी च नः॥ ऋ २ नमो द्यावापृथिवीभ्यां होरन्यां अर्द्धर्चैः॥ ४॥ प्रथमयोगे सीरस्य

ब्राह्मणः सीरं स्पृशेत् शुनं नः फाला इत्येतं मन्त्रं ऋक् वर। ब्राह्मणो द्विजः प्रथमयोगे संबंधे शुनं नः। ६
फाला इत्येतां त्र्यवं अनुष्टुभं वर्ज्यवारयन्। सीरस्य लांगलस्य सीरं अथ नांगं स्पृशेत्। वामदेवः शुनासीरौ त्रि
ष्टुप्। शुनं नः फाला विकृषंतु भूमिं॥ १॥ क्षेत्रस्य पतिने ति प्रदक्षिणं प्रत्यस्वं प्रति दिशामुपस्थानं। क्षेत्रस्य पति
ने ति सूक्तेन प्रदक्षिणं प्रादक्षिण्येन प्रत्यस्वं त्र्यवं त्र्यवं प्रति इति प्रत्यृचं। प्रतिदिशं। दिशं दिशं प्रति इति प्र
तिदिशं प्राच्यादि एकैकया ऋचा उपस्थानं कुर्यात्। वामदेव ऋत्विजः क्षैत्रपत्याः शुनः शुनासीरौ सीताः शुना
सीरौ त्रिष्टुप्यं चमीपुर उष्णिगाद्या चतुर्थी षष्ठी सप्तम्यनुष्टुप्। क्षेत्रस्य पतिना वयं ज्ञ दा॥ १३॥ ॥ त्रयोदश
खंडः॥ ॥ उदकं तरिष्यं स्वस्त्ययनं करोति। कृवित्कार्यतः प्राप्ते उदकतरणे उदकं अगाधं नद्युदकं नावा २२८
दिना तरिष्यन् तं तुमि छन् आत्मनो रक्षार्थं स्वस्त्ययनं करोति॥ १॥ उदकांजलीन्त्रीन् अप्सु जुहोति। समुद्रा

समिदाधानमन्त्राणां चेति नियमात् अन स्वाहाकार इति सूत्रभाष्यकारः। २

यवैणवे नमो वरुणाय धर्मपतये नमो नमः सर्वाभ्यो नदीभ्यः। अप्सु उदकेषु समुद्रायेत्यादिभिस्त्रिभि
र्मंत्रैः स्वाहाकारांतैः त्रीन् उदकांजलीन् जुहोति। उदकेष्वंजलित्रयप्रक्षेपरूपं होमं करोतीत्यर्थः। स्वाहा
कारांते होममंत्राणां समिदाधानमंत्राणां चेत्युक्तत्वात् स्वाहाकारः॥ २॥ सर्वासां पित्र्ये विश्वकर्मणो दत्ते रु
विजुषतामिति जपित्वा। सर्वासामिति मंत्रं उदकहोमानंतरं जपित्वा ततः॥ ३॥ प्रतीपस्रवंतीभ्य उन्नीपंस्था
वराभ्यः। मंडूकप्लुतिन्यायेन जुहोतीत्यनुवर्त्तनीयं स्रवंतीभ्यः स्रवणशीलाभ्यो नदीभ्यः प्रतीपं प्रतिस्रोतो
जुहुयात्। स्थावराभ्यः स्थगिताभ्यो नदीभ्य उन्नीपं उद्धृ पं जुहुयात्॥ ४॥ तरं स्रोतेद्यं शकेद्वासिष्ठं सूक्तं ज
पेत् समुद्रज्येष्ठा इत्येतत् स्ववर्चैत यद्यर्थे। यदि तरन्नूना वादिना बाहुतरणेन वा। नयं यवां केतन्न यवांकामव
तितदा वासिष्ठं सूक्तं। वसिष्ठेन दृष्टं वासिष्ठं समुद्रज्येष्ठा इति चतुर्ऋचात्मकं सूक्तं स्रवसंज्ञं जपेत्। नासि

ध्रुवयोर्ग्रहणं सूक्तस्तुत्यर्थं। इदमेव सूक्तं अंगीकुर्यात् किमन्येन सूक्तेनेति स्तुतिः॥ वसिष्ठ आपस्त्विषु
यः समुद्रज्येष्ठाः सलिलस्य मध्यात् ३ स्त ४॥१४॥ चतुर्दशः खंडः॥ ॥श्रवणाश्रविष्ठीयायां पौर्णमास्यामक्ष
तसक्तूनां स्थालीपाकस्य वा जुहोति। श्रवणाकर्मोच्यते। श्रवणाकर्म सर्पबलिकर्मणोर्द्वयोर्मिलित्वा
एकमाभ्युदयिकं कुर्यात्। श्रावण्यां तु द्वयोरेकं इति कारिकोक्तत्वात्। श्रवणाश्रविष्ठाधनिष्ठा यस्यां पौ
र्णमास्यां सा श्रवणाश्रविष्ठीया पौर्णमासी तस्यां प्रतिश्रुता विधानेन अक्षतसक्तूनां अक्षतानां अ
कंडितानां [illegible] अष्टानां यवपारवाणापिष्टानां सक्तूनां अवदानधर्मेण वक्ष्यमाणा आहुतीर्जुहोति।
आवसथ्ये। स्याद् धिश्रयणानावे सक्तादौ तेकमंजनमित्युक्तत्वादेकस्रुवेणानिधार्य सक्तूनां होमं २२
कुर्यात् स्थालीपाकस्य चरोर्वा आहुतीर्जुहुयात्। वा शब्दो विकल्पार्थः। स्थालीपाके षु चग्रहणासादन

प्रोक्षणानि इत्युक्तत्वात्। विश्वेवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यो जुष्टं गृह्णामि इति ग्रहणासा
दनप्रोक्षणानि भवंति। श्रावण्यां पौर्णमास्यां स्थालीपाकं श्रपयित्वा कृतधानाश्चैक इति यदुर्ध्व्य।
विश्वेवे स्वाहा। श्रवणाय स्वाहा। श्रावण्यै पौर्णमास्यै स्वाहा वर्षाभ्यः स्वाहेति। स्थालीपाकेन सक्तुभिर्वा विश्वे
व इत्यादिकाश्चतस्र आहुतीर्जुहुयात्। स्विष्टकृदादि कर्म समापनं। अथ सर्पबलिकर्मोच्यते॥ ७॥ गृह्यमग्निं
बाह्यत उपसमाधाय लाजान कृतसक्तूंश्च सर्पिषा संनिनीय जुहोति। गृह्यं अग्निं आवसथ्यं बाह्यतः
बहिः उपसमाधाय सर्वोद्धरणं कृत्वा पंचभूसंस्कारान् कृत्वा अग्निं संस्थाप्य प्रतिश्रुता धर्मेण लाजान् [illegible] अ
ष्टान् व्रीहीन् सर्पिषा घृतेन संनिनीय संप्लाव्य च पुनः अक्षतसक्तून् अकंडित अष्टयवकृतान् सक्तूंश्च
घृतेनाभिघार्य वक्ष्यमाणमंत्रेण जुहोति। वाह्यत इत्युक्तत्वात् सर्पबलिकर्म बहिर्भवति॥ ७॥ दिव्यानां स

पाणामधिपतयेस्वाहादिव्येभ्यःसर्पेभ्यःस्वाहेति।लाजानत्रहुतसंस्रवैकीकृत्य।दिव्यानांसर्पाणां
मधिपतयेदिव्येभ्यःसर्पेभ्योजुष्टंगृह्णामीतिग्रहणासादनप्रोक्षणानिकृत्वासर्पिषाभ्यज्याग्नेरग्राद्
तीजुहोति।अत्रापिपौर्णमासीनक्षत्रयोर्योगःपूर्वेणसमानः।अवदानधर्मांश्चेत्तुकृत्वातेअवदान
धर्मेणोकृतोभवतः।ततःस्विष्टकृत्॥छ॥उत्तरेणाग्निंप्रागग्रेषुनवेषुकुशेषूदकुंभंनवंप्रतिष्ठाप्य।
स्यापिताग्निंउत्तरेणउत्तरतःप्रागग्रेषुप्राक्अग्राणियेषांतेषुनवेषुनूतनेषुकुशेषुदर्भेषुत्रिषुन
वंनूतनंउदकुंभंउदकपूर्णंकुंभंप्रतिष्ठाप्यसंस्थाप्य॥छ॥दिव्यानांसर्पाणामधिपतिरवनेनिक्तांदि
व्याःसर्पाअवनेनिजंतामित्यपोनिनयति।वक्ष्यति।त्रिस्त्रिरुच्चैस्तरामुच्चैस्तरांपूर्वंनीचैस्तरांनीचैस्तरा २३
मुत्तरमिति।तस्मिन्स्थापितेकुंभेस्थानद्वयमुत्तराधरतयापरिकल्प्यतयोर्यदुच्चैस्तिष्ठतितस्मिन्दिव्या

नांसर्पाणामधिपतिरवनेनिक्तांइत्यनेनमंत्रेणत्रिरावृत्तेनत्रिरपोनिनयतिदक्षिणहस्तेनदेवतीर्थेन।
ततःपूर्वस्मान्नीचैर्यत्स्थानंतिष्ठतितस्मिन्दिव्याःसर्पाअवनेनिजंतांइतिमंत्रेणत्रिरावृत्तेनत्रिर
पोनिनयति।एवमुत्तरेष्वपिद्रष्टव्यं॥छ॥दिव्यानांसर्पाणामधिपतिःप्रलिखतांदिव्याःसर्पाःप्रलिखंता
मितिफणेनचेष्टयति।पूर्ववत्उत्तरेषुत्रिषुसर्पेष्वधिपतिषुदिव्यानामितिमंत्रेणफणेनकाष्ठमयेनफ
लकेनचेष्टयतिसर्पाकृतिंफणेनकरोतीत्यर्थः।ततःपूर्ववदधरेषुत्रिषुदिव्यांसर्पाइत्यनेनमंत्रेण
त्रिःफणेनसर्पाकृतिंकरोति।अयमेवप्रकारःसर्वत्र॥छ॥दिव्यानांसर्पाणामधिपतिःप्रलिंपतांदिव्याः
सर्पाःप्रलिंपंतामितिवर्णकस्यमात्रांनिनयति।पूर्ववदुत्तरेषुत्रिष्वधिपतिषुदिव्यानामितिमंत्रेणव
र्णकस्यमलयचंदनस्यमात्रांअंशंनिनयति।तथाअधरेषुत्रिषुअमात्येषुदिव्याःसर्पाइतिमलयचंद

नांशांनिनयति। श्रीखंडं वर्णकश्चैव चंदनं सुरभिस्तथेति कोषः॥ ठ॥ दिव्यानां सर्पाणामधिपतिभ्यो लब्धी
तां दिव्याः सर्पा आबध्नतामिति सुमनस उपहरति। पूर्ववदुत्तरेषु धरेषु च यथाक्रमं सुमनसः पुष्पाणि
उपहरति ददाति॥ ठ॥ दिव्यानां सर्पाणामधिपतिराच्छादयतां दिव्याः सर्पा आच्छादयंतामिति सूत्रतंतुमु
पहरति। पूर्ववदुत्तरेषु धरेषु च यथाक्रमं सूत्रतंतुं उपहरति ददाति॥ ठ॥ दिव्यानां सर्पाणामधिपतिरा
ङ्क्तां दिव्याः सर्पा आंजतामिति कुशतरुणेनोपघातमांजनस्य करोति। पूर्ववदुत्तरेषु धरेषु च यथाक्र
मं कुशतरुणेन कुशपिंजूल्या अंजनस्य सौवीरांजनस्य आउपघातं प्रक्षेपं करोति। अंजनं नेत्रभूषणमि २३२
त्यायुर्वेदे॥ ठ॥ दिव्यानां सर्पाणामधिपतिरीक्षतां दिव्याः सर्पा ईक्षंतामित्यादर्शेनेक्षयति। पूर्ववदुत्तरेषु
धरेषु च आदर्शेन ईक्षयति अवलोकापयति॥ ठ॥ दिव्यानां सर्पाणामधिपतय एष ते बलिर्दिव्याः सर्पा एष

वो बलिरिति बलिमुपहरति। बलिर्हविष्यमन्नं सक्तुलक्षणं। एवमहरहरहुतसक्तूनां दर्व्येणेति वक्ष्यमा
णत्वात्। पूर्ववदुत्तरेषु धरेषु च यथाक्रमं मेक्षणेन बलिं सक्तुलक्षणं सोदके उपहरति ददाति। एवमवने
जनप्रलिखनप्रलेपनपुष्पदानसूत्रतंतुदानांजनेक्षणबलिदानमित्यष्टौ क्रियाः प्रत्येकं षट्कृत्वोऽभ्यस्य
नाष्टाचत्वारिंशद्भवंति॥ ठ॥ एवमांतरिक्षाणां। एवमुक्तप्रकारेणोदकुंभस्थलांतरे तथैव स्थानद्वय
मुत्तराधरतया परिकल्प्य उत्तरे आंतरिक्षा अधिपतयो धस्तने आंतरिक्षाः सर्पास्तेभ्योवनेजनादिका अ
ष्टौ क्रियाः कार्याः। मंत्रे वोह्यः। आंतरिक्षाणां सर्पाणां। आंतरिक्षाः सर्पा इत्यूहः। अत्राप्यभ्यस्यमानाः क्रिया अ
ष्टाचत्वारिंशद्भवंति॥ ठ॥ दिश्यानां। एवमित्यनुवर्तते। एवं पूर्वोक्तप्रकारेण तस्मिन्नुदकुंभस्थलांतरे तथै
व परिकल्प्यावनेजनादिका अष्टौ क्रियाः कार्याः। मंत्रे चोहः। दिश्यानां सर्पाणां दिश्याः सर्पा इत्यूहः। अत्राप्य

ष्टाचत्वारिंशत्क्रियाभवंति ॥ ७ ॥ ॥ पार्थिवानामिति । एवमित्यनुवर्त्तते । एवमुक्तप्रकारेण तस्मिन्नुदकुंभे
स्थलांतरे तथैव परिकल्प्यावनेजनादिका अष्टौ क्रियाः कार्याः । मंत्रभेदो हः । पार्थिवानां सर्पाणां पार्थिवाः
सर्पा इत्यूहः । अत्राप्यष्टाचत्वारिंशद्भवंति ॥ ८ ॥ त्रिस्त्रिरुच्चैस्तराम् उच्चैस्तरां पूर्वौ । दिव्यानां दिव्या इत्यादिमंत्रा
दहशः ऊह्या तत्र पूर्वमंत्रवचनं क्रियायुक्तं दिव्यानामिति । त्रिस्त्रिरभ्यसेत् । इतरस्मात्प्रदेशात् उच्चैस्तरां
उच्चैस्तरां कुर्यात् । अयमर्थः । अधिपतेः सर्वस्मादपि प्रदेशादुच्चैःस्थानता कार्येत्यर्थः ॥ ९ ॥ नीचैस्तरां नीचै
२१३ स्तरामुत्तरं । त्रिस्त्रिरित्यनुवर्त्तते । उत्तरं मंत्रवचनं क्रियायुक्तं दिव्याः सर्पा इति अधिपतेः स्थानात् नीचैस्तरां नी
चैस्तरां त्रिस्त्रिरभ्यसेत् । उदक्तं स्थानं भवतीति प्राग्युक्तं । सप्तकादिकर्मसमापनं । ततः सर्वोद्धरणं कृत्वा स्व २४२
स्थाने निस्थापनं ॥ १० ॥ एवमहरहरकृतसक्तूनां दर्व्योपघातमाप्रत्यवरोहणात् रात्रौ रात्रौ वाग्यतः सोद

पौर्णमासीत आमार्ग्य २

अवनेजनं बलिप्रदानं चेति द्व
त्य ह्यपदार्थद्वयमेवेत्यर्थः ३

दकं बलिं हरेत् । वाग्यतो वाग्यमयुक्तो मौनधर्मेण आ प्रत्यवरोहणात् प्रत्यवरोहणकर्मणः प्रागेव
वमुक्तप्रकारेण अहरहः प्रतिदिनं रात्रौ रात्रौ दर्व्या काष्ठनिर्मितेन मेक्षणेन उपघातं उपहृत्योपह
त्य अकृतसक्तूनां सोदकेऽवनेजनपूर्वकं दिव्यांतरिक्षदिश्यपार्थिवानां पृथक् प्रदेशे बलिं हरेत् दद्या
त् ॥ ११ ॥ वाग्यता चैनमुपसादयेत् । वाग्यता वाग्यमयुक्ता यजमानपत्नी एनं बलिद्रव्यादिकं उपसादये
नं त् । स्थापयेत् प्रतिदिनं ॥ १२ ॥ प्रउपक्रमः स उत्सर्गः । य उपक्रमः या दृष्ट एवोपक्रमः सर्पबलिकर्मणः अस्या
मग्निं वा ह्यत उपसमाधायेत्येवमादिकः स एवोत्सर्गस्य कर्मणो भवति । आग्रहायण्यां पौर्णमास्यां ॥ १३ ॥
सुत्रामाणमिति शय्यामारोहेत् । यजमानः सुत्रामाणमिति मंत्रेण शय्यां चतुः स्थूणाभिः कृतनीडरू
पा तस्यां आरोहेत् शयनार्थी । श्रावण्यामारभ्य आग्रहायणीयावत् भूमौ शयनं न कार्यं । सर्पभयात् त

अल्पपदार्थद्वयः २

स्मात्तउक्तैः शयनं विधेयमिति वृद्धसंप्रदायः ॥ गणेशे विश्वेदेवा स्विष्टकृत् । सुत्रामाणं पृथिवीं द्यामनेहसं सु
त्रामाणं पृथिवीं द्यामनेहसं ॥ २ ॥ १५ ॥ ॥ पंचदशः खंडः ॥ ॥ आश्वयुज्यां पौर्णमास्यामैंद्रः पायसः ॥ आश्व
युजीकर्म आत्मसंस्कारः ॥ संस्कारकारणं सर्वेषामारंभे आद्धमिष्यत इति कारिकोक्तेः आभ्युदयिकं वि
धेयं । आश्वयुजे मासि सिनवा आश्वयुजीतस्यां पौर्णमास्यां ऐंद्रः इंद्रदेवताकः पायसश्चरुः कर्तव्यः ॥ एत
त्कर्मणो नामधेयं आश्वयुजीकर्मेति । पायसमैंद्रं श्रपयित्वेति यजुर्गृह्ये ॥ ॥ अश्विभ्यां स्वाहा अश्वयुग्भ्यां
स्वाहाश्वयुज्यै पौर्णमास्यै स्वाहा शरदे स्वाहा पशुपतये स्वाहा पिंगलाय स्वाहेत्याज्यस्य हुत्वा । प्रतिश्रु
ताविधानेन पायसं चरुं श्रपयित्वावदानधर्मेण इंद्राय स्वाहेत्येकामाहुतिं जुहुयात् । अनाम्नातमंत्रा २३२
स्वादिष्टदेवता स्वमुष्यै स्वाहामुष्यै स्वाहेति जुहुयात् इत्युक्तत्वात् । ततो अश्विभ्यां स्वाहेत्यादयः षडाहुती

पयोयत्र संयुक्ते तत्र पृषातकमुच्यते दध्येव इति कात्यायनः ॥ पयस्याज्ये निषिक्ते तु तत्पयस्याः पृषातकमिसाश्वलायनवृत्तौ ॥ ४
राज्यस्य स्रुवेण हुत्वा ततः ॥ ॥ अथ पृषातकस्य आ गावो अग्मन्नित्येतेन सूक्तेन प्रत्यृचं जुहुयात् । अ
थाज्याहुत्यनंतरं पृषातकस्य आ गाव इत्येतेन अष्टर्चात्मकेन सूक्तेन अष्टाहुतीः प्रत्यृचं स्रुवेण जुहु
यात् । स्रुवः पात्रमित्युक्तत्वात् । द्रवद्रव्ये स्रुवः स्मृत इत्युक्तत्वाच्च । तथा च कारिका । स्रुवेणाज्यं च होमः स्या
दाश्वयुज्यादिकर्मस्विति । घृतमिश्रं दधि पृषातकं तस्यान्नरदाजो गावो ... इति येंद्रीव ... उग
त्यस्ति स्वस्त्ययनं स्विष्टकृतो । आ गावो अग्मन्नुत भद्रमक्रन् । ततः पृषातकस्य चरोः स्विष्टकृदादिक
र्मसमापनं ॥ ॥ मातृनिर्वसनं संसृजंति तां रात्रीं । तां रात्रीं कर्मदिनरात्रौ मातृनिर्गोनिर्वसान् बालकान्
संसृजंति संसर्गं एकत्र करणं कुर्युः ॥ संसृजंतीति बहुवचनात् स्वाम्यादेशा ... गोपाला इति यावत् ॥ ॥
अथ ब्राह्मणभोजनं । अथ कर्मणोंते ब्राह्मणभोजनं विधेयं कर्मांगत्वेन । कर्मापवर्गे ब्राह्मणभोजन

पयोयत्र
संयुक्ते
पृ ४

मितिवर्त्तमानेऽनध्ययनाभ्याज्ञानविधानं बहुवार्थी । त्रिभ्योधिकान्ब्राह्मणान्भोजयेदित्यर्थः ॥८॥ ॥
षोडश्याः खंडः ॥ ॥ आग्रहायण्यां प्रत्यवरोहेत । आग्रहायणीकर्मोपात्तसंस्कारः संस्कारकाणां सर्वेषा
मित्युक्तत्वादाभ्युदयिकं विधेयं । आग्रहायण्यां मार्गशीर्ष्यां सर्पबलिकर्मणा ऽत्सर्गं कृत्वा प्रत्यवरो
हेत् शय्यातः ॥१॥ रोहिण्यां प्रोष्ठपदासु वा । अस्मिन्नेव स्मृत्युक्तपक्षे रोहिण्यां रोहिणीनक्षत्रयुक्ते दिने प्रो
ष्ठपदासु पूर्वभद्रपदयुक्ते दिने वा प्रत्यवरोहणं विधेयं । वा शब्दो विकल्पार्थः ॥२॥ शमीपलाशमधूक प्रातः
षीकापामार्गाणां शिरीषोदुंबरकुशाग्रतरुणां बदरीणां च पूलमुष्टिमादाय सीतालोष्टं च ॥ प्रातः प्रतिप
दि रोहिण्याद्युत्तरे दिने वा शम्यादीनां सप्तानां दक्षिणेन पाणिना पूलमुष्टिं च पुनः सीतालोष्टं हलो २३५
त्कर्षितं आदाय गृहीत्वा ततः पलाशो ब्रह्मवृक्षः । इषीका मुंजेषीका । अन्यत्तत् शम्यादीनि प्रसिद्धानि । मुं

ञ्जो विमुच्य तत् इषीक येति यास्कः ॥३॥ उदपात्रे वधाय । उदपात्रे उदकपूर्णपात्रे अन्नमये शम्यादि सर्व
णि अवधाय संस्थाप्य ततः ॥४॥ महाव्याहृतीः सावित्रीं चोदुत्यापनः शोशुचदघमित्येतेन सूक्तेन तस्मि
न्निमज्य निमज्य प्रदक्षिणं शरणेभ्यः पाप्मानमपहत्योत्तरतो निनयेत् ॥ महाव्याहृतयः प्रसिद्धास्ताः त्व
पुनः सावित्री गायत्री उदुत्य उद्वयं उच्चारणं कृत्वा तस्मिन्नुदपात्रे शम्यादिद्रव्याणि निमज्य निम
ज्य अपनः शोशुचदघमित्यष्टर्चेन सूक्तेन प्रदक्षिणं प्रादक्षिण्येन प्राचीप्रभृति दिक्षु शरणेभ्यो गृ
हेभ्यः सर्वेभ्यः सकाशात् पाप्मानं धूमसारूप्यमपहत्य अपहत्योत्तरतो गृहस्य निनयेत् क्षिपेत् । ऋक्सं
ख्या त्रिर्गायत्री । अपनः शोशुचदघं तच्चारणं । वरूथमिति तिष्टन्नामसुपागत् ॥५॥ मधुपर्को दक्षिणा ।
एतत्कर्मसिद्धये दक्षिणात्वेन मधुपर्को देयः । दधिमधुघृतसंयुक्तं कांस्यपात्रद्वयं पाद्यार्घाचमनीयपात्रा

णिताम्राणि एतद्द्रव्ययुक्तो मधुपर्केदेयः॥७॥ ॥ सप्तदशः खंडः॥ ॥श्री॥ प्रोहेमंतऋतवो वसं

ताः शरद्वर्षाः सुकृतं नो अस्तु ॥ तेषामृतूनां शतशारदानां निपात एषामभये स्याम स्वाहा ॥ अथ पश्चात्तनपदा

जहि पूर्वेषां चापरेषां च ॥ ससैवं वारुणीरिमाः सर्वाश्च बांधवैः स्वाहा श्वेताय वैदार्व्याय स्वाहा । विदा

र्व्याय स्वाहा । तक्षकाय वैशालेयाय स्वाहा । विश्वलाय स्वाहेत्याज्यस्य हुत्वा अग्निमित्रा महायथाकर्मणि

प्रतिष्कृतानि विभागेनान्यभागांतं कुलायी प्रोहेमंत इत्यादिभिः षड्भिर्मंत्रैः स्थालीपाकाहुतीः स्रुवेणाज्यस्य हुत्वा

ततः॥४॥ सुहेमंतः सुवसंतः सुग्रीष्मः प्रतिधीयताम् । सुवर्षाः सुतुनो वृर्षाः शरदः शं न भवंतु न इति । सुहेमं

त इति मंत्रे राजपोऽकर्मसंयोगात् । ततस्विष्टकृदादितंत्रशेषसमापनं ॥५॥ शं नो मित्र इति पलाशशा २३५

खया विमृज्य । तस्मिन्नेव दिने रात्रौ शयनार्थं शयनस्थानं भूमिं शान्न इति मंत्रेण पलाशशाखया वि

मृज्य संमार्जयित्वा । गोतमो लिंगोक्ता देवता अनुष्टुप् । शं नो मित्रः शं वरुणः शं नः समुद्रा ऊर्मिरित्यनु ८

ष्टुप् । तं शयनस्थलं समुद्रा ऊर्मिरिति मंत्रेण अद्भिरभ्युक्ष्य अभ्युक्षणं सेचनं कृत्वा । वामदेव ऋषिस्त्रिष्टु

प् । समुद्रादूर्मिर्मधुमाँ उदारत् ॥६॥ स्योना पृथिवि नो भवेति स्रस्तरमास्तीर्य । तस्मिञ्छयनस्थले स्यो

ना पृथिवीति मंत्रेण शयनार्थं स्रस्तरं सर्वेषां गृह्याणां शयनयोग्यं आस्तीर्य । मेधातिथिः पृथिवी

गायत्री । स्योना पृथिवि नो भव । अपरे ज्येष्ठदक्षिणाः पार्श्वैः संविशंति । तस्मिन्स्रस्तरे ज्येष्ठदक्षिणाः ज्येष्ठः

दक्षिणो दक्षिणतो येषां ते सर्वे गृह्याः प्राक्शिरसः पार्श्वैः दक्षिणपार्श्वैः संविशंति । पार्श्वैरित्युक्त्वा

न्नोत्तानाः अवाचीना वा वक्ष्यमाणमंत्रेण । ज्येष्ठदक्षिणा इत्यनेन यथा वृद्धं गृह्याः पार्श्वैः शयनं कुर्यु

र्मंत्रेण ॥७॥ प्रतिब्रह्मन्प्रतितिष्ठामि क्षत्र इति दक्षिणैः प्रतिब्रह्मन्नित्येकारांतेन मंत्रेण स्रस्तरस्था

शय्यादक्षिणैः दक्षिणपार्श्वैः।अवस्थानंकुर्युः॥छ॥प्रत्यस्थेषुप्रतितिष्ठामिगोष्वितिसव्यैः प्रत्यस्थे
ष्वितिमंत्रेणशय्यास्तरस्तरस्याः सव्यैःपार्श्वैरवतिष्ठेयुः॥छ॥प्रतिपशुषुप्रतितिष्ठामिपशुष्वितिदक्षि
णैः।प्रतिपशुष्वित्योकारांतेनमंत्रेणशय्यादक्षिणपार्श्वैःपरिवर्त्तेयुः॥छ॥प्रतिप्रजायांप्रतितिष्ठाम्यन्न
इतिसव्यैःप्रतिप्रजायामित्येकारांतेनमंत्रेणशय्याः सव्यैःपार्श्वैःपरिवर्त्तनंकुर्युः॥छ॥उदीर्ष्वजीवइ
त्युक्तानं।उदीर्ष्वमितिमंत्रेणसर्वैस्तरस्तराद्युत्थानंकुर्युः।कुसउषास्त्रिष्टुप्।उदीर्ष्वजीवोअसुर्नआगा
त्॥स्त्र॥छ॥स्वस्तरेतांरात्रींशेरते।तांरात्रींसंपूर्णांस्वस्तरेसर्वैर्गृहस्थाः शेरतेसुख[illegible]शायिनोनवेयुः।
॥छ॥यथासुखमतऊर्ध्वं।अतऊर्ध्वंमंत्रवत्दक्षिणादिपार्श्वपरिवर्त्तनानंतरंयथासुखंसर्वैस्तरेअन्यत्र २३६
वासवैर्गृहस्थैः शयनंकार्यं॥छ॥ ॥अष्टादशः खंडः॥ ॥चैत्र्यांपौर्णमास्यां।चैत्रेमासिभवाचैत्रीतस्यांपौर्ण

पाश्चोदिनियमवर्ज
मितिव्याख्येयं। २

मास्यांचैत्रीकर्मभवतीतिवाक्यशेषः।चैत्रीकर्माप्यात्मसंस्कारः।तस्मादाभ्युदयिकंकारिकोक्तंविधेयं।
॥छ॥कर्कंधुपर्णानिमिथुनानांचयथोपपादंपिष्टस्यकृत्वा।यथोपपादंयथासंभवं। मिथुनानांचक्रवा
कादीनांकर्कंधुपर्णानिकर्कंधुः शारएपबदरी।तत्पत्रवत्पत्राणिपिंडीनिपिष्टस्ययवपिष्टस्यतंडुलपिष्ट
स्यवाकृत्वाततः।मिथुनानांपत्राणिपिष्टानिबदरीपत्रवत्कार्याणीत्युक्तत्वान्मिथुनानामप्याकृतिःका
र्या॥छ॥ऐंद्राग्नस्थंडिलः।पिष्टस्येत्यनुवर्त्तते।ऐंद्राग्नः इंद्राग्नीदेवताकस्थंडिलः वृहदुदरः पुरुषः किंनरो
वृहच्छुखः।पिष्टस्यकार्यः॥छ॥रौद्रागोलकाः।पिष्टस्येत्यनुवर्त्तते।रौद्राः रुद्रदेवताकास्त्रयोगोलकाः
कर्त्तव्याः।अत्रापिप्रतिकृतांविधानेनपवित्रोत्पवनानंतरंपिष्टस्यग्रहणं।उक्तदेवताभ्यः इंद्राग्निभ्यांरु
द्रेभ्योजुष्टंगृह्णामिइतिग्रहणासादनप्रोक्षणानिकृत्वापिष्टस्योक्तक्रमेणयथाकृतिबंधनं।ततोवदान

धर्मेण इंद्राग्निभ्यां स्वाहा। रुद्रेभ्यः स्वाहेत्याहुतीर्जुहुयात्। स्विष्टकृच्च। आम्नातमंत्रास्त्वादिष्टदेवतास्वमुष्यै
स्वाहामुष्यै स्वाहेत्यूहकृतत्वात्॥७॥ लोकतो नक्षत्राण्यबालतश्च लोकतो नक्षत्राण्यप्यबालतश्च। नक्षत्राणि
कृत्तिकादीनि। पुनः अबालतस्तेषां नक्षत्राणां आकृतयो लोकतोन्यशास्त्रतो गवेषणीयाः। मिथुनानां
नक्षत्राणां माकृतीनां दानं ब्राह्मणाय दद्यात्। संप्रदायात्तु दिलगोलकानां अवदानधर्मेणावद्यैदाहु
तीर्जुहुयात्। द्विरभ्यासोऽध्यायसमाप्तिसूचनार्थः॥१९॥ ॥एकोनविंशः खंडः॥ ॥इति श्रीमत्सकलविद्वज्ज
नमंडनद्विवेदिश्रीश्रीपतितत्सुतद्विवेदिश्रीकृष्णजीततनयनारायणादि० सूत्रभाष्ये चतुर्थोध्यायः॥ ॥
एवं विश्वस्य कर्त्तारं विश्वातीतं चिदात्मकं। देवं संसारपोतं तं नृसिंहं प्रणतोस्मि वै। अथ परिशिष्टं व्याख्याः पंच २३१
माध्याय आरभ्यते। ॐ॥ अथ प्रवत्स्यन्नात्मन्नरण्योः समिधि वाग्निं समारोहयति। अथानंतरकार्यत्व

रुपात्सृतुगिति जर्तुरू ।२

त्वात्प्रवत्स्यन्। प्रवासं कुर्वन्। आत्मन्संप्रेम्यर्थेऽप्रथमौ आत्मनि अरण्योः समिधि प्रादेशमात्रायां वाग्निं
आवसथ्याख्यं समारोहयति। अथ अग्नेः समारोहणं यजमानः पुत्रादिर्वा करोति। परिशिष्टे। प्रवसंश्चिपुसमा
रोपयंस्त्वात्मन्यरण्योः समित्स्विति। आत्मनोरण्योरुपावरोह्य मंथनमिति सूत्रे॥७॥ एहि मे प्राणा नारोहेति
सकृत्सकृन्मंत्रेण द्विर्द्विस्तूष्णीं। यदात्मनि अग्नेः समारोहणं करोति तदा एहिम इति मंत्रेणाकारांतेन स
कृत्सकृदग्नेः समारोहणं तूष्णीं द्विर्द्विः समारोहणं। एवमात्मनि समारोहणे कृते यजमानस्य शरीरनाशोऽ
ग्निनाशः। यजमानस्य गतेपि देहे यद्यस्य दक्षिणहस्तो भवति तदापि लौकिकाग्निं संस्थाप्य तस्य तं दक्षिणह
स्तं मुक्त्वा उपावरोहेति यजुर्जपेत्। ततो द्वादशगृहीतेनाज्येनामंत्रकं स्रुचा होमं कुर्यात्। संपूर्णेपि देहेऽयं
अयमेव प्रकारः। अत्र मंडनः॥ आत्मारोपितशरीरस्य नाशो न भवति पावकः। शोबंदहेयनष्टेपि दक्षिणः पाणि

रस्ति चेत्। लोके नौस्थापयित्वास्य पाणिमुद्धारयेद्यजुः॥ उपावरोहजातेति तूष्णीमभिंनयेत्। ततः द्वादशोपा
त्तेनाज्येन तूष्णीकं जुहुयात् स्रुवा। समस्यां तत्प्रपद्येत प्रेतेमत्याइतिक्रियो। सकलेकुणपेलब्धे प्य एव विधि
र्नवेत्। यजमानस्य पूर्णदेहे प्राप्ते हस्त प्राप्तौ च पात्र प्रतिपत्ति पूर्वकं दाहो विधेयः। पात्राणि स्रुक् स्रुवस्र
द्रु प्रणीतोलूखलमुसलशूर्पमेक्षणादर्वीन लिका प्रच्छ नीनि॥ का॥ अयं ते योनिरिति वा ऽरणी प्रतितपा
वाराद्यः पूर्वपक्षव्यहितौ। यद्यरणीभवतस्तदादेशाच्चं शाखादौ नीथादिगमने चपक्षहोमं विधा[illegible]यारण्यार
यंतेयोनिरित्येतया स्रुवा प्रतितपति अयौ। सत्नुस्तन्मंत्रेणाद्विदिंस्त्रस्तीमित्यनुवर्त्तते। एवं प्रतपनं करो २३०
ति। विश्वामित्रो भिरन्नुष्टुप्। अयं ते योनिर्ऋत्वियः॥ अपंत्रापि यजमानस्य मरणे यथास्थानं पात्र प्रति
कर्तव्य॥ पत्नि विधाय शरीरदाहं पक्षादि होम प्रकारो यथा। प्रतिपत्तिथिमारभ्योपवसथतिथेः प्राक् यावंति

वैकल्पिकः समिद्धोमः ५

तिदिनानि पंचदश चतुर्दश वा तावंति दिनानि मनसि संगृह्य पात्रत्रये तावत् आहुतिग्रहणं विधाय।
होमयेत्। समूहनादि समिद्धोमः पर्युक्षणा सहदेवयेकपात्रे पंचदश चतुर्दश वा आहुतिग्रहणं। द्वितीयेपि
तथा॥ तृतीये त्रिंशत् अष्टाविंशति वा आहुतिग्रहणं। एवं ग्रहणं कृत्वा समूहनं पर्युक्षणं विधायैकां समिधं हु
त्वा। सायं अग्नये स्वाहेत्येकपात्रस्थं हुत्वा सूर्याय स्वाहेति द्वितीयपात्रस्थं हुत्वा द्विगुणितं तृतीयपात्रस्थं हु
५वै. त्वा प्रजापतय इति पर्युक्ष्य समिधं हुत्वा प्रज्वलितमग्निं कृत्वा ऽयंत इति मंत्रेणारण्योः प्रतपनं। मंडनः॥
सायं प्रातस्तनो होमा वुभौ सायं समस्यतु। आपन्नो जुहुयात्तत्र समिदेकाथवा द्वयं॥ इत्येकः पक्षः॥ तथा
दिनानि मनसि संगृह्य पात्रद्वये पंचदश चतुर्दश वा संगृह्य समूहनादि समिद्धोमं कृत्वा। सायं अग्न
य इत्येकपात्रस्थं हुत्वा द्वितीयं पात्रस्थं प्रजापतय इति हुत्वा पर्युक्ष्य नित्यसमिधारणं। तथा प्रातः पात्र

द्वयेतथैव संस्तरसमूहनादि विधाय सूर्याये लेकपात्रस्थं हुत्वा द्वितीयपात्रस्थं प्रजापतय इति हुत्वा पर्यु
स्यारण्योः प्रतपनं। एवं पक्षमध्ये चेत्तृतीयायां सप्तम्यां वा दशम्यां वा यस्मिन्दिने तीर्थादिगमनं त्वापद्वा न
वतितदा तु तत्पक्षद्वयेकतरेण होमं कुर्यात्॥ अत्र मंडनः॥ ॥आमयाव्यार्तिमानापद्गतो वाध्वगतोऽपि वा।
राष्ट्रक्षोभे धनाभावे गुरुगेहे वसन्नपि। अन्येष्वेवं प्रकारेषु निमित्तेष्वागतेषु च। समासमाहुतीनां च
यथासनं वमाचरेत्। पक्षहोमान्शेषांश्चाशेषहोमानथापि वा। समस्य जुहुयात्तत्र प्रयोगोयं निरूप्य
ते। प्रतिपद्युन्नये सायमापद्यन्यत्र वा दिने। यावंतौ पवसथ्याहात्प्राक्दिनानि भवंति हि। तावंति पूरि
प्ट हीयाचतुरुन्नयनानि च। एकास्मिन्स्रुचि होमः सकृदेव समूहनं एवमेवोत्तरत्राक्षिप्तानहोमान्स
मस्य जुहुयात्पौपवसथ्यात्प्रात होमावधी सकृत् समारोपविधानेन समारोपयतेनलं। एवं प्रति

पदोन्यत्र यत्रापदुपनायत इति। एवं कृते यद्दिने आपद्विनाशस्तद्देवमथित्वा हृत्वा वा भूसंस्कारं
कृत्वाग्निं संस्थाप्य नित्यवद्धोमः कार्यो न वा॥ मंडनः। दीर्घकालापदं मत्वा पक्षहोमे कृते सति। तत्रां
तराले यद्यापत्कदाचिदपगच्छति। काले काले पुनर्होमान्जुहुयात्प्राग्घुतानपि। केचिदेवं विदुः के
चिन्नेच्छंत्यन्ये पुनर्हुतमिति तिथेर्वोपवसथ्याहात्प्राग्यत्रैंपद्विनश्यति। तृतीयायां चतुर्थ्यां वा पंचम्यां वा
परत्र वा। तदादीनां तदंतानां होमानां स्यात्समस्यता। आपदेवावधिर्होमैः समासस्याप्युपेयते। तस्मा
त्कदाचिदारभ्य यावंतस्त्वापत्तो पि वा। आपत्कालसमा होमांस्समस्येदेकपक्षगान् त्र्यत एव द्विरात्र
यत्रिरात्राद्यधिकायवा। समस्य जुहुयाद्धोमानित्येवं पठ्यते कैः। प्रवासिनोग्निहोत्रस्य पंचाहं सम
वा पुनः। सायंप्रातं पृथक् होम एकस्मिन्नहनीति च। एवमेकत्र पक्षाये होमास्तेषामेवशेषतः। न्यूनानां

वासमासः स्यान्न पक्षांतरवर्त्तिभिः। पर्वण्युपवसथ्याह्ने सायंहोमात्पृथग्भवेत्। तथैव यजनीय
दे प्रातर्होमो भवेत्पृथक्। पर्वोपवासमध्यस्थे त्वाग्रयणेनापि देहिना। तदा तत्सायंहोमोपि पर्वैः
सह समस्यत इति। एवमेव पक्षे गतेप्यापद्वि नाशो न स्यात्तदा द्वितीयपक्षेपि पूर्वोक्तविधिना पक्षहो
मः कार्यः। न पूर्वपक्षेण सह मिथः समासः॥ मंडनः॥ तावतानापगच्छेच्चेदापत्पक्षांतरेपि च। पुनस्त ८४
त्रापि कर्त्तव्यः समासः पृथगेव हि। नच पक्षांतरस्थानां समासः क्वापि घटते मिथः। एवमापद्गतः पक्षे प
क्षे चैवं समाचरेत् इति। एवं तृतीयपक्षेपि पक्षहोमो न विधेयः। तृतीयपक्षेप्यापद्विनाशो न स्यात्तदा
तत्र कष्टेनापि दिने दिने होमान्विनिर्वर्त्य पक्षांतरे पक्षहोमः कार्यः॥ मंडनः॥ तृतीयेनंतरे पक्षे समा २४०
सेन समाचरेत्। तावतानापगच्छेच्चेदापत्पक्षे तृतीयके। कष्टेनापि विनिर्वर्त्य तत्र होमान्दिने दिने।

पक्षांतरे पुनः कामं पक्षहोमादिमाचरेत्। इति कालगत्या आपच्चेद्दीर्घकालं संभवति तदा पक्षग
णनावधि पक्षहोमान्यावदापद्विनाशस्तावत्कालं पक्षहोमान्कुर्यात्॥ मंडनः॥ आपच्चेदनुवर्त्तेत
दीर्घकालं कदाचन। यावज्जीवमविच्छिन्नान्पक्षहोमान्समाचरेत्। आपदेवावधिस्तत्र न पक्षगणना
वधिरिति। एवमेते पक्षहोमपक्षाः सायमुपक्रमा अपवर्गाश्च। अथवा सायमुपक्रमाः प्रातरप
वर्गा वा। सायंहोमस्य मुख्यत्वात्तदीयं तंत्रमिष्यत इति॥ मंडनः॥ न प्रातरुपक्रमाः सायमपवर्गाः॥
यद्वा प्रातरापत्तौ प्रातर्होमं विधाय पक्षहोमान्यथोक्तान्कुर्यात्। मंडनः। प्रातर्होमादिका यद्वा समा
सा इति भाषितं। कल्पव्याख्यातृभिः केश्चित् आतश्चेदापदागता। तथा पूर्वापराह्णादिनिमित्ते सति
विष्यत इति। अथ शुक्लपक्षे सायंहोमानंतरं यजमानो दुर्बलो भवेत्प्रातःकालपर्यंतं न जीविष्य

नीति विद्यात्तदा रात्रावेव प्रातर्होमं कुर्यात्। यदि सायंकाल एव मृतिशंका स्यात्तदा तंत्रेण सायंप्रा
तर्होमं कुर्यात्। अकाले कृतमपि पुनः स्वकालेन कर्तव्यं। पूर्वपक्षे तु रात्रौ चेन्मृतिशंकाग्निहोत्रिणः।
सायं हुत्वा तदैवाथ जुहुयात्प्रातराहुतिमिति मंडनः॥ सायमाहुत्याऽहुतायां चेद्दुर्बलः स्यात्तदैव
प्रातराहुतिस्तस्य स्याश्च कृतेरग्निहोत्रस्य जीवेच्चेत्पुनः कालेन वा कृतत्वादिति कात्यायनः॥ एवं पौ
र्णमासयागानंतरं यद्दिने मरणशंका स्यात्तदा तद्दिनादारभ्य दर्शयागात्प्राग्यावंतः सायंप्रातर्हो
मास्तान् तंत्रेण जुहुयात्। ततः पिंडपितृयज्ञवर्जितमामावास्यायागं कुर्यात्। पिंडपितृयज्ञस्य दर्शा
नंगत्वात्। कात्यायनस्मृतिः। पौर्णमासे कृते यागे मूमूर्षुर्यदि याज्ञिकः। दर्शयागस्तदैव स्यादपक्ष २४१
स्याहुतीः पृथक्। सायंप्रातस्तयाः प्रोक्ता दर्शोन्यं तरएव चेति। दर्शश्च रुर्यदिन संभवति तदा प्रध

नदेवतानां चतुरात्ता घृताहुतीर्जुहुयात्॥ मंडनः॥ दर्शेष्टिं च तदा कुर्याद् इष्टिर्यदि न संभवेत्। देवतानां
प्रधानानां च तु रात्ता घृताहुतीः। यदि कृष्णपक्षे रात्रौ मृतिशंका स्यात्तदा प्रातराहुतिं हुत्वा तद्दिनमारभ्यामा
वास्यायागपर्यंतानां सायंप्रातर्होमानां तंत्रेणानुष्ठानं कुर्यात्। ततः पिंडपितृयज्ञवर्जितमामावास्यया
गं कुर्यात्। संपूर्णयागासंभवे आज्यं संस्कृत्य चतुर्गृहीतात्तेन प्रधानदेवतानां होमः कार्यः। प्रतिदैवतं पू
र्णाहुतिर्वा॥ मंडनः॥ यदि त्वपरपक्षे स्यान्मृतिशंकाग्निहोत्रिणः। हुतावशिष्टाः पक्षेस्मिन्जुहुया
त्सकलाहुतीः॥ दर्शेष्टिं च तदा कुर्याद् इष्टिर्यदि न संभवेत्। देवतानां प्रधानानामेकैकस्य पृथक्पृथ
क्। पुरोनुवाक्यायाज्याभ्यां चतुरात्ता घृताहुतीः। जुहुयादेवमन्यत्र सर्वत्रापदि कृयत इति। आरब्धे र
रोहविर्ग्रहणानंतरं स्वेरोरासादनात्प्राग्धरणे हविषो मोदाहः। आसादनादूर्ध्वमपि मरणेऽप्यावेव हविषः

आहिताग्निश्चेन्नाईप्से

आहिताग्निश्चेदाहवनीये
एवं होमेपि

प्रक्षेपः॥एवंकृतेयद्यमावास्यापर्यंतंजीवतितदामावास्यायांकेवलःपिंडपितृयज्ञःकार्यः।नत्रत्याधाने।
नामावास्यायागः।कृतत्वात्।आश्वलायनमतेकृष्णपक्षेमृतेदर्शयागोनभवति॥मंडनः॥आहिताग्निःक
दाचित्कृष्णपक्षेमृतोयदि।तदाशेषाहुतीःसर्वास्तुहोतीत्याश्वलायनः॥अस्माकंतुजीवतःकर्माणिमुक्त
त्वान्मृतेदर्शयागोन।अन्येनदैवदर्शेष्टिंकुर्यात्कृत्स्नमृतस्यत्विति।एवंमृतेयजमानेअपेतवीतेतिपलाश
शाखयासंमृज्यगोमयादिभिर्भूसंस्कृतायांचितायांस्थापितेसतिचितायां।पुरोनुवैसंस्कृत्यप्राग्वन्मा
वसथ्याग्निंस्थापयेत्।तत्रपात्रप्रतिपत्तिः।उरसिस्रुक्।नासिकायांस्रुवं।प्रणीतापात्रंदक्षिणेकर्णे।
प्रोक्षणीपात्रंसव्ये।वज्रंदक्षिणपार्श्वेकृष्णाजिनंसव्ये।उपस्थेअरणी।ऊर्वोःउलूखलं।गुल्फयोःमुस २४२
लं।पादयोःशूर्पौपादतःमेक्षणदर्वीनलिकादीनिस्थापयेत्।चात्रोवेलीच।लोहदर्व्यादीनांब्राह्मणेदा

घृ१ च१

नंअप्सुप्रक्षेपोवा।तानिपात्राणिसर्वतेनपृषदाज्येनपूरयित्वा।ततःउत्क्रांत्यादिपंचपिंडदानानि।पू
र्वस्थस्थानेअकृतानिचेत्कृत्वातुमंत्रंजपेत्पुत्रादिः।कृत्वातुदुष्करंकर्मजानताप्यजानता।मृत्युका
लवशंप्राप्यनरंपंचत्वमागतं।धर्माधर्मसमायुक्तंलोभमोहसमावृतं।दहत्वंसर्वगात्राणिदिव्याल्लो
कान्सगच्छतु।इत्यग्निमालभ्यजपेत्।ततोग्नेःपूजनं।त्वंभूतकृज्जगद्योनेत्वंलोकपरिपालकः।उक्तःसं
स्कारकस्तस्मादेनंस्वर्गंमृतंनय।ततोग्निनाचितेरादीपनं।अयंवैत्वत्त्वमितिकल्प्योक्तेनमंत्रद्वयेनासा
वित्यत्रप्रथमांतंअमुकःस्वर्गायेतिनामोच्चार्यप्रेतस्यशवाहुतिर्देया।इदमग्नयइतित्यागः।स्त्रियाम
प्यस्यमंत्रस्योहोन।अन्यत्सर्वंनिरग्निनासमानं।अथयजमानस्ययजमानपत्न्यावाशरीरालाभेस्मृ
त्युक्तंपुत्तलकेसामग्रींकृत्वात्रीणिषष्टिशतानिपलाशवृंतानांयथोक्तस्थानेस्थापनं।तद्यथा॥शिर

सि ४० चत्वारिंशत्। ग्रीवायां दश१० अंसयोः पंचाशत्५० बाह्वोः पंचाशत्।५०। उरसि त्रिंशत्।३० जठरे विं
शति।।२० वृषणयोः षट्६ शिश्ने चत्वारि।४ ऊर्वोः शतं।१०० जान्वोर्दश।१० जंघयोर्दश।१० अष्ठीवतोर्गुल्फयो
र्दश।१० पादांगुलीषु विंशतिः।२० एवं पुरुषाकृतिं कृत्वोर्णासूत्रैः परिवेष्ट्य यवपिष्टेन प्रलिप्य घृतेनाभ्यज्या व३
यं वै त्वं त्वमित्यादि समानं। वृंतशब्दः पत्रपरो वा। अस्य लाभे पलाशार्कैः पत्रैः कार्यः पुमानपीति ब्रह्म
पुराणे। वृंतपत्रालाभे तावद्भिः कुशैरपि कार्यः। पलाशवल्कैः कुशैर्वा संदिधि पुरित्यापस्तंबः। कृष्णाजि
ने परि पुरुषाकारं कृत्वा यस्यां दिशि यजमानो गतः स्यात्तस्यां दिश्यग्निभिः कक्षं दहेदपि वा त्रीणि शतानि
षष्ट्यधिकानि पलाशवृंतानि विन्यसेत् कृष्णाजिनोर्णासूत्रैः परिवेष्टयित्वा यवपिष्टेन सोदकेन च गव्येना २४३
ज्येनाभ्यज्य पूर्ववद्दाहः। इति खादिरसूत्रे। आश्वलायनकारिका। अस्थीनि चेन्न लभ्यंते प्रोषितस्याग्निहो

हं तै ५

त्रिणः। पलाशपत्रवृंतानां षष्ट्यधिकशतत्रयं कृष्णाजिनेन शकारं कृत्वा वेष्ट्याजिनेन रं। ऊर्णासूत्रेण
बध्वा च यवपिष्टैः प्रलेपयेत्।। निर्द्दिश्य देवदत्तोयं नाम्नेत्याहाश्वलायन इति।। वैतानपरिशिष्टे। अकाजे
न दहेत्तं च मृद्दिग्धं संचयार्थतः। एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेदिति। स्मृत्यर्थसारे। अनाहिता
ग्नेः पुनः संस्कारस्तत्सूतकमध्ये चेत्कृतस्तत्सूतकशेषेण शुद्धिः।। अतीते सूतके पुनः संस्कारे तु पूर्वम
गृहीताग्नेश्च तस्य पुत्रस्य पत्न्याश्च दशाहाशौचं। गृहीताग्नेश्च तस्य पुत्रस्य पत्न्याश्च त्रिरात्रं। पत्नी पुनः संस्का
रे पत्युश्चैवं। सपत्न्योर्मिथश्चैवं। अगृहीताग्नेश्चानां सपिंडानां त्रिरात्रं। गृहीताग्नेश्चानां सपिंडानां पुनरा
ग्नेश्चैवं नास्तीति। अथ मृतत्वांस्याएवं कृते पुनरागच्छेद्यदि यजमानस्तदा पुनराधानं कृत्वायुष्मंतं चरुं कु रुं २
र्यात्। यत्राहिताग्नेः पुरोडाशास्तत्रानाहिताग्नेश्चरव इति न्यायात्। ब्रह्मपुराणे। एवं कृते मृतत्वांत्यायघ्योगके

१ ता

स्युमान्कृचितां कुर्याद्दग्धां पुष्पकांतीव्निष्टिं पुनराधायपावकं।अथपात्रन्यासपूर्वकंपर्णनरेदग्धेगतेऽग्नौ
तच्छरीरेऽर्दिलम्पतेतदार्द्रदग्धकाष्ठानि निर्मथ्यतंदहेत्।यदिदग्धकाष्ठालाभस्तदातदस्थिस्रुवंआनिमरा
नघांप्रक्षिपेत्।देवयाज्ञिकाः।अथपर्णनरेदग्धेपात्रन्यासेकृतेसति।गतेष्वग्निषुतद्देहायद्यर्द्धंलम्पतेकृ
चिता।तदार्द्रदग्धकाष्ठानितानिनिर्मथ्यतद्दहेत्।यद्यर्द्धदग्धकाष्ठंचतदीयं नोपलभ्यते।तदातदस्थिस्रुवंडश्व
कृतव्यंमहाजलइति।अथदृष्ट्यादिनाचितायौयांतेऽर्द्धदग्धारणिकाष्ठेनयात्रशेषेणवार्द्धदग्धेनचिता
काष्ठेनवानिर्मथ्यशेषस्यदाहःकार्यः।अथवाशेषस्याप्सुप्रक्षेपः।यद्वालौकिकाग्नौभूर्भुवःस्वःस्वाहेति
स्रुवेणाज्याहुतिंहुत्वातेनाग्निनाशेषस्यदाहःकार्यः॥यमस्मृतौ॥यजमानेचितारूढेपात्रन्यासेकृतेसति।२४४
वर्षाद्यभिहतेवाग्नौकथंकुर्यात्तुयाज्ञिकः।शेषंलब्ध्वाचशिष्टेननिर्मथ्यंतत्रकारयेत्।शेषालाभेततोवाकु

यार्द्धदग्धशेषस्यवापुनः।अप्सुप्रास्येतिशेषंतमाग्नेयास्ताःस्मृतंबुधैः।हुत्वावालौकिकेवह्नौभूर्भुवः
स्वर्घृतेनाहुतिं।स्रुवेणवासकृत्वातेनदग्धशेषंदहेत्ततइति।अथपत्न्याःपूर्वमरणेयदिपत्युःपुनराधानवि
वाहकरणेशक्तिस्तदामृतापत्नीस्मार्त्ताग्निनादाह्या।नान्यथा।यदिविवाहाधानयोःशक्तिर्नतदापूर्ववे
दाहः।पश्चात्प्रव्रजनं।।कृत्वापत्नीपूर्वमारिणीमग्निभिःसंस्कृत्यसांतपनेनेवान्यामानीयततःपुनरादधी
तं। तेतिसूत्रेसूत्रेस्मार्त्ताग्निनादाहःकात्यायनस्मृतौ।द्वितीयांचैवयोभार्यांदहेद्वैतानिकाग्निभिः।जीवंत्यां
घ्न प्रथमायांतुब्रह्मघ्नेनसमंहितत्।मृतायांतुद्वितीयायांयोऽग्निहोत्रंसमुत्सृजेत्।ब्रह्मोज्झंतंविजानी
याद्यश्चकामात्समुत्सृजेत्।द्वितीयामितिश्चाधानोत्तरंविवाहितांनदहेत्।ययासहाधानंकृतंतांद
हेदेव।आवाभयोवाएतेयेमृतायांधार्यंतइतिकर्कस्मृतेः।अथपत्नीयजमानयोर्मध्येयस्यपूर्वंमरणंतस्य
ठ

स्मार्त्ताग्निना दाहः। पश्चान्मृतस्य लौकिकाग्निना दाह इत्येकः पक्षः॥ अथवा यजमानस्य पूर्वं मरणे आव
सथ्योल्मुकं पृथक्कृत्वा तदुल्मुके अधरारणिरेवं कृत्वा एकं प्रमथ्य च संरक्ष्य तत्र समारोप्य पत्न्या या
वज्जीवनं धारयेत्। ततो मृतायां तन्निर्मथ्य तेन दाह्या। इति द्वितीयः॥ पत्न्याः पूर्वं मरणे यजमानस्याप्येवमे
व विधिः॥ अत्र कारिका। दंपत्योरनयोर्मध्ये पूर्वं स्वामी मृतो यदि। गृह्योल्मुकं पृथक्कृत्वा समारोप्यान
लं कृती॥ धारयेदरणिस्थं तदाप्रयाणात्प्रयत्नतः। मृतां निर्मथ्य दग्धव्या तेन पत्नी सुतादिभिः॥ यदि
पूर्वं मृता पत्नी दाह्या गृह्याग्निना सुतैः। पुनर्दारक्रियां कृत्वा पुनराधानमेव वा चेति॥ यज्ञपार्श्वः॥ मृतायां
मपि भार्यायां वैदिकाग्निं न हि त्यजेत्। उपाधिनापि तत्कुर्याद्यावज्जीवं समाचरेत्। उपाधिः सुवर्णपत्न्या २४५
दिं। दारकरणासामर्थ्ये आत्मन्येवाधानं। तत्र दर्शपूर्णमासावाग्रयणवैश्वदेवादिनिवृत्तिः। नान्यानि

२०

आवसथ्यकर्मादीनि। तथा चाश्वलायनब्राह्मणे। तस्मादपत्नीकोप्यग्निमाहरेदिति। मंडनः। एकाकी वा
दधीताग्नीन्विवाहश्चेन्न सिध्यति। नित्येष्ट्याग्रयणान्यग्निहोत्रं कर्म स्यान्नेतरत्॥ तथा स्मृतिः॥ पत्नीमपि
दहेदेवं भर्तुः पूर्वं मृता यदि। अनग्निकं दहेदेनं कपालजहविर्भुजा। तस्य लक्षणं। अग्निवर्णं कपालं कृ
त्वा तत्र विनिक्षिपेत्। कारीषादितयोर्यस्तु स वह्निर्ज्ञेयः कपालज इति। स्त्रीमरणे विशेषश्छंदोगपरि
शिष्टे। अनयैवावृता नारी दग्धव्या या व्यवस्थिता। अग्निप्रदानमंत्रोस्या न प्रयोज्य इति स्थितिः। व्यवस्थि
ता पातित्यदोषरहितेत्यर्थः॥ पातित्यदोषेण युक्तायास्तु विशेषः। अग्निनैव दहेद्भार्यां स्वतंत्रां पतितां न
चेत्। तदुत्तरेण पात्राणि दाहयेत्पृथगंतिके। पातित्यादिदूषणयुक्ताया भार्याया लौकिकेनाग्निना पात्रर
हितेन दहेत्। पात्राणि तु चिताया उत्तरतस्तस्याग्रे एकदेशे न पृथक्समीपे दाहयेत्। पात्यादिदोष ति

श्रौत२

ना१

युक्तस्य यजमानस्य स्मार्ताग्निर्दाहो न। आदोषसंक्षयात्। तदुक्तं देवयाज्ञिकैः। महापातकसंयुक्तो
दैवात्स्याद्यदिमान्यदि। पुत्रादिः पालयेदग्नीन्युक्त आदोषसंक्षयात्। प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते
यदि। गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदं। पात्राणि दद्याद्विप्राय दहेदप्स्वेव निक्षिपेत् इति।
अतः पातित्यदूषणरहिता साध्वी पत्नी पात्रैरग्निना दाह्या। यजमानोपि दोषरहितो दहेत्। तदुक्तं। एवंवृत्तां
सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीं। दाहयेदग्निना चैव यज्ञपात्रैश्च धर्मवित् इति। एवमनेकभार्यस्यैक
स्याः सवर्णायाः पूर्वमरणे तां विधिवदग्निना दग्ध्वाऽन्यया सह पुनराधानं कार्यं। यद्यन्या न भवति त
दान्यां परिणीय तत्कालमाधानं विदध्यात्। परिणयनासंभवे आत्मार्थमग्नेः पूर्वोक्तप्रकारेणारक्षणं २४६
वा। अथवा पत्नीरहितेनैवात्मार्थं दर्शपौर्णमासाग्रयणाद्यर्थं वाधानं कार्यं। तस्याप्यसामर्थ्ये यजमान

स्य मरणानंतरं प्रेताधानेनाग्निं संपाद्य दाहः कार्यः। स च प्रकारो यथा। अन्येन नूतनेऽरणी आनीय मनो
ज्योतिरिति मंत्रं पठित्वा। अथवा पुरुषस्यादितेऽग्निमानीय तयोस्तस्य वोपरि प्रेतहस्तं निधाय। अयं ते यो
निरिति समारोपमंत्रं पठित्वा मृताधानं कृत्वा निर्मथ्य संतापाग्निं वा कृत्वा दाहः कार्यः। मनो ज्योतिर्जुषता
माज्यस्य विच्छिन्नं यज्ञं समिमं दधातु। या इष्टा उषसो याश्च निम्रुचस्ताः संतनोमि हविषा घृतेन स्वाहेति। य
दिचिदरणी नवतस्तदा मंथनमंत्रः। यस्मात्त्वयो जुह्वतो मांसकामाः संकल्पयंते यजमानमांसं। जायैतु
तिरहविषे सादनाय स्वर्गलोकमिमं प्रेतं नयंत्विति मंथनमंत्रः। आपस्तंबकारिका। आहिताग्निर्मृतं दग्धुं
प्रेतोत्पत्तिसिद्धये। भरद्वाजादयः प्राहुः प्रेताधानविधिं पृथक्। प्राचीनावीतवानुक्त्या वोऽस्मायत ६२
नान्यथा। प्रेतहस्तमुपालये दृढिष्टा मथित्वाग्न्यालयेऽरणी। संविधायानलं मंथेद्यस्येति यजुषा ततः। तत

स्रुक्स्रुवौ माज्यं संस्कृत्य द्वादशगृहीतं कृत्वा तूष्णीं होमः। तथा सेचेच्च वा। प्रणीयपावकं तूष्णीं द्वादशोपात्तस्
पिधा। तूष्णीं कृत्वा ततः कुर्यात्प्रेतमत्याः इति क्रिया। एवं पत्न्या अपि मरणे दाहार्थमृताधीनं कार्यं न त्वग्नेः नत
न३ रं ततो दाहः। ब्रह्मपुराणे लौकिकाग्निना वादाहः संतापाजलं। एषकारिका संप्रदायकारिका च। पत्नी
चेद्विधवा भूत्वा प्रमीयेत कदाचन। तदास्मात्तामग्निशून्यत्वान्मृताधानेन वै दहेत्। अथ प्रोषितस्य यजमा
नस्य मरणं चेत् संनिकृष्टे देशे तदा तस्य शरीरं तैलद्रोण्यामवधाय शाकटेनाहरणीयं। विप्रकृष्टे दूरदे
शे चेन्मृतस्तदा तत्रापि तवीतेत्यादि मंत्रैर्ध्रुवं समाज्यं तु संस्कारं कृत्वो क्रोत्यादि पंच पिंडान्दत्वा लौकिक
काष्ठाभ्यामग्निं मथित्वा काष्ठवदेव मंत्ररहितं तच्छरीरं दग्ध्वा नु वांगान्न वा। अस्थिखंडान्यानीय दुग्धेनासि २४१
च्य तूष्णीं कृष्णाजिनादिसंपुटानि दत्वा दीर्घवंशे प्रबध्य भूमौ निधानमकुर्वतः प्रयताय जमानस्य निव

८३

स्य ग्रामसमीपमागत्य सीमायामेव मृतशरीरमस्थिखंडानि वा स्थापयेत्। तदा ग्राममध्येऽग्निसमीपे वा
आनयेयुः। बैजवापसूत्रे। प्रोषितश्चेत्प्रेयात्सविधेतद्देहमनसा हरेत् सर्ववद्दाहो सविधेचेत्तदा पिंडान्द
त्वान्यकाष्ठाभ्यामग्निं निर्मथ्य तूष्णीं तद्देशे तदस्थिखंडानि पयसा सिंचेदजिने प्रबध्य दीर्घदंडे बध्वा भू
मावधारयन्न ग्रामे प्रवेशयेत्। वितानगृहे पूर्ववत्पात्राणि विन्यस्य तच्छरीरं ज्वालयेदयं ते त्वामजाय
५ या इत्येतेनेति। वैतानपरिशिष्टे। प्रोषितो जमानश्चेन्मरणं प्रतिपद्यते। समीपे शकटे बध्वा तैलद्रोण्यां नि
धाय च। आहरेदग्निहोत्रस्य निकटे तद्दहेत् पुनः। विदेशे यदि चेत्प्रेयात्पंच पिंडान्निधापयेत्। काष्ठाभ्यां
निर्मथ्येदग्निं संतापाग्निमथापि वा। तद्दहेन्मंत्ररहितमस्थिखंडानि संग्रहेत्। दुग्धेनासिंच्य तूष्णीं तु व
स्त्रेणावेष्टयेत् पुनः। दीर्घदंडे तु तद्बध्वा सीमायां स्थापयेत्ततः। पूर्ववत्पात्रविन्यासं कृत्वा पिंडान्दहेत् पुनः। द

५१

हयेत्पूर्ववद्दाहमस्थिखंडानि वापुनरिति॥ आपस्तंबसूत्रभाष्येच। प्रोषितस्य यजमानस्य देहं तैल
द्रोण्यामवधाय संनिकृष्टदेशे वेद्धकटेनाहरंति विप्रकृष्टे चेत्पिंडान्दत्वा निर्मथनेनाग्निनादग्ध्वा अ
ग्निना संतापाग्निना वा दग्ध्वा कृष्णाजिनेस्थीन्युपनह्याहतेन वाससा संप्रच्छाद्य दीर्घवंशेप्रबध्या
नयोनिदधानाः प्रयता मृन्मयेनाज्जनान् आहरंति ता निग्राममर्यादायां प्रतिष्ठाप्य पाथिकृती विहारे
एवं तत्समीपं नीत्वा सर्वं पूर्ववद्दाहं कुर्यादिति। तथा स्मृतिः। विदेशे च मृतः स्वामी एकाग्निर्वा निरग्निकः।
स्मृत्युक्तविधिना दाहं न कुर्यात्तु जलांजलिं। पिंडान्दत्वा यथापूर्वं काष्ठवत्तद्द्देहकं। अस्थ्नां संचयनं नै
नर वकार्यं पिंडप्रपातमिति। विदेशे मरणश्रवणादनंतरं मृतस्य शरीरस्यास्थ्नां वा पात्रप्रतिपत्ति २४०
पूर्वकवैधदाहपर्यंतं गृहे प्रतिदिनं सायं प्रातर्होमो दर्शपौर्णमासपिंडपितृयज्ञादिकं वैश्वदेवश्च

नविधेयः पुत्रादिभिः किंतु धारणमेवाग्नेः। अग्निहोत्राद्युक्तत्वात्। मंडनकारिकादेशांतरमृतं यावद्द
हेतु वैदिकाग्निभिः। तत्पत्नीकारयेत्तावदग्निहोत्राद्युपस्थितिमिति। अस्थिग्रहणे वायं क्रमः। शिरसोस्थि
खंडमेकं। हस्तयोर्द्वौ पार्श्वयोर्द्वौ। पादयोर्द्वौ पृष्ठस्यैकं। हृदयस्यैकं एवं नव खंडानि। गोभिलः। शिरसोव
क्षसः पाण्योः पार्श्वाभ्यामथ पादयोः। अप्रदक्षिणमस्थीनि गृह्णीयात्पृष्ठदेशतः। एवमस्थिखंडानि न
व गृह्णीयात्। सप्तपुटानामयं क्रमः। सौरपुराणे। पूर्वं स्नात्वा ततः श्राद्धं वै स्नवं स्नानमाचरेत्। पुटे
पुटेतु वै स्नत्रं स्नानं चैव क्रमाच्चरेत्। मृच्चंदनेन लिप्यान्वदद्यात्तु तुलसीदलं वस्त्रं मृच्चंदनं दत्त्वा मिंजोर्ण
वैस्मृगलकौ नाम्नि त्वस्थिखंडानां सप्तप्रोक्तास्तु वै पुटाः। आचारमंजरीटिप्पणे। दुकूलं भूर्जपत्रं च नंर
दर्भोर्णं गोपिचंदनं प्रजिन्तिनाम्र मित्येतत्प्रोक्तं सप्तपुटं क्रमात्। धर्मतत्वसागरे निर्णयेन स्मेचमर्द

र्णोवस्त्रमूर्णातिलास्तथा॥ अउदुंबरेण संवेष्ट्य क्रमासप्तपुटं स्मृतं॥ त्रिःसप्तकृत्वो गायत्र्याऽभिमंत्र्य
वधारयेत्॥ नश्रूद्रेणवदेन्मार्गे नोच्छिष्टो वै वदेत्तु तदिति॥ ततो ग्रामसमीपे आनीय विदेशमरणनिमि
त्तं पाराकद्वयमष्टौ कृच्छ्रान्वा पर्युषितदोषनिवृत्यर्थं प्रायश्चित्तं विधाय पुत्रादिर्निर्दिष्टाधिकारार्थं कृच्छ्रादि
प्रायश्चित्तं कृत्वा दाहो विधेयः॥ ततः शरीरेऽस्थिखंडे वाऽऽगते गृह्यादग्निररणीपात्राणि वसर्वाणि सी
मायां स्थापितशरीरस्यास्थिखंडस्य वा समीपे आनीयास्थिखंडानि तीर्थोदकेः क्षालयेत्॥ गायत्र्यास्तु
द्रवतीभिः कूष्मांडीभिश्च गोदुग्धेन प्रक्षालयेत्॥ गोदानं च विधेयं॥ अस्थीनि क्षालयेत्पूर्वं गोदुग्धेन
च सेचयेत्॥ सावित्र्यास्तु द्रवत्या च कूष्मांड्या च विधानतः॥ गोदानं दक्षिणां दत्वा क्षालयेत्तु कलेवरमि २४५
तिस्मृतेः॥ तान्यस्थीनि कृष्णाजिनोपरि पुरुषाकारेण स्थापयित्वोर्णाभिःशद्धाघगव्येनाज्येनाभ्यज्य॥ पूर्व

वद्दाहप्रक्रियया पिंडान्पुनर्दत्वा तच्छरीरं अस्थिखंडानि वा दहेत्॥ कात्यायनः॥ शरीराण्याहृत्य कृत्वा
ग्निनेपुरुषविधिं विधायोर्णाभिः प्रच्छाद्याज्येनाभिघार्य पूर्ववद्दाहः॥ अथ देशांतरे यजमाने प्रेतेन्नावंग
तितद्वा दार्थं रक्षितेऽग्नौ सति गृहे चेत्पत्नी म्रियते तदाऽग्निः रक्षणीय उत तेनाग्निना पत्नीं दहेदिति संशये
उच्यते॥ जैमिनिः॥ विरोधित्वुत्तरोत्पन्ने पूर्वोत्पन्नं तु दुर्बलं॥ जैमिनिर्मुनिराहेदं न्यायशास्त्रसमन्वितं॥ उ
त्तरोत्पन्नं पत्नीमरणं पूर्वोत्पन्नास्थिदाहविरोधि॥ अतः प्रबलत्वादुत्तरं स्यादिति चेत्॥ उच्यते॥ देशांतर
१८ मृतं यावद्दहेत्तु वैदिकाग्निभिः॥ तत्पत्नीकारयेत्तावदग्निहोत्राद्युपस्थितमित्यादिवचनैर्यजमानस्यै
र्था वाग्निर्न पत्न्या इति प्राप्तं॥ तत्रापि प्रवासे मृतयजमानस्याग्निहोत्रहोमे क्रियमाणे रजस्वला प्रसूति दो
षं विना पत्न्या निकटे स्थेयं॥ तत्रापस्तंबः॥ स्वताग्निहोत्रहोमे क्रियमाणे पत्नी सविधे स्यादनालं तु कादि

नेति। अनालंभुकां रजोधर्मिणीं। श्रुतिश्चायस्य व्रतेऽह निपत्न्या नालंभुकास्या तामपरुध्य यजेतेति। नो
पवासः प्रवासे स्यात्पत्नी धारयुते व्रतमिति पूर्वोक्तं। तथा च स्मृतिः। पत्नीसीमामतिक्रामेद्यजमानोऽह २२
अप्र दि दैनंदिहि। आहोमाघ दिनागच्छेत्पुनराधानमर्हतीति। तथा पत्नीयजमानौ व्रत्यम स्त्रीयातामिति कल्पोक्तं।
तथाधानप्रकरणे खादिरसूत्रं। अमावास्यायां पौर्णमास्यां वा पत्नीयजमानावादधीयातामिति द्विवच
ननिर्देशाच्छ्रुति स्मृतिपर्यालोचनया पत्नीयजमानयोराधानाग्निषु तुल्याधिकार इति गम्यते। तेना
ऽनागते स्थिरखंडे गृह्येम्रतापत्नीस्मार्ताग्निना दाह्या। एवं च पत्नीमरणसमये यः स्थिरखंडान्या गच्छे घ
त्तदा सहदाहो। तत्र केचिच्छ्रुतिः। पत्न्याः प्रयाणसविधे यजमानशरीरमस्थीनि वा गच्छेत्तयोः सहप्र २५०
तिपत्तिः परस्तौ चेत्लौकिकं काष्ठाभ्यामग्निं विहृत्य दहेद्यजमानस्याग्नयो देवरथत्वं कुर्वंतीति। पत्न्या

सहदग्धे आवसथ्ये पश्चादागतान्यस्थिखंडानि पुनःसंस्कारविधिना लौकिकाग्नौ दहेत्। अनन्यगति
त्वात्। तत्रैव पुनर्मुमूर्षोः पुनराधायतैः शरीरं संस्कृत्यास्थीनि विहृत्य प्रथममाधानाग्निपात्रैश्च यथाव
त्पुनःसंस्कार इति। तथा च कौषीतकिः। अथ यद्येव रथिनिर्यजमानं संस्थापयंति देवरथो वा अग्नयो देव
रथ एवैनं तत्संस्थापयंतीति। तथा माष्टम्रताशौचमध्ये पूर्वंमृतानि पितुरस्थीन्यायांति चेत्तदा मातुराशौ
चांते सपिंडीकरणात्प्राक् पितुर्दाहादिसपिंडनं कृत्वा मातुः सपिंडीकरणं कुर्यात्। पितुर्नवीनं मरणं चे
त्तदा पितुराशौचस्य प्रबलत्वात्तदानीं पितुर्दाहादि कुर्यात्। पिंडोदकदानं तु पितृपूर्वं। पितर्युपरते पु
त्रो मातुः श्राद्धानि वर्जतेइति लौगाक्षिस्मरणात्। अथ सूतिकायारजस्वलायाश्च विदेशमरणे प्रायश्चि
त्तस्नानादिकं च विना दाहे कृते तदस्थ्नां प्रायश्चित्तपूर्वकं पंचगव्यस्नपनादि त्रिः कूष्मांडहोमादि त्रि

अस्थिशुद्धिं विधाय कृत्वा जिनेन विधानादि कृत्वा पूर्ववत्कृते पि पुनः कूष्मांडहोमादिभिः शुद्धिमापाद्य यथो
क्तो दाहः कार्य इति दिवयाज्ञिकाः॥ अथ सूतिकारजस्वलामरणे कुंभे उदकं कृत्वा तत्र पंचगव्यं प्रक्षि
प्यापो हि ष्ठेत्यादिभिः पुण्यग्निरभिमंत्र्य ब्राह्मणानुज्ञया पंचदशप्राजापत्यान् कृत्वा तेन कुंभोदके
त.रु.४ न शवं स्नापयित्वा वस्त्रांतरेण तां सर्वां परिवेष्ट्य पूर्ववद्दाहः॥ अथारण्योः समारूढे ग्नावयजमा
ने मृते प्रेतस्य दक्षिणहस्ते नारण्योः प्रेतस्य शक्तिचोपावरोहेण मंत्रं पठित्वा तत्स्थौ दाक्षो पात्र निर्मथ्य
माज्यं गृहीत्वा तूष्णीं होमयेत्॥ उपावरोहेण मंत्रं आपस्तंबीयः॥ उपावरोह जातवेद इमं तं स्वर्गाय
लोकाय नय प्रजानन्॥ आयुः प्रजां रयिमस्मासु धेहि प्रेताहुतिं चास्य जुषस्व स्वाहेति उपावरोह जा २५१
तवेदः पुनस्त्वं देवेभ्यो हव्यं वहतु प्रजानन्॥ आयुः प्रजां रयिमस्मासु धेह्यरिष्टो दीदिहि नो दुरोणे

इति स्वसूत्रोक्तः॥ अथाग्नौ शांते ऽरण्योर्वा नाशे पुनराधाननिमित्ते सति वक्ष्यामि नोमरणे ऽरण्योः अ
न्ये आनीय पुरुषस्यादितो वाग्निमानीय पूर्वोक्तवत्प्रेताधानं कुर्यात्॥ अथ प्रकृतं वक्ष्यामः॥ समिधं वा॥ ७
अयं ते योनिरिति प्रतितपती त्यनुवर्तते॥ वाशब्दो ऽरण्योर्निरस्यर्थः॥ अयं त इति मंत्रेण समिधं प्रादेशमा
त्रीं पालाशीं प्रतितपति॥ एवं तीर्थादौ गमने सायं संपुटहोमं कृत्वा वैश्वदेवं च कृत्वा नेन मंत्रेण समित्प्र
तपनं विधेयं॥ प्रादेशमात्रीः पालाशीः समिध इति वक्ष्यमाणत्वात्॥ प्रादेशमात्रीं पालाशीं समिधमन्या
दध्यादिति स्मृतेः॥ ७॥ अनस्तमिते च मंथनं॥ यद्यरण्योः प्रतपनं तदा अनस्तमिते आदित्ये आदित्यास्त
पूर्वं मंथनं विधेयं॥ चकारः पुरुषस्यादितो ग्नेरपि स्थापनमस्तात्पूर्वमिति सूचनार्थः॥ वैश्वदेवकाले च॥
मंथनमित्यनुवर्तते॥ वैश्वदेवकाले समये रण्योर्मंथनमग्नेः कार्यं॥ चकारात्पुरुषस्यादितो वाग्नेः स्थापनं॥

ततः प्रतापितासमिद्धोतव्यातती वैश्वदेवः॥६॥ उपलिप्तउद्धृतावोक्षिते लौकिकमग्निमाहृत्योपावरोहे
सुपावरोहे सुपावरोहणं। उपलिप्ते उद्धृतावोक्षिते पंचभिः संस्कारैः संस्कृते सति लौकिकमग्निं पुरुपस्था
दितआनीतमाहृत्य संस्थाप्य उपावरोहेतिकल्पोक्तेन मंत्रेण अग्नेरुपावरोहणं स्पर्शं कुर्यात्। केचनोपाव
रोहेति मंत्रेण समिद्धोममिच्छंति अयं संस्कारः स्थापितेऽग्नौ भवति न मथिते यो॥ लौकिकमग्निमित्युक्तत्वा
त्। तथा समारोहणानंतरमग्नेः स्थापनेयं संस्कारः न शांतेऽग्नौ नापि च कर्मणोर्थे स्थापिते॥७॥ अनुग
तेऽग्नौ सर्वप्रायश्चित्ताहुती हुत्वा पाहि नो अग्न एधसे स्वाहा पाहि नो विश्ववेधसे स्वाहा यज्ञं पाहि विभावसो
स्वाहा सर्वं पाहि शतक्रतो स्वाहेति॥ ॥ आरब्धे कर्मणि समाप्तेरर्वाक् अग्नौ अनुगते शांते सर्वप्रायश्चित्ताहु २५२
तीसूत्रोक्ते भूर्भुवः स्वः स्वाहा अयाश्चाग्न इत्येते आज्यसंस्कारपूर्वकं आज्याहुती हुत्वा पाहि नो अग्न इति चतस्रो

वी २

आज्याहुतीर्जुहुयात्। प्रायश्चित्तत्वेनन ततः कर्मसमाप्तिः॥ जुहोतीत्युक्ते सर्पिः प्रतीयेतेति उक्तत्वादाज्याहुतिः।
स्रुवः पात्रमित्युक्तत्वात् स्रुवेण। तथा च कारिका॥ अत्रान्यत्रापि ह्यांतोऽग्निः प्रवृत्ते यदि कर्मणि। तदा नैमित्ति
कं कुर्यात्तच्च माध्याय शिष्यते॥ तद्यथानुगते वह्नौ प्रायश्चित्ताहुती उभे हुत्वा यथा पाहि नो अग्ने चतस्रः स्त्ताः प
राहुतीरिति। अथ यद्यकस्मात्तु रूपस्थादि धर्मेणांगीकृतोऽग्निरुपशाम्येत् तदाज्यं संस्कृत्य सर्वप्रायश्चित्ता
हुती होतव्यौ॥ प्रायश्चित्ताहुती सर्वेषु दोषेष्विति कल्पोक्तेः कारिका च॥ कार्ये सत्युपशांतोऽग्निर्यद्यग्निर्निर्वि
वा कश्चित्। तदाहुत्याज्यसंस्कारं प्रायश्चित्ताहुती उभे इति॥८॥ व्रतहानाउपोष्याज्यस्य हुत्वा त्वमग्ने व्रतपा
इति। दर्शे च पौर्णमासे च पत्नीयजमानौ व्रत्यमश्नीयातामिति धर्मेण व्रते कृते तदहोरात्रे तद्दानौ नाशे
सति आज्यं संस्कृत्य तस्मिंस्य सर्वप्रायश्चित्ताहुती हुत्वा त्वमग्ने व्रतपा इत्येकामाज्याहुतिं जुहुयात्। हुते

तु कृत्वा देते। प्रायश्चित्ताकृतौ सर्वेषु दोषेषु तु उक्तत्वात्। तद्विधाने। यस्य (हुं चे १) व्रतं मोहाद्व्रात्यैर्वा सह संसं
विशेत्। उपोष्याज्यस्य जुहुयात्त्वमग्ने व्रतपा असीति। वसोऽग्निर्गायत्री। त्वमग्ने व्रतपा असि। त्त२। अग्नये व्र
तपतश्चरुरप्युक्तः। य एवाहिताग्निः पुरोडाशास्त एवानाहिताग्नेश्चरवस्तूक्तत्वाच्च। अग्नेत्यं वा चरित्वेति सू
त्रे। अग्नये व्रतपतये व्रत्येहनि मैथुनमांससंभोजनं चेदिति कात्यायनः। अहःशब्दोऽहोरात्रसूचकः।
काठकः। व्रतोपेतो व्रतं चरन्व्रातपतीं कुर्यादिति। स्मृतिः। शाकं मांसं मसूरं च चणकं कोरदूषकान्। मा
षं मधु परान्नं च वर्जयेदोपवस्तके। तथा। तिलमुद्गादृते शैंबं सस्ये गोधूमकोद्रवौ। चीणकं देवधा
हर न्यं च सर्वं शाकं तथैव च। सज्जीक्षारं यवक्षारं टंकणक्षारमेव च। व्रतस्थो वर्जयेन्नित्यं सामुद्रं लवणं २५३
तथेति। तथा। क्रोधाहंकारकार्पण्यलोभांस्त्यक्त्वा भयानि च। अमास्तु च शिलापिष्टं परान्नानि च संत्य

जेत्। एतदप्यचारे व्रातपतश्चरुराज्याहुतिर्वा। व्रतदिने पत्नीयजमानयोर्मध्ये एकस्यापि ग्रामांतरगम
नेऽप्ययमेव चरुः। व्रतपतये व्रत्यवेलां प्राप्येति सूत्रे। आपस्तंबः। अव्रत्यमिव वा चरेत्त्वं वसेद्वा व्रत्येहनीति।
क्रमप्राप्तत्वादन्यान्यपि प्रायश्चित्तान्युच्यंते। ग्राम्येणाग्निनाग्निसंसर्गे विविचयेऽग्नये चरुः कार्यः। विवि
चय अग्निर्मेणेति सूत्रे। कात्यायनमते संसर्गो याग्नये चरुः अनुक्तो अग्नये संसर्गायाहुतिर्वा आ
या माग्निनाचेदिति कात्यायनः। दावाग्निनाग्निसंसर्गे संवर्गायाग्नये चरुः। संवर्गाय प्रदाव्येनेति सूत्रे। अग्नये
संवर्गाय प्रदाव्याच्चेदिति कात्यायनः। अमेध्याग्निनाग्निसंसर्गे शुचयेऽग्नये चरुः। शुचये क्रव्येणेति
सूत्रे। अग्नये शुचये शुच्यायतनाच्चेदिति कात्यायनः। अथ यस्याग्नयः शावेनाग्निना संसृज्येरन्का
श्र१ तत्र प्रायश्चित्तिः सोऽग्नये शुचयेऽष्टाकपालं पुरोडाशं निर्वपेत्याथर्वणे। विद्युत्संबंधिनाग्निनाग्निसंस

दि२

गेऽप्सुमतेऽग्नये चरुः॥ अप्सुमते वैष्कृतेनेति सूत्रे। अग्नये प्सुमते वैष्कृताद्वेदिति कात्यायनः॥ व्रतदिने आर्त्त्या
ऽश्रुकरणेऽग्नये व्रतभृते चरुः॥ व्रतभृते श्रुकल्लेति सूत्रे। आर्त्त्याश्रुकरणेऽग्नये व्रतभृत इति कात्यायनः॥
आश्वलायनब्राह्मणे। यस्याहिताग्निरुपवसथेऽश्रु कुर्वीत सोऽग्नये व्रतभृत इत्यादि। स्वीयगृहदाहे क्षा
मवतेऽग्नये चरुः॥ गृहदाहे क्षामवते इति सूत्रे। अग्न्यगारेषु दग्धेष्वन्येषु वा दृष्टे क्षामवतेऽष्टाकपाल
मिति लौगाक्षिः॥ गेहदाहेऽग्नये क्षामवते पुरोडाश इति कात्यायनः॥ स्वीयभार्यासु गोषु वा युग्मप्रसवे
मरुद्भ्यश्चरुः॥ मरुद्भ्योऽयमौ प्रजाताया मिति सूत्रे। भार्यागोषु च यमजनने मारुतं त्रयोदशकपालं नि
र्वपेदिति कात्यायनः॥ यजमानः पत्नी वाऽग्रयणेनानिष्ट्वा नवान्नमश्नीयात्तदाऽग्नये वैश्वानराय चरुः॥ का २५४
र्यः॥ यस्याहिताग्निराग्रयणेनानिष्ट्वा नवान्नमश्नीयात्कात्र प्रायश्चित्तिः सोऽग्नये वैश्वानराय द्वादशक

पालं पुरोडाशं निर्वपेदित्याश्वलायनब्राह्मणे आथर्वणे च। पिंडपितृयज्ञाकरणे वैश्वदेवद्वयलोपे वाऽयमे
व चरुः॥ कात्यायनस्मृतिः॥ यद्यग्निरग्निनान्येन संनवेदाहितः क्वचित्। अग्नये विविचय इति जुहुयाद्धु
घृताहुतिं। अग्नये प्सुमते चैव जुहुयाद्वैकृतेन चेत्। अग्नये शुचये चैव जुहुयाद्वैदुरग्निना। गृहदाहा
ग्निनाभिस्तु यष्टव्यः क्षामवान्द्विजैः। दावाग्निना च संसर्गे हृदयं यदि तप्यते। परेणाग्नौ हुते स्वार्थं परस्याग्नौ
हुते स्वयं। पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च। अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा। भोजने पतिता
न्नस्य चरुर्वैश्वानरो भवेत् इति। अत्र सर्वप्रायश्चित्तचरुकरणाशक्तौ सर्वप्रायश्चित्ताहुतिपूर्वकं उक्त
देवताभ्य आज्याहुतिं वा जुहुयात्। आहुतिं वा जुहुयादिष्ट्यशक्ताविति मानवस्मरणात्। आश्वलाय
नश्च। आहुतिं वा जुहुयादग्नये वैश्वानरायेत्यादि। तथा तत्रैव। अपि वा प्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै

देवतायैपूर्णाहुतिंजुहुयादितिवक्ष्यमाणत्वाच्छाखीनान्याहुतिः।कारिका।इत्याद्युक्तौविकल्पेतत्रशाखाशाक्र
व्यवस्थया।मन्वादिनिर्यतःप्रोक्तमेवंतत्कृत्यतावच॥प्रत्युतःप्रथमस्यकल्पस्ययोऽनुकल्पेनवर्तते।नसां
परायिकंतस्यदुर्मतेर्विद्यतेफलमिति॥१॥प्रथमःखंडः॥ ॥अथपुष्करिणीकूपतडागानां॥अथानंतर्या
र्थेसमारोहणादिकथनानंतरंपुष्करिण्यादिजलाशयानांउत्सर्गरूपंकर्मवक्ष्यामइतिवाक्यशेषः।
पुष्करिणीवापिका।कूपतडागादयःप्रसिद्धास्तेषां॥२॥शुद्धपक्षेपुण्येवातिथौशुक्लपक्षेपुण्येविरुद्धयो
गदुष्टचंद्ररिक्तादिरहितेतिथौकर्मकार्यमितिशेषः।वाशब्दःशुभमासादिसूचनार्थः॥मत्स्यपुराणे।
शुभदिनेशुभनक्षत्रेमुहूर्तेतुनवेद्यदा।वापीकूपतडागानांतस्मिन्कालेविधिःस्मृतः॥गार्ग्यः॥देवतारा २५५
मवाप्यादिप्रतिष्ठामुत्तरायणे।माघादिपंचकेशुक्लेकृत्स्नेवापंचमीदिने।कारणतंत्रे।प्राप्यपक्षंशुभं

शुक्लमतीतेदक्षिणायने।विनाचैत्रेणमासादौप्रतिष्ठामासपंचके।केषांचिन्मतेचैत्रेण।तथासंक्रां
तिविशेषफलविशेषोमात्स्ये।कर्कटेपुत्रलाभस्तुसौख्यंतुमकरेभवेत्।मीनेयशोर्थलाभश्चकुंभेच
सुबहूदकं।वृषेचमिथुनेवृद्धिर्वृश्चिकेनिर्जलंभवेत्।पितृतृप्तिस्तुकन्यायांतुलायांशाश्वतीगतिः।सिं
ना॰ हेमेषेधनुर्नाशंजलस्यद्विजयच्छतीति।अत्रदक्षिणायंविधानंतज्जलबहुलातिशयार्थं।कालादर्शे।
रिक्तातिथिविनाशेषाःशुभाःपूर्णाजयावराः।भद्रास्तुमध्यमानंदाःकनिष्ठाश्चप्रकीर्तिताः।चतु
र्थीनवमीचतुर्दश्योरिक्ताः।द्वितीयासप्तमीद्वादश्योभद्रामध्यमाः।प्रतिपत्षष्ठ्येकादश्योनंदाअ
धमाःपंचमीदशमीपौर्णमास्यःपूर्णाःश्रेष्ठाः।तृतीयाष्टमीत्रयोदश्योजयाःश्रेष्ठाः।कारणतंत्रे।
१८ रविरुग्रप्रतिष्ठायांचलायांगुरुरिष्यते।सोमवर्जस्थिरायांशुःशनिशुक्रबुधेदवः।पेटकार्यमूणे

सार्पयाम्याग्नेयद्विदैवतं। चित्रां विना प्रतिष्ठासु शेषर्क्षाणि शुभानि च। सनत्कुमारसंहितायां। व्याघात
शूलगंडेषु व्यतीपातातिगंडयोः। विष्कुंभवज्रपरिघवैधृतीषु न कारयेत्। प्रशस्तानि प्रतिष्ठासु त्रीण्या
दीकरणानि चेति। मात्स्या कार्यः। स्थिरप्रतिष्ठायां प्राङ्गोदङ्गायमंडपः। चरे देवप्रतिष्ठायां नियमो मंडपस्य
नात्। तडागादिप्रतिष्ठायां वारुण्यां दिशि मंडपः। प्रागुदक्प्रवणे देशे तु तडागस्य समीपतः। मंडपप्रकारो दा
नखंडादेर्ज्ञेयः। षोडशहस्तं षोडशस्तंभं मध्यतो वेदियुक्तं चतुर्द्वारं तोरणध्वजपताकाद्यलंकृतं मंडपं कु
र्यात्। तत्र मध्यत्रिभागे चतुरस्रां इष्टकाभिः कृतां चतुर्थांशोच्छ्रितां वेदिकां कुर्यात्। वेद्यां सुरजोभिर्मंडलं का
र्यं। दानखंडे रजसा मंडलं कुर्यात्तं च वर्णेन तत्र लिखेत्। षोडशारं ततश्चक्रं पद्मगर्भं चतुर्मुखं। चतुरस्रं च २५६
परितो वृत्तं मध्ये तु प्रोन्नतं। मंडलरचनाप्रकारस्तत्रैव। वेदिमध्ये तु विन्यासं कुर्यात्। पार्श्वे तु पूर्वतः। म

ध्यात्स्वलांछनं पूर्वं कुर्याद्व्यंगुलोन्मितं। रव्यंगुलं द्वितीयं तु नखांगुलं तृतीयकं। चतुर्विंशांगुलं तुर्यं कु
र्याद्भ्रमणं ततः। कुर्याद्वृत्तानि चत्वारि मध्यलांछनतो भ्रमात्। मध्यवृत्तं तु नाभिः स्यादष्टपत्रं द्वितीयकं।
षोडशारं तृतीयं स्यात्तुर्यं च चतुरारकं। तिस्रो रेखाश्च परितश्चतुरस्राश्चतुर्मुखाः। वारुणं मंडलं प्रोक्तं द्वि
श्वा ४ हस्तार्धं द्विहस्तकं। पद्मोद्भवनिःप्रोक्तं नाभिस्तु त्रिभिरंगुलैः। अष्टभिः प्रवरं कुर्यान्नेमिस्तु चतुरंगु
ला। इति केचन। मंडले रजसः स्थापनं। पद्मं पीतं सिता नाभिरारकाः पंचवर्णकाः। चतुर्वर्णा नवे नेमि
स्ततो रेखास्त्रिवर्णकाः। वेद्याश्चोपरि तत्कृत्वा स्थापयेद्व्रणं घटं। पंचपल्लवसंयुक्तं पंचरत्नन ला [illegible]
ष्टसुपरिशिष्टे। सौवर्णो वरुणं कार्यो मकरस्कंधमाश्रितः। चतुर्हस्तः पद्मपाशाकरस्त्राङ्कादिनीयुतः।
तस्याः पृष्ठकरस्त्वेको पंशमकरवालधृक्। सौवर्णं हंसयोर्युग्मं चक्रवाकद्वयं तथा। सौवर्णौ कूर्मम

करावायसः। शिशुमारकः। मत्स्याश्वराजताः कार्यास्ताम्रजा दुर्दुरी तथा। कलशो परितास्त्रपात्रे च रूपा
दीन्स्थापयेत्। रजसः प्रकारो यथा। पंचरात्रे। रजांसि पंचवर्णानि मंडलार्थं हि कारयेत्। शालितं
डुलचूर्णेन शुक्लं वायवसंभवं। रक्तं कुंकुमसिंदूरगैरिकादिसमुद्भवं। हरितालोद्भवं पीतं रजनीसं
भवं क्वचित्। रजनी हरिद्रा कृष्णं दग्धयवैः कार्यं पीतं कृष्णविमिश्रितं। नीलमित्यर्थः। वेद्याश्च परितः
कुंडांश्चतुरो दिक्षु कारयेत्। ईशान्यां पंचमं कुंडं स्थापकस्य विधीयते। ईशान्यां ग्रहपीठं च आग्नेय्यां
मातृपीठकं। नैर्ऋत्यां वास्तुपीठं च वायव्यां मंगलं न्यसेत्। मंगलमभिषेकार्थं। मत्सी कौर्मी जलौका च
दुर्दुरी जलगोधिका। मकरी दुंदुभी प्रोक्ताः सप्तैता जल[illegible]मातरः। कुंडानि नानाकृतीनि। तदसं २५७
भवे चतुरस्राणि। तदसंभवे स्थंडिलानि। विस्तरासंभवे एकं कुंडं स्थंडिलं वा। ततः सर्वौषध्युदकस्ना

तः शुक्लगंधानुलेपनः यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः। करिष्य इति संकल्प्य वाप्याद्युत्स
र्जनं ततः। मातृयागं चाभ्युदयिकं कुर्याद्ब्राह्मणवाचनं। आचार्यादीनां वरणं मधुपर्कादि पूजनं। ऋ
त्विजस्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै। अष्टौ तु जापकाः कार्या ब्राह्मणा वेदपारगाः। कुलशीलस
मायुक्तः स्थापकः स्याद्द्विजोत्तमः। ऋत्विजां वरणं कार्यमादावाचार्यपूर्वकं। कुंडलानि च हैमानि केयू
रकटकानि च। तथांगुलीयवासांसि विचित्राणि विविधानि च। दद्याच्च सममेवैषामाचार्ये द्विगुणं पुनः।
प्रतिद्वारं पंचरत्नपंचपल्लवसंयुतं। फलवस्त्रसमायुक्तं स्थापयेत्कलशद्वयं। ततः। यजमानः सपत्नीकः ५३
पुत्रपौत्रसमन्वितः। पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमंडपं। ततो मंगलवादित्रभेरीणां निःस्वनेन च॥
आचार्यः पूर्वकुंडादौ होतारो बह्वृचो न्यसेत्। दक्षिणे याजुषांस्थाप्यो पश्चिमे सामवेदिनो। आथर्वणाव

हो॰१ ततस्तौ तूर्णमेवं यथाक्रमं। जापकद्वारपालानामेष एव विधिः स्मृतः॥ उदङ्मुखो दक्षिणतो यजमान उपा
विशेत्। अग्निस्थापनमंत्रो क्रमाज्ज्यनागांतमेव च। ऋक्पूर्वा रुणैर्मंत्रैराज्यं च समिधस्तथा। यजेद्धमि
तिता त्रयादाचार्यो होतृकान्यति। तत्वायामि त्वन्नो अग्न इमं मे वरुणेत्यादिवारुणमंत्राः। आचार्या
थस्वकुंभे तु कुर्यात्कांतिंग्रहाग्निधां। वरुणप्रतिमायां च प्रत्नीनामग्न्युत्तारणपूर्वकं। ग्रहदेवाधि
देवानां पूजये स्थापको नमः॥ इंद्रादिलोकपालानां स्थापनं च प्रपूजनं। ग्रहयज्ञोक्तमार्गेण होमं कु
र्यादतंद्रितः॥ अष्टोत्तरं शतं होमोप्यष्टाविंशतिरष्ट वा। विस्तरासंभवे चतुरो जापकानेकमावा यैरके
नैव कुंडेन कर्म कुर्यात्। दानखंडे। अयं लक्षाक्षावर्द्धनविधिर्दृष्टः स्वयंभुवा स्वल्पेप्येकाग्निवत्कार्यं २५८
वित्तवान्याद्दतेन्द्रजि॥ चतुरो जापकाश्चैव ऋग्वेदादिविदस्तथा। अथ जपसूक्तानि। रात्रीसूक्तं चरो

द्रं च पावमानं सुमंगलं। जपेरन्यौरुषं सूक्तं पूर्वतो बह्वृचाः पृथक्। रात्रिसूक्तं आरात्रि पार्थिवं रजः। रौद्रं
कद्रुद्रायेत्यादि। पावमानं प्रसिद्धं सुमंगलं कनिक्रदत् इति। पौरुषं सूक्तं प्रसिद्धं। शाक्रं रौद्रं च सौम्यं च कूष्मां
डं जातवेदसं। सौरं सूक्तं जपेरंस्ते दक्षिणेन यजुर्विदः॥ शाक्रं इंद्रं विश्वा इत्यादि। रौद्रं नमो हिरण्यबाहवे इ
त्यादि। सौम्यं आप्यायस्वेत्यादि। कूष्मांडं यद्देवा देवेत्यादि। जातवेदसं सुसमिद्धायेत्यादि। सौरं विभ्राड्बृहदि
ति। वैराजं पौरुषं सूक्तं सौपर्णं रुद्रसंहितां। शैशवं पंचनिधनं गायत्रं ज्येष्ठसाम च। वामदेव्यं बृहत्सौम्यं रौ
रवं च रथंतरं। गवां व्रतं विकर्णं च रक्षोघ्नं च यमास्तथा। गायंति साम गा राजन्पूर्वमंदानरमाश्रिताः। वैरा
जं पिबा सोममिंद्रेति। पौरुषं प्रसिद्धं। सौपर्णानि उद्वदन्तीति त्रीणि सामानि। रुद्रसंहिता आ वो राजानमि
ति। शैशवं उच्चा त इति। पंचनिधनं गायत्रं ज्येष्ठसामानि त्रीणि आज्यदोहानि। वामदेव्यं कया नश्चित्र इति।

बृहत्सामत्वामिद्धिहवामहइति।सौम्यंसंतेपयांसीति।रौरवंपुनानःसोमेति।रथंतरंअभित्वाशूरेति।गा
वांव्रतंतेमन्वतप्रथममिति।विकर्णंविभ्राड्बृहदिति।राक्षोघ्नंप्रसिद्धं।यशःसामबृहदिंद्रायेति।आथर्वणा
श्चात्तरतःशांतिकंपौष्टिकंतथा।जपेदनन्यमनसादेवमाश्रित्यवरुणंप्रभुं।एवंविधैरनितोरात्रावेवंकृत्वाधिवा
सनं।ततःप्रभातेविमलेसंजातेवारुणंचरुं।गृह्योक्तविधिनाचार्यःस्थापयेदग्निमुज्ज्वलं।पुराणांतरे।सर्व
भूतोपकारायशांतिंकृत्वाद्विजोत्तमः।चरुंतुश्रपयेद्वह्नौवारुणंसर्वकामदं।ततोन्वसंस्कृतेप्रदेशेआ
वसथ्यंलौकिकाग्निंवासंस्थाप्य।।छ।।पयसायवमयंचरुंश्रपयित्वा।पयसादुग्धेनयवमयंयवप्रचुरंच
रुंआवसथ्येलौकिकेवाश्रपयित्वावक्ष्यमाणैर्मंत्रैर्होमयेत्।कारिका।अतोयत्रापिसंस्कारोदृष्टंवादृष्ट २५७
मात्मनः।तत्रस्वाग्निःपरार्थेतुग्राम्यएवात्रलौकिकः।तडागारामकूपादौहोमेचादृष्टमात्मनइति।स्थाली

पाकेषुचग्रहणासादनप्रोक्षणानिमंत्रदेवतास्यस्तुकृत्वातौवरुणायग्रहणासादनप्रोक्षणानिन
वंति।पयसेत्युक्तत्वादुदकनिवृत्तिः।।छ।।त्वंनोअग्नइतिद्वाभ्यामवतेहेलइमंमेवरुणउदुत्तमंवरुणेमां
धियंशिक्षमाणस्य।एतैःषड्भिर्मंत्रैश्चरोःषडाहुतयःस्वाहाकारांतैर्होतव्याः।वामदेवोवरुणस्त्रिष्टुप्।त्वं
नोअग्नेवरुणस्यविद्वान्।अ।शुनःशेपोवरुणस्त्रिष्टुप्।अवतेहेलोवरुणनमोभिः।शुनःशेपोवरु
णोगायत्री।इमंमेवरुणश्रुधि।शुनःशेपोवरुणस्त्रिष्टुप्।उदुत्तमंवरुणपाशमस्मत्।ज्ञ।नाभाको
र्चनानावावरुणस्त्रिष्टुप्।इमांधियंशिक्षमाणस्यदेव।ज्ञ।इतिषडाहुतयः।।छ।।गृह्योपदिष्टोमयोभूरारब
रोनिरवरोनिःसरोनिकामःसपत्नदूषणइतिवारुण्यादिदिक्प्रभृतिप्रदक्षिणंजुहुयात्।जुहोतीत्युक्ते
सर्पिःप्रतीयेतेतिन्यायात्।गृह्योदिष्टैर्मंत्रैःवारुण्यादिवरुणस्येयंवारुणीदिक्पश्चिमासादिका।आ

दौप्रथमायासांता। दिशास्तत्र न्तितितदारभ्य प्रदक्षिणं प्रादक्षिण्येन स्रुवेण। ष्टावाज्याहुतीर्जुहुयाद्य
जमानस्त्राचार्यो वा। स्पृहाय स्वाहेति पश्चिमायां। अपस्पृहाय स्वाहेति वायव्यां। मयोभुवे स्वाहेत्युदीच्यां। अ
स्वराय स्वाहेतीशान्यां। निस्वराय स्वाहेति पूर्वस्यां। निःसराय स्वाहेत्याग्नेय्यां। निकामाय स्वाहेति दक्षिण
स्यां। सपत्नदूषणाय स्वाहेति नैर्ऋत्यां॥ ॥ मध्ये पयसा जुहोति विश्वतश्चक्षुरिदं विष्णुरिति। मध्येऽग्निम
ध्ये विश्वतश्चक्षुरिदं विष्णुरित्याभ्यां मंत्राभ्यां पयसा दुग्धेन स्रुवेण जुहोति। द्रवद्रव्ये स्रुवः स्मृत इति वचना
त्। विश्वकर्मा विश्वकर्मा त्रिष्टुप्। विश्वतश्चक्षुरुत विश्वतोमुखः १। मेधातिथिर्विष्णुर्गायत्री। इदं विष्णु
र्विचक्रमे २ स्विष्टकृत्प्रभृति मार्जनांतं कृत्वा। मार्जनांते धेनुं तारयेत्तत्र उगा। तत्पुच्छाग्रेलग्नो यजमानोऽपि २९
तरेत्। तत्र तारणे मंत्रः। इदं सलिलं पवित्रं कुरुष्व शुद्धाः पूता अमृताः संतु नित्यं। मां तारयंती कुरु तीर्थोनि

षेकं खोकास्तोकं तरती तीर्यते चेति। पश्चिमतटे स्नानीयावत्। अत्र तारणं वैकल्पिकं। वापिकायां कू
पे च धेनुं न तारयेत्॥ ॥ यत्किंचेदमिति मज्जयित्वा। ततः परतटं प्राप्य यत्किंचेदमिति मंत्रेण मज्जयित्वा
स्नात्वा ततः। तारणाभावे पि मज्जनं न वत्स्येवा ततः आपो अस्मानित्यृचां जपं केचिदाहुः। गां चेत्रान्यो मु
चति। गोतारणपक्षे सूयवसादिति मंत्रेण तारणं। यदि गौ हिंकरोति तदा हिंकृण्वती तिजपेत्। वसिष्ठो
वरुणो जगती। यत्किंचेदं वरुण दैव्ये जने १। अग्निधाने। यत्किंचित्पातकं कुर्वो त्कर्मणा मनसा गिरा। यत्किं
चेदं वरुणो दृष्टस्त्वं जप्त्वा प्रमुच्यते। दीर्घतमा गौस्त्रिष्टुप्। हिंकृण्वती वसुपत्नी वसूनां २। माधवीयनिबंधे।
पूजिता या च गोः पुच्छे स्वयमेवावलंबितः। उत्तरामि मुखो भूत्वा आगच्छतटं प्रति। सुरा नैवं जगद्धा प
वित्रा पापनाशनी। नीत्वा पारं परं पारं दृष्टिं कुरु सदा ममेति। सा गौः मार्कंडसाम कोय गोयदद्यात्। तारणं

न्नावेपिगोदानंनवत्येवसामगायवापीकूपप्रतिष्ठायांचगोदानं।तथापुराणे।जलाशयंचत्रिवृत्तासूत्रेण
परिवेष्टयेत्।शुक्लमाल्यांबरधरोयूपमभ्यर्चयेत्ततः।होमस्थानाद्दिशिप्राच्यामीशानेवाजलाशयात्।दर्भो
द्धृतयुतेस्थानेयूपंतंनिखनेत्ततः।इष्टयपरिशिष्टे।उत्तरस्थश्चयूपःस्याद्वाप्यांकूपतडागयोः।खदिराश्वत्थ
वैकंकतौदुंबरशमीवटैः।शिरस्कंधोस्नानीषुप्रमाणंब्राह्मणादिषु।अरत्निमात्रोयूपःस्यात्क्षीरवृक्षवि
निर्मितः।यजमानप्रमाणोवासंस्थाप्योभूतिमिच्छता।यूपोवटाद्बहिःकार्यश्चतुरस्रस्तृतीयके।मध्येष्टाश्र
ऊर्ध्वंनागिवर्तुलःपंचमस्तवधःसवितातैप्रथमंयूपस्यस्पर्शनंमतं।समुद्रज्येष्ठाश्चमंत्रेणस्नापयेद्द्राकुंभकैः।
अंजंतित्वेतिमंत्रेणघृतेनाभ्यज्यतंपुनः।युंजंतिब्रध्नमंत्रेणगंधपुष्पैस्तमर्चयेत्।गर्त्तेपंचामृतंकृत्वाऽन्ययेन २६१
म्येदिवितथायूपव्रस्काश्चमंत्रेणस्थापयेद्गर्तमध्यतः।युवंवस्त्राणिमंत्रेणाच्छादयेद्वाससापितं।संस्थाप्य

विन्यसेत्तत्रमंत्राद्वरुणदैवतान्।वेदवाद्यादिघोषेणततोगत्वाजलाशयं।जलमध्येतुयज्ञास्यान्मात्रृयगं
वनलस्यच।समुद्रज्येष्ठाइतिमंत्रेणपूजनं।जलाशयाद्वपरितोदिक्पतीनर्चयेत्ततः।ततोयादसां द्देपो ३२
च३ जलैवरुणस्यच।पात्रीमादायसौवर्णींपंचरत्नसमन्वितां।यादोभिर्वरुणयुतांकुंभतोयसमन्वितां।घृतां
वतुर्भिर्वि प्रैश्चदध्यक्षतसमन्वितां।उत्तराभिमुखोन्युब्जांजलमध्येतुकारयेत्।आथर्वणेनसाम्ना
तुपुनमीमेवृचेनहि।आपोहिष्ठेतिमंत्रेणक्षिप्त्वाप्रार्थयतेपुनः।आथर्वणंसामवानोदेवीरिति।जले
प्रक्षिप्यवरुणंपुनःकुर्याच्चपूजनं।ततःप्रार्थना।जलाधिनाथोवरुणस्त्वंतुदेवैर्विनिर्मितः।जलाशयेस्मिन्दे
वेशसंनिधानंसदाकुरु।पुष्करादीनितीर्थानिगंगाद्याःसरितस्तथा।आगच्छंतुमहानागावांछितानीष्ट
सिद्धये।मत्स्यादयोजलचराजलक्रीडासमन्विताः।विचरंतुस्वभावेनकारितेस्मिञ्जलाशये।ततोयथोक्तं

वि२ तर्पणं विधाय। ततः। ब्रह्मा विष्णुश्च रुद्रश्च अग्निश्चैव प्रजापतिः। ऋषीश्छंदांसि देवांश्च पूर्वाचार्यैस्तथैव
च। गंधर्वानितरा शार्यांश्च संवत्सरांस्तु हायनाकान्। दैत्यान् अप्सरसो नागा श्च तीर्थांस्सागरांस्तथा। पर्वतान्स
रितश्चैव मनुष्यान्पन्नगांस्तथा। रक्षांसि च पिशाचांश्च सुपर्णान्यक्षिणस्तथा। भूतानि च पशूंन्सर्वान्व
नस्पत्योषधीस्तथा। जलाशये तर्पयामि जलेन शुभहेतवे। स्नत्या मा श्च तु विधास्तृप्यंतु जलदानतः। दि
क्पाला लोकपालाश्च तृप्तिमंतो भवंतु इह। अस्मिन्हि तर्पणे सर्वे प्रयच्छंतु शुभं मम। सततं तर्पणे देवास्तृ
प्यंतु पितृदेवताः। ततो यूपप्रार्थना। यूपत्वं पापहर्त्ता च पुरा देवैर्विनिर्मितः। सर्वेषु हायणे पापं जलशो
धप्रजावतः। कीर्तिविद्धस्थितो यूपः स्थिरो भवतु नित्यशः। यूपस्याधो जलमाद्यर्बरूणं दिक्पतीस्तथा। २६२
ततो मंडपमागत्य जलोत्सर्गं तु कारयेत्। गृहीता कृतदर्भाश्च देशकालं प्रयोजनं। संकीर्त्यैवं वदेतत्र

सर्वं चूतेन्यस्थवच। इमं सर्वोपयोगित्वेनोत्सृजामि जलाशयं। इति त्यागं कुर्यात्। मया उत्सृज्यते यं ज
लाशय इति वा। ततः प्रार्थना। अनेनोत्सर्गयज्ञेन प्रीयतां पितरो मम। देवाश्चैव मनुष्याश्च तथा सर्वे
चजंतवः। ततो गोदानादि कुर्यात्। का। धेनुर्दक्षिणा वस्त्रयुग्मं च। अस्मिन्जलोत्सर्गकर्मणि धेनुर्गौर्द
क्षिणात्वेन देया। वस्त्रयुग्मं युगलं देयं। चकाराच्छातादिशय्यादानं च। दानखंडे। कनकालंकृतां धे
नुं ब्राह्मणाय निवेदयेत्। अन्यां च दक्षिणां दद्याच्छय्यां सोपस्करां तथा। इदं गोदानं पूर्वतोरितगोदा
व२ नादन्यो। इदं तु प्रतिष्ठासिद्ध्यर्थं पूर्वं तु यजमानस्य तारणार्थं। का। अतो ब्राह्मणभोजनं। अतो गोदा
नानंतरं ब्राह्मणभोजनसंकल्पं कुर्यात्। रक्षपरिशिष्टे। ततः सहस्रं विप्राणामथवा ष्टशतं पुनः। भो
जयेच्च यथाशक्त्या पंचाशद्वाथ विंशतिमिति। एषामेकतमं संख्याभोजनसंकल्पं कुर्यात्। ततः कर्मसम।

पनं। कर्मापवर्गे ब्राह्मणभोजनं च पूर्वद्युः परिशिष्टात्। यस्यानुक्तमपि ग्राह्यं होमविरोधि च संमतं। अतो
यूपादिकं सर्वं कर्तव्यं फलगौरवादिति॥ ॥२॥ द्वितीयः खंडः समाप्तः॥ ॥ अथारामेष्विमुपस
माधाय। अथ जलोत्सर्गकथनानंतरं आरामप्रतिष्ठा उद्यानप्रतिष्ठा कर्मोच्यत इति वाक्यशे
षः। तत्र आरामेन वोद्यानेन कृते अग्निमावसथ्यं लौकिकं वा संस्थाप्य ततः। अत्रापि कुंडमंडपाभ्यु
दयिक ब्राह्मणवरणादि सूक्तजपश्च सर्वं वदेव ग्रहशांतिश्च तडागोत्सर्गवत्। मत्स्यपुराणे। ततः
प्रभाते विमले कुंडं कृत्वा समेखलं ग्रहयज्ञविधानेन ग्रहशांतिकर्म समारभेत्॥ ॥ स्थालीपाकं श्र
पयित्वा। स्थालीपाकधर्मेण स्थालीपाकं तंडुलचरुं श्रपयित्वा। ग्रहणासादनप्रोक्षणानि विष्णु २६३
व इत्यादिना नवंति। विष्णवे इंद्राग्निभ्यां विश्वकर्मणे वनस्पतये [illegible] जुष्टं गृह्णामि
यूपेभ्यो। [illegible]

इत्यादि समानं। ततः सर्ववृक्षाणां सुवर्णशलाकया कर्णवेधं व्याहृत्या कृत्वा जातकर्मादि विवा
हांताः संस्काराः कर्तव्याः। प्रत्येकं पताकाः सुवर्णाद्यलंकाराश्च। मत्स्यपुराणे। स्थंडिले विप्रक
का ३ थिते ग्रहनक्षत्रसंयुते। पताकालंकृतान्वृक्षान्सर्वेषामधिवासयेत्। रक्तवस्त्रैः समाच्छाद्य रक्तसूत्रे
ण वेष्टयेत्। सर्वौषध्युदकैः स्नातान् पुष्पमालासुशोभितान्। स्थापयेत्तु चतुर्दिक्षु ताम्रजान्कल
शान्दृढान्। पल्लवान्कृतमुखान्सितचंदनचर्चितान्। मूलविन्यस्तकलशान्सर्वान्वृक्षानिति
सुवर्ण क्रमात्। कलधौतमयान्यत्र फलानि दशपंच वा। तूर्यमंगलघोषेण चतुर्दिक्षु क्षिपेद्बलीन्। इंद्रा
दिलोकपालानां तन्मंत्रैर्मंत्रवद्गुरुः। चत्वारोष्टौ यथाशक्त्या ब्राह्मणान्वरयेत्क्रमात्। जातकर्मा
करणमन्नप्राशनमेव च। सुवर्णसूच्या कुर्वीत कर्णवेधं विधानतः। अंजनं चापि कर्तव्यं तद्धेम

शाला कया। जातरूपक्षुरेणाथ चूडाकर्म यथाक्रमं। बध्नीयान्मेखलां मौंजीं वाससी परिधापयेत्॥
कृत्वा वै तत्र दक्षिणेन कुर्याद्गोदानकं ततः॥ विवाहं केचिदिच्छंति माधवीलतया तरोः॥ तिलाज्येन च होमः बालंता
का। स्याद्ब्रह्मकूर्चहोमपूर्वकं॥ ॥ विश्ववेदा हे ऽग्ने स्वाहा विश्वकर्मणे स्वाहेति याज्ञ्वो नर इति प्रत्यृचं जुहुया
त्। विश्ववेदस्त्वादिति सप्ताहुतीः खदानधर्मेण कुर्वीयायान्वो नर इति पंचाहुतीर्जुहुयात्तत्र चायद्यपिया
न्वो नर इत्यत्र सूक्तं वो वनस्पते षड्ऋचस्त्रिष्टुप्तितया पित्र्यायामभिन्नप्रयोगात्संचैवाहुतयः॥ विश्वामित्रो वनस्प यूपो देवता
पृष्ठं ६२ ति त्रिष्टुप् तृतीयानुष्टुप् याज्ञ्वो नरो देवयंतो निमिम्युः इत्य पद्हे माद्धौ। वनस्पतेश्च वि द्विर्होमः
कार्यो द्विजातिभिः॥ तिलाज्येन च होमः स्याद्यथाशक्त्या द्विजोत्तमेति यूपपरिशिष्टे। अत्रोदक्षुखीं गामुत्सृजे २६४
त्। नारूढसामवगापयेत्। सा गौश्च सामगायकाय दद्यात्। दानखंडे॥ ततः शुक्लांबरधरः सुवर्णतिलका

=अष्टमी वैश्वदेवी वा ३ सप्तम्यां वा ३ तिथि: ४

श्चिन्नयूप४

कृतां। सकांस्यदोहां सौवर्णशृंगां श्यामतिशालिनीं। पयस्विनीं वृक्षमध्यादुत्सृजेद्गामुदङ्मुखीं। सामगा
य च सा देया पूर्वोक्तविधिना द्विजे इति॥ ॥ वनस्पते शतवल्श इत्यभिमंत्र्य। वनस्पत इत्यनयर्चा आरामम
=अभिमं॰ ३ ध्य वृक्षं वा अभिमंत्रणं संस्पर्शं कृत्वा ततः स्पृष्टानामिकाग्रेण क्वचिदालोकयन्नपि। अनुमंत्रणीयं सर्व
त्र सदैव मनुमंत्रयेदिति कर्मप्रदीपोक्तत्वात्। विश्वामित्रो वनस्पतिस्त्रिष्टुप्। वनस्पते शतवल्शो विरोह।
त्वं पोराणोपि च मंत्रः॥ ये शाखिनः शिखरिणां शिरसि प्रतिष्ठा येनंदनादिवनेषु कृतप्रतिष्ठाः। ये कामदाः ५५
सुरनरोरगकिंनराणां ते मे द्रुमा दुरितानि हरा भवंतु। अनेन मंत्रेणाभिमंत्रयित्वा ततः॥ ॥ हिरण्यं
दक्षिणा च॥ अत्रारामोत्सर्गकर्मणि हिरण्यं सुवर्णं दक्षिणात्वेन देयं। चकाराद्गोशतादि। सहस्रं शतम
ष्टोत्तरं पंचाशद्विंशति वा ब्राह्मणभोजनं। अन्यत्समानं तडागाद्युत्सर्गकर्मणा। दानखंडे। तडागविधि

वस्त्रं वेष्टकृत्वासौ जगतीश्वरः ॥ तैरेव कुंभैः स्नपनं कुर्याद्ब्राह्मणपुंगवाः ॥ त्र्यंगय ऊ सामममंत्रैश्च वारुणैरभि
सु २ षेचयेत् ॥ गोभिर्विजवतः सर्वान् लिंगैः समाहितः ॥ हिमसूत्रैः सकटकैरंगुलीयैः पवित्रकैः ॥ वासोभिः स्राय
नीयैश्च तथोपस्करपादुकैः ॥ क्षीराभिषेचनं दद्याद्यावद्दिनचतुष्टयं ॥ होमश्च सर्पिषा कार्यो यवव्रीहितिलैस्त
था ॥ पलाशासमिधः शस्ताश्चतुर्थेह्नि तथोत्सवः ॥ दक्षिणा च तथा तद्वद्देयास्तत्रापि शक्तितः ॥ आचार्ये द्विगुणं
दत्वा प्रणिपत्य विसर्जयेत् ॥ अनेन विधिना यस्तु कुर्याद्वृक्षमहोत्सवं ॥ सर्वान्कामानवाप्नोति पदं चानंतमश्नु
ते ॥ ३ ॥ ॥ तृतीयः खंडः ॥ ॥ यदि पार्वणस्त्वकृतोन्यतरस्तत्रश्चरुः ॥ यद्यापन्निवह्नात्पार्वणः पर्वणि न वः पार्व
स २ ण अमापौर्णमास्योर्योग अन्यतरएको पिश्रैतानकृतस्तत्र तस्तदा वक्ष्यमाणदेवताकश्चरुः कर्तव्यः कारि २६५
कोपरिशिष्टाद्वावसथ्ये पार्वणातिक्रमे चरुः ॥ वैश्वानरायाग्नये वाग्नये तंतुमते तथेति ॥ अथ वर्णेयत्राहि

क्रै १

ताग्निर्विह्वि घेत सोऽग्नये तंतुमते ष्टाकपालं पुरोडाशं निर्वपेदिति ॥ का ॥ अग्नये वैश्वानराय स्वाहाग्नये तंतु
मते स्वाहेति ॥ पार्वणातिक्रमे स्थालीपाकविधानेनाग्नये वैश्वानरायाग्नये तंतुमते च चरुं कृत्वोद्देश्य मंत्रा
हुतीर्जुहोति ॥ ग्रहणासादनप्रोक्षणानि भवंति ग्रहणे अग्नये वैश्वानरायाग्नये तंतुमते जुष्टमिति वि
शेषः ॥ परेण यजमानेन स्वार्थमावसथ्याग्नौ हुते । परस्यैवाग्नौ वा स्वार्थं हुते ॥ पिंडपितृयज्ञातिक्रमे वैश्वदेवा
द्वयातिक्रमे ऽकृताग्रयणस्य नवान्नभक्षणे पतितान्नभक्षणे वैश्वानरदेवताकश्चरुः कार्यः ॥ कात्या
यनः ॥ परेणाग्नौ हुते स्वार्थं परस्याग्नौ हुते स्वयं ॥ पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च ॥ अनिष्ट्वा नवयज्ञे
न नवान्नप्राशने तथा ॥ भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥ नवान्नभक्षणं दंपत्योः समं नवाश
ननिषेधोयं दंपत्योः कृतयोः समश्नतिमंडनः ॥ कृष्णाजिनाविमिषाश्वादीनां दुष्टप्रतिग्रहे प्येष एव चरुरि

तिदेवयाज्ञिकाः॥ प्रतिप्राजापत्यमेकश्चरुः॥ चरुप्रत्येकोब्राह्मणभोजनं॥ अत्रत्रस्रुंवासोदक्षिणा
त्वेनदेयं॥ कात्यायनसूत्रे तथोक्तत्वात्॥ ७॥ होमातिक्रमे॥ सायंप्रातर्योर्होमातिक्रमेप्रायश्चित्तमि
दंवक्ष्यमाणंज्ञेयमितिवाक्यशेषः॥ ८॥ सायंदोषावस्तर्नमः स्वाहा॥ सायंहोमातिक्रमे आज्यंसंस्कृ
त्यदोषावस्तर्नमः स्वाहेत्येकाहुतिर्होतव्या॥ साचाहुतिर्विध्यपराधेकेवला॥ आहुतीर्भूर्भुवः स्वः स्वाहा॥
अयाश्चाग्न इत्येतेहुत्वाभवति विध्यपराधेप्रायश्चित्तमित्युपक्रम्यसर्वप्रायश्चित्ताहुतीः सर्वेषुदोषे
ष्वित्युक्तत्वात्॥ अत्यल्पविहितंवैकेषुदोषेषुप्रायश्चित्तंतत्रोग्रेकुर्यात्सर्वप्रायश्चित्तंचाधिकारिकंचेति
सूत्रितत्वाच्च॥ प्रायश्चित्तहोमेसर्वत्रसुवर्णंदक्षिणांयथाशक्तिकिंचिद्दद्यात्॥ ९॥ नत्वेवादक्षिणंकर्मकिं २९९
चिदस्तीतिशौनकस्मृतिविधानोक्तत्वात्॥ प्रायश्चित्तंहुत्वा आतमनोंतमग्निंध्यात्वासायंतनआहुतीर्हु

त्वावरसंज्ञकंगांदत्वा भूरिरियंग्निःस्तोत्रे॥ आतमनादासित्वाहुत्वावरंदत्वाभूरित्यनुमंत्रयेतेतिसू
त्रेसूत्रितंतस्यप्रादुष्करणाद्धवनकालात्वग्निहोत्रेषेतिपूर्वमुक्तत्वात्॥ १०॥ प्रातः प्रातर्वस्तर्नमः स्वाहेति॥
प्रातर्होमातिक्रमेआज्यंसंस्कृत्यप्रातर्वस्तरित्येकाहुतिर्विध्यपराधेकेवलआहुतीर्हुत्वाभवति॥ आ
तमनोंतमारभ्यभूरितिस्पर्शःपूर्ववदत्रापिभवति॥ कारिका॥ होमकालातिक्रमणेदोषावस्तर्यंनि
शि॥ प्रातर्वस्तरितिप्रातः प्रायश्चित्ताहुतीपरेइति॥ ११॥ सर्वप्रायश्चित्तंहुत्वा॥ पूर्वोक्तआहुतीः सर्वप्राय
३त: श्चित्तंहुत्वाभवेत्॥ कारिकामतेतुसर्वप्रायश्चित्ताहुतीपरतोभवतिपूर्वंदोषावस्तरितिहुत्वाभव
तिंप्रायश्चित्ताहुतीपरेइत्युक्तत्वात्॥ १२॥ यावंतोहोमास्तावंतोहुत्वापूर्ववद्धोमः॥ एवंआपत्तिवशा
त्यावंतोहोमाअतिक्रांतास्तावंतआज्यस्रुवान्परिगृह्यहुत्वापूर्ववद्धोहिमिर्वापयेद्वासायंप्रात

कल्पसूत्रभाष्यकारमतेच ३ दोषावस्तरित्यादि

होमा विधेयाः। अत्रार्पितमनादिग्निमंत्रणं तं पूर्ववत्। एवं प्राकृक्षकरणकालातिक्रमे। श्रौ
तेऽग्नौ पाकार्थमुद्धृतेऽग्नौ पुनरस्थापने। प्रवासोपस्थानविस्मरणे च सर्वप्रायश्चित्ताहुतीर्भवति।
प्रायश्चित्ताहुती सर्वेषु दोषेष्वित्युक्तत्वात्। स्रुवः पात्रमित्युक्तत्वा स्रुवेणैव होमः। एवमापत्तिव
शात्। अथ यत्नाग्नौ सुवर्णं संस्थाप्य होमः कार्यः। कुशस्तंबे अजाकर्णे ब्राह्मणहस्ते वा। सुवर्णे स्थाप
नपक्षे यावज्जीवं संवत्सरं वा सुवर्णेनानिंद्यात् धारणं च। अयं च विशेषः। समिद्धोमो न भवति।
तस्य वेधनार्थत्वात्तस्य चासंभवात्। समूहनं पर्युक्षणं च न भवति। द्रव्यसंस्कारस्याप्राप्तेर्यो लौकिके
भवति। ब्राह्मणस्थापने यावज्जीवं वा सार्थमागतस्य ब्राह्मणस्य निराकरणं न कर्तव्यं संवत्सरप २६७
र्यंतं वा। अजस्थापने तस्य दक्षिणकर्णे होमः। तस्मिन् स्थापिते यावज्जीवं संवत्सरं वाजमांसं नाश्नी

यात्। रागप्राप्तस्यैव निषेधो न क्रत्वर्थस्य। ब्राह्मणो नश्यप्रत्यङ्मुखः स्थाप्यः। कुशस्तंबस्थापने कुशे
घृपवेशनं न कार्यं। क्रत्वर्थस्य तु न निषेधः। एतेन श्राद्धादावुपवेशनमर्थान्निषिद्धं भवतीति। अपः स्था
मे पने यावज्जीवं यजमानेऽप्सु निंदा न कार्येति। निःपादप्रक्षालनं न विधेयं। एतेषु पक्षेषु होमांते मंथन
स्रोत्रियाद्यगाराद्वा नयनं। आपस्तंबः। यदि कालसंनिकर्षेऽग्निर्मथ्यमानो न जायेत तत्रान्यं यं पश्येत्तम
हृत्य जुहुयादथ चरमाणस्तु निर्मंथ्य यद्यन्यं न विंदेदजाया दक्षिणे कर्णे होतव्यमजस्य तु मांसं नाश्नी
याद्यद्यजां न विंदेत् ब्राह्मणस्य दक्षिणे हस्ते होतव्यं ब्राह्मणं तु वसत्येनावरुंधीयीत यदि ब्राह्मणं न वि
देद्दर्भस्तंबे होतव्यं दर्भांस्तु नाध्यासीत यदि दर्भान्न विंदेदप्सु होतव्यमापस्तु न परिवक्षीत नाद्भिः पादौ न
प्रक्षालयीत सांवत्सरिकाण्येतानि व्रतानीत्याश्मरथ्यो यावज्जीवमित्यालेखन इति। अनुद्धृताग्नि

पादप्रक्षालनं न विधेयं। उद्धृतानिर्मनिषेध इति तद्भाष्ये। नैमित्तिककारिका। अपराग्न्यो होमपक्षे तत्रा
पि स्थापयेदग्निं होमस्य करणे किं तेष्वोद्धृतमप्यनुवर्त्यते। अन्नस्य मांसं नाश्नीयाद्वैश्वदेवे मज्जाहुतौ। पा
णिहोमेनावरुंध्याद्ब्राह्मणं वा सकांक्षिणं। दर्शे सने ष्ठुनासीत दर्शे होमेषु वर्त्यते। अपोननिंद्यात्ताभि
श्च पादौ न प्रक्षालयीत चान निंद्यात्तु सुवर्णं तु यावज्जीवं च धारयेदिति। समिद्धोमो ग्निप्रतिनिधौ न भव
ति। समूहनं पर्युक्षणं च न भवति सर्वत्र चतुर्थः खंडः॥ ॥कपोतोलूकाभ्यामुपवेशने। अतः परमाध्या
य परिसमाप्तिं प्रायश्चित्तरूपां शांतिमाचार्य आह। कपोतश्च उलूकश्च ताभ्यां पक्षिभ्यां गृहे उपवेश
ने कृते सति प्रायश्चित्तरूपां शांतिं वक्ष्याम इति वाक्यशेषः॥ क॥ देवाः कपोत इति प्रत्यृचं जुहुयात्॥ २६८
देवाः कपोत इति सूक्तेन पंचर्चेन प्रत्यृचं पंचाज्याहुतीः पाकयज्ञविधानेन आवसथ्ये लौकिके वा

जुहुयात्। कारिका। अतो यत्रापि संस्कारो दृष्टं वा दृष्टमात्मनः। तत्र स्वाग्निः परार्थेष्विति। तथा त
त्रैव। वास्तोष्पतिः पीयूषोयमलं कस्य विहूषां उपाकर्म कपोता दिग्वेधुक विरोहणे। मधुव
ल्मीकसंभूतो शांतिर्दृष्टो गणे मत इति। जुहोती तु के सर्पिः प्रतीयते तिन्यायात्। तो श्चाज्याहुतेर्यो
र्गृहयज्ञप्रपूर्विका भवंति। गृहपीडा सुचो ग्रासु शांत्यर्थं च विशेषत इति शौनकाभुक्तत्वात्। कपोतः
विश्वे कपोतो देवा अग्निर्यमो मृत्युस्त्रिष्टुप्। देवाः कपोत इषितो यदिच्छन्। तद्विधाने। देवाः कपोत इति
त्रकपोतस्यापवेशने। सूक्तेन जुहुयादाज्यं यमदूतं हितं विदुरिति। आथर्वणपरिशिष्टे। गृहे यस्य
पतेद्गृध्र उलूको वा कथं च न कपोतः प्रविशेच्चैव जीवा वारण्यसंभवाः। धुर्यौ च पततो युक्तौ गोस्त्री
जन्म च वेद्धृतं। जायंते यमलान्येव घोरः स्वप्नश्च दृश्यते। अनिद्रं वंति रक्षांसि यत्र चैव कुमार

कान्॥ उन्निद्रको तिनिद्रो वा दुःस्वप्नमतिभोजनं। आलस्यं चैव मे तेषां देवता यम उच्यते। पुरोहितस्तु कु
र्वीत कापोतीं अद्भुत शांतिकां। ग्रहयज्ञप्रधानां हि कुर्याद्वाचनपूर्विकां। देवाः कपोत इति च सूक्तं तत्र समा
दिशेत्। आवापे व्याहृतिषंगे च परिशिष्टं हूयते। कामिकां दक्षिणां दद्यात् कुर्वीयेन तुष्यतीति। स्विष्टकृद
दितंत्रशेषं समापनं अभिषेको यजमानस्याशीः करणं। ब्राह्मणभोजनं। अनुक्तं वा ग्रहयज्ञपूर्वक
त्वाद्विंशतिः। शेषं ग्रहयज्ञवत्॥ छ॥ दुःस्वप्नदर्शने चानिष्टदर्शने। दुःस्वप्नदर्शने कृष्णपुरुषनग्नस्त्रीमर्क
टादि स्वप्ने दृष्टे अनिष्टदर्शने विकृतप्रसवादिके च प्रायश्चित्तरूपां शांतिर्वक्ष्यमाणा ज्ञेया॥ छ॥ निशा
यां काकशब्दाक्रांते च। वा पुनः निशायां रात्रेर्मध्यप्रहरद्वये काकशब्दाक्रांते काकशब्दश्रवणे वक्ष्यमाणा
शांतिर्ज्ञेया॥ छ॥ अन्येषु चाद्भुतेषु च। वा पुनः अन्येषु अनुक्तेषु अद्भुतेषु अनुक्तपूर्वेषु च शांतिर्वक्ष्यमाणा ज्ञे

या। अद्भुतानि गोशृंगे धूमदर्शनप्रतिमाहसनादीनि॥ छ॥ पयसा चरुं श्रपयित्वा। आवसथ्यं लौकिकाग्निं
वा संस्थाप्य पयसा दुग्धेन चरुं स्थालीपाके श्रपयित्वा ततः। पयसेत्यनेन नोदकनिवृत्तिः॥ छ॥ सरूपवत्सा
या गोः पयसि पयसो नियममाह। समानरूपो वत्सो यस्याः सा सरूपवत्सा गौस्तस्याः पयसि दुग्धे चरुं श्र
पयेदित्यर्थः॥ छ॥ न त्वेव तु कृष्णायाः। तु शब्द एवकारश्च नियमार्थौ। सरूपवत्सायाः कृष्णाया धेनोः पयसि
नैव श्रपयेत्। वा सरूपवत्साया धेनोरलाभे अन्यस्याः सवत्साया दुग्धं ग्राह्यं सरूपवत्साया इत्युक्त्वा
वा। स च चरुः रात्रीदेवताको भवति। रात्री व्यख्यदिति मंत्रलिंगोक्तत्वात्। अहरेण रात्र्यै जुष्टमित्यादि॥ छ॥
रात्रीसूक्तेन प्रत्यृचं जुहुयात्। स च चरुर्ग्रहयज्ञपूर्वको भवति। सूक्तं पादिम होत्यान इति शौनक्या मुक्त्वा
वा रात्रीसूक्तेन रात्री व्यख्यदित्यष्टर्चेन प्रत्यृचं अष्टाहुतीरवदानधर्मेण जुहुयात्। कुशिको रात्रिर्वा रात्रि

गोयत्री।।रात्रीव्यख्यदायतीश ण।।ततः स्विष्टकृद्धर्मेण स्विष्टकृत।।८।।हुतशेषं महाव्याहृतिभिः प्राश्य हुत
शेषं शिष्टं चरुं महाव्याहृतिभिस्तिसृभिः प्राश्य प्राशानं कृत्वा ततो मार्जनमिदमापइति तृचेन।इतरां यज
मानपंचमाः प्राश्य मार्जनाद्वाग्यमनमिदमापइति तृचेनांतर्वेदि पवित्रवति मार्जयंत इति सूत्रे।।८।।भ
द्रं कर्णेभिरिति कर्णौ।भद्रं कर्णेभिरि।तृचा कर्णौ स्वकीयो यजमानोभिमंत्रयते।आत्मानमभिमंत्रेत्य
तः सिंहावलोकनन्यायेनात्रानुषज्यते।स्पृशानना मिकाग्रेणेति कात्यायनस्मृतिः।गोतमो विश्वेदेवा
स्त्रिष्टुप्।भद्रं कर्णेभिः शृणुयाम देवाः इत्यस्य।।८।।शतमिन्नु शरदो अंतिदेवा इत्यात्मानमभिमंत्र्य।श
तमिन्विति येतयज्ञो आत्मानं हृदयं स्पृशेत्।ततः उदकस्पर्शः।आत्मान्यात्मानमेव चेत्युक्तत्वात्।गोतमो २१०
विश्वेदेवा त्रिष्टुप्।शतमिन्नु शरदो अंतिदेवाः इत्यस्य।ब्राह्मणेभ्यः किंचिद्दद्यात्।ग्रहयज्ञार्थं शांत्यर्थं च दत्ते

देवी० ४

भ्यो ब्राह्मणेभ्यः किंचिद्दक्षिणां दद्यात्।अत्र शांतिपाठार्थं ब्राह्मणवरणं।ते वृता ब्राह्मणाः शांतिपा
ठं स्वस्त्ययनं च कुर्युः।ततो यजमानस्याभिषेको मांगल्यमाशीर्वादाः।ततः सप्तकादि कर्म समाप्तिः।।
ब्राह्मणभोजनसंकल्पो विंशत्यादिको यथाशक्त्या।। ।।पंचमः खंडः।।५।। ।।व्याधौ समुत्थिते।व्याधौ म
हारोगे समुत्थिते प्रायश्चित्तरूपां शांतिं वक्ष्याम इति वाक्यशेषः।गृहे नगरे ग्रामे वा महारोगोत्पत्तौ रुद्र
देवताकां शांतिं कुर्यात्।सा च शांतिर्ग्रहशांतिपूर्विका भवति।महारोगान्महोत्पाताद्बंधनाद्राजसं
५।३ कटात्।महारुद्राद्द्वितीयो वै नास्ति त्रौघटोद्भवः।इति काशीखंडे।रुद्रस्याराधनं पूजां लक्षपुष्पेण
कारयेत्।तिललक्षप्रदानेन महारोगात्प्रमुच्यते।बिल्वाग्निलक्षदानेन महामृत्योः प्रमुच्यते।पंचा
मृतेन स्नपनं सहस्रपलसंख्यया।कार्त्तिक्यां कृत्तिकायोगे कृत्वा पापात्प्रमुच्यते इति बृहन्नारदीयसं

हितार्थं तथा च रुद्राराधने। महार्णवे। राष्ट्रव्याधिसमुत्पत्तौ राजा शांतिं तु कारयेत्। द्विजन्मभिर्मंत्रसि
द्धैः कर्म स्यादीश्वरालये। एकादशानवेयुक्तेश त्विजस्तेषु पंचभिः। जपः स्यात्पंच निर्होम एको ब्रह्मा ति
लौदनं। जुहोति ब्रह्मणो होमे मंत्राः सप्तदशैव तु इति। तथा तत्रैव। द्रव्यं तु गव्यमाज्यं स्यादेवं व्याधिः
प्रशाम्यति। एकोपि व्याधिमान्यस्यात्सोपामार्गजतंडुलैः। आज्यमिश्रैः सहस्राणि जुहुयाद्दष्टसंयुतः।
एवं कृते रोगशांतिर्नवेत्तस्य न संशयः। अमात्यस्य समुत्पन्ने व्याधावीश्वरसंनिधौ। तंडुलैराज्यसंमि
श्रैः शुक्लैर्लक्षं हुतिर्नवेत्। अमात्यस्य गृहे पश्चादपामार्गस्य तंडुलैः। दूर्वामिश्रप्रतिद्रव्यं सहस्रा
ष्टकसंख्यया। अनेन कर्मणामात्यो व्याधिना मुच्यते ध्रुवं। राज्ञो व्याधिसमुत्पत्तौ शांत्यर्थं कर्म कारयेत्। २५२
मंत्रसिद्धा द्विजास्तत्र ऋत्विजस्त्वेकविंशतिः। तत्र ब्रह्मा महीपालः समानयुक्तं तु सर्वतः। अग्निकुंडं वि

निर्माय वह्निं संस्थाप्य शास्त्रतः। ततो नियोजयेदन्यान्दृत्विजो होमकर्मणि। अथ ते जुहुयुस्तत्र द्वंद्वं
भूत्वा हवींषि तु। तंडुलाश्च तिलव्रीहियवा माषाश्च पृथक् पृथक्। नीवाराश्च तथा ग्राह्यास्त्वपामार्गो
द्भवतंडुला। दूर्वा कमलकिंजल्कास्तथा शुद्धौदनं घृतमिति। शांतौ रुद्रमहारुद्रातिरुद्रात्वरितरुद्राणां
करणं। तत्स्वरूपं निर्वचनं तत्रैव। षडंगैकादशी रुद्रो रुद्रैकादशरुद्रतः। एकादशभिरेतानिर्महारु
द्रस्तु कथ्यते। एकादश महारुद्रैरतिरुद्रश्च नीरितः। यथा एकादशधाभ्यस्तो रुद्रस्तूच्यते षडंगै
कादशी चैवनामनी नवतः। एकादशधाभ्यस्तो रुद्रो रुद्री भवति रुद्रैकादशानीचोच्यते। एकाद
शधाभ्यस्ताभिः रुद्रीभिर्महारुद्रो भवति। एकादशधाभ्यस्तो महारुद्रोऽतिरुद्रश्च तूच्यते पद्धु
नामपद्धतौ। रुद्राध्यायः स रुद्रस्तु प्रथमः सांगशीर्षकः। एकस्यैकादशावृत्त्या रुद्री नाम्ना द्वितीयकः। सां

गमाद्यं जपेद्रूपं केवलानि नवांतरे। सांगं सशीर्षकं चांत्यं निरंगमिति केचन। तान्निरेकादशोक्ता
निर्लघुरुद्रस्तृतीयकः। लघ्वैकादशानि स्तद्वन्महारुद्रश्चतुर्थकः। एकादशामहारुद्रैरतिरुद्र इती
रितः। एषु पंचसु रुद्रेषु श्रेष्ठः स्यादुत्तरोत्तरः इति। शांतिके गणशांतिश्च ग्रहशांति पूर्विकेति महा प्र३
र्णवे॥ तस्माद्ग्रहशांति पूर्वको होमो लक्षाद्ययुतांतो तिलादिभिः कार्यो विल्पमाण चरुणा सह॥ का
इमा रुद्राय तवसे कपर्दिन इति प्रत्यृचं गावेधुकं च रुं जुहुयात्। आवसथ्यं लौकिकाग्निं वा संस्था
प्य रुद्रदेवताकं स्थालीपाकधर्मेण चरुं गावेधुकैस्तंडुलैः श्रपयित्वा इमा रुद्रायेत्येकादशाभिर्ऋ
ग्भिः प्रत्यृचमेकादशाहुतीरवदानधर्मेण जुहुयात्। गवेधुका नाम लानेत्राग्रपामार्गतंडुलाग्रा २७२
ह्याः। महार्णवे तु कल्पात्। ततः स्तिलादि होमः। ग्रहाणं। रुद्राय जुष्टमित्यादि समानं कुर्यात् रुद्रै

स्त्रिष्टुभेत्येंजगत्यौ। इमा रुद्राय तवसे कपर्दिने॥ १ ग्रहशांति पूर्वं कृत्वा द्विंशाति ब्राह्मणान्भोजयेत्।
गोदानं। स्विष्टकृदादितंत्रशेषं समापनं। व्याधिप्रायेरुद्रायेति सूत्रेण सूत्रितं त्वं जनमारिविशेषो
ब्रह्मवैवर्ते। राजा च कुरुते पापं ब्रह्महत्यादियातकं। तेन पापेन राज्ञस्तु जनमारो निजायते। प्रजावत्यो
ऽधं नैव मंत्रतंत्राणि चैव हि। क्रोधलोभसमाविष्टाः साध्वाचारविवर्जिताः सर्वाः प्रजाः प्रजायंतेत
तो रुद्रः प्रकुप्यति। कुपिते तु महादेवे जनमारो निजायते तस्मात्प्रसादयेद्देवं पार्वतीवल्लभं शिवं।
रुद्रसूक्तेन कुर्यात्तु जलधारां शिवोपरि। उपहारैश्च विविधैश्चत्वरे बलिमुत्सृजेत्। शिवद्वारे विधि
स्त्वेषकार्यो नान्यत्र वैष्णवः। मृत्युंजयेन मंत्रेण होमं तत्र प्रकल्पयेत्। समिधो ब्रह्मवृक्षस्य जुहुयाच्च
सहस्रकं। साज्यं च पायसं चैव सहस्रं जुहुयात्सुधीः। सहस्रं बिल्वपत्रैश्च त्र्यविच्छिन्नैर्द्विजोत्तमः। जुहु

अश्वत्थ २

यात्पष्टिकैश्चैव तथा च तिलसर्पिषा॥ स्विष्टकृच्चैव हुत्वा च जपेरं शांतिमुत्तमां। ततोभिषेचनं कुर्याद्व
रुणमंत्रैश्च वारुणैः॥ त्रिलिंग्यो हेमदानं तु दद्यात्कर्णांगुलीयकं॥ आचार्याय च गां दद्यात्सप्तधान्यं च वाड
वे। भूमिदानानि भूरीणि विविधांश्चतुरंगमान्॥ दशांगेन च धूपेन धूपयेत्प्रयतः पुमान्॥ विलिप्य चंदने
नाथ श्वेतपुष्पैश्च पूजयेत्॥ दीपेनीराजयेद्देवं नैवेद्यैस्तोषयेच्छिवं। एवं संपूज्य विश्वेशं प्रार्थयेत्सज्जनो न्
पः॥ देवदेव महादेव महापापविनाशन। जन्ममारकृतां पीडां सद्यो नाशय शंकर। इति संप्रार्थ्य देवेशं कुर्या
च्चैव प्रदक्षिणां। जपेच्छैवीं स्तुतिं धीमांछ्रद्धया परया युतः॥ प्रसादितेन ततो रुद्रे जन्ममारो निवर्त्तते। ब्राह्मणा
न्भोजयेत्पश्चात्सहस्रं शतसंख्यया। रुद्रार्चनं गवां दानं गायत्रीजप उत्तमः। निवारयति विघ्नानां राशिं ना २७३
त्र विचारणा। शिवपूजा शिवध्यानं शिवाराधनसत्क्रिया। ये कुर्वंति सदा भक्त्या ते विघ्नान्भंजंति वै।

उपवासेन भूपालो विधानमिदमाचरेत्॥ स नार्यः स च विवः श्रीमान्सपुत्रः सपुरोहितः इति। तथा रुद्र
संहितायां। महारोगिणा योग्रस्तस्तेन कार्यं शिवोपरि। रुद्रमंत्रैर्घटीस्नानं शिवं संतततधारया। मधु
ना सर्पिषा चैव पयसेक्षुरसेन वा। कार्यमाम्ररसेनापि नालिकेरोदकेन वा। अश्वत्थवोदकेनैव रु
द्रं चैवाभिषेचयेत्। ब्राह्मणान्भोजयेत्पश्चाद्रोद्रानेकादशैव तु। दक्षिणां च दिशेत्तेभ्यो जापकेभ्यो य
थाक्रमं। भूयसीं च यथाश्रद्धं दद्याद्वित्तानुसारतः। एतेनैव विधानेन सहस्रकलशैस्तथा। स्नपनं चैव
कर्त्तव्यं सर्वरोगापनुत्तये। अंतर्दाहोज्वरश्चैव परितापस्तथैव च। सद्यो विनाशमायाति शिवस्यैवभि
षेचनादिति। तथा भारते। अचिकित्स्याश्च ये रोगा ये रोगा निरुपायिनः। तेषां समूलनाशाय तिलैरी
शानमर्चयेत्। एतत्तिलप्रजननं लक्षतिलैः। तिललक्षप्रदानेन महारोगात्प्रमुच्यते इत्युक्तत्वात्। ए

तत्प्रकरणव्याख्याल्लिखितं॥ छ॥ इति षष्ठखंडः॥ ॥६॥ अकृतसीमंतोन्नयने चेत्प्रजायेत॥ चेद्यदि सी-
मंतोन्नयने आपत्तिवशात् अकृते सति प्रजायेत बालस्य जननं भवति तदा वक्ष्यमाणं प्रायश्चित्तं कृत्वा।
सीमंतकर्म कुर्यात्॥ कात्यायनस्मृतिः॥ लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते। प्रायश्चित्ते कृते पश्चाल्लु-
प्तं कर्म समाचरेत्॥ एवं अतिक्रांतकालेष्टममासादौ करणे एतदेव प्रायश्चित्तं॥ छ॥ अकृतजातकर्मासि-
त्। यदि बालः अकृतजातकर्मा आसीत् तदा नामकरणकाले एकादशदिने जातकर्मकालातिक्रमनि-
मित्तं प्रायश्चित्तं कृत्वा तज्जातकर्म कार्यं॥ छ॥ ततोतीते दशाहे उत्संगे मातुः कुमारं स्थापयित्वा॥ ततए फे ३
वं जाते सति जननानंतरं अतीते अतिक्रांते दशाहे दशादिने सति एकादशे दिने प्राप्ते मातुः ज्ञातस्य २०४
बालस्य मातुः उत्संगे उपस्थे कुमारं एव कुमारकं तं स्थापयित्वा वक्ष्यमाणं प्रायश्चित्तं कुर्यात्॥ तत्कि-

मित्यपेक्षायामाह॥ छ॥ महाव्याहृतिभिर्हुत्वा पूर्ववद्धोमः॥ पूर्वमकृतत्वान्मातुरुत्संगं कृत्वा लौकिकाग्निं
संस्थाप्य सीमंतोक्तं च रूपयित्वा प्रायश्चित्तं तया महाव्याहृतिभिश्चतसृभिर्हुत्वा सीमंतकर्म प्रधाना-
हुतिं हुत्वा कर्मसमापनं॥ गर्भाधानादिकं कर्म सीमंते नोपलक्षितमिति कारिकोक्तत्वात्॥ ततो निन्न स्थं-
डिले जातकर्मार्थं सूतिकाग्निं संस्थाप्य हिरण्यश्राद्धं कृत्वा जातकर्मकालातिक्रमनिमित्तं प्रायश्चित्तं
महाव्याहृतिचतुष्टयात्मकं हुत्वा पुरस्तात्संज्ञकमुपरिष्टात्संज्ञकं च हुत्वा अन्यत् प्राशनादिकं कर्म विधा-
येनामकरणाख्यं कर्म कार्यं॥ जातकर्मादिनामांतं सूतिकाग्नौ विधीयत इति कारिका॥ कर्मतत्त्वप्रदीपे॥
कालातिक्रमणे चैषां हुत्वा व्याहृतिभिस्ततः॥ कार्यो एकैकशो लोपे पादकृच्छ्रः प्रकीर्तितः॥ एवं गर्भाधान-
पुंसवनगर्भरक्षणकर्मकालातिक्रमे महाव्याहृतिचतुष्टयात्मकं प्रायश्चित्तं भवति॥ अकृतसीमंतो-

न्नयनेऽग्नूक्तजातकर्मासीदित्युक्तत्वात्। गर्भाधानाद्यतिक्रमे सर्वप्रायश्चित्ताहुतीर्नवतः। प्रायश्चित्ताहु-
तीः सर्वेषु दोषेष्विति सामान्यप्रायश्चित्तमुक्तत्वात्। एतदुक्तप्रायश्चित्तमापत्त्यातिक्रमणे पादकृच्छ्रमात्रं। आ-
लस्यात्यागे द्विगुणं। आलस्यानुप्रमादाद्वा कालातिक्रमणे सति। पाराकं द्विगुणं प्राकृतं विषयः। शांसितव्रता
इति वृत्त्यारार्थः॥ छ॥ ॥ सप्तमः खंडः॥ ॥ स्थूणाविरोहणे। स्थूणा गृहाधारस्तंभस्तस्य विरोहणं
नवपल्लवांकुरोद्गमनं तत्र प्रायश्चित्तरूपां शांतिं वक्ष्याम इति वाक्यशेषः॥ छ॥ स्थालीपाकं श्रपयित्वाया
विष्ठाजनयन्कर्वराणि पिशंगरूपः सुभरो वयोधा इति द्वाभ्यां चरुं जुहुयात्। सा च शांतिः सप्त हा नवति।
मूकंपादिमहोत्पाते इति शौनकाद्युक्तत्वात्। आवसथ्ये लौकिके वा संस्थाप्य। तत्र स्थालीपाकधर्मेण २७५
चरुं श्रपयित्वा। ऽया विष्ठा पिशंगरूप इति द्वाभ्यां मंत्राभ्यां चरुं जुहुयादवदानधर्मेणाद्वे आहुती। अया

विष्ठाजनयन्कर्वराणि स हि घृणिरुरुर्वराय गातुः। स प्रत्युदैद्धरुणं मध्वो अग्रं स्वां यत्तनूं तन्वामैरयत स्वा-
हा। अयं सूत्रोक्तः। गृत्समद ऋषिस्त्रिष्टुप्। पिशंगरूपः सुभरो वयोधाः श्रुत्यग्रहणं। अनयेत्यत्रानुष्ट-
मित्यादिश्च नाम्नातमंत्रत्वादिष्टदेवतास्वित्युक्तत्वात्। स्विष्टकृदादि तत्र शेषं समापनं। ब्राह्मण-
भोजनादि ब्राह्मणवरणं च पूर्ववत्। शांतिकलापः सर्वेऽपीहापि॥ छ॥ यदि प्रणीता चरुराज्यस्थाल्य-
न्यदपि मृन्मयं भिन्नं स्रवेत्। यदि कदाचित्प्रमादात्प्रणीतापात्रं च चरुस्थाली आज्यस्थाली अन्यद-
६३ पि मृन्मयं एतद्व्यतिरिक्तं मृन्मयं मृत्तिकामयं पात्रं विवाहादौ स्थापितं कुंभादिकं भिन्नं भेदितं सत् स्र-
वेत्। प्रस्रवेदधः पतेत्। तदा प्रायश्चित्तं वक्ष्यमाणं कुर्यात्॥ छ॥ सर्वप्रायश्चित्ताहुतीर्हुत्वा यूर्ज्जति वि-
दितिवचेन भिन्नमनुमंत्रयते। तं ज्ञानेन रसं सर्वप्रायश्चित्ताहुतीर्भूर्भुवः स्वः स्वाहाया आयान इत्येन हुत्वा

यज्ञं ते विदिति त्र्यृचेन भिन्नं पात्रमनुमंत्र्य संसृज्य द्वितीयं पुनरुत्पादयेत्। पुनरुत्पादनमग्रिम सू-
त्रात्सिंहावलोकनन्यायेनात्राप्यनुषज्यते। मेधातिथिर्मेध्यातिथी इंद्रो रहती। यज्ञं ते चिदग्निस्त्रि-
ष्टु॥ स्त आ॥ ८॥ यद्य समाप्ते होमे पवित्रं नश्येत्। यदि कथंचित्प्रमादात् असमाप्ते अपरिपूर्णे होमे
पवित्रं नश्येत् नाशं प्राप्नुयात्तदा वक्ष्यमाणं प्रायश्चित्तं कुर्यात्॥ ९॥ सर्वप्रायश्चित्तं हुत्वा स्वयमेष इति
पुनरुत्पादयेत्। भूर्भुवः स्वः स्वाहा या स्वायमग्न्याहुतिद्वयात्मकं सर्वप्रायश्चित्तं हुत्वा स्वयमेष इति मंत्रे-
ण पुनः नूतनं पवित्रं उत्पादयेत् कुर्यात्। विरूपो ग्निर्गायत्री। अस्वयं स धिष्टं वत्सरतया। हविषो भूमौ
पतने अस्कन्नं यं वो यययो रोजसे त्याभ्यामद्भिरुक्षित्वा स्कान्नथीति त्रिभिर्मंत्रैरभिमंत्रयेत्। दुष्टस्याप्सु नि- २०६
क्षेपः। शिष्टेन हविषा समापनं। शेषाभावे न्यदुत्पादनं। तस्यालाभे प्रतिनिधिद्रव्येण हविःस्थाने यथायव-

एवं घृतादिष्वपि द्रष्टव्यं। तथा च सूत्रं। हविषि स्कन्ने अस्कान्द्यं वो यययो रोजसा स्कभितारजांसि वीर्येभिर्वी-
रतमा शविष्ठा। या पत्येते अप्रतीता सहोभिर्विष्णू अगन्वरुणा पूर्वहूतौ इत्यद्भिरुपनिनीयास्का-
न्द्यौरित्राजनि दिवं देवांस्तृतीयं यज्ञो गात्ततो मा द्रविणमष्टंतरिक्षं पितृंस्तृतीयं यज्ञोप मष्टु पृथिवी
मनुष्यांस्तृतीयं यं० द्विरित्यनुमंत्रयेत्। यद्वा ब्राह्मणो जुगुप्सुर्न लक्षयेदेतद्दुष्टस्य लक्षणं तस्याप्सु प्रतिप-
क्षेपः विद्यमाने तेन समापनं शेषाभावेन्यदुत्पादयेत्तस्मिन्द्रव्ये विद्यमाने यत्सामान्यतमं मन्ये-
८ ततस्ततिनिधीयादिति॥ ॥अष्टमः खंडः॥ ८॥ ९॥ यदि गृहे मधूका मधु कुर्वंति। यदि कदाचित्स्व-
विषय दुत्याने गृहे मधूकाः मधुमक्षिका मधु कुर्वंति तदा वक्ष्यमाणं प्रायश्चित्तरूपां शांतिं कुर्या-
त्॥ १॥ उपोष्यौदुंबरीः समिधो ष्टशतं दधिमधुघृताक्तां मानो महांतमिति द्वाभ्यां जुहुयात्॥ २॥ उ

पौष्योपवासांस्त्रिरेकं वा कृत्वावसथ्यं लौकिकाग्निं वा संस्थाप्याष्टशतं अष्टभिरधिकं शतं दधिमधु
घृताक्ता औदुंबरीः समिधो मा नो महांतमिति द्वाभ्यां मंत्राभ्यां जुहुयात्। सा च शांतिः सर्वग्रहाणां भवति। भू
मिकंपे च महोत्पाते इति श्रौतवाक्यामुक्तत्वात्। शांतिके गणे शांतिस्थग्रस्ता शांतिकपूर्विकेति महा
र्णवे। कुत्सो रुद्रो जगती। मा नो महांतमुत मा नो अर्भकं त्वरा। त्र विधाने। वीरवधपत्यगोष्ठेषु दुःस्वप्ने
रिष्टमात्मनः॥ मा नो महांतमित्याज्यं त्रिरात्रोपोषितः शुचिः। औदुंबरीस्तु जुहुयाद्दधिमध्वाज्यसंस्कृता
इति॥ ७॥ शं न इंद्राग्नी इति च सूक्तं जपेत्सर्वेष्वेव कर्मसु प्रतिश्रुतादिषु परिभाषासूत्रमेतत्। प्रतिश्रुता
दिषु सर्वेषु कर्मसु अंते शांत्यर्थं शं न इंद्राग्नी इति सूक्तं जपेत्। वसिष्ठो विश्वेदेवास्त्रिष्टुप्। शं न इंद्रा २११
ग्नी भवतामवोभिः॥ स १५ चकारात्रयो वै यज्ञेकामा इति यजमानाशीः प्रार्थनां पठेत्। द्वितीय चकारा

त्प्रजापतिर्वै यज्ञ इति खंडं पठेत्। संप्रदायाच्च॥ ८॥ प्रादेशमात्रीः पालाशीः समिधः सप्तदश हुत्वाप
श्चात्स्रुवग्रहणं। प्रतिश्रुतादिषु सर्वेषु कर्मसु विकृतिभूतेष्वित्यनुवर्त्तते। पालाशीः पलाशवृक्षोद्भवाः कु ३
प्रादेशमात्रीः प्रादेशमात्रपरिमिता यजमानस्य सप्तदशसंख्याकाः समिधो वा पश्चात् विश्लोर्हस्तो
सीति स्रुवग्रहणं कार्यं। परिभाषेयं। प्रादेशमात्रीः पालाशीः समिधमन्यादध्यातीति श्रुतेः॥ ९॥ दर्शपू
र्णमासयोः पंचदश॥ समिधो हुत्वेत्यनुवर्त्तते। दर्शपौर्णमासयोः कर्मणोः पंचदश समिधो हुत्वा
स्रुवग्रहणं विधेयं॥ १०॥ मध्यावर्षेऽष्टके तिस्रो वा भवंति पितृयज्ञवद्धोमः॥ मध्यावर्षेऽष्टके नाद्रष्टव्या
ष्टकायां तिस्रो वा समिधो भवंति ता अश्च हुत्वा स्रुवग्रहणं विधाय पितृयज्ञवत्पित्र्येष्टिवत्। होमः का
र्यः। अंत्यास्तिस्रः समिधो भिन्नाः एवं पद्मा वा शाब्दास्सप्तदशापि भवंति। पितृयज्ञवद्धोम इत्युक्तत्वात्

प्राचीनावितिनाकार्यः॥अपसव्येनदक्षिणामुखतयाच।दक्षिणांप्राचींपित्र्यस्तुकल्पात्।तथा
चकारिका।प्रादेशमात्राःपालाशाःसमिधोदशसप्तवापंचमाध्यायपठिताःप्रक्तौनिर्विंशांतिताः
दर्शेचपौर्णमासेतुसमिधोदशपंचच।पित्र्याष्टकायांतिस्रोवाथवासप्तदशैवतु।हुत्वातांत्रीणस
मिधस्ततोदर्व्यास्रुवश्चहश्चति॥ ॥इतिनवमःखंडः॥९॥ ॥यस्मिन्गृहेवल्मीकसंभूतिर्गृहोत्सर्गे।यदि
कदाचिद्गृहेनिवासगृहेवल्मीकसंभूतिःसंभवःपिपीलिकाबिलंकुर्वीतितदागृहोत्सर्गोगृहस्या
द्वसनंभवति।तच्छांतयेवक्ष्यमाणांशांतिंकुर्यात्॥१०॥अथत्रिरात्रमुपोष्यमहाशांतिंकुर्यान्म
हाशांतिंकुर्यात्।अथवल्मीकसंभववृक्षानानंतरंतद्दियाशांत्यर्थंत्रिरात्रमुपवासंविधायावस २९८
थ्यंलौकिकाग्निवासस्थाप्यमहाशांतिसग्रहांविनायकशांतिंकुर्यात्।महाशांतिर्विनायकशां

तिःसग्रहोच्यते।द्विरभ्यासोध्यायसमाप्तिसूचनार्थोमंगलार्थोवा।रात्रौसूक्तेनहोमोवा।अन्येष
द्भुतेषुचेत्तुकल्पात्।आथर्वणपरिशिष्टे।देशेवायदिवाग्रामेगृहेवानिष्टसंभवः।गौरश्वंवड
वावागांयस्मिंदेशेप्रसूयते।अन्यंतरेतुतद्वर्षात्स्वामिनोमृत्युमादिशेत्।मानुषीजनयेद्यत्रनष्ट
एगदान्विविधानपि।उष्ट्रंवायाप्रसूयेनवानरंवापिमानुषी।एवमादिमहोत्पाताःशांत्यर्थंवैप्रकी
र्तिताः।तेषुसर्वेषुविधिवत्शांतिकामोनराधिपः।अमात्योवाधिकारीवाशमनार्थंसमाहि
तः।अथर्वाणंचवृणुयात्सर्वशास्त्रार्थकोविदं।वृणुयाच्छांतितत्त्वज्ञानुत्पातविहितांश्चनाव्यषो ६
डशाष्टौवृतास्तेचपुरश्चरणशोधिताः।अंगानितुकुर्युरन्येयथातसंख्याद्विजोत्तमाः।तेसदस्याइ
तिप्रोक्तावाचनेयज्ञकर्मणि।तेषांवरिष्ठःशांतिज्ञउपद्रष्टामनोहरः।सर्वकर्मसुवेत्तायश्चानये

सोप्यथादराद्भूमिं संशोध्य विधिवत्कृत्वा तत्र च मंडपं कोटिहोमं प्रयुंजीत लक्षहोमम् अथापि वा।
गणशांतिं सग्रहां च कुर्यादुत्पातशांतये। महाशांतिं प्रकुर्याद्यस्तस्योत्पातो विनश्यति उत्पातेषु म
हाशांतिं कारयेद्बहुदक्षिणां। शाम्यति तस्य घोराणि योगक्षेमं च जायते। महत्सुखमवाप्नोति का
र्यसिद्धिं च विंदतीति। विनायकशांतिप्रकारस्तु यथा याज्ञवल्क्यः। स्नपनं तस्य कर्त्तव्यं पुण्येह्नि
विधिपूर्वकं। गौरसर्षपकल्केन साज्येनोत्सादितस्य च॥१ सर्वौषधैः सर्वगंधैः विलिप्तशिरसस्त
था। भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः॥२ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्र
दात्। मृत्तिकां रोचनां गंधान्गुग्गुलुं चाप्सु निक्षिपेत्॥३ या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदा २८७
त्। चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः॥४ स्नातस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु। जुहुयान्मू

श्री१ हु२

र्ध्नि कुशान्सव्येन परिगृह्य च॥५ मितश्च संमितश्चैव तथा शालकटंकटौ। कूष्मांडो राजपुत्रश्चैते स्वा
हासमन्वितैः॥६ नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः। दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः॥७
कृताकृतांस्तंडुलांश्च पललौदनमेव च। मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु॥८ पुष्पं चित्रं सुगं
धं च सुरां च त्रिविधामपि। मूलकं पूरिकापूपांस्तथैवोंडेरकस्रजः॥९ दध्यन्नं पायसं चैव गुडपिष्टं स
मोदकं। एतान्सर्वानुपाकृत्य भूमौ कृत्वा ततः शिरः॥१० विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां। दूर्वा
सर्षपपुष्पाणां दत्वार्घं पूर्णमंजलिं॥११ रूपं देहि जयं देहि भगं भगवति देहि मे। पुत्रान्देहि धनं देहि सर्वा
न्कामांश्च देहि मे॥१२ ततः शुक्लांबरधरः शुक्लगंधानुलेपनः। ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि।
॥१३॥ एवं विनायकं पूज्य ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमां। आदित्यस्य

सदा पूज्या॥ तिलकं स्वामिन स्तथेति॥ १६॥ तथा च शौनकी॥ नवग्रहमखे कार्यो मंडपः कुंडमेव वा स्थंडिलं रु
द्रकलशं त्विजां वरणादिकं॥ १॥ कुशंडी भूमिसंस्कार पूर्वं ध्रियणं तिका॥ स्थापनं च ग्रहादीनां पूजा
संक्षेपतस्ततः॥ २॥ श्रुता निधारणाद्याज्य भागांता च कुशंडिका॥ समिदाज्य चरूणां च होमस्तिलयवैः क्रमा
त्॥ ३॥ पंचांगं रुद्रजपनं तद्धोमश्च दशांशतः॥ ग्रहपूजार्घदानं च प्रार्थना चैव कल्पना॥ ४॥ वह्निपूजा बलिदा
नं पूर्णाहुतिस्ततः परं॥ स्विष्टकृत्पूर्विका वह्निर्होमांता च कुशंडिका॥ ५॥ होमस्य दक्षिणादीनां भूयस्या
श्चैव कल्पनं॥ अभिषेकादि मांगल्यं नार्यपुत्रान्वितस्य च॥ ६॥ प्रणीतानां विमोकादि शंयांता च कुशं २८०
डिका॥ विसर्जनं ग्रहादीनां पदार्थानामयं क्रमः॥ ७॥ ग्रहदीपिका॥ जयं वा विजयं वापि मंडपं कारये
त्सुनं॥ जयस्त्वष्टकरः प्रोक्तो विजयो दशहस्तकः॥ ८॥ आदित्यादिग्रहयज्ञमहं कुर्वेत्र कर्मणि॥ हवेदाधा

६२

यिवामीशामाचार्यत्वा महं वृणे॥ ९॥ अस्य यागस्य निष्पत्तौ भवंतोभ्यर्थिता मया॥ सुप्रसादं प्रकर्तव्यं
शांतिकं विधिपूर्वकं॥ १०॥ नित्ये नैमित्तिके काम्ये आनिवारिकमेव च॥ आवसथ्यो विधातव्यो मुक्तैकौ
च प्रसूतिकौ॥ ११॥ ताम्रकास्फाटिकाद्रक्तचंदना स्वर्णकादुभौ॥ राजताद्आयसः सीसात्कांस्यात्कार्या ग्रहाः
क्रमात्॥ १२॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृ
ताः॥ १३॥ वर्तुलं चतुरस्रं च त्रिकोणं बाणमेव च॥ दीर्घाकृति चतुष्कोणं पंचकोणं धनुस्तथा॥ १४॥ शू
७२ र्पध्वजपताकारे मंडलानि यथाक्रमं॥ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलके पुवा॥ १५॥ अरत्निमात्रं लिखेत्सूर्यं
सोमं च द्विगुणं लिखेत्॥ वेदांगुलं लिखेद्भौमं बुधं च चतुरंगुलं॥ १६॥ गुरुं षडंगुलं चैव लिखेच्छुक्रं नवांगु
लं॥ वेदांगुलं लिखेत्सौरिं सोमादप्यधिकांगुलं॥ १७॥ लिखेद्राहुं ततः केतुं ध्वजरूपमेव च॥ मध्ये तु भास्करं

हुं १ मध्य १

विंध्याद्भवानं पूर्वदक्षिणे ॥१८ दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु ॥ उत्तरेण गुरुं विद्यात्पूर्वेणैव तु
भार्गवं ॥१९ पश्चिमे च शनिं विद्याद्राहुं दक्षिणपश्चिमे । पश्चिमोत्तरतः केतुं स्थापयेद्वै शुक्लतंदुले ॥२०
शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ । प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः ॥२१ अ
ग्निरापो धरा विष्णुरिंद्र ऐंद्री प्रजापतिः । सार्पराज्ञी स्तथा ब्रह्मा प्रत्यधिदेवताः स्मृताः ॥२२ ईश्वरोमा तथा
स्कंदस्तथा नारायणः स्मृतः । ब्रह्मा शक्रो यमः कालश्चित्रगुप्तोऽधिदेवताः ॥२३ दिक्पालास्तु इंद्रो वै तद्
द्रोऽग्निर्यमनिर्ऋती । वरुणः पवनः सोम ईशो ब्रह्मा पृथिव्यपि ॥२४ इंद्रो ब्रह्मा यमो वायुर्वरुणो लोकपाल
काः । गणेशो दुर्गा क्षेत्रं च वास्तुर्वै मरुतस्तथा ॥२५ गणानां त्वेति मंत्रेण [illegible] स्थापयेद्[illegible] ॥ २६
[illegible] णनायकं । गौरीर्मिमाय मंत्रेण स्थापयेज्जगदंबिकां ॥२६ आकृष्णेनेति

मंत्रेण मध्ये संस्थापयेद्रविं । सर्वे मंत्राः प्रयोक्तव्या भूर्व्याहृतिपूर्वकाः ॥२७ आप्यायस्वेति मंत्रे
ण आग्नेय्यां वा शिलासुतं । अग्निर्मूर्द्धेति मंत्रेण दक्षिणे च धरासुतं ॥२८ उद्बुध्यस्वेति मंत्रेण ईशा
न्यां बुधमेव च । बृहस्पते अति मंत्रेण उत्तरे च गुरुं न्यसेत् ॥२९ शुक्रं ते इति मंत्रेण पूर्वे संस्थापये
त्कविं । शं नो देवीरिति मंत्रेण शनिं पश्चान्न्यसेत्ततः ॥३० कया न इति मंत्रेण सैंहिकेयं तु नैर्ऋते । के
तुं केतुं कृण्वन्नु मंत्रेण केतूंश्च वायव्यकोणके ॥३१ अग्निर्दक्षिणतः सूर्यादग्निं दूतमृचा न्यसेत् । रवेरुत्त
रतः शंभुः कद्रुद्रायेत्यृचा न्यसेत् ॥३२ आप उत्तरतः सोमादप्सु मे सोम इत्यृचा । सोमाद्दक्षिण
तश्चोमा गौरीर्मिमाय संन्यसेत् ॥३३ भूमिः पश्चिमतो भौमात्स्योना पृथिवि संन्यसेत् । भौमाच्च
दक्षिणे स्कंदो यदक्रंदन्नृचा न्यसेत् ॥३४ विष्णुः प्राच्यां बुधात्स्थाप्य इदं विष्णुर्ऋचा तथा । नासत्य

बुधात्यश्वात्रसहस्रेतिच मंत्रतः॥३५॥ इंद्रः पश्चाद्गुरोश्चैव इंद्रश्रेष्ठानीति मंत्रतः॥ गुरोः प्राच्यां न्यसेद्ब्रह्मा
मंत्रेण ब्रह्मणस्पते॥३६॥ इंद्राणीं पश्चिमे शुक्रादिंद्राणीमिति मंत्रतः॥ शुक्रात्पूर्वत इंद्रं तु त्रातो
रमिति मंत्रतः॥३७॥ प्रजापतिनैर्ऋते तु वानेर्ऋचा प्रजापते। परियिवो सं मंत्रेण ग्नानेराग्नेयतो यम॥
॥३८॥ सार्पराज्ञीं नैर्ऋते च राहोरायमृचान्यसेत्। कालो राहोस्तथैवान्यां कायमानश्चान्यसेत्॥
॥३९॥ ब्रह्माग्नेये तु केतूनां ब्रह्मजज्ञानमेतया। केतूनां नैर्ऋते नागे चित्रगुप्तस्य मित्यृचा॥४०॥ इंद्रं च
स्थापयेत्पूर्वे त्रातारमिति मंत्रतः॥ आग्नेये स्थापयेदग्निं त्वं नो अग्ने च तथा॥४१॥ दक्षिणे च यमः स्था
प्यायस्मिन्वृक्षस्तथापि च॥ नैर्ऋत्यां निर्ऋतिं देवं प्रतार्यं पुरश्चातथा॥४२॥ प्रतीच्यां वरुणः स्थाप्यस्त २८२
त्वा यामीति मंत्रतः॥ वायुः स्थाप्यस्तु वायव्य आनोमंत्रेति तत्र वै॥४३॥ उत्तरे स्थापयेत्सोमं वयं सोम

तिमंत्रतः॥ ईशाने स्थाप्य ईशानस्तमीशानमृचा तथा॥४४॥ पूर्वेशानकयोर्मध्ये ब्रह्माणं ब्रह्मण
स्पते। रुद्रं वा स्थापयेत्तत्र अस्मरुद्राश्च चा तथा॥४५॥ प्रतीचीवायव्योर्मध्ये स्योनेति पृथिवी तथा॥ लोक
पालास्ततः स्थाप्याः सूर्याद्युत्तरतस्तथा॥४६॥ ऐंद्रसानमिमिंद्रं तु ब्रह्माणं ब्रह्मणस्पते। यमं परेयिवांसं
च वायुं वायवितिन्यसेत्॥४७॥ वरुणं वरुणः प्रेति स्थापयेल्लोकपालकान्। ईशानेरीशानकोणे तु
केतुन्यश्वाग्निकोणके॥४८॥ आदित्याद्यान्तु नागे तु गणानां त्वा विनायकं। गणेशोत्तरतो दुर्गां जात
वेदसमंत्रतः॥४९॥ गणेशात्पूर्वभागे तु क्षेत्राधिपमनुत्तमं। क्षेत्रस्यपतिना स्थाप्य गणेशान्नैर्ऋतिप
रं॥५०॥ मंत्रेण वास्तोष्पतिना वास्तोष्पतिमनुत्तमं। दुर्गाया उत्तरे भागे मरुतो यस्य मारुतः॥५१॥ ग्रहस्य
ईशानकोणात्तु रक्षार्णं देवताः स्मृताः॥ अग्निः प्रजापतिः सोमो रुद्रो दितिर्बृहस्पतिः॥५२॥ सर्पाश्च पितर

श्चैव सर्गश्चैवार्यमा पित्रा। सविता त्वष्टाथवा युश्चेंद्राग्नी मित्र एव च॥५३॥ इंद्रो निर्ऋतिरापो विश्वेदेवा
स्तथैव च। विष्णुर्वसवो वरुणो ऽज एकपात्तथैव च॥५४॥ अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च।
नक्षदेवा इमे ना गि पूर्वादिक्रमयोगतः॥५५॥ प्रदक्षिणक्रमेणैव कृत्तिकाप्रभृतीनि च। ईशानकोणाद
स११४ रभ्यच्चतुर्दिक्षु विन्यसेत्॥५६॥ सप्त सप्त क्रमेण स्थापयेन्मंत्रपूर्वकं। क्रमेण कृत्तिकादीनां मंत्राञ्ज्ञे
या विजानता॥५७॥ अग्निर्ऋषिं प्रजापते आप्यायस्व समेतु ते कद्रुद्राय अदितिर्द्यौर्बृहस्पते तु कालिकः।
॥५८॥ उदीरतां तु भद्रो न स्तन्नुनीतीन सविता। इहेति वायवाया हिंद्राग्नी आ न एव च॥५९॥ त्रातारमिंद्रं प्र
तारिसमुद्रो मास एव च। तत्सवितुरिदं विष्णुर्यैनो दिवरुणः श्वान्नः॥६०॥ उत नोहिर्बुध्न्य पूषे षोपरेयिवांसमि २८३
त्यपि एते मंत्रैर्यथोक्तैश्च स्थापयेद्दक्ष देवताः॥६१॥ एवं ग्रहासनं कृत्वा संस्थाप्येशानकोणका त्रा रुद्रकु

नं यथोक्तं वै स्थापयेत्पूर्ववत्ततः॥६२॥ तत्र देवत्रयं स्थाप्यं ब्रह्मविष्णुशिवात्मकं। ब्रह्मणो थो इदं कद्वि
मंत्रा देवत्रयस्य हि॥६३॥ पंचांगं चैव रुद्रं च जपेन्मंत्रं तदाखिलं। आवाहनं ततः कुर्यात्सूर्यादीनां क्रमे
ण वै॥६४॥ प्रतिष्ठापनमंत्रेण प्रतिष्ठापनमुत्तमं। तदस्त्विति च मंत्रेण प्रतिष्ठापनमाचरेत्॥६५॥
न्यग्रोधोदुंबराश्वत्थचूतजंबूदलानि च। अभिषेके सदा श्रेष्ठाः कथ्यंते पंचपल्लवाः॥६६॥ अर्कः पला
शः खदिरोपामार्गोथ पिप्पलः। उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥६७॥ अष्टोत्तरं सहस्रं वा श
तमष्टोत्तरं तथा। अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत्॥६८॥ अलाभे तु प्रकर्तव्याः सर्वाः पालाश
वृक्षजाः। होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः॥६९॥ एकैका च घृताहुतिरेकैका चरोस्तथा। ए
कैनैव च मंत्रेण देया चैकाय ग्रहं प्रति॥७०॥ पर्वप्रमाणमाहुत्यां पंचांगुलिगृहीतया। दध्याज्यक्षीरसंयुक्ता

न्सयवान्तु कुर्यात्तिलान् ॥७१॥ द्राक्षे स्तु पूगनारिंगं जंबीरं बीजपूरकं। उत्तनीनालिकेरं च दाडिमानि यथा
क्रमं ॥७२॥ पश्चादग्रे यजमानस्ततस्त्यागं समाचरेत्। मंत्रोक्तदेवतानाम च तुर्थ्यंतमिदं पदात् ॥७३॥
यजमानः सपत्नीको ग्रहस्रजां समाचरेत्। भास्करांगारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ ॥७४॥ पीतौ बुधौ
गुरुश्चैव शेषाः कृष्णा ग्रहाः स्मृताः। गंधादिनि यथावर्णैर्नाममिस्तु न मोंतगे ॥७५॥ यथावर्णं प्रदातव्यं
वासः पुष्पं विलेपनं। युग्मैकेनाथवा सर्वौ कुलकवर्णैश्च राकितः ॥७६॥ रक्तं च करवीरं च तद्वेतं च कु
सुंभकं। चंपकं शतपत्रं च जातीपुष्पं शमी तथा ॥७७॥ पुष्पं चागस्त्यकं प्रोक्तं विचित्राणि यथाक्रमं। रवेः
कुंदरकं धूपं शशिनस्तु घृताकृतं ॥७८॥ भौमे सर्जरसं चैव त्वगरुं च बुधे स्मृतं। गुरोश्चैव तु रक्षं च सु २८४
के बिल्वागुरुं तथा ॥७९॥ गुग्गुलुं मंदवारे तु लाक्षा राहोश्च केतवे। कुंदरादिक धूपानाम भावे गुग्गुलः

स्मृतः ॥८०॥ सर्वेषां चैव देवानां गायत्र्या धूपमाहरेत्। नववर्त्तियुतं दीपं घृतेन परिपूरितं ॥८१॥ प
त्रं पुष्पं फलं तोयं रत्नानि विविधानि च। गृहाणार्घं मया दत्तं देहि मे वांछितं फलं ॥८२॥ आदित्याद्याग्र
हाः सर्वेपी मे ये त्र प्रतिष्ठिताः। ते गृह्णंतु मया दत्तमिममर्घं नमो नमः ॥८३॥ नागवल्लीदलं दिव्यं पूगीफल
समन्वितं। कर्पूरेण समायुक्तं तांबूलं प्रतिगृह्यतां ॥८४॥ गुडोदनं रवेर्दद्या सोमाय घृतपायसं। लोहित
यह विष्यान्नं बुधे क्षीरोदनं विदुः ॥८५॥ दध्योदनं गुरोर्दद्या शुक्राय च घृतौदनं। मिश्रितं तिलमुद्गैश्च नैवे
द्यं तु शनैश्चरे ॥८६॥ राहोर्मांसोदनं ज्ञेयं केतोश्चित्रोदनं तथा। आदित्यादिग्रहाणां च पूजा विस्तरतः क्र
मात् ॥८७॥ आयुर्विद्यां धनं दत्त यशः शौर्यं च पुष्कलं। पुत्रान्दत्त धनं दत्त सर्वान्कामांश्च दत्त मे ॥८८॥ आ
दित्ये कपिलो नाम पिंगलः सोम उच्यते। धूमकेतुस्तथा भौमे जठरा ग्रे बुधः स्मृतः ॥८९॥ गुरोश्चैव शिखी

नामस्तुके नवतिराटकः॥ शनैश्चरे महातेजा राहोः केतोर्हुताशनः॥ [illegible]॥ तत्पुरुषाय विद्महे वक्रतुंडा
य धीमहि। तन्नो दंती प्रचोदयात्॥ [illegible]॥ सुभगायै विद्महे काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्॥ [illegible]॥
रूपं देहि जयं देहि भगं भगवन्देहि मे। पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ [illegible]॥ रूपं देहि जयं देहि भ
गं भगवति देहि मे। पुत्रान्देहि इति पूर्ववत्॥ [illegible]॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतं। तेन त्वामभिषिं
चामि पावमान्यः पुनंतु ते॥ [illegible]॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिंद्रश्च वायुश्च भगं सप्त ऋ
षयो ददुः॥ [illegible]॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि। ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा॥ [illegible]॥
सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥ [illegible]॥ प्रद्युम्नश्च २८५
थानिरुद्धश्च भवंतु विजयाय ते। आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥ [illegible]॥ वरुणः पवनश्चैव

धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिता ह्येते दिक्पालाः पांतु वः सदा॥ [illegible]॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पु
ष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शांतिर्माया निद्रा च भावना॥ १॥ एतास्त्वामभिषिंचंतु पुष्टिः कीर्तिः
क्षमा तथा। आदित्यश्चंद्रमा भौमो बुधो जीवः सितोर्कजः॥ २॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च पू
जिताः। देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ ३॥ ऋषयो मुनयो गावो देवमातर एव च। देवपत्न्यो
सना १ द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ ४॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च। औषधानि च रत्ना स्त्रा ५
नि कालस्यावयवाश्च ये॥ ५॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एतास्त्वामभिषिंचंतु सर्वका
मार्थसिद्धये॥ ६॥ धेनुः शंखस्तथानड्वान्हेमवासो हयस्तथा। कृष्णा गौः शय्या संज्ञा गएता वै दक्षिणाः स्मृ
ताः॥ ७॥ धेन्वादीनि न वैतानि शक्तिश्चेत्प्रददेत्तदा। हिरण्येन समाः कुर्याद्यजमानेन दक्षिणा॥ ८॥

चा१ आर्यायचगांदद्याद्वस्त्रयुग्मंचकांचनं।गजाश्वादीनिवैदद्याद्गुरुर्वायेनतुष्यति॥१०॥धेन्वाद्य
नावेदद्याद्वैकांचनंसर्वकामदं।ऋत्विग्भ्यश्चापिसर्वेभ्योगुरवेचयथाक्रमं॥११॥स्थंडिलेविघ्नरा
जश्चगौर्याश्चस्थापनंततः।वरणंब्राह्मणानांचततोमद्रासनक्रिया॥१२॥स्थापनंकलशानांच
तेषुमुद्रापनादिकं।कुशंडीवरूपाकांतालघुपूजाद्वयोरपि॥१३॥श्रिता।भिषारणाद्याज्यभागं
ताचकुशंडिका।मद्रासनोपविष्टस्यकल्केनोद्वर्तनंततः॥१४॥गंधैर्मूर्द्धिविलेपश्चदक्षिणास्वस्ति
वाचनं।कलशैस्नपनंतस्यतैलहोमश्चमस्तके॥१५॥संकल्पश्चैवपूजायाउपस्थानंपृथक्पृथक्।
कुशंडीखिष्टकृत्पूर्वायावह्निविसर्जनं॥१६॥××यजमानिकुर्यात्स्नानंवरोराकृतयश्चषट्।विना २८६
यकोविकापूजाप्रणामोर्घ्यस्तथांजलिः॥१५॥××होमस्यदक्षिणानांचकल्पनामंगलक्रिया।व

लिदानंवरोःशेषाश्चत्वरेसूर्पमोचनं॥१७॥बलिंशृक्कंलिमंदेवाआदित्यावसवस्तथा।मरुतोथाश्वि
नौरुद्राःसुपर्णाःपन्नगग्रहाः॥१८॥असुरायातुधानाश्चपिशाचामातरोनगाः॥३॥किन्नरायक्षवेताला
योगिन्यःपूतनाशिवाः॥१९॥जंभकाःसिद्धगंधर्वामालाविद्याधरानराः।दिक्पालालोकपालाश्चयेच
विघ्नविनायकाः॥२०॥जगतांशांतिकर्त्तारोब्रह्माद्याश्चमहर्षयः।माविघ्नोमाचमेपापंमासंतुपरिपंथि
नः॥२१॥सोम्यानवंतुतृप्ताश्चभूताःप्रेताःसुखावहाः।इतिपूर्वोमुखःपूर्वकोणेसूर्पमथोत्सृजेदिति॥२२
ग्रहदीपिकायां॥चतुरस्रामवेदीचतुर्हस्तासमंततः।कुंडस्येशानदिग्भागेद्विहस्तंपीठमाचरेत्॥२
कुंडमानेनकर्त्तव्यंग्रहपीठंविचक्षणैः।किंचिन्मध्योन्नतंकुर्याद्गुर्वायोद्वादशांगुलं॥२॥मेखलाद्वयसं
युक्तंगोमयेनोपलेपितं।त्रिंशांगुलंतुकर्त्तव्यमंतरंग्रहपीठयोः॥३॥वायव्येमद्रपीठंतुग्रहपीठप्रमा

णकं। कुर्यान्नैरृतिभागे तु कुंडं हस्तप्रमाणकं॥४॥ गणेशं विकयोः पीठेत्राग्नेय्यां द्वादशांगुले। गणपा
विकयोर्मध्ये कुंडं स्यात्र्यस्रांगुलं॥५॥ गणपाविकयोर्मध्ये नंदत्र्यंगुलं। नंद्यस्थंडिलयोर्मध्ये त्रि
शांदैव नवांगुलं॥६॥ नंद्यकुंभं सवस्त्रं च सरत्नां नः सपल्लवं। पुष्पचंदनसंयुक्तं सर्वौषधिसमन्वितं॥७॥ स
द्विद्विसमायुक्तं पीठस्येशानतो न्यसेत्। ससुवर्णं त्रयीयुक्तं कलशं सम्यगर्चयेत्॥८॥ व्रीहयो यव गोधू
षा माश्च मुद्गा माषाः प्रियंगवः। तिलाश्च सप्तमाः प्रोक्ताः सप्तधान्यमिति क्रमात्॥९॥ दधिदूर्वाशमीपत्रकु
सुमाक्षतचंदनैः। सिद्धार्थादिकपूर्णं तु कृत्वा पात्रं कृतांजलिः॥१०॥ चंदनागुरुकर्पूरकस्तूरीकुंकुमानि
च। सुगंधद्रव्यमित्येतद्यक्षकर्दममुच्यते॥११॥ व्रीहितंडुलसंपूर्णं दूर्वांकुरशमीयुतं। कांस्यपात्रं सतांबू २८७
लमाकुर्वंद्दीपनं बुधाः॥१२॥ ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः। प्रथमोयुतहोमः स्याल्लक्षहो

होमस्ततः परः॥१३॥ तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः। सर्वेशांतिषु कर्त्तव्यो ग्रहयज्ञः प्रपूर्वकः
ति॥१४॥ इति सग्रहविनायकशांतिप्रयोगः॥ अथ पुनराधाननिमित्तानि। दैवयाज्ञिकाः उपघातः क्रिया
लोप उपेक्षा च प्रमादतः। चतुर्विधमिदं प्रोक्तं पुनराधानकारणं॥१॥ प्रसिद्धकर्मणां लोप उपघातोंत्यजा
दिना। उपेक्षणं प्रवासादि प्रमादोग्नेरधारणं॥२॥ स्पृष्टोग्निर्यदि चांडालैरुदक्यादिभिरेव वा। उपघातेषु
सर्वेषु पुनस्त्वेति समिंधनं॥३॥ यजमानश्च पत्नी च उभौ प्रवसितौ यदा। आहोमान्न निवर्त्तेत पुनराधा
नमर्हति॥४॥ विनाग्निनिर्यदा पत्नी नदीमंबुधिगामिनीं। अतिक्रमेत्तदाग्नीनां विनाशः स्यादिति श्रुतिः॥५॥
पत्नी सीमामतिक्रांता यजमानो गृहे यदि। अग्निहोमाद्यदिना गच्छेत्पुनराधानमर्हति॥६॥ एकाकिनी यदा पत्नी
वह्निमादाय गच्छति। तत्र नाशोपरेखां कुर्वंत्याघातेन दुष्यति॥७॥ रजोदोषे समुत्पन्ने सूतके मृतकेपि वा।

प्रवसन्नग्निमानग्निः पुनराधानमर्हति ॥७॥ त्रयीमुक्त्वा तु यो लोभात्प्रवसन्पर्वसंधिषु ॥ करोति पुनराधानं
प्रायश्चित्तमृणाहते ॥८॥ नाग्निकार्यस्य वेलायां प्रवसेन्न च पर्वसु ॥ न विना च निमित्तेन क्रीडाद्यर्थं तु न व्रजेत्
॥९॥ इत्यादीनि निमित्तानि पुनराधानमाधानवद्विधेयं ॥ आधानवत्पुनराधानमित्युक्तत्वात् ॥ राष्ट्रदेशादि
भ्रंशेन तादृशं ॥१०॥ इति दशमः खंडः ॥ ॥ इति श्रीमत्सकलविद्वज्जनमंडलीमंडनद्विवेदिश्रीश्रीपतित
सुतद्विवेदिश्रीलक्ष्मीजीतत्तनयनारायणविरचिते गृह्यप्रदीपके भाष्ये पंचमोध्यायः परिशिष्टरूपः समा
प्तः ॥ ॥ देवाधिदेवं गरुडाधिरूढं विश्वस्य बीजं करुणानिधानं ॥ लक्ष्मीनिवासं नवनाशहेतुं वंदे नृसिंहं भु
वनैकनाथं ॥१॥ अथ शांकरादीनां त्रयाणां व्रतानां पूर्वोक्तानां विशेषविधानार्थं षष्ठाध्यायं चिकीर्षन्नाचा २८८
र्यः पुनः प्राह ॥ अथातइत्यादिना ॥ अथातो ब्राह्मणं ब्रह्मऋषिं ब्रह्मयोनिमिंद्रं प्रजापतिं वसिष्ठं वामदेवं

कहोलं कौषीतकिं महाकौषीतकिं सुयज्ञं शांखायनमाश्वलायनमैतरेयं महैतरेयं कात्यायनं शाट्या
यनं शाकल्यं बभ्रुं बाभ्रव्यं मंडुं मांडव्यं सर्वानेव पूर्वाचार्यान्नमस्य स्वाध्यायारण्यकस्य नियमानुदाह
रिष्यामः ॥ अथातः प्रायश्चित्तरूपशांत्यध्यायकथनानंतरं ब्रह्मादिपूर्वाचार्यानृषीन्नमस्य नमस्कृ
त्य स्वाध्यायारण्यकस्य स्वाध्यायलक्षणस्य आरण्यकस्य नियमान् नियमविशेषानुदाहरिष्यामः क
थयिष्याम इत्याचार्यप्रतिज्ञा ॥ ब्रह्माणं सृष्टिकर्तारं ॥ ब्रह्मऋषिं नारदादिकं ॥ ब्रह्मयोनिं सनत्कुमारादिकं ॥
इंद्रं सुरेश्वरं ॥ प्रजापतिं प्रजापालकं वसिष्ठं ॥ वसिष्ठादयो मांडव्यांताः प्रसिद्धा ऋषयः ॥ अथ व्रतादेश
नमित्यारभ्याथातो दंडनियमा इत्येतत्पर्यंतं संक्षिप्योक्तं पुनर्विशदीकरोत्याचार्यो होरात्रमित्यादि
ना ॥ एतेषामपि त्रयाणां व्रतानामाचरणमुत्तरायणे शुक्लपक्षे च विधेयं ॥ उदगयने शुक्लपक्षे इति पूर्वेण

कृत्वात्॥ अहोरात्रं ब्रह्मचर्यमुपेत्याचार्यो मांसाशी॥ आचार्यो वक्ष्यमाणश्राद्धकरादिकर्मकर्त्ता पिता वान्यो
वा अहोरात्रं एकाहं ब्रह्मचर्यं उपेत्य प्राङ् मांसाशनरहितो वक्ष्यमाणं कर्म कुर्यात्॥ इणगतौ। येगत्यर्थास्ते
प्राप्त्यर्था इति न्यायात् प्राप्येत्यर्थः॥ त्रिरात्रे निर्वृत्त इति प्रागुक्तत्वात् त्रिरात्रं वा ब्रह्मचर्यं कृत्वा श्राद्धकरादीनां व्र
तानामुपदेशं कुर्यात्॥ तानि च व्रतान्यनध्यायेषु न कार्याणि। चतुर्दशीं परिहाप्याष्टमीं चेत्यादीन्युक्तत्वात्।
पुनरनध्यायविशेषानाह॥ ७॥ आमपिशितं चंडालं सूतिकां रजस्वलां तेदनिम पहस्तकदर्शनान्यन
ध्यायकानि॥ आमपिशितादीनां दर्शनानि अनध्यायकानि अनध्यायकारणानि जानीयात्। आम
पिशितं अपक्वमांसं। आमपिशितमित्युक्तत्वात् पक्वेनानध्यायः। चंडालो अंत्यजः। सूतिका प्रसूता आदशाहा- २८५
त्। रजस्वला आत्रिरात्रात्। तेदनिं लोहितं रक्तमित्यर्थः॥ अपहस्त एव अपहस्तकः। अपगतो हस्तो यस्य सः

छिन्नहस्त इत्यर्थः॥ अपहस्तकः छिन्नकर्णादीनामुपलक्षणार्थः॥ एतेषां दर्शनान्यनध्यायकानि आरंभ
काले। रहस्यं श्रावयिष्यन् कालनियममित्युक्तत्वात्॥ ७॥ शावरूपाणां च। सिंहादयः शावरूपा लोके उच्य
ते। शाशकोमृगपशुर्व्याधिः सिंहः श्वा गर्दभो एकः। शावदर्शनं तेषां रहस्ये वर्जयेत्सदेति पाराशरः॥ एते
॥७॥ षां दर्शने चानध्यायः॥ यान्यास्येन प्रविशेयुः। यानि पश्वादीनि आस्येन मुखेन प्रविशेयुः बिलप्रवेशं
कुर्वंति तेषां दर्शने चानध्यायः॥ ते च सर्पादयः प्रसिद्धाः॥ ७॥ वांतश्च [illegible] श्मश्रुकर्मी [illegible] वांतं छर्दनं कृत
येन सः॥ श्मश्रुकृतं कर्म येन तस्यानध्याय आस्नानात्। केशश्मश्रुनिवापनं आस्नानादित्युक्तत्वात्॥ स्कां
देनागरखंडे। मैथुने शयने वांते ज्वरे स्नाने च भोजने। श्मश्रुकर्मणि चोत्सर्गे नाधीयीत कदाचनेति॥ ७॥
मांसाशन श्राद्धसूतकभोजनेषु॥ मांसाशने खादने श्राद्धभोजने सूतकभोजने एतेषु अनध्यायः॥ नो

जनशब्दः प्रत्येकमभिसंबध्यते। एकोद्दिष्टश्राद्धभोजने दशाहमघसूतकेषु चैतत्सुकलात्॥ ॥ ग्रामाध्ययना
नंतरितान्यहानि। ग्रामाध्ययने ग्राममध्याध्ययने या निरंतराहानि दिवसाः अंतरितानि शवादिनातेष्वनध्या
यः॥ अंतःशवे ग्रामस्तुकलात्। ग्रामारण्ये अरण्यग्रूतेवा ग्रामेप्यनध्ययनं। श्मशानांतःशवसगोत्रे ग्रा
मे कोविदारकपित्थबिनीतककायायामनध्याय इति विष्णुः॥ ॥ त्रिरात्रोऽनवक्रमः। अनवक्रमः अस
वधानो ज्वरादिना यदा तदा त्रिरात्रोऽनध्यायः। व्याधिनापरिभूतो यत्राधिनावासमाहितः। तस्य त्रिरात्रो
नध्यायः सोऽप्येकेनमते तथेति काश्यपाजिनिः॥ ॥ पराभिमृष्टः। परैः शत्रुभिः अभिमृष्टः शोधितः द्रव्यह
रणादिना शुद्धः संपादितः संमार्जितस्तदाध्ययनं न॥ ॥ उपपर्वणामह्न उत्तरार्द्धानि च। अर्द्धशब्दः २९०
प्रत्येकमभिसंबध्यते। पर्वणाममावास्यापौर्णमासीनां अह्नः दिवसस्य उपार्द्धानि पूर्वार्द्धानि च उर्द्धा

रूपाणि तेष्वनध्यायः। तथा पर्वणामह्नो दिवसस्योत्तरार्द्धानि प्रतिपदादिरूपाणि तेष्वनध्यायः। च
कारादष्टम्यादिष्वनध्यायः। चतुर्दश्यमावास्ययोरष्टकासु चैतत्सुकलात्॥ ॥ अग्निविद्युत्स्तनयित्नुव
र्षमहाभ्रप्रादुर्भावात्। प्रादुर्भावो जननं तस्मादनंतरं अनध्यायः। अंतरिक्षादिति शेषः। अंतरिक्षात्
अग्नेः प्रादुर्भावः उत्पत्तिः। तथा विद्युदंतरिक्षात्। स्तनयित्नुर्मेघः। वर्षा वृष्टिः। महाभ्राणि महावृष्टिः। एतेषां
प्रादुर्भावादनंतरं यावत्कालमेतेषां स्थितिस्तावत्कालमनध्यायः। यावत्कालमित्यधिमसूत्रात् सिंहा
वलोकनन्यायेनाप्यनुषज्यते। एतद्वर्षाकालव्यतिरिक्ते काले। वर्षास्वन्यत्र गर्जनस्त्यादिस्मृतत्वा
त्। तथा पर्वणि परिशिष्टा तावदनध्यायो गोशृंगे धूमदर्शने विद्युद्दग्निपांसुशोणितवर्षणे संध्याग
र्जने स्वमवर्षे समुदुर्दिने दिवा चौर्यप्रपतने हसने च यावत्कालमिति॥ ॥ वाते च शर्करा कर्षिणी यावत्का

लं।शर्कराःपांसवस्तानाकर्षणशीलिवातेवायौवातिसतियावत्कालंपांसूनाकर्षणंतावत्काल
मनध्यायः॥छ॥यच्छब्दस्तच्छब्दाकांक्षीइतिन्यायात्॥छ॥ ॥प्रथमःखंडः॥छ॥ऊर्ध्वमाषाढ्याश्चतुरोमासानना
धीयीत।आषाढ्या ऊर्ध्वं चतुरोमासान् नअधीयीतअध्ययनंनकार्यंउपनिषदः॥छ॥अत्यंतंवाशाक्वर्यइति
नियमाःशाक्वर्येशाक्वरीव्रतेइतिपूर्वोक्तानियमाःअनध्यायरूपाअत्यंतंअतिशयेननवर्तंतेइत्यर्थः॥व्राति
कादिषुव्रतेषुतथानयथाशाक्वरीव्रते॥छ॥प्राग्ज्योतिषमपराजितायांदिशिपुण्यमुपगम्यदेशं।अपरा
जितायांऐशान्यांदिशिप्राक्पुरस्तात्ज्योतिर्यस्मिन्तंपुण्यंपवित्रंदेशंप्रदेशमुपगम्यगत्वा॥व्याकरा
ने दिकंकर्मकार्यं।ततःसंवत्सरेपूर्णेउद्दीक्षणिकांकृत्वात्रिरात्रंतेएकरात्रंतेवाग्रामात्निष्क्रम्यखंडा २६१
२ लादीनांवेष्टेत।प्रागुदीच्यांदिशिग्राममुपनिष्क्रम्यशुचौदेशेप्राङ्मुखआचार्यउपविशतीसुक्तंप्राक्।तथा

त्रिरात्रेनिर्वृत्तेइत्युक्तंप्राक्॥छ॥अनुदितउदकस्पर्शनं।अनुदितेआदित्येउदकस्पर्शनंसांत्यर्थंक
र्तव्यं॥छ॥मंडलप्रवेशश्चांजनगंधिमित्येतयर्चा।चकारात्अनुदितेआदित्येआंजनगंधिंइत्येतयाऋ
चामंडलप्रवेशःकार्यः।मंडलकरणंचोदकधारयातूष्णींअनुक्तत्वात्।देवमुनिरण्यान्यनुष्टुप्।आंज
नगंधिंसुरभिंइति॥छ॥मंडलंतुप्राग्द्वारमुदग्द्वारंवाजनाश्रीयमसंप्रमाणमसंबाधं।उक्तश्चमंडलकर
णप्रकारेप्राग्द्वारंउदग्द्वारंवामंडलंकार्यं।किंविशिष्टंजनैःलोकैःआश्रीयंमुख्यंस्तुत्यमित्यर्थः।एवंस
मंकार्यंयथालोकास्तुतिंकुर्वंति।पुनःकिंविशिष्टं।असंप्रमाणंप्रमाणरहितं।अर्थात्परिमाणमितिका
त्यायनोक्तेः।पुनःकिंविशिष्टं।असंबाधंसंबाधारहितंमृदित्यर्थः।एवंमंडलंकार्यंयथासर्वेशिष्या
उपवेष्टुंशक्ताभवंतितथाकार्यं॥छ॥आर्षंमंदिव्यमुत्तरशांतिः।उत्तरशांतिःउत्तरानंतराशांतिःवामदे

व्यंकयानश्चित्रइतितमभिव्याप्यइतिआवामदेव्यं।प्रणवादिवामदेव्यांतोमंत्रगणोयत्र।एतादृशंशांति
मंत्रगणंजपन्नित्यर्थः।ॐकारोमहाव्याहृतयइत्यादिकंवक्ष्यमाणंज्ञेयं।तस्मिन्शांतिपात्रेदूर्वांकुराःस्थाप्याः
दूर्वाकांडवतीष्वक्षितिवक्ष्यमाणत्वात्।सुगंधद्रव्यंचस्थाप्यंआंजनगंधिमित्यत्रलिंगात्।सुगंधद्रव्यंयक्ष
कर्दमः।कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यतु।चंदनस्यत्रयोभागाःशशिनस्त्वेकएवहि।यक्षकर्दम
इत्येषसमस्तसुरवल्लभइतिदानखंडे।पूर्वसूत्रेचकारग्रहणात्।आंजनगंधिमित्येतयावाशांतिपात्रस्था
पनं।।छ।।पुनःप्राध्येषणंचअत्रशाकल्यादिव्रतेप्रणवादिव्याहृतिमारभ्यगायत्र्यादिदशर्चांपुनःप्राध्ये
षणंप्रकर्षेणाध्ययनंप्रधानोत्तरंपुनर्विधेयं।।छ।।बहिर्मंडलस्याभिरावस्य।मंडलाद्बहिःइतिबहिर्मंडलंत २९२
त्रस्थास्तानिःमंडलाद्बहिःस्थितानिरद्भिःतत्रशौचाःआचम्यपुनःशुध्यर्थंशांतिपात्रादाचमनंविधेयं।

अयमर्थः।शारीरावश्यकत्वान्मूत्रपुरीषाद्युत्सर्गेकृतेबहिर्मंडलाल्लौकिकोदकैःशुद्धिंकृत्वाकर्मशुध्यर्थं
शांतिपात्रोदकेनाचमनंविधायशेषमध्ययनंविधेयं।।छ।।प्राधीयीरन्कृतशांतयः।।छ।।कृताशांतिर्दशर्चि
यैःशिष्यैस्तेततःप्राधीयीरन्प्रकर्षेणाध्ययनंकुर्युः।।छ।।शांतिपात्रोपघातेप्रोक्षणंप्रायश्चित्तिः।शां
तिपात्रस्योपघातेभंगेशांतिपात्रस्यप्रोक्षणंप्रायश्चित्तिःप्रायश्चित्तं।अनुक्तत्वात्यज्ञतेविदितिष्टचेन
प्रोक्षणं।पुनरांजनगंधिमित्येतयाशांतिपात्रस्थापनंपूर्ववत्।।छ।।प्रोक्षणंतुहिरण्यवतापाणिना
दर्भपिंजूलवता।वा।तच्छांतिपात्रस्यप्रोक्षणंहिरण्यवतासुवर्णयुक्तेनहस्तेनदर्भपिंजूलवतादर्भश
लाकायुक्तेनहस्तेनवाकार्यं।वाशब्दोविकल्पार्थः।।छ।।इतिनाभितं।इतिपूर्वोक्तंसर्वंअनध्यायाद्यारभ्य
मंडलादिकरणंनाभितंपरिभाषितंज्ञेयंइत्याचार्योक्तिः।।छ।।द्वितीयःखंडः।।२।।अथप्रविश्यमंडलं।अ

थमंडलादिकरणानंतरं आंजनगंधिमित्येतया मंडलं प्रविश्य प्रवेश्य प्रवेशं कृत्वा ततः॥छ॥ प्राङ्मु
ख आचार्य उपविशेत्तु उदङ्मुखा दक्षिणतश्चेतरे यथाप्रधानं। गुरुशिष्यैर्मंडलप्रवेशे कृते सति मंड
लमध्ये आचार्यो गुरुः प्राङ्मुख उपविशति। इतरे शिष्याः गुरोर्दक्षिणतः दक्षिणपार्श्वे उदङ्मुखा य
थाप्रधानं यथाप्राधान्येन वृद्धानुक्रमेणोपविशंति॥छ॥ असंभवे सर्वतोमुखाः। असंभवे उदङ्मुखो
पवेशनस्थलाभावे शिष्याः सर्वतोमुखाः सर्वदिङ्मुखा वा उपवेशनीयाः। आचार्येण तु प्राङ्मुखतयैवो
पवेष्टव्यं। असंभवे सर्वतोमुखा इति शिष्याणामेवोक्तत्वात् तथा च यापदि। एकः आ(?)ता दक्षिणतो निषी
देद्वौ वा। भूयांसस्तु यथावकाशमितु कृत्वात्व। इदं चोपवेशनादिकं सर्वमपररात्रे उक्तायस्नानादिनि २८३
त्यक्रियां निर्वर्तनांता विधेयं आ अरुणोदयात्। प्रतीक्षेरन्नुदयमादित्यस्येति वक्ष्यमाणसूत्रत्वात्॥छ॥ प्र

त३

तीक्षेरन्नुदयमादित्यस्य। साचार्यास्ते सर्वे शिष्याः आदित्यस्य सूर्यस्योदयमुद्गमं प्रतीक्षेरन् सूर्योदयप्र
२८ तीक्षां कुर्युः आसीरन्॥छ॥ विज्ञाय चैनं दीधितिमंतं ते सर्वे एनं सूर्यं दीधितिमंतं किरणयुक्तं विज्ञाय ज्ञा
त्वा वक्ष्यमाणं कुर्युः। दीधितयः गभस्तयः इति रश्मिनामसु पठितत्वात् तद्वंतं॥छ॥ अधीहि भो इति दक्षिणे
दक्षिणं सव्येः सव्यं दक्षिणेतरैः पाणिभिरुपसंगृह्य पादावाचार्यस्य। आचार्येण अधीहि भो इत्युक्ते सति स
र्वे शिष्याः आचार्यस्य पादौ चरणौ स्वकीयैर्दक्षिणैः पाणिभिर्हस्तैर्दक्षिणमाचार्यस्य चरणं उपसंगृह्य त
था स्वकीयैः सव्यैर्हस्तैराचार्यस्य सव्यं चरणमुपसंगृह्य संग्रहणं कृत्वा ततः। किं विशिष्टैः पाणिभिः। दक्षि
णेतरैः दक्षिण उत्तर उपरि येषां तेन तथाविधैः। अधीहि भो इत्युक्त्वाचार्य उंकारं प्रचोदयेदिति पूर्वमु
क्तत्वात्। असावहं भो इत्यात्मनो नामादिश्य व्यस्तपाणी इत्युक्तत्वाच्च॥छ॥ निर्णिक्तां तथाध्यायशांतिपा

स१

त्रे दूर्वाकांडवतीष्वप्सु पिन्वमानैः पाणिभिः प्राधीयीरन्॥ अथानंतरं॥ अपिन्वमानैः पाणिभिरिति द्विती
यार्थे तृतीया॥ आचार्यः स्वौ हस्तौ निर्णिक्तौ सार्द्रौ शांतिपात्रे पूर्वं स्थापितदूर्वाकांडवतीषु दूर्वांकुरवतीषु
अप्सु उदके आधाय संस्थाप्य ततः शिष्याणां पाणिभिः पाणीन् हस्तान् सार्द्रान् संस्थाप्य प्राधीयीरन् आध्य
कुर्युः यनं कुर्युः॥ किंविशिष्टैः पाणिभिः। अपिन्वमानैः अपिन्वमानान् असंस्पृष्टान्॥ अयमर्थः। आचार्यः स्वे हस्ते
तेषां हस्ते स्वपात्रमाधाय प्राध्ययनं कारापयति॥ एषविधिर्यदि तु स्नायेरन्नेक एषामस्पृन्यं शांतिभाजनं
कुर्यात्॥ एषविधिः पूर्वोक्तः सर्वेषां साचार्याणां छात्राणां कांस्यरूपे शांतिपात्रे प्रक्षेपणरूपः। यदि तु य २९४
दि ये तु स्नायेरन् परिश्रमयुक्ता भवेरन् शिष्यास्तदा एषां शिष्याणां मध्ये एकः कश्चित् शांतिभाजनं त्रा
तिपात्रं अस्पृन्यं हस्ते न कुर्यात्। आचार्यस्तु नियत एव उत्तरतोऽग्नेः कांसमणिं स्थापयेति आरण्यके उक्तत्वात्।

हस्त २

कांस्यपात्रे मणिः पाषाणः स्थाप्यः। दधिमधुसंयुक्ताः सक्तवो मंथसंज्ञकः स्थाप्यः॥ दधिमधुन्यासुप
मंथ्ये तु उक्तत्वात्॥ छ॥ अध्यायाद्यंतयोश्च सर्वैः प्राधीयीरन्निति पूर्वमुक्तं तत्र विशेषविधानमाह। सर्वैः साचा
र्यैः शिष्यैः अध्यायाद्यंतयोः अध्यायस्यादिः अंतश्च तयोः खंडफक्किकावा शांतिपात्रे हस्तानाधाय श्र
वणं कुर्युः॥ शिष्यैर्यथा श्रोतुं शक्यं भवति तथाचार्येण पठनीयं। तद्यथा॥ प्रजापतिर्वै संवत्सरः॥ १ नैवं विदु
षा वतर्द्वं॥ २ हिंकारेण प्रतिपद्यत एतदुक्थमित्यादि॥ १॥ छ॥ नत् संततमव्यवछिन्नं भवति। तत् अध्याया
द्यंतरूपं अध्ययनं संततं निरंतरं अव्यवछिन्नं अवच्छेदरहितं भवति इति शेषं एतत्पूर्णपाठशाक्तौ।
॥छ॥ अथ शांतिः। अथानंतरं शांतिरुच्यत इति शेषः॥ छ॥ ॐकारो महाव्याहृतयः सावित्री रथंतरं बृह
द्वामदेव्यं पुनरादायं ककुक्कारमिति। ॐकारः प्रणवस्त्रिमात्रः। ॐकारः प्लुतस्त्रिमात्रः प्लुतो मकारांतो

पा

वातंप्रणवइत्याचक्षते इतिसंज्ञेसूत्रितं।सउमितिप्रस्वरितित्रिमात्रइतिर्षदे।महाव्याहृतयश्चतस्रः
प्रसिद्धाःभूःभुवःस्वःभूर्भुवःस्वरित्येताःसावित्री गायत्रीसाचपादशोर्द्धर्चशोनवानेपठिता।अथास्मै
सावित्रीमन्वाहतत्सवितुर्वरेण्यमित्येतांपच्छोर्द्धर्चशोनवानमितिपूर्वमुक्तत्वात्।रथंतरंअभित्वाशू
रनोनुम॥अभित्वाशूराभित्वापूर्वपीतयइतिस्तोत्रियानुरूपौरथंतरस्येतिकल्पेउक्तं।बृहत्त्वामि प्रगाथे
द्धिहवामहेत्वामिद्धिहवामहेत्वंह्येहिचेरवइतिबृहतइतिकल्पे।वामदेव्यं।वामदेव्यंकयानश्चित्रआ ४
भुवत्।वामदेव्यंमैत्रावरुणस्यकयानश्चित्रइतिकल्पे।रथंतरंबृहच्चपुनरादायंककुभारंछत्वापं २९५
त्राप्युनरादीयतेतत्पुनरादायं।ककुभंछत्वाइतिककुभारंछत्वात्मकंप्रगाथंविहारमार्गेणतिस्र
त्रचःकृत्वापगेत्।अभित्वातिस्रःषःईशानमिंद्रतस्थुषोनत्वावांअन्योदिव्यानपार्थिवः।नजातोनजनि

ष्यते॥२नजातोनजनिष्यतेश्वायंतोमघवन्निंद्रवाजिनः।गव्यंतस्त्वाहवामहे॥३इतिरथंतरं।त्वामिद्धि
हवाभ्स्ववंतः१त्वांकाष्ठास्ववंतःसत्वंनश्चित्रवज्रहस्तधृष्णुया।महस्तवानोअद्रिवः॥२महस्तवानोअ
वो३ द्रिगामश्वंरथ्यमिंद्रसंकिर।सत्रावाजंनजिग्युषे॥इतिबृहत्।कयानश्चित्रआभुवत्इत्यालता स्ति
स्त्रस्त्रचः।द्वादशाक्षरचरणाभावादत्रविहारोन।सतिहिद्वादशाक्षरेककुभंदःकर्तुंशक्यं।म
ध्यमश्चेत्ककुबितिउक्तत्वात्।एवंएकागायत्री।रथंतरस्यत्रयः॥३बृहतस्त्रयः॥३वामदेव्यस्यत्र तिस्र
यः॥३एवंदशानवंतीत्यर्थः।इतिकरणंदशेत्यस्यव्याख्यापनार्थंएतासांऋषिदेवतछंदांसि
वास्तोष्पतीयेकर्मण्युक्तानिज्ञेयानि॥७॥बृहद्रथंतरेदशैताःसंपादिताभवंति।बृहद्रथंतरेबृह
द्रथंतरेपृष्ठेयज्ञेअग्निष्टोमादिकेएताऋचःसंपादिताःसपन्नाभवंति॥८॥दशादशिनीवि

तिस्रः४ तिस्रः४

रालित्येतद्ब्राह्मणं। अर्थवादोऽयं। दशेति कस्मात्। विराड्दशिनी दशाक्षरपादयुक्ता भवतीत्ये
तद्ब्राह्मणं। विराट्छंदः। तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागतानामिति संज्ञा इत्यनुक्र
मण्योक्तत्वात्। २ इति दशर्चात्मकं शांतिपात्रे शांतिपाठं कृत्वा ततः॥८॥ तृतीयः खंडः॥ अदब्धं मन
इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीरिति सवितारमीक्षंते। साचार्याः शिष्याश्च दब्धं
मन इत्यास्य हिंसीरित्यंतेन मंत्रेण सवितारं सूर्यमीक्षंते पश्यंति।८। युवं सुराममित्येका स्वस्ति
नः पथ्यास्विति चेति सूत्र इति महाव्रतस्य। युवं सुराममित्येकानुष्टुप् स्वस्ति नः पथ्यासु इति तिस्रश्च
चत्वार्याः श्रावयित्वा महाव्रतं श्रावयेत्। सुकीर्तिरश्विनावनुष्टुप्। युवं सुराममश्विना त्रयो गा २०६
यो विश्वेदेवास्त्रिष्टुप् स्वस्ति नः पथ्यासु धन्वसु ३ र २। प्रजापतिर्वै संवत्सरस्तस्यैष आत्मा यन्महा

व्रतमित्यध्यायद्वयं श्रावयित्वा प्रणवादिकया न इत्यंतं श्रावयित्वा वक्ष्यमाणामुत्तरां शांतिं कृत्वा प
श्चाद्यं कर्म समापनीयं। अयं च विशेषः। इति महाव्रतस्य। व्रातिकस्य व्रतेस्येत्यर्थः॥८॥ शाक्वरीणां तु
पूर्वी तु शब्दः पूर्वोक्तानुकर्षणार्थः। अदब्धं मन इति सूर्यावेक्षणं कृत्वा युवं सुरामं स्वस्ति न इत्यादि क्र
येण शाक्वरीणां व्रातप्रत्यस्मा इत्यतः पूर्वं प्रथमतो भवति॥८॥ प्रत्यस्मै पिपीषते योऽरपि वोरयिंतम
स्त्य उ वो अप्रहरणमिति त्र्यर्चं प्रत्यस्मा अस्मा इदं धस इत्येवाहासि वीरयुर्वेत्यन्ते ततः शाक्वरीणां
प्रत्यस्मा इत्याद्या स्वयुक्त्वा न वशवः अस्मा अस्मा इदित्येका एवं दश। अस्मा अस्मा इत्यत्र एवा
पि॰२ ह्यसि वीरयुरिवा स्तंभं श्रावयेत्। ततोऽनुवाचनधर्मेण वाग्यमयुक्ता योऽल्ली षिणमाणवकाय म
हानाम्नीः विदा मघवन्निति नवक्च पाठयेत्। एवाहे रवेत्यादि पंच पुरीषपदानि च श्रावयेत्॥

उदितआदित्येनुवाचनधर्मेणवाग्यतायोक्तीधीरेणवाहमहानाम्नीषुवैषनियमइतिपूर्वमुक्त
त्वात्।महानाम्नीतिसंज्ञानवर्चामेवा।एवाह्येवेत्यादिपंचपदानोपुरीषसंज्ञोक्तत्वात्नवेव।अनितः
पश्चादपिप्रत्यस्माइत्यादिदशश्रावयित्वोंकारश्चतस्रोव्याहृतयोगायत्र्यभित्वाशूरत्वामिदि
कयानइतिआवृयेत्।एवमपितःशाक्करीणांभवति।अथोत्तरेषुप्रकरणेषुस्वाध्यायमेवकुर्वी
तआचार्यस्येतरःशृणोतीतिपूर्वमुक्तत्वात्श्रावणमेवशिष्याणांनपाठनंएवंभवति।अदब्ध
मनइतिसूर्यीवेदृशं।।युवंसुराममित्येका।।१स्वस्तिनःपथ्यासुवितितिस्रः।३भरद्वाजइंद्रोनुष्टुप्।प्र
त्यस्मैपिपीषतेइत्येषां४गौरिवीतिरिंद्रोनुष्टुप्।योरयिवोरयिंतमः३।शंयुरिंद्रोनुष्टुप्।त्यमुवोअप्रहणं३ २९७
भरद्वाजइंद्रोबृहती।अस्माअस्माइदंधसः।श्रुतकक्षःसुकक्षोवेंद्रोगायत्री।एवाह्यसिवीरयुः।।२।।

इतिवा।।विश्वामित्रइंद्रएकःप्रजापतिस्त्रिष्टुप्।।विद्यमघवन्विदाः।।९।।ततःपंचपदादि।एवाह्ये
वेत्यादिसमाप्तिपर्यंतं।पुनःप्रत्यस्माइत्यादिदशश्रावयित्वोंकारादिकयानइत्यंतंजपेत्।इति
शाक्करं।।८।।अथोपनिषदां।अथशाक्करादिकथनानंतरंउपनिषदांव्रतानांविशेषोवक्ष्यतइतिवा
क्यशेषः।इदमपिसंवत्सरेपूर्णेभवति।शाक्करंनुसंवत्सरंव्रातिकमौपषदंचेतिपूर्वमुक्तत्वात्।अयंच
विशेषः।पूर्वेसंवत्सरेउक्तविधिनोद्दीक्षणिकांकृत्वाततःप्रभातेउपनयनवत्सर्वांतन्ममव्रतइ
त्यत्रसांवत्सरिकस्यौपनिषदोब्रह्मचर्यस्यदेवदत्तेत्यादिव्रातिकवत्सर्वं।एवंमहाव्रतस्य।महाव्रत ७।।
स्यव्रातिकस्ययापूर्वोक्तापरिभाषाप्रणवाद्यारभ्यादंममइत्यादिकाचसा।एवंऔपनिषदिभवती
त्यर्थः।।८।।संहितानांतुपूर्वमृतंवदिष्यामिसत्यंवदिष्यामीतिविशेषः।उराद्योमहाव्रतानितिदेशासूत्र

नार्थः॥संहितानांअथातःसंहितायाइत्यादीनांपूर्वंप्रथमतःऋतंवदिष्यामिसत्यंवदिष्यामीत्यार
भ्यव्योमसंदधातीत्यंतंश्रावयेदितिविशेषोज्ञेयः॥अयमर्थः॥अदब्धंमनइतिसूर्योवैदक्षिणात्वंयुवं
सुरामित्यष्टकचतुष्टयंश्रावयित्वाविशेषेहवाइत्यध्यायचतुष्टयंश्रावयेत्ततःऋतंवदिष्यामिइति
खंउंश्रावयित्वाअथातःसंहितायाइत्यारभ्याध्यायद्वयंश्रावयेदित्यर्थः॥ततःअथमंथस्यतत्सवितु
र्वृणीमहेतत्सवितुर्वरेण्यमितिपूर्वेवा॥अथानंतरंमंथस्यमंथाख्यस्ययोहवाइत्यारभ्ययावत्समा
प्तिपर्यंतंअध्येतव्यस्यद्वेएतेतच्चोपूर्वेपूर्वेश्रावयेत्॥द्वितीयार्थेसंप्रमर्गौचकारोविशेषार्थः॥इतिवि
शेषोज्ञेयः॥श्यावाश्वःसवितागायत्री॥तत्सवितुर्वृणीमहे॥तत्सवितुरित्यस्याःप्रागुक्तानि॥तत्सवितु २९८
र्वरेण्यंतत्र॥४॥अदब्धंमनइत्याधिकारिकाःशांतयस्ततः॥ततःऋतंवदिष्यामितत्सवितुरित्यादिश्रा

धें३

वरेण्यानंतरंअदब्धंमनइतिश्रावयेत्तद्वयोरप्यनंतरं॥इतिप्रकारेणऋतंवदिष्यामितथातत्सवितु
रितिश्राधिकारिकाःअधिकारेनवाःशांतयोज्ञेयाइत्यर्थः॥निर्वाधिकारख्यापनार्थमेतदुक्तं॥इत्यु
पनिषदि॥ठ॥इत्याह्निकैइतिपूर्वोक्तंसर्वंआह्निकंअनुष्ठानंविजानीयात्॥ठ॥अथोत्थानकालेपठे
घ्यपापं॥अथानंतरंउत्थानकालेउत्थानसमयेपापंशरीरसंबंधिमलादिअध्ययनेनापठ्यदूरीकृ
त्यततः॥ठ॥नित्यांशांतिंकृत्वा॥नित्यांपूर्वोक्तांॐकारोमहाव्याहृतइत्यादिशांतिंकृत्वाततः॥ठ॥उदिते ५
ष्वर्कियेदधइत्यादित्यमीक्षंतेसाचार्याःशिष्याःउदितेष्वर्कियंदधइत्यनेनमंत्रेणआदित्यंसूर्यंई
क्षंतेपठंति॥ठ॥चतुर्थःखंडः॥४॥तमहमात्मनीत्यात्मानमभिनिहितंनिहितं॥दधेईक्षंतेइत्युक्तवं
ते॥तमहमात्मनिदधइत्यनेनमंत्रेणस्वकीयआत्मनिआत्मानंसूर्यंअभिनिहितेस्थापितंईक्षंते॥

त्रिरीक्षितं तं पूर्वोक्तं उदितइतिमंत्रं पठित्वा हि पुनः इमं मंत्रं च पठित्वा सूर्यं आत्मानं त्रिः ईक्षेरन् सर्वे मंत्रावृ
त्त्या पृथक्पृथक्॥ ८॥ उपमा श्रीर्जुषतामुपयशो नु मा श्रीर्जुषतामनुयशाः इमं मंत्रं साचार्याः शिष्या ज
पंति अविशेषात्॥ ९॥ सेंद्रः सगणः सबलः सयशाः सवीर्य उत्तिष्ठानीत्युत्तिष्ठंति। सेंद्र उत्तिष्ठानीत्यं तं मं इत्यादि
त्रं प्रत्येकं जपित्वा साचार्याः शिष्या उत्तिष्ठंति॥ १०॥ श्रीर्मा उत्तिष्ठंतु यशो मा उत्तिष्ठ त्विषुन्काय। श्रीर्मेत्या
तत्रैव ५ रन्योत्तिष्ठत्वित्यं तेन मंत्रेण साचार्याः शिष्या उत्कायंते ततः॥ ११॥ इदमहं द्विषंतं भ्रातृव्यं पाप्मानं मलं दूमी
वापधुनोमीति वस्त्रांतमवधूय। इदमित्यारभ्य धुनोमीत्यं तेन मंत्रेण वस्त्रांतं उत्तरीयांतं अवधूयकं
पयित्वा दकस्पर्शः अभिचाराद्या अत्र सुरंचाभिचारिकमित्युक्तत्वात्॥ १२॥ अपप्राच इति सूक्तमिंद्रस्य मर
लयातिनइतिद्वे यतइंद्र नयामहइत्येका आ सइन्द्रो महाँ असीति प्राचीस्वस्तिदाइतिदक्षिणां दक्षिणा

अपेयुरिति शेषः॥५

वृतो विरक्षइति प्रतीचीं विनइंद्रेत्युदीचीं सव्यावृतोपेंद्रेति दक्षिणावृतो दिवमुदीक्षंते॥ १३॥ यं रमः
खंड॥ ॥ सविता पश्चातात्तच्चक्षुरित्यादित्यमुपस्थाय॥ अपप्राच इति समस्तं सूक्तं इंद्रस्येति द्वेत्यृचो॥ य
तइंद्रेत्येका त्र्यृचः एतां दशर्चं जपित्वा ततः आ स इत्येतिस्त्वा प्राचीं दिशं उदीक्षंते साचार्याः शि
ष्याः स्वस्तिदा इत्यनया दक्षिणां दिशमुदीक्षंते दक्षिणावृतो दक्षिणावर्तधर्मयुक्ताः ततो विरक्ष इ
त्यनया प्रतीचीं दिशमुदीक्षंते ततो सव्यावृतः सव्यावर्तधर्मयुक्ता विनइंद्रेत्यनया उदीचीं दिशमुदीक्षं
१११३ ते। ततो दक्षिणावृतो दक्षिणावर्तधर्मेणापेंद्रेत्यनया दिवमुदीक्षंते पश्यंति। उदीक्षंत इति प्रत्येकमभिसंब
ध्यते। ततः सविता पश्चातादित्यनया तच्चक्षुरित्यनेन चादित्यं सूर्यमुपस्थाय उपस्थानं कृत्वा। सूक्तानि त्रि
ष्टुब् अश्विनो तृतीया चतुर्थ्यावनुष्टुभौ अपप्राच इंद्र विश्वामित्र आद्य ३ इत्सम द इंद्रो गायत्री। इंद्रस्य मल

यातिनःशायतइंद्रेत्यस्या अध्यायानुक्रमानि।यतइंद्रभयामहेशंआसइक्केतिपंचानामध्यायानुक्रमानि।
त्रासइक्कामहोंअसि पा।सुत्राःसवितात्रिष्टुप्।सवितापश्चातात्सवितापुरस्तात्॥वसिष्ठःसूर्यःपुरउ
ष्णिक्।तच्चक्षुर्देवहितं॥ ॥व्यावर्तमानाश्चप्रत्यायंत्युपविशंति।ततःसाचार्याःशिष्याव्यावर्तमानाः
परावर्त्तनधर्मयुक्ताःशांत्युदकपात्रनिकटेप्रत्यायंतिप्रत्यागमनंकुर्वंति।तत्रैवोपविशंतिचा॥ ॥य
थापःशांताइतिशांतिपात्रादपआदायततःसाचार्याःशिष्यास्तस्मिन्पात्रेहस्तान्निक्षिप्ययथापःशां
ताइतिमंत्रेणशांतिपात्रादपउदकान्यादायगृहीत्वाततः॥ ॥पृथिव्यामवनिनीय॥ ॥तदुदकं ३००
पृथिव्यामवनिनीयप्रापयित्वाततः॥ ॥यथापृथिवीत्यस्यानिकर्षंति।यथापृथिवीत्यनेनमंत्रे
णअपसपतितोदकस्यअभिकर्षंतिअंशेनयंतीत्यर्थःसर्वे॥ ॥एवंमयिश्राम्यत्वितिदक्षिणांसे

निर्लिपंति।एवंमयिश्राम्यतुइतिमंत्रेणस्वकीयेस्वकीयेदक्षिणेअंसेस्कंधेनिर्लिपंतितदुदकंस
र्वेशिष्याः॥ ॥एवंद्वितीयमेवंतृतीयं।शांतिपात्रादपआदायेत्यादिलेपनांतंएवंद्वितीयं।एवमेवतृ
तीयं॥ ॥कांडात्कांडात्संभवसिकांडात्कांडात्प्ररोहसि।शिवानःशालेभवेतिदूर्वाकांडमादायमूर्द्ध
निकृत्वाशिष्याःशांतिपात्रस्थंदूर्वाकांडंआदायगृहीत्वाकांडात्कांडादित्यारभ्यभवेत्यंतेनमंत्रेणततः
दूर्वाकांडंस्वेस्वेमूर्द्धनिशिरसिकृत्वाततः॥ ॥अग्निस्तृप्यतु।वायुस्तृप्यतुसूर्यस्तृप्यतुविष्णुस्तृप्यतु
प्रजापतिस्तृप्यतुविरूपाक्षस्तृप्यतुसहस्राक्षस्तृप्यतुसर्वभूतानितृप्यंत्विति।ततःशिष्याअनवसा
नंकुर्वंतःसव्यधर्मेणअग्निस्तृप्यत्वित्यादिनाकुशेषुदक्षिणंजान्वाच्यदेवतर्पणंकुर्युः।दक्षिणेनना
मुनाकम्पमूलेकुशानकृत्वानितिपूर्वमुक्त्वा॥ ॥सुमंतुजैमिनिवैशंपायनपैलाद्याचार्याः।ततो

त्ये

पसव्यधर्मेणसुमंतुरिकोंजलिः।जैमिनिर्याघुदेवोनवैकोंजलिः।इत्यंजलिद्वयंतर्पयतुश्चाद्वरदितंवि
धेयं।अनुक्तत्वात्।अथप्राचीनावीतीतिखंडोक्तत्वात्अपसव्यधर्मः।छ।पितृन्त्वात्मिकानृ।त
तआत्मीयान्स्वकीयान्पितृन्पितृपितामहप्रपितामहान्प्रतिप्रत्येकंतर्पयेत्।अनुक्त्वा।दिकै
कोंजलिः।ततोमातामहानांपितरोयत्रपूज्यंतेतत्रमातामहाअपीतुक्तत्वात्।पितृवंशास्तृप्यंतुमा
तृवंशास्तृप्यंतुइत्यंजलिद्वयं।छ।समुद्रंवइत्यपोनिनीयात्समुद्रंवइत्यारभ्यधनमित्यंतेनसूत्रोक्तेन
मंत्रेणतदुदकशेषंप्राक्समुद्रंवानिनीयसंनिनीय।।प्राचीनिर्नीयोदीचीर्वेतिसूत्रेपूर्णपात्रेशे
षप्रतिपत्तिविधानात्।समुद्रंवःप्रहिणोमिश।छ।वामदेव्यंजपित्वाकयानश्चित्रइतिऋत्र्यंवामदे ३०
वदृष्टंजपित्वा।वामदेव्यंमंत्रावरुणस्यकयानश्चित्रइतिसूत्रेसूचितत्वात्।छ।यथाकामंविप्रतिष्ठं

ते।यथाकामंयथेष्टंतेशिष्याःसर्वेविप्रतिष्ठंतेगच्छंति।यथागमप्रशास्तुतिस्मृतिविनवादस्व
क्रांतमानादविवादप्रतिष्ठादनयंसंभवेनोअस्तु।नमोस्तुदेवर्षिपितृमनुष्येभ्यः।शिवमा
युर्वपुरनामयंशांतिमरिष्टिमक्षितिमोजस्तेजोयशोबलंब्रह्मवर्चसंकीर्तिमायुःप्रजांपशून्
मोनमस्कृतावर्द्धयंतुदुष्कृतादुरुपयुक्तान्न्यूनाधिकाचसर्वस्मात्।स्वस्तिदेवर्षिभ्यश्चब्रह्मसत्यं
चपातुमामिति।ब्रह्मसत्यंचपातुमामिति।यथागमेत्यादिभिश्चतुर्भिर्मंत्रैस्तद्भूमिस्थमुदकंअनु
मंत्रयंते।शिष्यास्तथादेवानांचोपस्थानंकुर्युः।अत्रानुमंत्रणमालोकनं।कविदालोकयन्नपी
तिकात्यायनोक्तत्वात्।ततस्तद्दिनेउपवेशनंनकार्यंसर्वैःशिष्यैः।अहःशेषंस्थानमुपवासश्चे
तिपूर्वमुक्तत्वात्।ततःउष्णीषंनाजनंदक्षिणांगांदद्यात्।चार्यायशिष्याःप्रत्येकं।उष्णीषंनाजनंद

क्षिणांगांददातीत्युक्तत्वात्।आचार्यश्चत्वंतंब्रह्मणस्पतेउच्चादिवीतिमंत्राभ्यांप्रणवेनवाउष्णी
षादिकंप्रतिगृह्णाति।ततःउपवीतंदंडंमेखलांकृष्णाजिनंचनहितेऋतमित्यृचाप्रणवेनवा
दकेषुनिक्षिपेत्पूर्ववत्तथोक्तत्वात्।अत्रशांकरादीनामंतेयासुदेवतासुदत्ताःशिष्याःस्तेभ्योवै
श्वदेवश्चरुःकार्यइतिमांडूकेयमतंमांडूकेयमतादिकल्पः।अत्रहैकेवैश्वदेवंचरुंकुर्वतेसर्वे
षुप्रकरणेषुयथापरीक्षमितिमांडूकेयइतिपूर्वमुक्तत्वात्।अपराह्णेकृतस्नानानांनिष्क्रमणादि
पूर्ववद्धोमोलौकिकाग्नौ।इत्येवमत्रानुक्तंसर्वंपूर्वस्मात्प्रकरणादूहनीयं।ततःसमावर्तनं।द्वि ३०२
रभ्यासोध्यायसमाप्तिसूचनार्थोमंगलार्थोवा।नमोस्तुदेवर्षीत्यादौनमःशब्दःस्वस्तिदेवर्षि
भ्यइत्यत्रस्वस्तिशब्दोग्रंथांतेमंगलद्योतनार्थःसर्वेषामध्येतॄणां।ग्रंथादौग्रंथांतेग्रंथमध्येच

मंगलाचरणंविधेयमितिशिष्टाचारात्॥६॥इतिषष्ठःखंडः॥ ॥१॥इतिश्रीमत्सकलविद्व
ज्जनमंडलीमंडनद्विवेदिश्रीश्रीपतितत्सुतद्विवेदिश्रीकृष्णजीततनयनारायणविरचितेगृ
ह्यप्रदीपकेभाष्येषष्ठोध्यायःसमाप्तः॥ ॥समाप्तंचेदंगृह्यप्रदीपकंनामभाष्यं।वर्षेनंदकरर्तु
चंद्रसमितेमाघेसितेपक्षकेषष्ठ्यांसौरिदिनेपराह्णसमयेत्वाष्ट्रेचनक्षत्रके।मार्तंडेमकरस्थि
तेघटगतेचंद्रेद्विषेलग्नकेकाश्यपेनविनिर्मिताकृतिरियंभूयाज्जगन्मोहिनी॥१॥देशेगूर्जरसं
ज्ञकेसुखकरेश्रीपाटलाख्यापुरीतस्यांवेदविचारचंचुरमतिश्चंडांशुनामाद्विजः।आसीन्नागरभू
षणंक्षितितलेश्रीरामनक्रंकृतीयत्तेजःकमलापतेरिवसमंवृत्तंमहद्वैरिव॥२॥तस्यात्सुदिबुधे
श्वरेणसदृशःसूनुःकृतीवामनःसम्राड्वैदिकभूषणःसुरगुरुप्रख्यःकृपासागरः।दृष्ट्वामुञ्जलनामि

१६२९

तंकुलमिदंयाज्यस्यकन्यांतुयोवैदर्भेनगरेस्तुवाहविधिनाद्दृष्टंपुनःसंततिं॥३॥आदित्यादिसुनावसि
ष्ठसद्दृशास्तस्याचिरात्सम्भवेज्ञातावेदविशारदौत्रिभुवनेख्यातागुणैरुद्भटाः॥आचारैर्विमलामलेषु रव
सततंदीक्षापरायाज्ञिकाःश्रीरामस्मरणेविशिष्टमनसोयोगाद्विपारंगताः॥४॥आदित्यादनवसु
तोहरिनिजोवेदांगपारंगतोलोकेसौख्यकरोजनार्दनइतिख्यातोगुणैरुग्रधीः॥बाल्याद्धर्मपरःक्रि
यासुकुशलोवृत्तंचकिंवर्ण्यतेयस्याभ्यागतनेनिवासमकरोद्ग्रामोऽथवर्षार्द्धकं॥५॥श्रीरामोनगु
नंदनोनिजसुखेनाशिक्षयद्ब्रह्मवित्वेदांगंपरमंद्ध्मार्गगमनप्रद्योतनंतस्यवै।षण्मासेथगते
प्रयाणसमयेधृत्वास्वकीयांतनुंब्रूहिब्रूहिवरंतवेतिवचसाऽभीष्टंचसंस्मारितः॥६॥वव्रेत्रीन्स्व ३०२
रान्कुलेममकिलोयावेचवेदीतथावेदंसांगमथप्रयाणसमयेदेयंत्वयादर्शनं।यावद्देदमिदंकुलेद्वि

जवटोसंघस्यतेतेखिलंश्रीरामःप्रणयात्तदैवभगवान्दध्रेस्वरूपंमहत्॥७॥पाणौस्वर्णेतरंगिणी
जलभृतंपात्रंदधानंनवंकोदंडंपरशुंदधानमसितंमूर्ध्निजटाधारिणं।भक्ताद्यंसनकादियोगि
सहितंसूर्येंदुकोटिप्रभंश्रीरामंरघुवंशभूषणमथोदृष्ट्वासचक्रेनतिं॥८॥जातस्तस्यसुतोमहेश्व
रनिजःश्रीनीलकंठाभिधोयेनब्रह्मविदाक्रमादिनवधाविद्याप्रकाराद्विजातु।तैलंगादधिगम्य २४
तूर्णमवनीदेवेषुविस्तारिताःसोंतेप्रापपरात्परांरविपुरेगंगोद्भवेसद्गतिं॥९॥तस्यात्मतनयोम
हेशानिरतोभानुःकृपासागरःश्रीमान्भूसुरमंडनःक्षितितलेविद्यानिवासास्पदः।वेदार्थैकनिधिः
क्रियासुकुशलोवृत्तेचवैयासकिःसोंतेप्राप्यपुरींशिवस्यमहतोमोक्षंजगामाक्षरं॥१०॥तस्मात्तात
नयौविगीतयशसौख्यातौगुणैःसर्वतोवेदाब्धेःपरपारगौसुविदितौदेशेविदेशेपितौ।आचारैर्वि

मल्लोपराविहजगन्नाथे विलोके सुतोऽन्वैंष श्रीजयदेव इत्यपि परो वंशास्य नृपास्पदं ॥२॥ ज्येष्ठाहे
कुलभूषणं समभवच्छ्रीश्रीपतिः श्रीपती रूपेणाप्रतिमो रमेवात्मजकेः विद्यासमूहान्वितः स्वधुना
मृतत्तोयपानरसिको नृदेवपूजापरो मुक्तिं प्राप महेश्वरस्य निकटे पुर्या हरस्योत्तरां ॥ [illegible] स्तस्तस्य
सुतो जितेंद्रियवयो लक्ष्मीपतिः सेवको मीमांसार्थविचारचंचुरमतिर्वैतानकर्माश्रय [illegible] गानीयोदि
गुणैर्विभूषिततनुर्बुध्या समानो गुरोस्तीर्थप्राप परां गतिं शिवपुरे जन्मोः सुतायाः स्रजा ॥४॥ नाराय
णेन कृतिना तत्तनूजेन निर्मितं । सांख्यायनस्य गृह्यस्य भाष्यं गृह्यप्रदीपकं ॥५॥ कृतेनानेन ग्रंथेन
विश्वरूपी सदाश्रयः । यतः परतरो देवो नृसिंहः प्रीयतां मम ॥६॥ श्रीश्रीनृसिंहायनमः ॥ ॥संवत
१७०८ समये चैत्रकृष्णाद्वितीयायां बुधेकारव्यां लिखितमिदं पुस्तकं ॥ ॥श्रीरस्तु शुभं भवतु ॥ ॥ ॥ ३०४

शु। श्री वैकुंठस्येदं संग्रह्य भाष्यपुस्तकं द। गणेशजी विभागे। सं. १७४२।
द्विवेदी रामनाथ क्षत्तुल लल्लदेव रूपता के सही॥ पत्र ३०४ [illegible]